THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY

OU_184506

UNIVERSAL
LIBRARY

OUP—391—29-4-72—10,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S82 N97A Accession No. PG S82

Author मुरारिमिश्र

Title अनर्घराघवम् · 1936.

This book should be returned on or before the date last marked below.

ANARGHARAGHAVA

(A DRAMA IN SEVEN ACTS)

BY

MURARI-MISHRA.

WITH A FULL COMMENTARY

BY

Pandit-Kulapati Jibananda Vidyasagara, B.A.

EDITED AND PUBLISHED BY

PANDIT ASHU BODH BIDYABHUSHANA

AND

PANDIT NITYA BODH BIDYARATNA.

THIRD EDITION.

CALCUTTA.

PRINTED AT THE VACHASPATYA PRESS.

1936.

All rights reserved.

Price 2-8 As.

To be had of :—

Pandit-Kulapati Jibananda Vidyasagara B.A.
Superintendent, Free Sanskrit College.
No. 2, Ramanath Majumdar Street,
Amherst-Street P.O., Calcutta.

अनर्घराघवम् ।

महाकविश्रीमुरारिमिश्रविरचितं सप्ताङ्कनाटकम् ।

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण विरचितया

टीकया समलङ्कृतम् ।

तदात्मजाभ्यां श्रीआशुबोध-विद्याभूषण तथा

श्रीनित्यबोध-विद्यारत्नाभ्यां

प्रतिसंस्कृत्य च प्रकाशितम् ।

तृतीयसंस्करणम् ।

कलिकातामहानगर्य्याम्,

वाचस्पत्ययन्त्रे मुद्रितम् ।

सं १८३६ ।

सर्वं स्वत्वं संरक्षितम् ।

मूल्यं सार्द्धरूप्यकद्वयम् ।

प्रकाशक— { पण्डित-श्रीआशुबोध-विद्याभूषण
तथा
पण्डित-श्रीनित्यबोध-विद्यारत्न।

प्राप्तिस्थान— { २न०, रमानाथ मजुमदार ष्ट्रीट्
आल्बार्ट ष्ट्रीट् पोष्ट-अफिस, कलिकाता।

प्रिण्टर—वि, वि, मुखर्जी।

२ न०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता।

अनर्घराघवम ।

प्रथमोऽङ्कः ।

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः
कोकप्रीति-चकोरपारणपटुज्योतिष्मती लोचने ।
याभ्यामर्द्धविबोधमुग्धमधुरश्रीरर्द्धनिद्रायितो
नाभीपल्वलपुण्डरीकमुकुलः कम्बोः सपत्नीकृतः ॥ १॥

यस्यारम्भ प्रारिप्सितपरिसमाप्तिकामो ग्रन्थकृत विघ्नोत्कटवस्तूपासनरूप मङ्गलं नान्दीव्याजेनाचरति, निष्प्रत्यूहमिति ।—निष्प्रत्यूह प्रत्यूहस्य विघ्नस्य, अभाव, निष्प्रत्यूहं निर्विघ्नं, तस्मै विघ्नाभावायेत्यर्थः, कौमोदकीलक्ष्मणः कौमोदक्याख्य-निजगदाचिह्नस्य, मदाधरस्यात यावत्, भगवतः विष्णो, कोकस्य चक्रवाकस्य, प्रीतिः आनन्दः, चकोरस्य पक्षिविशेषस्य, पारणम उपवासान्तभोजन, पिपासानिवारणार्थं पाननिति भाव., तयोः पटुनी समर्थे, उपयोगिनी इति यावत, ये ज्योतिषी तेजसी, सूर्य चन्द्ररूपे इति यावत्, ते विद्येते ययोः तथोक्ते, चक्रवाकस्य दिवसे स्त्रिया अविरह इति तदानन्दप्रयोगी सूर्यः, तथा चकोरस्य रजन्या चन्द्रिकापाने परितृप्तिरिति तत्पारणोपयोगी चन्द्र इति ध्वनितमिति भावः, लोचने नेत्रे, उपास्महे आराधयामः ; याभ्या लोचनाभ्या, नाभी पल्वलमिव अल्प सर इव, "पल्वलञ्चाल्प-सर:" इत्यमरः, नाभेर्गभीरत्वात् सरःसाम्यम्, तत्र यत् पुण्डरीकं श्वेताम्भोजं, "पुण्डरीकं सिताम्भोजम्" इत्यमरः, तस्य मुकुलः अर्द्धविकसिता कलिका, अर्द्ध-विबोधेन अर्द्धप्रकाशेन,सूर्य्यरूपलोचनप्रभायोगादिति भावः, मुग्धमधुरा अति मनोहारिणी, श्रीः शोभा यस्य तथोक्तः, तथा अर्द्धनिद्रायितः अर्द्धाङ्गे निद्रा गतः, अपरार्द्धस्य विकासाभावेन निमीलित इति यावत्, चन्द्ररूपलोचनप्रभायोगादिति भावः, सूर्योदये पुण्डरीकविकासस्य चन्द्रोदये च तन्निमीलनस्य कविसमयसिद्धत्वादिति भावः, अत एव कम्बोः शङ्खस्य, "शङ्ख स्यात कम्बुरस्त्रियाम" इत्यमरः, सपत्नीकृतः विपक्षीकृतः, "रिपौ वैरिसपत्नारि द्विषद्विषदरिद्विषः। द्विट्विपक्ष—" इत्यमरः ;

अपि च—

विरमति महाकल्पे नाभीपद्मैकनिकेतन-
स्त्रिभुवनपुरः शिल्पी यस्य प्रतिक्षणमात्मभूः।
किमधिकरणा ? कीदृक् ? कस्य व्यवस्थितिः ? इत्यसा-
वुदरमविशद्द्रष्टुं तस्मै जगन्निधये नमः ॥ २ ॥

(नान्द्यन्ते) (क)

सुगुप्तमङ्गुल्या एकपृष्ठं यथा विहतम्, अपरपृष्ठञ्च सहत. पुण्डरीकमुकुलोऽपि तथा एकाग्रस्य विहतत्वात् अपराग्रस्य च सहतत्वात् साहश्येन अङ्ग स्पर्शक्रिय इव अवस्थित इति भाव' । भगवत्स्मरणादिकमपदाय खींचनोपासन यत्प्रकृति तदीयमुभद्दृष्टि-पातनार्थमिति द्रष्टव्यम। उपमाऽलङ्कार:। तदुक्त दर्पणे—"साम्य वाच्यमवैधर्म्ये वाक्यैक्ये उपमा द्वयो" इति। शार्दूलविक्रीडितं लक्षणं तु—"सूर्याश्वैर्यदि मः सजौ स-त ग्राः शार्दूलविक्रीडितम्" इति तल्लक्षणात ॥ १ ॥

विरमतीति।—महाकल्पे महाप्रलये, विरमति निवर्त्तमाने, अतिक्रामति सतीत्यर्थः, कल्पावसाने पुन सर्गेच्छाकाले इति भाव:, यामी एव पद्या: भगवदुदर-प्रवेशमार्ग इत्यर्थ', नाभिसमुद्भूतपद्मनिति भाव:, स एव एकम् अद्वितीय, निकेतनं निलय: यस्य तथोक्त:, ब्रह्मण: भगवन्नाभिकमलवासस्यत्वादिति भाव:, त्रिभुवनमेव पू: तया त्रिलोकीनगर्या इत्यर्थः, शिल्पी निर्माता, असौ आत्मभू: ब्रह्मा, कस्य पदार्थस्य, कीदृक् व्यवस्थिति' ? व्यवस्था ? सा च किमधिकरणा ? किमाश्रया ? कस्मिन्नाधारे क: पदार्थ: किं-रूपेण व्यवस्थित: ? इति यावत, यद्वा—तथाभूत: आत्मभू: असौ मदधिष्ठानभूता नाभि:, असौ सृष्टिर्वा, किमधिकरणा ? कीदृक् ? कस्य व्यवस्थिति' ? असौ नाभि सृष्टिर्वा किमाश्रित्य वर्त्तते ? कीदृशी ? अत्र कस्य अवस्थितिरित्यर्थः, इति द्रष्टुं प्रतिक्षणं क्षणे क्षणे, मुहर्मुहुरित्यर्थः, यस्य उदरम् अविशत्, जगता निधये क्रीडिष्यसमस्तभुवनायेत्यर्थ., तस्मै नारायणायेति यावत्, नमः। हरिणीलक्षणं तु, "न-स-म-र-स-ला ग्राः षड्वेदैर्यदि हरिणी मता" इति तल्लक्षणात ॥ २ ॥

(क) नान्द्यन्ते इति।—नन्दयति देवादीनिति नान्दी रङ्गविघ्नोपशान्त्यर्थं नटै: क्रियमाणमङ्गलाचरणविशेष:। तदुक्तं दर्पणे—"यन्नाट्यवस्तुन: पूर्वं रङ्गविघ्नोपशान्तये। क्रियतेऽसौ; प्रकुर्वन्ति पूर्वरङ्गं च तत्त्रयम्॥ प्रत्याहारादिवाक्यान्यङ्गान्यस्य भूयांसि यद्यपि। त्रयाऽत्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये॥ आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते। देवद्विजनृपादीना तस्मान्नान्दीति संज्ञिता॥" अनाहतपदा नान्दी। तथा च—

सूत्रधारः। अलमतिविस्तरेण। भो भो लवणोदवेला-वनालीतमालतरुकन्दलस्य त्रिभुवनमौलिमण्डनमहानीलमणेः कमलाकुचकलशकेलिकस्तूरिकापत्राङ्कुरस्य भगवतः पुरुषोत्तमस्य यात्रायामुपस्थानीयाः (ख) सभासदः। कुतश्चित् द्वीपादागतेन कलहकन्दलनाम्ना (ग) कुशीलवेन रौद्रबीभत्सभयानकाद्भुतरसभूयिष्ठं (घ) कमपि प्रबन्धमभिनयता (ङ) नित्यं

"सङ्ख्यासङ्ख्यचन्द्रार्क-कौकवैरवशसिनौ। पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत॥" इति दर्पणकारः।

(ख) भो भोः!, सभासदः। इति उत्तरेणान्वयः। लवणोदेति।—लवणम् उदकं यस्य स लवणोदः लवणसमुद्रः, तस्य वेला तीरभूमिः, "वेला स्यात्तीरभूमौ च" इत्यमरः; तत्र या वनावली वनराजिः, तस्याः यः तमालतरुः तापिञ्छवृक्षः, तस्य कन्दलस्य काण्डभूतस्य, तत्प्रदेशस्थितस्येति भावः यद्वा—कन्दलस्य नवाङ्कुरस्य, अभिनवोद्भिन्न-तमालपल्लवमच्छायस्निग्धश्यामवर्णस्येत्यर्थः, "कन्दलं विषु कपालेऽप्युपरागे नवाङ्कुरे" इति मेदिनी। त्रिभुवनेति।—त्रिभुवनस्य मौलिर्मस्तकं, मस्तकसदृशश्रेष्ठं पुरुषोत्तम-स्येत्यर्थः, तस्य मण्डनाय अलङ्करणाय, महान् नीलमणिः नीलकान्तरत्नं तस्य, तत्सदृशस्येत्यर्थः। कमलेति।—कमलायाः लक्ष्म्याः, कुचौ स्तनौ, कलशाविव कुम्भाविव, तयोः यः केलिः क्रीडनं, हर्षजननव्यापारविशेष इति यावत्, तस्य तदर्थं वा कस्तूरिकापत्राणि मृगनाभिविचित्रपत्राकाररचनाविशेषाः, तेषाम् अङ्कुरस्य प्ररोहस्य, कारणभूतस्येति यावत्, भगवतो विहारार्थमेव तत्कुचरञ्जनादिति भावः। भगवतः ऐश्वर्यादिसर्वशक्तिमतः; तदुक्तम्—"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञान-वैराग्ययोश्चैव षण्णां भग इतीङ्गनः॥" इति। पुरुषोत्तमस्य विष्णोः। यात्रायाम् उत्सवे। उपस्थानीयाः उपस्थिताः, आराधनीया वा। उपपूर्वकात् तिष्ठतेः कर्तरि अनीय-प्रत्ययः।

(ग) कलहकन्दलनाम्ना कलहस्य कन्दलः प्रकाण्डः, नवाङ्कुरो वा, तत्सदृश इत्यर्थः, नाम यस्य तथोक्तेन। "कलहकन्दनाम्ना" इति पाठे—कलहस्य कन्दः मूलं नाम यस्य तथाभूतेन।

(घ) रौद्रेति।—रौद्रः रुद्ररूपः, बीभत्सः विकृतरूपः, भयानकः दारुणरूपः, अद्भुतः आश्चर्यरूपः, ते रसाः भूयिष्ठाः प्रचुराः यत्र तथाविधम्। उक्तञ्च दर्पणे—"रौद्रः

किलायमुद्वेजितो (च) लोकः। तत् कस्यचिदभिमतरसभावभाजः प्रेक्षणकस्य प्रयोगानुज्ञया (छ) नाट्यवेदोपाध्यायबहुरूपान्तेवासी मध्यदेशीयः (ज) सुचरितो नाम भरतपुत्रोऽहमनुगृह्ये (झ)। यतः,—

प्रीतिर्नाम सदस्यानां प्रिया रङ्गोपजीविनः।
जित्वा तदपहर्त्तारमेष प्रत्याहरामि ताम्॥ २॥

क्रोधस्थायिभावो रक्तो रुद्राधिदेवतः। आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्॥ जुगुप्साख्यायिभावस्तु कौणपः कथ्यते रसः। नीलवर्णो महाकाल देवतोऽयमुदाहृतः॥ भयानको भयस्थायि भावः कालाधिदेवतः। अद्भुतो विस्मयस्थायि-भावो गन्धर्व-देवतः॥" इति।

(ङ) प्रबन्ध रचनाविशेष, नाटकमिति यावत्। अभिनयता नाट्येन प्रकटयता।

(च) उद्वेजितः विरक्तीकृतः।

(छ) अभिमतरसभाजः अभिमतं मनोऽनुकूलं, रसं भजते इति तथोक्तस्य मधुररसयुक्तस्य इत्यर्थः। प्रेक्षणकस्य प्रकृष्टम् ईक्षणं दर्शनं, दृश्यवस्तु इति यावत् तस्य यत् वा तत्तस्य, नाटकस्येत्यर्थः। प्रयोगानुज्ञया अभिनयायमनुमत्या।

(ज) नाट्यवेदेति।—नाट्यवेदस्य नाट्यशास्त्रस्य, उपाध्यायः उपदेष्टा, यः बहुरूपः तन्नाम आचार्यविशेषः, तस्य अन्तेवासी शिष्यः। मध्यदेशीयः मध्यदेशभव इत्यर्थः। भरतपुत्रः नटपुत्रः। "भरता इत्यपि नटाः" इति धरणिः।

(झ) अनुगृह्ये अनुगृहीतोऽस्मि।

प्रीतिरिति।—सदस्यानां सभ्यानां, प्रीतिः सन्तोषः, नाम सम्भावनायां, रङ्गं नृत्यव्यापारं ततूर्वं वा, उपजीवति लोकिकत्वेन आश्रयतीति तथोक्तस्य, मनीति शेषः, प्रिया इष्टा, सदस्यप्रीतिरेव मादृशस्य हितायेति भावः; एषः अहं, तस्याः प्रीतेः, अपहर्त्तारं चौरं, विनाशकमिति यावत्, लोकविरञ्जकं पूर्वोक्तं खलदुश्चन्दलाख्यमिति शेषः, जित्वा परिभूय, तां प्रीतिं, प्रत्याहरामि प्रत्यानयामि, पुनस्तान् सदस्यान् प्रीतान् करोमीति यावत्। एतेन सीताहर्त्तारं रावणं जित्वा पुनः रामस्य सीताप्रत्यानयनं ध्वनितम्। अनुष्टुब्वृत्तम्॥ २॥

(आकाशे कर्णं दत्त्वा)। किं ब्रूथ ? "वैदेशिको भवानसमग्रपात्रः, (ज) कथमीदृशे कर्मणि प्रगल्भते ?" (ट) इति। (विहस्य सप्रश्रयम् (ठ) अञ्जलिं बद्ध्वा)। हन्त भोः ! किमेवमुदीर्ष्यते ? (ड) भवद्विधानामाराधनी वृत्तिरेव (ढ) मे पात्राणि समग्रयिष्यति (ण)। यतः,—

यान्ति न्यायप्रवृत्तस्य तिर्य्यञ्चोऽपि सहायताम्।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥ ४ ॥

(पुनराकाशे कर्णं दत्त्वा)। किं ब्रूथ ? "तर्हि प्रहितेयमस्माभिः पत्रिका ?" इति।

(प्रविश्य नटः पत्रिकां ददाति। सूत्रधारो गृहीत्वा वाचयति)।—

"यत्र सर्वपुरुषार्थरहस्यनिःस्यन्दिनि— (त)

(ज) वैदेशिकः विदेशभवः। अत एव असमग्रपात्रः असमग्रम् असम्पूर्णं, पात्रम् अभिनयार्हाभिनेत्र-नेपथ्यादिसामग्रीसमाधानं यस्य तादृशः, देशीयैर्यथा सर्वं सङ्कलयितुं शक्यते, विदेशीयैस्तथा नेति भावः।

(ट) प्रगल्भते स्पर्द्धते।

(ठ) सप्रश्रयं सविनयम्।

(ड) उदीर्ष्यते क्रुध्यते।

(ढ) आराधनी अनुरञ्जनी। वृत्तिः व्यापारः।

(ण) पात्राणि नटादीन्। समग्रयिष्यति सम्पूर्णानि करिष्यति, अभिनेत्र-नेपथ्यादीनामभावं पूरयिष्यतीत्यर्थः।

यान्तीति।—तिर्य्यञ्चोऽपि पशु पक्षिजातीया अपि, न्यायप्रवृत्तस्य सदाचारमनुसरतः इति यावत्, जनस्येति शेषः, सहायताम् अनुकूलतां, यान्ति गच्छन्ति; अपन्थानम् अन्यायमार्गे, गच्छन्तं तु जनं, सोदरः अपि विमुञ्चति त्यजति। एतेन रामस्य वानरसहायत्वं विभीषणेन रावणस्य त्यागश्च ध्वन्यते ॥ ४ ॥

(त) यत्रेति।—सर्वे पुरुषार्थाः धर्मार्थ काम मोक्षाः, तेषां रहस्यं गोपनीयं तत्त्वं, तस्य निःस्यन्दः क्षरणं तद्वतीत्यर्थः। तदुक्तं सङ्गीतकल्पतरौ—"देवर्षिचरितपात्रपूर्व-चरितान्यालोच्य धर्मोदयः तद्वाश्रितभूमिकाऽभिनयने साहर्यसिद्धिः परा।

चेतःशुक्तिकया निपीय शतशः शास्त्रामृतानि क्रमा-
द्दान्तैरक्षरमूर्त्तिभिः सुकविना मुक्ताफलैर्गुम्फिताः।
उन्मीलत्क्रमनीयनायकगुणग्रामोपसंवल्लान-
प्रौढाहङ्कृतयो लुठन्ति सुहृदां कण्ठेषु हारस्रजः॥ ५॥
तस्मै वीराङ्गुतारम्भ-गम्भीरोदात्तवस्तवे।
जगदानन्दकन्दाय सन्दर्भाय त्वरामहे"॥ ६॥

सङ्गीताङ्गतचित्तवृत्तिरतला यस्या भवत्कल्पना ज्ञानं ब्रह्मरसेयमेति कथितं नाट्यं चतुर्वर्गदम॥" इति। यत्र सन्दर्भे।

चेतः इति।—चेतः चित्तमेव, शुक्तिका मुक्तास्फोटः, तया क्रमात् शतशः शतं शतं वारान् इत्यर्थः, बहूनि इत्यर्थो वा, शास्त्राणि उपदेशगर्भाणि आगमानि एव, अमृतानि निपीय सादरं पीत्वा, समाधीत्येति यावत्, दान्तैः उद्भटैः, मुक्ताफलैः मुक्तासदृशम्, अफलम असारवन्तु येषु तथाभूतैः, अक्षराण्येव मूर्त्तयः आकाराः येषां तैः, गद्य पद्यमहेवाक्यैरिति भावः, सुकविना गुम्फिताः विरचिताः, उन्मीलता प्रस्फुरता, क्रमनीयाना हृद्याना, नायकस्य "त्यागी कृती कुलीनः सुधीको रूपयौवनोत्साही। दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता॥" इत्युक्तलक्षणस्य नेतुः, "नायको नेतरि श्रेष्ठे हारमध्यमणावपि" इति विश्वः, गुणानां "शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी। ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः॥" इत्युक्तलक्षणानां गुणानां, यामस्य समुदायस्य, उपसंवल्लानेन सम्बन्धेन, सङ्गावेनेति यावत्, विरचनेनेति भावः, प्रौढा उद्भटा, अहङ्कृतिः रचनोत्कर्षजनिताभिमानः यासु तथाविधाः, हरन्तीति हारा, मनोहारिण्यः, सज्ज इव माला इव, अक्षरमाला इति यावत्, सुहृदां सुष्ठु हृदयङ्गमिनां, सामाजिकानामित्यर्थः, कण्ठेषु लुठन्ति। अन्यान्यपि लौकिकानि गुक्तिकासु बहुशः सामुद्रपानीयं चन्द्रनिःसृतामृतं वा पीत्वा क्रमेण ततो बाल्यानि सुधतुरपुरुषेण गुम्फितानि क्रमनीयमध्यमणियुतानि सूत्रेण ग्रथितानि च सत्पुरुषाणां कण्ठेषु लुठन्तीति द्रष्टव्यम्। मार्दूलविक्रीडितं वृत्तम्॥ ५॥

तस्मै इति।—वीराद्भुतयोः रसयोः, आरम्भेण उद्योगेन, ताडकावध-धनुर्भङ्गादिरूपेणेति भावः, गम्भीरं दुरवगाहं, तथा उदात्तं हृद्यं, प्रियमित्यर्थः, महार्थकं वा, "उदात्तौ दाढ-महतोर्हृद्ये च स्वरभिद्यपि" इति हैमः; वस्तु अभिनेय-

(विलक्ष्य सहर्षस्मितम्) (ब)। मारिष! रामायणमिति शृणोषि तत्रभवतः कविलावतारप्रथमतीर्थस्य (ट) वल्मीकजन्मनो मुनेः सरस्वतीनिर्यासो यशःशरीरम् (ठ) इक्ष्वाकूणाम्?

नटः। अथ किम्।

सूत्रधारः। तत्प्रतिबद्धप्रबन्धानुबन्धिनो परिषदाज्ञा (ड)।

नटः। (विहस्य)। अहो! सकलकविसार्थसाधारणी खल्वियं वाल्मीकीया सुभाषितनीवी (ढ)।

विषयः यत्र तथाभूताय, जगताम् आनन्दस्य कन्दाय मूलभूताय, सन्दर्भाय रचनाविशेषाय, नाटकायेति यावत्, नाटकाभिनयायेति भावः, त्वरामहे सत्वरा भवामः। युग्मम्। अनुष्टुप् वृत्तम् ॥ ६ ॥

(ब) विलक्ष्य विचिन्त्य। सहर्षस्मितं सहर्षं सानन्दं, स्मितं मन्दहासविशेषः यस्मिन् तत् यथा तथा, आहेति अध्याहार्यक्रियाविशेषणम्। स्मितलक्षणमुक्तं यथा—"ईषत् प्रफुल्लितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः। अदृष्टदन्तकुसुमैरुक्तमानं स्मितं भवेत्॥" इति।

(ट) तत्रभवतः पूज्यस्य। "पूज्यस्तत्रभवान्तत्रभवान्" इत्यमरः। कविलेति।—कविलेन काव्यकर्तृत्वेन, अवतारः अवतरणं, प्रादुर्भाव इत्यर्थः, कविलावतारः, तस्य प्रथमः आद्यः, तीर्थः पात्रं, प्रथमं कविलपदवीमारूढस्येत्यर्थः, आदिकवेरिति यावत्।

(ठ) सरस्वतीनिर्यासः वाङ्निस्रवः, वाग्सृतमित्यर्थः। यशःशरीरं कीर्तिरूपं शरीरं, भौतिकन्तु शरीरं क्षीयते इदन्तु न तथेति भावः।

(ड) तदिति।—तेन वाल्मीकिना, प्रतिबद्धः विरचितः, यः प्रबन्धः रामायणमिति यावत्, तदनुबन्धिनो तदनुसारिणो। परिषदाज्ञा सभ्यानामाज्ञा। परिषदा रामायणानुबन्धिना केनचित् प्रबन्धेन वयं श्रोष्णमोया इति आज्ञप्तमिति भावः।

(ढ) सकलेति।—सकलानां कविसार्थानां कविसम्प्रदायानां, साधारणी संवादिनी, सर्वकविसम्मतेत्यर्थः। वाल्मीकीया वाल्मीकिसम्बन्धिनी। सुभाषितनीवी सुष्ठुवाक्यविन्यासमयीत्यर्थः; सुभाषितरूपमूल्यधनमित्यर्थो वा, वाल्मीकिसुभाषितरूपमूल्यधनमुपजीव्य सर्वे कवयः कविपदवीमारोहन्तीति भावः, "नीवी परिपणो मूल्यधनम्" इत्यमरः।

सूत्रधारः । मारिष ! किमुच्यते—

अपि कथममौ रक्षोराजस्तताप जगत्त्रयीम् ?
अपि कथमभूदिक्ष्वाकूणां कुले गरुडध्वजः । ?
अपि कथमृषौ दैव्यो वाचः स्वतः प्रचकाशिरे ?
सुचरितपरीपाकः सर्वः प्रबन्धकृतामयम् ॥ ७ ॥

तत्र तावन्निरूपयामि (फ) रूपकमभिरूपम् (ब) दृष्टश्रुतम् । (मुहूर्तमिव स्थित्वा अवलम्बितेव सोल्लासम्) । अस्ति मौद्गल्यगोत्रसम्भवस्य महाकवेर्भट्टश्रीवर्द्धमाननन्दनस्य (भ) मुरारेः कृतिरभिनवमनर्घराघवं नाम नाटकम् (म) । तत् प्रयुञ्जानाः सामाजिकानुपास्महे (य) । (विचिन्त्य सहर्षम्) । अहो !

अपीति ।—अमौ रक्षोराजः राक्षसेश्वरः रावणः, कथं केन प्रकारेण, केन हेतुना वा, जगत्त्रयीं त्रिलोकीं, ततापः ? सन्तापितवान् ? अपि-वत्र प्रश्नवाचकम् ; इक्ष्वाकूणां कुले गरुडध्वजः विष्णुः, कथं केन हेतुना, अभूत ? अजनि ? ऋषौ वाल्मीकौ, दैव्यः दैवसम्बन्धिन्यः, वाचः गिरः, दैवभाषा इत्यर्थः, कथं केन हेतुना, स्वतः आत्मना, प्रचकाशिरे ? प्रादुर्भूताः ? इत्यर्थः, अयं सर्वः राक्षसराजादिकृत जगत्त्रयसन्तापनादिरूपः, प्रबन्धकृतां काव्यरचयितॄणां, सुचरितस्य सुकृतस्य, परिपाकः परिणामः, परिपच्यते इति परिपाकः फलं वा, कर्मणि घञ् प्रत्ययः, प्रबन्धकृता सुकृतबलेनैव तत्तत् सर्वं चित्ते आविर्भवतीति भावः । उक्तञ्चैतत्—"न-स-ज-र-स-ला ग: षड्वेदैर्छयैर्छरिणी मता" इति तल्लक्षणात् ॥ ७ ॥

(फ) निरूपयामि निर्द्धारयामि ।

(ब) अभिरूपं रसज्ञीयं, सर्वजनप्रियमित्यर्थः, "अभिरूपो बुधे रम्ये" इति मेदिनी ।

(भ) वर्द्धमाननन्दनस्य वर्द्धमानपुत्रस्य । तन्तुमतो नाम काचित् रमण्याः, तस्या नन्दनस्य तद्गर्भजस्य ।

(म) अनर्घः अमूल्यः, राघवो रामः, रामचरितमिति यावत् यत्र तन्नाटकम् ।

(य) तत् नाटकम् । प्रयुञ्जानाः अभिनयन्तः । सामाजिकान् सभ्यान्, सहृदयानिति यावत् । उपास्महे आराधयामः ।

रमणीया खल्वियं सामग्री परिषदाराधनस्य (र)। यतः,—

महर्ग्या रसपाठगीतिगतिषु प्रत्येकमुत्कर्षिणो
मौद्गल्यस्य कवेर्गभीरमधुरोदारा गिरां व्यूतयः।
धीरोदात्तगुणोत्तरो रघुपतिः काव्यार्थबीजं मुनि-
र्वाल्मीकिः फलति स्म यस्य चरितस्तोत्राय दिव्या गिरः॥८॥

अयं तु प्राचेतसोयं कथावस्तु बहुभिः प्रणीतमपि प्रयुञ्जानो नापराध्यति श्रोत्रियपुत्रः (ल)। पश्य—

यदि च्युतं पूर्वैरिति जहति रामस्य चरितं
गुणैरेतावद्भिर्जगति पुनरन्यो जयति कः?

(र) सामग्री उपकरणम्। परिषदाराधनस्य सभ्यसन्तोषविधानस्य।

महर्ग्या इति।—मम वर्ग्या, सम्प्रदायभुक्ता जनाः, प्रत्येकम् एकैकम्, रसपाठः रसयुक्तः पठ्यते इति पाठः सन्दर्भः, सुसंस्कृतरचनाविशेष इत्यर्थः, तस्य गीतिः सङ्गीतं, तस्या गतिषु पद्धतिषु, उत्कर्षिणः उत्कर्षवन्तः, पारदर्शिन इत्यर्थः, मौद्गल्यस्य मौद्गल्यगोत्रसम्भूतस्य, कवेः मुरारेः, गिरां वाचां, व्यूतयः रचनाः, गभीराः अर्थगुरुः, मधुराः मनोहरस्य, उद्गारः उक्तिः यासु तथाभूताः, तथा काव्यार्थस्य नाटकीय-वस्तुनः, बीजं मूलं, मूलभूत इत्यर्थः, रघुपतिः रामः, धीरोदात्तस्य "अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः। स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥" इति दर्पणोक्तलक्षणकस्य नायकभेदस्य, गुणैः अविकत्थनत्वादिभिः, उत्तरः भूयान्, वाल्मीकिः यस्य रघुपतेः, चरितस्तोत्राय चरितकीर्तनाय, दिव्याः संस्कृताः, गिरः वाचः, फलति स्म उत्पादयामास, उद्भावयामासेत्यर्थः। शार्दूलविक्रीडितं वृत्तम्॥ ८॥

(ल) प्राचेतसोय प्रचेताः वरुणः, "प्रचेता वरुणः पाशी" इत्यमरः, तस्यापत्यं पुमान् प्राचेतसः वाल्मीकिः, तस्य इदं तत्सम्बन्धि तत्प्रणीतं वा, कथावस्तु कथारूपनिति-वृत्तं, बहुभिः कालिदास-भवभूत्यादिभिः, प्रणीतमपि विरचितमपि, प्रयुञ्जानः अभिनय-मार्गेण विरचयन्। श्रोत्रियपुत्रः छन्दोज्ञात्राह्मणतनयः, वेदविद्ब्राह्मणश्रोत्रिय इत्यर्थः, "श्रोत्रियच्छान्दसौ समौ" इत्यमरः; न अपराध्यति न दोषमर्हतीत्यर्थः।

यदीति।—पूर्वैः प्राचीनैः पण्डितैः वाल्मीकिप्रभृतिभिः, च्युतं क्षेत्रमीमांसेन

स्वमात्मानं तत्तद्गुणगरिमगम्भीरमधुर-
स्फुरद्वाग्ब्रह्माणः कथमुपकरिष्यन्ति कवयः ? ॥ ९ ॥

उपक्रममाणश्च स कविः स्वनिर्भासशब्दब्रह्माणमाचार्यं प्राचेतसं गिरं च देवतामेवमुपश्लोकितवान् (व)—

तमृषिं मनुष्यलोकप्रवेशविश्रामशाखिनं वाचाम् ।
सुरलोकादवतारप्रान्तरखेदच्छिदं वन्दे ॥ १० ॥

उत्कर्षे, विरचितमिति यावत्, इति हेतोः, रामस्य चरितं, मत्प्रणीतमिति शेषः, यदि जडति त्यजन्ति, लोका इति शेषः, तदा तत्तद्गुणाना "रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा। गुणा माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा ॥" इति दर्पणोक्त-माधुर्यौज-प्रसादादीना, गरिम्णा गुरुत्वेन, गम्भीरं गभीरार्थक, मधुर श्रुतिसुख यथा तथा, स्फुरत् प्रकाशं गच्छत्, वाग्ब्रह्म शब्दरूप ब्रह्म येषा तथाभूताः, कवयः काव्यप्रणेतारः, स्वम आत्मान निजस्वरूपमित्यर्थः, कथं केन प्रकारेण, उपकरिष्यन्ति ? प्रतिपत्तिरूपामुपकृतिं नेष्यन्ति ? नैव नेतुं शक्ष्यन्तीत्यर्थः. कः पुनः कथः, पुनरिति शेषः, जगति एतावद्भिः गुणैः पूर्वोक्तैः काव्यगुणैः, माधुर्यादिगुणवत्काव्यरचनैरित्यर्थः, जयति ? उत्कर्षे लभते ? न कोऽपीत्यर्थः ; तस्मात् रामचरितस्य पूर्वकविभिः सुललेऽपि तथाविधगुणसम्पन्न काव्य समादरणीयमिति तात्पर्यम् । शिखरिणीलक्षणं —"रसैरुद्रैश्छिन्ना य-म-न-स-भ-ला गः शिखरिणी" इति तल्लक्षणात् ॥ ९ ॥

(व) उपक्रममाणः आरभमाणः । स्वनिर्भासेति ।—स्वस्मिन् निर्भासते स्वतः स्फुरतीति तथोक्तं, शब्दब्रह्म यस्य तथाभूतम् । आचार्यं गुरुं, काव्यप्रणेतृत्वादिति भावः । प्राचेतसं वाल्मीकिम् । गिरं देवता वाग्देवीमित्यर्थः । उपश्लोकितवान् श्लोकेन स्तुतवानित्यर्थः ।

तमिति ।—वाचां देववाणीनां, मनुष्यलोके मर्त्यभूमौ, यः प्रवेशः समागमः, तस्मिन् विश्रामशाखी श्रमापहतरुः तं, विश्रामकरणार्थं हतवृक्षमित्यर्थः, तथा सुरलोकात् स्वर्गात्, यः अवतारः अवतरणं, तस्मिन् अवतरणकाले इत्यर्थः, प्रान्तरे मुखवर्त्मनीत्यर्थः, यः खेदः निरवलम्बनतया क्लेशः, तं छिनत्तीति तथोक्तम् आश्रयदानात् तत्क्लेशमपहरन्तमिति यावत्, तं प्रसिद्धम्, ऋषिं वाल्मीकिमित्यर्थः, वन्दे प्रणमामि । आर्या वृत्तम् ॥ १० ॥

धातुश्चतुर्मुखीकण्ठ शृङ्गाटकविहारिणीम्।
नित्यं प्रगल्भवाचालामुपतिष्ठे सरस्वतीम् ॥ ११ ॥

नटः। (सदर्पम्)। भाव! तत् प्रस्तूयताम्। अस्य हि मौद्गल्यानां ब्रह्मर्षीणामन्वयमूर्धन्यस्य (श) मुरारिनामधेयस्य बालवाल्मीकेर्वाङ्मयममृतबिन्दुनिष्यन्दि कन्दलयति (ष) कौतुकं मे।

सूत्रधारः। मारिष! स्थाने (स) भवतः कुतूहलमीदृशमेवैतत्। तथा हि—

तत्ताटङ्कुज्ज्वलककुत्स्थकुलप्रशस्ति-
सौरभ्यनिर्भरगभीरमनोहराणि।

धातुरिति।—धातुः ब्रह्मणः, चतुर्णां मुखानां समाहारः चतुर्मुखो मुखचतुष्टयमित्यर्थः, तस्याः कण्ठाः एव शृङ्गाटकानि चत्वारः पन्थानः, "शृङ्गाटकचतुष्पथे" इत्यमरः, तेषु विहारिणीं सततसञ्चारिणीं, प्रगल्भा च वाचाला च ता समुद्भतवाग्वादिनीमित्यर्थः, सरस्वतीं नित्यं सततम्, उपतिष्ठे सन्तोषाराधयामीत्यर्थः। सन्तोषकरणकोपपूर्वकात्तिष्ठतेरात्मनेपदम ॥ ११ ॥

(श) मौद्गल्यानां मौद्गल्यगोत्रसम्भूतानाम्। अन्वयमूर्धन्यस्य वंशश्रेष्ठस्येति भावः।

(ष) बालवाल्मीकेः नवावतारवाल्मीकेः। वाङ्मयं काव्यम्। अमृतबिन्दुनिष्यन्दि सुधाबिन्दुवर्षीत्यर्थः। कन्दलयति जनयतीत्यर्थः।

(स) स्थाने योग्यविषये युक्तं वा, "युक्ते हे साम्प्रतं स्थाने" इत्यमरः।

तदिति।—तत् प्रसिद्धं, ताटङ्कम् अनन्यसाधारणमिति यावत्, उज्ज्वलं दीप्यमानं, यत् ककुत्स्थकुलं तन्नामराजा वंशः, पुरा परञ्जयो नाम आसीत् इक्ष्वाकुवंशोद्भवः नृपतिरासीत्। तमेकदा देवाः समागत्य असुरजयाय अनुरुरुधुः। स च तानब्रवीत्, यदि शतक्रतुः इन्द्रपः मां सङ्ग्रामभूमिं नयति तदाऽहं तेषामसुराणां जयाय यास्यामीति। देवाश्च शक्रमुपेत्य तथेत्यवोचुः। स च देवेन्द्रः इन्द्रत्वमाप्ताय तं राजानमसुरजयार्थं रणभूमिमनयत्। स राजा तत्र इन्द्रत्वप्राप्तेन्द्रस्य ककुदि वृषाकाराय असुरान् जिगाय। ततश्चास्य ककुत्स्थ इति, तद्वंशीयानाञ्च काकुत्स्था इति प्रसिद्धिरिति पुराणवार्ता; तस्य या प्रशस्तिः चरितकीर्तनेन प्रशंसा, तस्याः सौरभ्यस्य

वाल्मीकिवागमृतकूपनिपानलक्ष्मी-
मेतानि बिभ्रति सुरारिकवेर्वचांसि ॥ १२ ॥

(नेपथ्ये गीयते)।

दिणअरकिरणुक्केरो पिआअरो कोऽवि जोअलोअस्स।
कमलमउलंकवालोकिअमहुअरकड्ढणविअड्ढो * ॥ १३ ॥

सूत्रधारः। (आकर्ण्य)। कथमुपक्रान्तमेव (ङ) नर्त्तकैः, यदियं दशरथोत्सङ्गात् (क) रामभद्राकर्षिणी विश्वामित्रस्य

* दिनकरकिरणोत्करः प्रिया(य)करः कोऽपि लोकलोकस्य।
कमलमुकुलाङ्कपालोकितमधुकरकर्षणविदग्धः ॥ इति संस्कृतम्।

सुनन्दितायाः, कमनीयतायाः वा, ख्यातेर्वा, "सुरभिः सुगन्धि-कान्तयोस्त्रिषु। विख्याते—" इति मेदिनी; निर्भरेण अतिशयेन, गभीराणि महान्ति, मनोहराणि च एतानि सुरारिकवेः वचांसि वाल्मीकेः वागेव रामायणमेवेत्यर्थः, अमृतकूप तस्य निपानं तदमृतपानार्थं तत्समीपे कृतजलाधारविशेषः, "आहावस्तु निपानं स्यादुपकूप-जलाशये" इत्यमरः, तस्य लक्ष्मीं शोभां, बिभ्रति भजन्ते। अत्रान्यस्य धर्मं अमलत्वो बहुत्विति निपानस्य सुरादिवचसश्च बिम्ब-प्रतिबिम्बभावात् निदर्शनाऽलङ्कारः, तदुक्तं दर्पणे—"सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वाऽपि कुत्रचित्। यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना॥" इति। वसन्ततिलकं वृत्तं, "ज्ञेयं वसन्ततिलकं त-भ-जा ज ग गौ गः" इति तल्लक्षणात् ॥ १२ ॥

दिनकरेति।—दिनकरस्य सूर्यस्य, किरणोत्करः तेजोराशिः, तत्स्वरूप इत्यर्थः, लोकलोकस्य संसारस्य, प्रियाकरः प्रियस्य प्रियानुष्ठानस्य, आकरः खनिस्वरूपः, आश्रयभूत इत्यर्थः, प्रियानुष्ठाता इति यावत्; "प्रियकरः" इति वा क्वचित्, तथात्वे हितकरः इत्यर्थः, कमलमुकुलेन पद्मकलिकया, अङ्कपालोकितः क्रोडनिहितः, स्वस्य अभ्यन्तरे आवलोकित इत्यर्थः, यः मधुकरः भ्रमरः, तस्य कर्षणे तत्क्रोडात् हरणे इति यावत्, विदग्धः दक्षः, लोऽपि अनिर्वचनीयप्रभावसम्पन्नः पुरुष इति भावः, दृश्यते इति शेषः ॥ १३ ॥

(ङ) उपक्रान्त प्रारब्धम।

(क) दशरथोत्सङ्गात् दशरथक्रोडात्।

प्रावेशिकी ध्रुवा (ख)। (पुरोऽवलोक्य सवक्षुभम्)। अये! कथम्!! अत्रैव तत्रभवतः कमलयोनिजन्मनो मुनेरायतनात् (ग) प्रतिनिवृत्तेन ऋत्विजा (घ) वामदेवेन किमपि तदाचिकम् (ङ) अभिधीयमानो महाराजो दशरथस्तिष्ठति। तदेहि, न हयोस्तृतीयेन भवितव्यम्, (च) इत्यावामप्यनन्तरकरणीयाय (छ) सज्जीभवावः। (इति निष्क्रान्तौ)।

प्रस्तावना। (ज)

(ततः प्रविशति यज्ञोपवीती दशरथो वामदेवश्च)।

दशरथः। अहो!! बहुधा श्रुतमपि भगवतो वशिष्ठस्यानुशासनं (झ) नवं नवमिव प्रमोदयति माम्।

(ख) प्रावेशिकी प्रवेशसूचिका। ध्रुवा गीतिविशेषः; सा च पञ्चधा; यदाह भरतः,—"ध्रुवा तु गीतिभेदोऽयमिति; प्रावेशिकी निष्क्रामिकी परिक्रामणध्रुवेति:। उत्थापनी तु पञ्चम्या ध्रुवा नाट्यार्थसिद्धये॥ तत्र प्रावेशिकी प्रेक्षा प्रवेशे नाटयोक्तः॥" इति च।

(ग) कमलयोनिजन्मनः ब्रह्मणो मानसपुत्रस्य। मुनेः वशिष्ठस्येत्यर्थः। आयतनात् आश्रमात्।

(घ) ऋत्विजा पुरोहितेन।

(ङ) वाचिकं सन्देशवचनं, "सन्देशवाक् वाचिकं स्यात्" इत्यमरः।

(च) हयोः परस्परं कलहतोः वामदेव दशरथयोरित्यर्थः। तृतीयेन, जनेनेति शेषः। न भवितव्यं न तत्र गन्तव्यमिति यावत्, कलहयोर्विघ्नत्वात्तत्र गमने आघातसम्भवादिति भावः।

(छ) अनन्तरकरणीयाय अतःपरं कर्त्तव्यानुष्ठानाय।

(ज) प्रस्तावना प्रस्तावयति सूचयति नाटकीयवस्तु अनयेति व्युत्पत्त्या प्रस्तुतसूचिका निघः सम्भावना इत्यर्थः। तदुक्तं दर्पणे—"नटो विदूषको वाऽपि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥ चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा॥" इति।

(झ) अनुशासनम् उपदेशवचनम्।

वामदेवः ।—

मधुकैटभदानवेन्द्रमेदःप्लवविस्रा विषमेव मेदिनीयम् ।
अधिवास्य यदि स्वकैर्यशोभिरमेनामुपभुञ्जते नरेन्द्राः ॥ १४ ॥

दशरथः । (सविमर्शस्मितम्) । सखे वामदेव ।—

तस्याग्र्ययैव परिपालयतः प्रजां मे
कर्णोपकण्ठपलितङ्करणी जरेयम् ।
यन्नर्भरूपमिव मामनुशास्ति सर्व-
मद्यापि तन्मयि गुरुर्गुरुपक्षपातः ॥ १५ ॥

मधुकैटभेति ।—मधुश्च कैटभश्च तयोः तदाख्ययोः, दानवेन्द्रयोः दैत्यराजयोः, मेदसा वसया, "आत्मदस्तु वपा वसा" इत्यमरः; प्लवेन आप्लवनेन, आच्छादितत्वेनेत्यर्थः, पूरणेन इति यावत्, विस्रा आमगन्धवती, "विस्रं स्यादामगन्धि यत्" इत्यमरः, अत एव मेदिनी मेदोबहुला, मेदोयोगादिति भावः, इयं पृथिवी, विषमेव अभोग्यैवेत्यर्थः, दौर्गन्ध्यादिति भावः, अत एव लोकाला अरोरेषु विविधदुष्कृतयोगात् दुर्गन्ध एव वासते इति तात्पर्यम्, यदि पक्षान्तरे, अथवा दौर्गन्ध्यात् वासायोग्ये ऽपीत्यर्थः, यथा—यदि सम्भावनायां, मन्ये इत्यर्थः, नरेन्द्राः राजानः, स्वकैः स्वकीयैः, यशोभिः कीर्तिभिः, प्रजारञ्जनजनितैरिति भावः, एनां मेदिनीम्, अधिवास्य यशः-सौरभैः सुरभीकृत्य, "संस्कारो गन्धमाल्याद्यैः यः स्यात्तदधिवासनम्" इत्यमरः, चिरं दीर्घकालम् उपभुञ्जते, वासायोग्यामपि इमां नरेन्द्रा एव स्वकीययशःसौरभैः सुरभिं कृत्वा वासयोग्यां कुर्वन्ति उपभुञ्जते च, अतः स्वकैरेव अस्या सुष्ठु आचरितव्यमिति तात्पर्यम् ॥ १४ ॥

तस्येति ।—तस्य गुरोः, अग्र्ययैव आदेशेनैव, प्रजा परिपालयतः परिरक्षतः, मे मम, इयं जरा वार्द्धकं, कर्णोपकण्ठयोः कर्णसमीपप्रदेशयोः, तत्रत्यकेश-निचयानामित्यर्थः, "समीपे निकटासन्न···उपकण्ठान्तिकाभ्यर्णाभ्यया—" इत्यमरः; पलितङ्करणी जरालनितशौक्ल्यजननीत्यर्थः, कर्णान्तिकवर्तिनः केशनिचयाः परिपक्वा इति भावः, "पलितं जरसा शौक्ल्यं केशादौ" इत्यमरः, आशैशवं बाल्यं यावत् तदाग्र्ययैव प्रजाः पालयामीति निष्कर्षः, अद्यापि गुरुः श्रेष्ठः, गर्भरूपमिव शिशुं स्वपुत्रमिव, मां सर्वम् अनुशास्ति उपदिशति, इति यत् तत् मयि गुरुभक्तौ, पक्षपातः कृपा यस्य तादृशः, इति मन्ये इति शेषः । वसन्ततिलकं वृत्तम् ॥ १५ ॥

वामदेवः। महाराज! किमुच्यते, समानवृत्तेरपि क्वचिदेव कस्यचित्तारामैत्रकम् (अ)। तथा हि, स तत्रभवान्—

साधारणो रघूणां गुरुर्भवन्नपि विशेषदृष्टिस्ते।
नामोदयति कमिन्दुः? कुमुदं पुनरस्य सर्वस्वम्॥ १६॥

दशरथः। वामदेव! मम हि गुरुवचनश्रवणतृष्णामङ्कुशीकरोति (ट) श्रोत्रवृत्तिरिन्द्रियान्तरानुसारिणी (ठ) हृदयमहागजस्य; तत्र किञ्चिदपरम् (ड) अवशिष्यते?

वामदेवः। महाराज! निःशेषमभिहितम्। इमां तु सर्वसन्देशसङ्ग्रहकारिकां कारिकाम् (ढ) अतिप्रयत्नेन भगवान् भवन्तमनुस्मारयति। (ण)

(अ) समानवृत्तेः समाना साधारणी वृत्तिः व्यापारः, अनुशासनरूप इत्यर्थः, यस्य तथाभूतस्यापि, सर्वेषु जनेषु समदर्शिनोऽपीत्यर्थः, कस्यचित् जनस्य, क्वचिदेव जने, तारामैत्रकं स्वतःसिद्धा चेतःप्रीतिः, नक्षत्रयोगकृता प्रीतिर्वा। "अश्विपुष्याश्च नक्षत्रे तारौ ज्ञातौ बालयोषिति" इति विश्वः।

साधारण इति।—रघूणां रघुवंशीयानां, साधारणः तुल्यरूपः, गुरुः भवन्नपि ते तव, त्वयीत्यर्थः, सत्यपि विवक्षया षष्ठी, विशेषदृष्टिः अत्यन्तमनुरागीत्यर्थः; तथा हि, इन्दुर्नन्दः, कं जनं, न आमोदयति? न प्रीणयति? सर्वमेव आमोदयतीत्यर्थः, पुनः किन्तु, कुमुदं कैरवम्, अस्य इन्दोः, सर्वस्वं परमप्रियमिति भावः। प्रतिवस्तूपमालङ्कारः। तदुक्तं दर्पणे—"प्रतिवस्तूपमा सा स्यात् वाक्ययोर्यस्य-साम्यधीः। एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्॥" इति। आर्याद्वयं—"यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये पञ्चदश चतुर्थके साऽऽर्या॥" इति तल्लक्षणात्॥ १६॥

(ट) गुरुवचनेति।—गुरुवचनस्य, श्रवणे या तृष्णा लालसा, आयत इति यावत् ताम्। अङ्कुशीकरोति अनङ्कुशम् अङ्कुशं हस्तिग्रासनदण्डविशेषं तादृशं करोति।

(ठ) इन्द्रियान्तरानुसारिणः इन्द्रियान्तरं श्रोत्रव्यतिरिक्तं चक्षुरादिकम्, अनुसरति अनुधावतीति तच्छीलस्य।

(ड) अपरम् अन्यत्, वक्तव्यमिति शेषः।

(ढ) सर्वेति।—सर्वेषां सन्देशानां वाचिकानां, सङ्ग्रहः सङ्क्षेपः, तस्य कारिकां कारणीं कारिकां श्लोकं, "कारिका तु कृतौ श्लोके" इति विश्वः।

दशरथः। (सादरम्)। अवहितोऽस्मि। किमाज्ञापयति?

वामदेवः।—

हुतमिष्टं च तप्तं च धर्मसायं कुलस्य ते।
गृहात् प्रतिनिवर्त्तन्ते पूर्णकामा यदर्थिनः॥ १७॥

दशरथः। (सहर्षम्)। सुष्ठु, शिरसि कृतमाचार्य्यवचनम्।
किञ्च—

अस्मन्नेत्रमहत्तरः क्रतुभुजामद्यायमाद्यो रवि-
र्यज्वानो वयमद्य ते भगवती भूरद्य राजन्वती।
अद्य स्वं बहु मन्यते सहचरैरभ्राभिराखण्डलो
येनैतावदकन्धतीपतिरपि स्वेनानुगृह्णाति नः॥ १८॥

(च) अनुशासयति श्रुतिविषयं प्रापयति, श्रुतिपथं नेतुमनुरुध्यस्वेत्यर्थः।

हुतमिति।—अर्थिनः याचकाः, पूर्णकामाः सफलमनोरथाः सन्तः, गृहात् राजभवनात्, प्रतिनिवर्त्तन्ते प्रतिनश्यन्ति, इति यत्, एतत् ते तव, कुलस्य वंशस्य, हुतं "क्षेत्रमिष्टिर्तो भावो द्रव्यवत् प्रकाशते" इति न्यायात् क्षीरः इत्यर्थः, हवोर्हेयेन घृतो द्रव्यमात्रेण; इति यावत्, एवम् "इष्टं" "तप्तम्" इत्यत्रापि अवगन्तव्यम्, इष्टेन अग्निहोत्रादिकः क्रतुः, तप्त तपश्चरणम्, अयं धर्मस्य अवश्यकर्त्तव्यः आर्य्यविशेषश्च। यद्वा—हुतं होमः क्रतुः, इष्टं यागोऽनुष्ठितः, तप्तं तपश्चरणं कृतं, भवतीति शेषः, च किन्तु, ते कुलस्य अयं धर्मः विशेषतः, यत् अर्थिनः पूर्णकामाः गृहात् प्रतिनिवर्त्तन्ते इति। अनुष्टुब्वृत्तम्॥ १७॥

अद्यदिति।—अद्य अस्माकं नेत्रस्य नेत्रम्, महत्तरः अतिमहान्, आदिपुरुष इत्यर्थः, रविः सूर्यः, क्रतुभुजां देवानाम्, आद्यः श्रेष्ठः, अभूदिति शेषः। वयम् अद्य ते यज्वानः विधिना क्रतवस्राः, अभूमेति शेषः, "यज्वा तु विधिनेष्टवान्" इत्यमरः, अद्य भगवती भूः पृथिवी, राजन्वती शोभनराजन्याधिनीत्यर्थः, "सुराष्ट्रि देशे राजन्वान्" इत्यमरः; अद्य आखण्डलः इन्द्रः, अभ्राभिः सहचरैः, स्वं स्वपतिपाल्य, विश्वोर्वी-राज्यमिति यावत् बहु मन्यते सफलिकमादियते इत्यर्थः, येन हेतुना अकन्धतीपतिः वसिष्ठोऽपि, स्वेन आत्मना, स्वयमित्यर्थः, नः अस्मान्, एतावत् सफलिकमिति भावः, अनुगृह्णाति, उपदेशदानेनेति शेषः। आर्द्रविक्रीडितं वृत्तम्॥ १८॥

वामदेवः। राजर्षे! सहजानुभावगम्भीरमहिमानो (त) यूय-
मेव तादृशाय यशसे। (थ) वयं तु केवलमुपदेष्टारः,—
उन्मुद्रयति हि कुमुदाकरमप्यरश्मिर्निशानिशातनिस्तुषोऽपि
तुषारकिरणः।
स पुनः किमुच्यते भगवान् द्वितीयपरमेष्ठी वशिष्ठः? ॥ १९ ॥

अपि च—

इदं वो याज्यानामुदितमुदितं यत् कुलमभूत्
यदिष्टं वा कुर्वन्नकृत सगरः पूर्त्तमुदधिम्।
असौ पूर्वेषां ते सुचरितपताका यदमर-
स्रवन्तो कृत्स्नोऽयं त्रिभुवनगुरोस्तस्य विभवः ॥ २० ॥

(त) सहजेति।—सहजः स्वाभाविकः, य. अनुभावः प्रभावः, तेन गम्भीरः दुरवगाहः, महिमा माहात्म्यं यस्य तथाविधः।

(थ) यशसे तत्तत्सुकृतानुष्ठानजनितकीर्त्तये, प्रभवतीति शेषः।

उन्मुद्रयतीति।—अरत्कः अरत्कालस्थः, निशा रात्रिः, तया निशातः तेजितः, समुज्ज्वल इत्यर्थः, तथा निस्तुषः निरावरणः, निर्मल इति यावत्, स न भवतीति अप्ररश्मिर्निशानिशातनिस्तुषः अपि वर्षाकालीनोऽपीति भावः, तुषारकिरणः शीतरश्मिः, चन्द्र इत्यर्थः, कुमुदाकरं कैरवनिचयं, तदाधारजलाशयं वा, उन्मुद्रयति हि विकाशयत्येव, सः पुनः द्वितीयपरमेष्ठी अपरो ब्रह्मा, वशिष्ठः कः पृथिव्यां, तस्याः मुदं आनन्दम्, आकरः आश्रयं तं भवन्तमिति भावः, उन्मुद्रयतीति किम् उच्यते? किं कथ्यते? अत्र किं वक्तव्यमिति भावः। शीतरश्मिस्तु कदाचित् मलिनता कदाचिन्निर्मलता च अस्य तु सततं सदैव निर्मलत्वमित्याशयेन द्वितीयपरमेष्ठीत्युक्तम्। कुमुदाकरं यथा—"एकादशशिरोवर्णैरष्टादशभिः क्रमादधो पादौ। तत् कुमुदाकरस्य चरणौ तु दशाक्षरौ यस्य॥" इति तल्लक्षणात् ॥ १९ ॥

इदमिति।—याज्यानां यजमानानां वो युष्माकम्, इदं कुलम् उदितम् उदितम् अतिशयेन उदितं, वर्द्धितमित्यर्थः उदितं मुदितमिति आदरमुदितं वा अभूत् इति यत्, वा अथवा, इष्टं यज्ञं, कुर्वन् सगरः उदधिं समुद्रं, पूर्त्तं खातं, "पूर्त्तं त्रिषु पूर्त्तिते ख्याते क्लीबे खातादिकं मतम्" इति मेदिनी, अकृत अकरोत्, तत् तव, पूर्वेषां पूर्वपुरुषाणां सुचरितपताका सुकृतानां वैजयन्तीस्वरूपेयं, असौ

किञ्च—

कौशिकस्योक्तस्यापि यदाज्ञातिक्रमादभूत्।
त्रिशङ्कोरुपभोगाय न द्यौरपि न भूरपि ॥ २१ ॥

(प्रविश्य)।

प्रतीहारी। जयतु जयतु देवः। देव! भगवान् कौशिको द्वारमध्यास्ते।

दशरथः। (ससम्भ्रमम्)। किं कौशिकः !!

वामदेवः। अहं तमुपेत्य श्रौतेन (ङ) विधिना पुरस्कृत्य (ध) प्रवेशयामि तपोनिधिम्। (इति प्रतीहार्या सह निष्क्रान्तः)।

दशरथः। (सहर्षम्)—

यः चतुष्टयं परित्यज्य टङ्कैस्तपोमयैर्ब्राह्मणमचकार।
परोरजोभिः स्वगुणैरगाधः स गाधिपुत्रोऽपि गृहानुपैति ॥ २२ ॥

अमरसवन्ती सुरनदी, मन्दाकिनीत्यर्थः, "अथ नदी सरित्। सवन्ती निम्नगाऽऽपगा" इत्यमरः; इति यत् अथ क्रतुः समयः, तस्य प्रसिद्धस्य, त्रिभुवनगुरोः वशिष्ठस्य, विभवः प्रभावः; वशिष्ठप्रभावेणैव तव पूर्वपुरुषाः ताहशानि महान्ति क्रतूंषि साधयामासुरिति तात्पर्यम्। शिखरिणी वृत्तम् ॥ २० ॥

कौशिकेति।—यस्य वशिष्ठस्य, आज्ञाऽतिक्रमात् आदेशलङ्घनात् हेतोः, कौशिकेन विश्वामित्रेण, स्वोक्तस्य त्वा सशरीरं स्वर्गे प्रेषयिष्यामीति अङ्गीकृतस्यापि, त्रिशङ्कोः तदाख्यनरपतेः, द्यौरपि स्वर्गोऽपि, न, भूरपि भूमिरपि, उपभोगाय आश्रयाय, न अभूत्। अनुष्टुब्वृत्तम् ॥ २१ ॥

(ङ) श्रौतेन श्रुतिवेदः तद्विहितेन।

(ध) पुरस्कृत्य परितोष्य, अग्रेकृत्य इति वा।

य इति।—यः तपोमयैः टङ्कैः पाषाणविदारकास्त्रभेदैः, "टङ्कः पाषाणदारणः" इत्यमरः, चतुष्टयं परित्यज्य तनूकृत्य, खण्डीकृत्येत्यर्थः, विशोध्य इति भावः, ब्राह्मणं ब्रह्मस्वत्वम्, टङ्कमिति शेषः, चकार चक्रे कृतवान्, ब्राह्मणं देहं बृहमने इत्यर्थः, चतुस्तत्त्वतेजःपूर्णं चकारेति यावत्, परोरजोभिः रजोगुणात् परैः, रजोगुणातिशायिभिरित्यर्थः, स्वगुणैः निजैः, सात्त्विकैः गुणैरित्यर्थः, अगाधः अतल-

(ततः प्रविशति वामदेवोपदिश्यमानवर्त्मा विश्वामित्रः)।

विश्वामित्रः। सखे वामदेव! त्वमधुनैव वशिष्ठाश्रमादागतोऽसि। कच्चित् कुशली तावदरुन्धतीनाम्ना पतिव्रतामयेन ज्योतिषा सहचरितधर्मा (न) तत्रभवान् मैत्रावरुणिः (प)।

वामदेवः। विशेषेण (फ) पुनरद्य याज्यकुलमुपतिष्ठमाने (ब) चिरन्तनप्रणयिनि कौशिके।

विश्वामित्रः। सखे वामदेव! चिरेण दशरथो द्रष्टव्य इति सर्वमनोरथानामुपरि वर्त्तामहे।

वामदेवः। (सविनयम)। भगवन् कुशिकनन्दन! धन्यः खल्वयं राजा सावित्रः, (भ) यमेवमनुरुध्यन्ते (म) भवन्तोऽपि।

विश्वामित्रः। सखे! धन्य एवायं—

नमन्नृपतिमण्डलीमुकुटचन्द्रिकादुर्दिन-
स्फुरच्चरणपल्लवप्रतिपदोक्तदोःसम्पदा।

स्वर्गः, दुरवगाह इत्यर्थः, स गाधिपुत्रः विश्वामित्रः अपि, गृहान्, नमेति शेषः, उपेति आगच्छति, अहो! महाभाग्य नमेति भावः॥ २२॥

(न) सहचरितः सहानुष्ठितः, धर्मः येन तथाभूतः, "सस्त्रीको धर्ममाचरेत्" इति शास्त्रादिति भावः।

(प) मैत्रावरुणिः मित्रस्य वरुणस्य तपोरूपं पुमान् मैत्रावरुणिः। पुरा ब्रह्मणानसृजनितं देहमपहाय तपस्तेजोभिर्मित्रावरुणयोस्तेजसा ऊर्वशीगर्भे सम्भूत इति पुराणात् मैत्रावरुणीति सञ्ज्ञाबीजं ज्ञातव्यम्।

(फ) विशेषेण कुशलीति शेषः।

(ब) याज्यकुलं याज्यस्य यजमानस्य दशरथस्य, कुलं गृहमित्यर्थः। उपतिष्ठमाने समागच्छतीत्यर्थः।

(भ) सावित्रः सूर्यवंशीयः।

(म) अनुरुध्यन्ते अभिनन्दन्ति।

नमदिति।—नमन्ति प्रणिपतन्तो, ये नृपतिमण्डलो राजचक्रं, तेषां मुकुटानां

अनेन सृष्टजेतरां तुरगमेधमुक्ताभ्रम-
स्फुरङ्खुरचन्द्रकप्रकरदन्तुरा मेदिनी ॥ २३ ॥

(पुरोऽवलोक्य सहर्षम्)—

चिरादक्षोर्जाड्य शमयति समस्तासुरवधू-
कचाकृष्टिक्रीडाप्रसभसुभगभ्यावुकभुजः ।
त्रिलोकीजङ्घालोल्वलसहजतेजा मनुकुल-
प्रसूतिः सूनामणी विजयसहकृत्वा दशरथः ॥ २४ ॥

सखे वामदेव ! इयमनेन पीयूषतुषारसीकरासारवर्षिणी सुजनसचाटकीतुकमेघलेखा पौरस्त्येनेव मरुता लोकनाथेन सहस्रशिखरोक्रियते (य) ।

शिरोटाना, चन्द्रकया ज्योत्स्नया, शमयेति यावत्, दुर्दिन मनाच्छन्नमिति यावत्, तत् यथा तथा, स्फुरन् राजन्, यद्यरूपसर्ग तेन प्रतिपदं पदे पदे, प्रतिच्छन्नमिति वा, उक्षा वर्धिता, प्रकटितेति यावत्, दीप्तम्पत यद्वलसमूह यस्य तथोक्तेन, समाजेति भाव, अनेन दशरथेन, मेदिनी पृथिवी, तुरगमेधेषु अश्वमेधेषु, मुक्तानाम् अभिमन्त्रा विसृष्टानाम्, अत एव सप्तता सर्वासु दिक्षु विचरतां, तुरङ्गाणा खुर-चन्द्रकप्रकर: चन्द्रकलाकारखुरचिह्नसमूह, तेन दन्तुरा उन्नतावनता, व्याप्तेति यावत्, सहजेतरां अभिप्रेत्य सहजे, कृतेत्यर्थ । पृथ्वीछन्द, "ज-सौ ज-स-य-ला वसु-यतिश्च पृथ्वी गुरु:" इति तल्लक्षणात् ॥ २३ ॥

चिरादिति ।—समस्तानाम असुराणा या वध्व: पत्न्य:, तासां कचाकृष्ट्या केशाकर्षणेन या क्रीडा तया प्रसभं सहसं, सुभगभ्यावुकौ प्रीतिदौ, भुजौ बाहू यस्य तथोक्त: त्रिलोक्या जङ्घालं प्रसरादिति भाव:, उल्वलं सहजं स्वाभाविकं, तेज: प्रताप: यस्य तथाभूत: मनुकुले प्रसूति: उद्भव यस्य तथाविध: मनुवंशीय इत्यर्थ:, सूनामणि: श्रेष्ठ, "सूनामा गावमित्र वन्धौ" इतीन्द्रपर्याये अमर:, विजये, असुराणामिति शेष:, सहकृत्वा सहकारी, दशरथ: चिरात् बहुकालात् परम, अक्ष्णो: नेत्रयो: जाड्य जडता, रमणीमुखालोकादिति भाव:, शमयति निवारयति, चक्षुषी विकासयतीत्यर्थ:, आनन्देनेति भाव: । शिखरिणी वृत्तम ॥ २४ ॥

(य) पीयूषेत्यादि —पीयूषमसृतमेव, तुषार हिम तस्य सीकरा: कणा:, तेषाम् आसारवर्षिणी धारासम्पातिनी सुजनानां सहृदा, सचाटे निजो भावश्चे, यत्

वामदेवः। भगवन्! अद्य खलु दिलीपकुलकुशलकर्म-कल्पलतानामङ्कुरयन्तिभिः (ङ) उदीर्यन्ते किमलयानि, (च) यदत्रभवानपि त्रिभुवनसनातनगुरुः (छ) एवमस्मै नरेन्द्राय स्मृहयति (ज)।

(इति परिक्रामतः)।

दशरथः। (सहर्षं सबहुमानमासनादुत्थायोपसृत्य च)। भगवन् कुशिक-नन्दन! ऐक्ष्वाकः पङ्क्तिरथोऽभिवादयते (झ)।

विश्वामित्रः। स्वस्ति भवते (ञ) सपरिवाराय।

(इति सर्वे यथोचितमुपविशन्ति)।

दशरथः। (सप्रश्रयम्)। भगवन् विश्वामित्र!—

क्षत्रित् कान्तारभाजा भवति परिभवः कोऽपि श्रौवापदो वा?
प्रत्यूहैर्न क्रतूनां न खलु मखभुजो भुञ्जते वा हवींषि?।

कौतुकेन आनन्दः, तस्य मन्थरेखा घनस्यन्दो, गौरवेण पूर्वादनुभवेन, मनसा बाहुना इव, लीलयाऽपि नृपतिना दशरथेनेत्यर्थः, सहस्रमिश्वरोक्तियते सहस्रगुणयती क्रियते, दशरथस्यात्यादरबहुमानं भूयसा परिवर्धते इति भावः।

(ङ) दिलीपेति।—दिलीपस्य कुलं वंशः, तस्य कुशलकर्माणि कुशल-जनकानुष्ठानानि एव, कल्पलताः कल्पतरवः, तासाम् अङ्कुराः, प्ररोहाः, तेषां यन्तिभिः पर्वभिः।

(च) किमलयानि नवपल्लवाः। उदीर्यन्ते उद्गाव्यन्ते।

(छ) अत्रभवान् पूज्यः। त्रिभुवनेति।—त्रिभुवनस्य सनातनः चिरन्तनः, गुरुः आचार्यः, विश्वामित्र इत्यर्थः।

(ज) स्मृहयति आकाङ्क्षति।

(झ) पङ्क्तिरथः पङ्क्तिः दश, दशसु दिक्षु गतः दशरथः, रथो यस्य सः दशरथः, "पङ्क्तिर्दशाक्षरच्छन्दो दशखड्गादिषु स्त्रियाम्" इति मेदिनी; अभिवादयते प्रणमति।

(ञ) स्वस्ति शुभं, भूयादिति शेषः।

क्षत्रिदिति।—कान्तारभाजां अरण्यवासिनां, कोऽपि श्रौवापदः श्वापदजातः, परिभवः तिरस्क्रिया, पीडेति यावत्, क्षत्रित् भवति वा? भवति किम्? मखभुजो

कर्त्तुं वा कांक्षिदन्तर्वसति वसुमतीदक्षिणः सप्ततन्तुः ?
यत्तस्माल्लोऽसि ? किंवा रघुकुलतपसामीदृशोऽयं विवर्त्तः ॥ २५ ॥

विश्वामित्रः । (विहस्य) ।—

जनयति त्वयि वीर ! दिशां पतौ-
नपि गृहाङ्गनमात्रकुटुम्बिनः ।
रिपुरिति श्रुतिरेव न वास्तवो
प्रतिभयोन्नतिरस्तु कुतस्तु नः ? ॥ २६ ॥

अपि च—

वह्नयाधिनो देवाः, "यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः" इत्यमरः ; प्रश्नपूर्वेण विघ्नेन, यज्ञस्येति शेषः, क्रतूना यज्ञाना, इवौषः न खलु नेव, भुञ्जते वा ? वा अथवा, वसुमती पृथिवी, दक्षिणा यस्य तथाविधः, सप्ततन्तुः यज्ञः, (कर्तृ) कर्त्तुं करणाय, अन्तः मनसि, वसति किञ्चित् ? किम् ? यत यतः, तस्मात्, तस्मागतः, असि ? भवसि ? किंवा रघुकुलतपसा रघुवंशीयानां तपोऽनुष्ठानानाम्, दृष्टश्च अयं, विवर्त्तः ? परिपाकः ? रघुवंशीयाना तप प्रभावेणैव भवादृशाना गृहागमनं सम्भवतीति भावः । स्रग्धरा वृत्तं, "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्" इति तल्लक्षणात् ॥ २५ ॥

जनयतीति ।—हे वीर । त्वयि भवति, दिशां पतौनपि दिक्पालानपि, नृपतीनपि इति वा, गृहाङ्गनमात्रे त्वदीयगृहप्राङ्गणे एव, कुटुम्बानि पोष्यवर्गाः, "कुटुम्बं पोष्यवर्गे च" इत्यमरमाला ; एषा सन्तीति तादृशान् कुटुम्बिनः सपरिवारावस्थिता-निति यावत्, सततमग्नानुष्ठानात भयात् वेति भावः, जनयति कुर्वति सति, रिपुः शत्रुः, विघ्नकारीति भावः, अस्माकमिति शेषः, इति एवं, श्रुतिरेव शब्दमात्रमेवेत्यर्थः, वर्त्तते इति शेषः, वास्तवो तात्त्विको न, विघ्न इति शब्दमात्रमेव वर्त्तते, परन्तु विघ्नकृतां नामापि न श्रूयते इति भाव ; नः अस्माकं, तु पुनः, प्रतिभयस्य भयङ्करस्य, भयहेतोः अग्नेरित्यर्थो वा, शत्रुभ्यः भयस्य इति वा, "भयङ्कर प्रतिभयम्" इत्यमरः, "प्रतिभयं भये भीमे" इति च हैमः, उन्नतिः वृद्धिः, कुतः अस्तु ? भवतु ? न कुतोऽपि भयस्यावकाश इति भावः । द्रुतविलम्बितं वृत्तं, "द्रुतविलम्बितमाह नभौ भरौ" इति तल्लक्षणात् ॥ २६ ॥

दत्तेन्द्राभयविभ्रमाद्भुतभुजासञ्चारगम्भीरया
त्वद्दृष्ट्या गिरिलोकृतस्त्रिभुवनत्राणाय नारायणः।
अन्तस्तोषतुषारसौरभमयश्वासानिलापूरण-
प्राणोत्सङ्गभुजङ्गतल्पमधुना भद्रेण निद्रायते ॥ २७ ॥

दत्तेति। (सर्वेलक्ष्यलिङ्गम्) (ङ)। भगवन् विश्वामित्र! अभ्यमित्रीणस्य तत्रभवतः सुनासीरस्य नासीरपूरकेण पदातिपरमाणुना (क) मयाऽपि कदाचिदुद्धृतं धनुः, यन्मूलः (ख) अयमलौकिकलोकप्रवादो भवन्तमाप्याययति (ग)।

दत्तेति।—दत्तम् इन्द्राय अभयं येन तादृशः विभ्रमः विलासः यस्य तथाभूतः, अत एव अद्भुतः विस्मयजनकः अलौकिकः इति यावत्, यः भुजयोः बाहुयुगलस्य, "अथो भुजा। द्वयोः बाह्वौ करे" इति मेदिनी, सञ्चारः चलनमित्यर्थः, तेन गम्भीरया उद्भटया, महत्या इति यावत्, तव दृष्ट्या व्यापारेण, आचरणेनेत्यर्थः, पृथिवीपालनरूपेणेति यावत्, हेतुना त्रिभुवनस्य त्राणाय परिरक्षणार्थं, परिरक्षणे इति यावत्, गिरिलोकृतः गिरिलक्ष्यलोकृतः इत्यर्थः, उपेक्ष्यमाण इति भावः, नारायणः अधुना अन्तस्तोषेण आन्तरसन्तोषेण, तुषारः शीतलः, समुद्रसलिलेनेति भावः, सौरभमयः शोभनगन्धपूर्णः, नासिक्यकमलसम्बन्धीति भावः, यः श्वासानिलः निश्वासवायुः, नारायणस्येति शेषः, तेन आपूरणं परिपोषणं यस्य तथाभूतेन, प्राणेन तदाख्यवायुना, उत्सङ्गः समुद्गतः, स्फीत इत्यर्थः, उपरिष्टा वायुभुक्त्वादिति भावः, भुजङ्ग एव शेष एव, तल्पः शय्या यत्र तत् यथा तथा, भद्रेण सुखेन, निद्रायते स्वपिति। शार्दूलविक्रीडितं छन्दः ॥ २७ ॥

(ङ) सर्वेलक्ष्यलिङ्गं सलक्ष्यसन्दोहम्।

(क) अभ्यमित्रीणस्य अभिमित्रान् अवून्, अभिमुखं गतस्य सामर्थ्येन अवूनामभिमुखं गच्छतः इत्यर्थः, "यो गच्छत्यवं विहिषतः प्रति। सोऽभ्यमित्रोऽभ्यमित्रीयेऽप्यभ्यमित्रीय इत्यपि ॥" इत्यमरः; सुनासीरस्य इन्द्रस्य, "इडयवाः सुनासीरः पुरुहूतः पुरन्दरः" इतीन्द्रपर्य्याये अमरः, नासीराणां सेनामुखानाम्, अग्रगामिसेनानां वा, "नासीरोऽग्रगन्तरि" इति विश्वः; पूरकेण सङ्ग्रामपूरकेण, सङ्ग्रामहिंसारिपेत्यर्थः, पदातिपरमाणुना क्षुद्रपदातिनेत्यर्थः।

(ख) यन्मूलः यन्निबन्धनः।

(ग) आप्याययति प्रीणयति।

विश्वामित्रः । (सोल्लाहङ्कितम्) । सखे !—

त्रैलोक्याभयदानदक्षिणकरेणाद्य त्वया वीरेण विस्तारितं
तत्त्रैमूर्तमुरुक्रमस्य महतो नूनं सुहृत्तं वपुः ।
किन्त्वाजन्मनि वाहितेन हविषा सम्फुल्लमांसोल्लस-
त्सर्वाङ्गीणबलीविलुप्तनयनव्यूहः कथं वर्त्तते ॥ २८ ॥

वामदेवः । महाराज भूकश्यप ! यथाऽऽह भगवान् कौशिकः (घ) । स्वयमनेकधा सुधर्मायामध्यवीक्षितम् (ङ) अहमपि ब्रवीमि—

त्वय्यर्द्धासनभाजि किन्नरगणोद्गीतैर्भवद्विक्रमै-
रन्तः सम्भृतमत्सरोऽपि भगवानाकारगुप्तौ कृतौ ।

त्रैलोक्येति ।—आक्रान्तस्य इन्द्रः, त्रयाणां लोकानां समाहारः त्रिलोकी सा एव त्रैलोक्यं विभुत्वं, तस्य अभये निर्भयतायां, अग्रकेण प्रतिभूस्थेन, वीरेण भवता तत् प्रसिद्धं, तत्प्रसिद्धं, नूनमत्र मेघस्य, सुहृत्तं वपुरिवं, मरुतस्य मरुद्गणस्य भूतं, यत् यत् दानमनुरिति इन्द्रधनुरिति च नामकं, तस्मिन् पार्थिवं तत्सम्बन्धि, विस्तारितः, निष्प्रयोजनत्वात्तदनुपदंहस्येति भावः; किञ्च पुनरर्थे, आजन्मन् अनवरतं, सखेषु यज्ञेषु, आर्पितेन दत्तेन, हविषा हवनीयद्रव्येण, सम्फुल्लं प्रवृद्धं, यत् मांसं तेन उल्लसन्ती उद्गच्छन्ती, या सर्वाङ्गीणा सर्वाङ्गव्यापिनी, बली पुष्टिः, तया विलुप्तः विगतः, समाच्छन्न इति यावत्, नयनव्यूहः नेत्रसमूहः, सहस्रनयनो-त्तीति भावः; यस्य तथाभूतः सन्, अयम् त्वत्र अग्रगीति पदमध्याहृत्य अन्वयः कर्त्तव्यः, अद्यापि अतिक्रान्तेऽपि, वर्त्तते । हविर्भुक्त्वात् अग्नेरुद्गारित्वेन शरीरकौशं, तेन च बलीना समृद्धः, बलीनिव नेत्राणां समाच्छादनमिति सहस्रनेत्रापरिहार्यत्वेन क्लेशेन तिष्ठतीति निष्कर्षः । आर्द्धासनिकीकृतं श्लोकम् ॥ २८ ॥

(घ) भूकश्यप ! भुवि पृथिव्यां, कश्यपमुनेरवतार इत्यर्थः, विष्णुमनसश्चात्रिणि भावः । भगवान् कौशिकः विश्वामित्रः, यथा चाह ब्रवीति, तत्तथेति शेषः ।

(ङ) सुधर्मायां सुष्ठु धर्मः यस्यामिति तदाख्यायां देवसभायामित्यर्थः, "ज्ञात् सुधर्मा देवसभा" इत्यमरः; अनेकधा बहुधारूपं, अध्यवीक्षितं प्रत्यक्षीकृतं, इन्द्रमित्यर्थः ।

त्वयीति ।—त्वयि अर्द्धासनभाजि आसनार्द्धभोगे सति, इन्द्रेति शेषः,

उन्मीलद्भवदीयदक्षिणभुजारोमाञ्चविद्योद्गर-
द्बाष्पैरेव विलोचनैरभिनयत्यानन्दमाखण्डलः ॥ २८ ॥

दशरथः। (सस्मितम्)। वामदेव! त्वमपि भगवन्तं गाधिनन्दनमनुप्रविष्टोऽसि (च)—

एतस्मै समराङ्गनप्रणयिने तिष्ठेत कः प्रज्वल-
द्दम्भोलिद्युतिमण्डलोद्भटभुजस्तम्भाय जम्भारये ?।
निर्यद्भिर्विहिरेष रोषदहनज्योतिःस्फुलिङ्गैरिव
स्वे रज्यद्भिरपीक्षणैः समतनोदाग्नेयमस्त्रं हिषाम् ॥ ३० ॥

क्षितराजा देवयोनिविशेषाणां, गणैः समूहैः, उद्गीतैः उच्चैः गान्धारग्रामेण कीर्त्तितैः, भवतः विक्रमैः शौर्य्यैः, असुरपराजयव्यापारैरिति यावत्, अलं मनसि, सम्भृतः सञ्जातः, मत्सरः विद्वेषः यस्य तथाभूतोऽपि, मां परित्यज्य एनं मर्त्यमुपस्तुवन्नीति ईर्ष्याकुलितचित्तोऽयमिति यावत्, आकारस्य चित्तविकृतिजनितमुखस्फान्यादेः मत्सरचिह्नस्य, गुप्तौ संवरणे, कृती दक्षः, भगवान् परमैश्वर्य्यवान्, आखण्डलः इन्द्रः, उन्मीलद्भिः गानश्रवणात् उद्भवद्भिः, भवदीयदक्षिणभुजायाः तव दक्षिणबाहोः, इन्द्रस्य वामभागावस्थितत्वादिति भावः, रोमाञ्चैः पुलकैः, विद्यानि संसृष्टानि, अत एव उद्गरन् उद्भवन्, बाष्पः अश्रुजलं येभ्यः तथाभूतैः, विलोचनैः नेत्रैः, आनन्दं हर्षं, सङ्कीर्तनश्रवणजनितमिति भावः, अभिनयति प्रकाशयति। शार्दूलविक्रीडितं वृत्तम्॥ २८॥

(च) अनुप्रविष्टोऽसि अनुस्तुतोऽसि, अनुसरसीत्यर्थः।

एतस्मा इति।—प्रज्वलता प्रदीप्यमानेन, दम्भोलेः वज्रस्य, द्युतिमण्डलेन प्रभानिचयेन, उद्भटौ दारुणौ, भुजाविव स्तम्भौ यस्य तथाभूताय, समराङ्गनप्रणयिने सङ्ग्रामभूमिप्रियाय, सर्वदा युद्धक्षेत्रवर्त्तिने इत्यर्थः, एतस्मै जम्भारये जम्भासुरशत्रवे इन्द्राय, कः तिष्ठेत ? कः आत्मनो युद्धाभिप्रायं प्रकाशयेत् ? युद्धार्थी सन् एतत्समीपे कस्तिष्ठत् ? न कोऽपीत्यर्थः। एषः इन्द्रः, बहिः निर्यद्भिः निर्गच्छद्भिः, रोषस्य क्रोध एव, दहनस्य अग्नेः, तस्य ज्योतिषा शिखानां, स्फुलिङ्गैरिव कणैरिव, "स्फुलिङ्गोऽग्निकणः" इत्यमरः; रज्यद्भिः रक्तता गच्छद्भिः, स्वैः निजैः, इक्षणैः नेत्रैरपि, हिषां शत्रूणां, प्रतीति शेषः, आग्नेयम् अस्त्रं समतनोत् विस्तारितवान्, ववर्षेत्यर्थः। शार्दूलविक्रीडितं वृत्तम्॥ ३०॥

विश्वामित्रः । (सनीवारं दशरथबाहुमालोक्य) । राजर्षे ! वशिष्ठशिष्य !—

संवृत्तोऽयं यदि तव भुजच्छायया सम्प्रतीन्द्रो
निर्विघ्नश्रीरियमभिनवा कौटशी ते प्रशस्तिः ? ।
दृष्ट्वाकूणा लिखितपठिता स्वर्वधूगण्डपीठ-
क्रीडापत्रप्रकरमकरीपाण्डुगाल्यं हि वृत्तिः ॥ ३१ ॥

दशरथः । भगवन् सर्वाङ्गतनिधे ! (छ) भगवन्तमनुगन्तुमिति प्रत्युक्तिकया के वयम् ? (ज) । एवं किल त्रिशङ्कुसङ्कीर्त्तनोपाख्यानपारदृश्वानः (झ) पौराणिकाः कथयन्ति—

त्रासोत्कम्पत्रिदशपरिषन्मौलिमाणिक्यमाला-
बालादित्यप्रकरकिरणस्मेरपादारविन्दे ।

संवृत्त इति ।—यदि अयम् इन्द्रः तव भुजच्छायया बाहुबलाश्रयेण, सम्प्रति निर्विघ्नश्रीः निर्गता विघ्नविरहिता, श्रीः सम्पत् यस्य तादृशः, संवृत्तः सञ्जातः, तदा इयं ते तव, अभिनवा नूतना, प्रशस्तिः प्रशंसा, सुख्यातिरित्यर्थः, कौटशी ? का ? नेयं तव अभिनवा प्रशस्तिः, आप तु कुलक्रमागतैवेत्याह. दृष्ट्वाकूणेति ।—स्वर्वधूना सुरसुन्दरीणा, गण्डपीठेषु कपोलदेशेषु, यः क्रीडापत्रप्रकरः विलासार्थं विरचितपत्रावलीसमूहः, तत्र या मकरी मकराख्यजलजन्तुस्त्री चित्रितेति भावः, तस्याः पाण्डुगाल्यं रचेति यावत्, असुरभयदूरीकरणेन तासां चेतसः प्रफुल्लतासम्पादनद्वारा इति भावः, दृष्ट्वाकूणा लिखितपठिता लिखिता पठिता च, प्रसिद्धेति यावत्, वृत्तिः व्यापारः, कुलधर्म इत्यर्थः । मन्दाक्रान्ता वृत्तं, "मन्दाक्रान्ताम्बुधि-रस-नगैर्मो भ-नौ तौ गयुग्मम्" इति तल्लक्षणात् ॥ ३१ ॥

(छ) सर्वाङ्गतनिधे ! सर्वाश्रयाश्रय !

(ज) भगवन्तम् अनुगन्तुम् । इति प्रत्युक्तिकया वचन-प्रतिग्रहणेनेत्यर्थः । अर्थं किं ? न केऽपीत्यर्थः, न वयमित्याशयः ।

(झ) त्रिशङ्कुरिति ।—त्रिशङ्कोः तदाख्यनृपतेः, सङ्कीर्त्तनं चरितवर्णनं यत्र तादृशं, यत् उपाख्यानम् आख्यायिका, तत्र पारदृश्वानः पारङ्गामिनः, तदभिज्ञा इति यावत् ।

त्रासेति ।—त्रासेन भयेन, उत्कम्पाः, उच्चैः क्रान्ताः यत्राः तदाभूताः, या त्रिदश-

प्राचीमेतां भुवनरचनामन्यथा निर्मिमाणे
कार्पण्योक्तीस्त्वयि रचितवानन्तरायं महेन्द्रः ॥ २२ ॥

(विदूषकः)।

जवादाराद्धुं त्वामुपनमति वर्गे दिविषदा-
मपव्यग्रो मन्दैरजनि रथहंसैः कमलभूः।
नियच्छामो जिह्वां न तव चरितेभ्यः किमुत ते
सुधाम्भ्रीचीनामतिपतति वाचामवसरः ॥ २३ ॥

(अञ्जलिं बद्ध्वा)। भगवन्! प्रसीद तावत्; उत्तरोत्तरेषां

परिषत देवसभा, सभाच्छटेवेन्द्रनिलयं, तस्या मौलिषु किरीटेषु, या माणिक्यमाला माणिक्याख्यरत्नविशेषसञ्जः, ता एव बालादित्यप्रकरविरचा: नवोदितबालसूर्यप्रभाः, तैः स्वं विकसितं, रञ्जितमिति भावः, पादारविन्दं चरणकमलं यस्य तथाभूते, त्वयि भवति, एतां वर्त्तमानां, प्राचीं पूर्वतनीं, विधात्रकृतामित्यर्थः भुवनरचनां जगत्सृष्टिम्, अन्यथा अन्येन प्रकारेण, निर्मिमाणे कुर्वाणे सति, महेन्द्रः देवराजः, कार्पण्योक्तीः दीनवचनानि, 'कृपया एवं मा कृत मा कृत' इत्येवं रूपेणार्त्तस्वरेण प्रार्थनावाक्यानीति यावत्, अन्तरायं विघ्नं, सृष्टवानिति शेषः, रचितवान् कृतवान्। पुरा हिरण्यां सृष्टिं कर्तुमुद्यतं विधात्रिमं भयोद्विग्ना देवाः समुपेत्य पादपतनेन दैन्यवचसा च प्रणयानासुरिति पुराणवार्त्ता। मन्दाक्रान्ता वृत्तम् ॥ २२ ॥

जवादिति।—दिविषदां देवानां, वर्गे गणे, त्वां भवन्तम्, आराद्धुं सन्तोषयितुं, जवात् वेगात्, सत्वरमिति यावत्, उपनमति उपगच्छति सति, मन्दैः मन्थरगामिभिः, रथहंसैः रथयोजितहंसैः, उपलक्षितः, हंसवाहितरथारूढ इत्यर्थः, कमलभूः ब्रह्मा, अपव्यग्रः अत्युत्कण्ठित इत्यर्थः, अजनि संवृत्तः, हंसानां मन्थरगामितया सत्वरं गन्तुमक्षमत्वादिति भावः; वयं तव चरितेभ्यः चरितवर्णनेभ्यः, जिह्वां रसनां, न नियच्छामः न निवारयामः, किमुत? अत्र किं वक्तव्यम्? नैव तव चरितवर्णने निवर्त्तामहे इत्यर्थः; यद्वा—किमुत इति विकल्पे अथवा इत्यर्थः, "वाहो उताहो किमुत विकल्पे किं किमुत च" इत्यमरः; सुधाम्भ्रीचीनाम् अमृतसदृक्षरीणां, पीयूषसदृशमनोहारिणीनामित्यर्थः, ते तव वाचाम् अवसरः समयः, अतिपतति अतिवर्त्तते, अमृतोपमानि तव वचनानि तव वचनावसरमदृष्ट्वैव प्रसरन्ति इत्यर्थः, किमर्थमागमनं श्रोतुमिच्छानीति भावः। शिखरिणी वृत्तम् ॥ २३ ॥

महोत्सवानां (अ) कदाचिदपि न तृप्यन्ति पुंसां हृदयानि, यदियं त्वदुपस्थानसुलभसद्भावनाऽतिप्रसङ्गसङ्कीर्तनत्तर्कौ (ट) मे चित्तवृत्तिर्नियोगानुग्रहाय स्पृहयति। अपि च—

एताभिस्त्वव कौतुकोक्तिभिरपि त्रैविद्यमूर्त्तेरिव
त्वष्टस्यामरशिल्पिना दिनकृतोऽवच्छेदवेदाक्षरैः।
पूता: स्मो वयमद्य यद्यपि तदप्याम्नामपि स्यामहो!
वोढुं विष्टिरनर्घता रघुकुले कल्पान्तमुन्मीलतु॥ ३४॥

विश्वामित्रः। (विहस्य)। ऐन्दुमतेय! (ठ) किमन्यत् नियोज्यं (ड)—

निर्मुक्तशेषधवलैरचलेन्द्रमन्थ-
सङ्क्षुब्धदुग्धमयसागरगर्भगौरैः।

(अ) उत्तरोत्तरेषाम उत्तरोत्तरवर्त्तिनाम्। महोत्सवानामिति अत्रापि षष्ठी।

(ट) त्वदिति।—तव उपस्थानेन उपस्थित्या, सुलभः सुप्रापः, स्वयमुपनत इत्यर्थः, यः सद्भावनाऽतिप्रसङ्गः समादरातिशयः, तस्य सङ्कीर्त्तने, तत्तर्कौ नटौ, तत्सङ्कीर्त्त्यर्थः।

एताभिरिति।—यद्यपि वयम् एताभिः पूर्वोक्ताभिः, कौतुकोक्तिभिः परिहास वचनैः, अमरशिल्पिना विश्वकर्मणा, त्वष्टस्य तनूजस्य, आचार्यत्वे समारोप तदृषभेण नन्दप्रभोक्तसंज्ञेत्यर्थः, "तष्ट त्वष्टा तनूजते" इत्यमरः, त्रयाणां वेदाना समाहारः त्रिवेदी, सा एव त्रैविद्यं, तत् मूर्त्तिर्यस्य तस्याभूतस्य त्रयीमयशरीरस्ये त्यर्थः, दिनकृतः सूर्यस्य, अवच्छेदा एव खण्डभूतान्येव, यानि वेदाक्षराणि तैरि पूताः स्म पवित्रीकृता भवामः। पुरा किल तेजोऽवहनाया सूर्यपत्न्या संज्ञया पित विश्वकर्माऽभिधित: सूर्यं यन्त्रोल्लिखितं कृत्वा किञ्चित क्षीणतेजसमकरोदिति पुराणम तदपि तथाऽपि, आज्ञा भवत: आदेशं, वोढुं स्वीकर्तुं, विष्टिः कर्मकरः, "विष्टि कर्मकरे विषु" इति मेदिनी; सा भवेयम्, अहो। अनर्घता अमूल्यता, असाधारण्य मित्यर्थः, अर्थिजनपूरणे इति भावः; कल्पान्तम् आप्रलयं, रघुकुले उन्मीलतु प्रसरतु शार्दूलविक्रीडितं वृत्तम्॥ ३४॥

(ठ) ऐन्दुमतेय! इन्दुमतीतनय!

(ड) नियोज्यम् आदेष्टव्यं, वक्तव्यमिति यावत्।

राजन्नदं बहुलपक्षदलन्मृगाङ्क-
च्छेदोज्ज्वलैस्तव यशोभिरशोभि विश्वम् ॥ २५ ॥

पुनरिदानीमपि—

यशःस्त्रीभानुच्चैरुपचितु चकोरप्रणयिनी-
रसज्ञापाण्डित्यच्छिदुरशशिधामभ्रमभरान्।
अपि त्वत्तेजोभिस्तमसि शमिते रक्षतु दिशा-
मसौ यात्रामैत्रीं नभसि नितरामम्बरमणिः ॥ २६ ॥

किन्तु कतिपयरात्रमायुधमभ्रोचा (ढ) रामभद्रेण सन्नि-

निर्मुक्तेति।—हे राजन्! निर्मुक्ताः मुक्तकञ्चुकः, निर्मोकरहितः इत्यर्थः, "निर्मुक्तो मुक्तकञ्चुकः" इत्यमरः, यः शेषः फणिनां नागः, तद्वत् धवलानि शुभ्राणि तैः, अचलेन्द्रः मन्दरगिरिः, तेन मथ्यः विलोडकः, तेन क्षुब्धः, समुच्छलितः, यः दुग्धमयसागरः क्षीरोदधिः, तस्य गर्भवत् अभ्यन्तर इव, गौराणि तैः, तथा बहुलपक्षे कृष्णपक्षे, "बहुला गोलिकायां... । पुंस्यो कृष्णपक्षे च—" इति मेदिनी, दलन् उन्मीलन्, यः मृगाङ्कच्छदः चन्द्रखण्डः, तद्वत् उज्ज्वलानि तैः, बहुलयद्यपि शुक्लपक्षापेक्षया चन्द्रस्य सृष्णीयत्वद्योतनायेति बोध्यम्; तव यशोभिः विश्वं जगत्, अशोभि अलङ्कृतम्। वसन्ततिलकं वृत्तम् ॥ २५ ॥

यश इति।—चकोरप्रणयिनीनां चकोरीणां, या रसज्ञा जिह्वा, "रसज्ञा रसना जिह्वा" इत्यमरः, तस्याः पाण्डित्यं नैपुण्यं, चन्द्रिकापानचातुर्यमिति यावत्; उक्तञ्च, "चकोर्य्य एव चतुरास्चन्द्रिकापानकर्मणि" इति, तस्य छिदुरः भेदकः, यद्यपि चन्द्रिकाभ्रमात् तस्याः पाण्डित्यच्छद इति वाच्यम्; अशिधामभ्रमभरः चन्द्रकिरणभ्रान्त्यतिशयः येषु तान्, उच्चैः महतः, यशःस्त्रीभान् कीर्त्तिराजीन्, उपचितु वर्द्धयितुं नय, तथा तव तेजोभिः प्रतापैः, किरणैश्च, तमसि तु:खे अन्धकारे च, शमिते शान्तिं गमितेऽपि, असौ अम्बरमणिः सूर्यः, नभसि आकाशे, दिशां यात्रामैत्रीं गमनेन मित्रता, नितरां केवलं, रक्षतु; तवैव तेजसा तत्कार्य्ये साधिते तस्य उदयस्य निरर्थकत्वेऽपि केवलमिदानीं दिशु भ्रमणं पूर्वमैत्रीरक्षणार्थमिति तात्पर्य्यम्। भ्रान्तिमान् अलङ्कारः, तदुक्तं दर्पणे—"साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता" इति। शिखरिणी वृत्तम् ॥ २६ ॥

(ढ) आयुधसभ्रोचा आयुधेन अस्त्रेण सह, अञ्चति गच्छति, विचरतीत्यर्थः; तादृशेन अस्त्रसहचरेण, अस्त्रधारिणेत्यर्थः। "यः सहाञ्चति सध्र्यङ् सः" इत्यमरः।

हितवैतानव्रतानाम् (ण) अस्माकमाश्रमपदं सनाथीकरिष्यते (त) । अपि च—

मध्येकृत्य घनं धिनोति जलधिः खैरम्बुभिर्मेदिनीं
हन्ति स्वैः किरणैस्तमिस्रमरुणं कृत्वाऽन्तराले रविः ।
त्वं रामान्तरितस्य पालय निजैरेव प्रतापैः प्रजा-
मौदुम्बरोऽपि परोपकारसुहृदामेष स्वभावो हि वः ॥ ३७ ॥

किञ्च—

दुष्टः साक्षादसुरविजयी नाकिनां चक्रवर्त्ती
मात्स्यो न्यायः कथयति यथा वारुणो दण्डनीतिः ।

(ण) वितानेति ।—वितानम् उपरिष्टात्, वैतानव्रतं यज्ञकर्म येषां तपोधनानाम् । "वितानो यज्ञ उल्लोचे" इति मेदिनी ।

(त) सनाथीकरिष्यते सरक्षकं करिष्यते, रक्षिष्यते इत्यर्थः ।

मध्येकृत्येति ।—जलधिः समुद्रः घनं मेघं मध्येकृत्य द्वारीकृत्येति यावत्, स्वैः अम्बुभिः जलैः, मेदिनीं पृथ्वीं, धिनोति तर्पयति, रविकरैराकृष्टं जलैर्जलमूर्ध्वमुत्थाय मेघो भूत्वा वृष्टिरूपेण पततीति प्राग्वात् जलधिजलस्य मेघद्वारेण मेदिनीतर्पणं बोध्यम्, रविः सूर्यः, अरुणं स्वल्पावधिम्, अन्तराले मध्ये, कृत्वा स्वैः किरणैः तमिस्रं तिमिरं, हन्ति नाशयति, त्वञ्च रामेण अन्तरितः, रामः अन्तः मध्ये, इतः गतः, अवस्थित इत्यर्थः यस्य तादृशः इति वा रामान्तरितः, राम मध्ये कृत्वेत्यर्थः, निजैरेव प्रतापैः तेजोभिः, प्रजा प्रकृतिवर्गं, पालय रक्षस्व, परोपकारे परहितसाधने सुष्ठु हृत अन्तःकरणं येषां तथाभूतानां, वः युष्माकम्, ईदृक् एवंविधः, औदुम्बरोऽपि ऊर्णनाभोऽपि, एष स्वभावः हि प्रकृतिरेव । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः, तदुक्तं दर्पणे—"सामान्यं वा विशेषेण विशेषस्तेन वा यदि । अर्थोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा । साधर्म्येणैवं वैधर्म्येण च स द्वेधा । साधर्म्येणेदं वैधर्म्येण च समर्थ्यते । "साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा मतः ॥" इति । और्णनाभिकीकृतं वृत्तम् ॥ ३७ ॥

दुष्ट इति ।—नाकिनां देवानां, चक्रवर्त्ती प्रभुः, दुष्टः इत्यर्थः, असुरविजयी असुरानाशेन जेता, न तु असुरमरणेनेति भावः, किन्तु असुरविजयी असुरभावजयी चेति; किञ्च, असुरविजयी इत्यनेन तव स्व-स्व कृपादिदुर्लभत्वं, तेन च तव दुष्कृतिनो दुःखं पापबहुत्वमिति च व्यञ्यते, तव तु न तथेति; यद्वा—असुरविजयित्वात्

पातालेन्द्रादहिभयमथास्त्येव नित्यानुषक्तं
तत्र पुण्यैरजनि भवता वीर ! राजन्वती भूः ॥ १८ ॥

छायया । (सविषादमात्मगतम्) । कथमिदमस्माकं सकललोक-शोकापङ्करणशीलशीतलेभ्यः कौशिकप्रसादेभ्यो रामभद्रप्रवास-वैमनस्यमुत्पत्स्यते (थ) !! दृष्टं वा निःशेषानन्दनिःस्यन्दिनो-

---

र्ध्वदेव सङ्ग्रामाङ्गणस्थ तस्य प्रजापालने नैव दृष्टिरिति व्यज्यते, तव तु न तथेति ; किञ्च, असुराणां विजयः असुरवर्गविजय इत्यर्थः, स चास्तीति सत्ताकः असुरैर्विजित इत्यर्थः दैवीमाहात्म्यादिव महिषासुरादिभिर्वशङ्गतस्वा दर्शनात् ; अतस्तस्य प्रजावत्सलत्वात् तद्राज्ये स्थितिर्न युक्ता, त्वं न कदाऽपि विजित इति च व्यज्यते । वाहुकी बलवत्सख्यिनी, दण्डनीतेः दुष्टानां निग्रहाय विरचितं नीतिशास्त्रं, सख्यः सख्यवत्यौ, न्याय व्यवहारः, यथा यद्वृत्तयर्थः, तथा कथयति प्रकाशयति, बलवती हि सेनाधिपतेः तत्प्रजाश्च सत्यदृष्टी सज्जनरा, तेषां व्यवहारः सज्जनोचितदुर्बलभक्षकत्वं, तथा च, बलवत्सख दण्डनीतेः साधूनामत्यधनानां सङ्घातनैर्बलवद्भिर्दण्ड इति फलं, न तु तत्त्वतो दुष्टनिग्रहपरिपालितं तद्राज्ये स्थितिर्न युक्तेति व्यज्यते । अथ किञ्च, पातालेन्द्रात् वासुकेः, अहिभयम् सर्पभीतिः, नित्यानुषक्तं सततसम्बद्धम्, अस्त्येव ; अहेभयमित्यत्र पञ्चम्याः भयम् अहीनां भयमिति अर्थः ; तथा च, पातालेः राज्ञो वासुकेः, तत्प्रजाश्च सर्पाः, तेः सह वासो सख्युरेव, तदुक्तं —"सखर्षे न यतेऽहं वासो सख्युरेव न सशयः" इति, सर्पाश्चास्य न वाधुक्यैर्भयं, कदाऽप्यान् गरुडाय प्रदास्यतीति, तत्र युक्तस्तव वास इति व्यज्यते । हे वीर ! तत् तस्मात्, न, अस्मत्, पुण्यैः सुकृतैः, भवता भूः पृथिवी, राजन्वती सुराजप्राप्तवती, न्यायपरायणराजाधिष्ठिता इत्यर्थः, "सुराज्ञि दैवे राजन्वत्" इत्यमरः, अजनि जाता, तव राज्ये न कथिदपि प्रजानां क्लेश इति भावः । मन्दाक्रान्ता वृत्तम् ॥ १८ ॥

(व) सकलेति ।—सकलानां लोकानां जनानां, शोक एव शत्रुः तदस्य निर्दिष्टं शत्रुमिति यावत्, तस्य शत्रुरूपस्य उत्पाटने, शोकं क्षमाभावं यैषा तथाभूताः, शीतलाः शीतस्पर्शाः तेभ्यः । कौशिकप्रसादेभ्यः विश्वामित्रानुग्रहेभ्यः । रामभद्रेति ।—रामभद्रस्य प्रवासेन विदेशगमनेन, वैमनस्यं विमनस्कत्वं, विषाद इत्यर्थः, मम इति शेषः । उत्पत्स्यते उद्भविष्यति ।

नामपौन्डुकरकन्दलोनां कमलवनोमीलनं कलङ्कस्थानम् (द)। (विश्वा)। का गतिः (ध)—

कूर्मराजभुजगाधिपगोत्र-
ग्रावदिक्करिभिरेकधुरीणः।
मां प्रसूय कथमस्तु विगोतो?
हा! परार्थविमुखो रघुवंशः॥ १९॥

विश्वामित्रः। (सस्मितम्)। राजर्षे! ममकारो हि राजपुत्रेषु राज्ञामुपलालनक्लेशाय केवलम्, उपयोगस्तु प्रजानाम् (न)। यथैतत्—

(द) वा अथवा। निःशेषेति।—निःशेषः परिपूर्णः, निरतिशय इत्यर्थः, न आनन्दः तस्य निःस्यन्दिनोनां वर्षणोनाम्। इन्दुकरकन्दलोनां चन्द्रकिरणनिचयानाम्। कमलवनोनिमीलनं क्षुद्रपद्मवनसङ्कोचनं, पद्मसङ्कोचसाधनमित्यर्थः, कलङ्कस्थानं कलङ्करमित्यर्थः। सकलजगदुःखहरणाच्च सदोदयदुःखजनकं रागदानन्दिनचन्द्रस्य पद्मनिमीलनमिवेति तात्पर्यम्।

(ध) गतिः उपायः।

कूर्मेति।—कूर्मराजः कमठपतिः, पृष्ठे सागर-वनसहितसप्तद्वीपवसुन्धराधारक इति भावः, भुजगाधिपः वासुकिनागः, शिरसि पृथ्वीधारकत्वात् इति भावः, गोत्रपाषाणः कुलपर्वताः, दिक्करिणः दिग्गजाः तैः, एकधुरीणः समं मधुरस्वरः, पृथिव्याः भारवहनमीक इत्यर्थः, रघुवंशः मां प्रसूय कथं केन प्रकारेण, परार्थविमुखः परकार्यसाधने पराङ्मुखः सन्, विगोतः निन्दितः, अस्तु? भवतु? हा! इति खेदे, कूर्मराजादयः सदेव तत्तदवसरकरणरूपकार्यकारित्वेन यथा परार्थसाधनपराः, रघुवंशोऽपि तथा, किन्तु यदि रामप्रदानेऽपि पराङ्मुखो भवेयं, तदा रघुवंशे मयैव कलङ्कः पातित इतीति भावः॥ १९॥

(न) ममकारः ममत्वबुद्धिरित्यर्थः। ममेत्यव्ययम्। उपलालनेति।—उपलालनं सत्पथेन प्रवेरपोषणं, तेन क्लेशः तस्मै, यद्वा—उपलालने सयत्नं पोषणे, रक्षणवर्धने इत्यर्थः, यः क्लेशः कष्टं तस्मै। उपयोगः उपकारः। राज्ञां ममत्वबुद्ध्या निजपुत्रोपलालनं केवलं क्लेशकरं, न तु किञ्चिदपि लोकोपकारकं, परन्तु भाविप्रजानां सुखविधानार्थमिति भावः।

कष्टा वैधव्यव्यथा कष्टो नित्यमुद्वहनक्लमः।
श्रवणानामलङ्कारः कपोलस्य तु कुण्डलम् ॥ ४० ॥

दशरथः। भगवन्! परमनुगृहीता वयमेवं तत्रभवता सम्भाव्यमानाः (प); किं पुनरकृतास्त्रः क्षीरकण्ठो (फ) वत्सोऽयमिति मुग्धोऽस्मि (ब)।

विश्वामित्रः। (विहस्य)। सखे! तत्रभवन्तं मैत्रावरुणिमृषिं पुरोधाय चरितब्रह्मचर्य्यव्रतस्य (भ) धनुर्वेदसंस्कारास्त्रावदस्य क्षत्रास्त्रप्रसादादस्मास्त्रायतन्ते (म)।

दशरथः। (सविनयोपरोधम्)। भगवन्! उच्छ्वसितमपि (य) रघुराजवीजिनां त्वदायत्तमेव, किमुत कार्मुकविद्यासम्प्रदायः। मन्ये, सहस्रकिरणकुलैकपक्षपातेनैव (र) सहस्रं वत्सरान्

दृष्टान्तेनैतत् समर्थयति, कष्टेति।—श्रवणानां श्रोत्राणां, वैधव्यजा वैधव्यजनिता पीडा, कुण्डलधारणार्थमिति शेषः, कष्टा क्लेशदायिनी, तथा नित्यं सततम्, उद्वहने धारणे, यः क्लमः क्लान्तिः, परिश्रम इत्यर्थः, सोऽपि कष्टः, तु किन्तु, कुण्डलं कर्णभूषणं, कपोलस्य गण्डदेशस्य, अलङ्कारः शोभाजनकमित्यर्थः ॥ ४० ॥

(प) सम्भाव्यमाना सादरमभ्यर्थ्यमाना इत्यर्थः।

(फ) किं पुनः किन्तु इत्यर्थः। अकृतास्त्रः अधिगतधनुर्वेद इत्यर्थः। क्षीरकण्ठः दुग्धपायी, दुग्धपोष्य इति यावत्।

(ब) मुग्ध मूढः, किंकर्त्तव्यविमूढ इति यावत्।

(भ) पुरोधाय पुरोहितं कृत्वा। चरितेति।—चरितम् अनुष्ठितं, ब्रह्मचर्य्यव्रतं येन तथाभूतस्य, वाशिष्ठेनोपनीतस्येति भावः।

(म) क्षत्रास्त्रस्य मम पूर्वप्रपितामहस्य, धनुर्वेदोपदेष्टुः गुरोरिति भावः, प्रसादात् अनुग्रहात्। आयतन्ते आयत्ताः इत्यर्थः, धनुर्वेदसंस्कारो मयैवास्य सम्पादनीय इति भावः।

(य) उच्छ्वसितं जीवनम्। रघुराजेति।—रघुराजः जीमूत आदिपुरुषः प्रधानपुरुषो वा येषां तथोक्तानां रघुवंशीयानामित्यर्थः।

(र) मन्ये मन्ये। सहस्रेति।—सहस्रकिरणस्य सूर्य्यस्य, कुलं वंशः, तस्मिन् एव अद्वितीयः, पक्षपातः स्नेहः तेन।

भगवन्तं क्षत्राश्रमुपासीनो दिव्यास्त्रमन्त्रोपनिषदमध्यगीष्ठाः (ल)।

विश्वामित्रः। अलं च ते रामभद्रेऽपि बालोऽयमित्यलीकसम्भावनया (व); दिवस्पृथिव्योस्तिमिरतिरस्करिणीं तरणिरणुतरोऽपि तेजसा तिरस्करोति (श)।

दशरथः। (सलज्जितम्)। भगवन्! कुशिकवंशकेतो! कस्य तलिनी (ष) तादृशी जिह्वा, यस्त्वामपि ब्रुवाणमधरोत्तरेणाभिसन्धत्ते? (स) (अपवार्य)। (ह) वामदेव! एवमत्रभवान् कौशिको ब्रवीति।

वामदेवः। राजर्षे! किमत्र प्रष्टव्या वयम्?—

कौशिकोऽर्थी भवान् दाता रत्नयोनिर्महाक्रतुः।
रक्षिता रामभद्रस्येदनुमन्यामहे वयम्॥ ४१॥

(ल) उपालीनः आराधयन्। दिव्यास्त्रेति।—दिव्यानि अस्त्राणि तेषां मन्त्रोपनिषदं मन्त्ररहस्यम्। अध्यगीष्ठाः अधीतवानसीत्यर्थः।

(व) बालोऽयं शिशुरयम्। अलीकसम्भावनया वृथाज्ञानेन, मिथ्याज्ञत्वेत्यर्थः।

(श) तरणिः सूर्यः "द्युमणिस्तरणिर्मिहिरः" इति सूर्यपर्यायो अमरः। अणुतरोऽपि अतिक्षुद्रोऽपि, तेजसा किरणेन प्रतापेन च, दिवस्पृथिव्योः द्यावा-भूम्योः, तिमिरमेव अन्धकारमेव, तिरस्करिणीं अवनिकां सां, तिरस्करोति अपनयति, तिरस्यतीत्यर्थः।

(ष) तलिनी खच्छा, "परिष्कृतेति यावत्, "तलिनं विरले क्लीबे स्वच्छेऽपि वाच्यलिङ्गकम्" इति विश्वः।

(स) अधरोत्तरेण अधरः वादः, उत्तरः प्रतिवादः तेन वादप्रतिवादेनेत्यर्थः। यद्वा—अधरोत्तरेण स्वल्पमहता, स्वल्पार्थकेन महार्थकेन वा वाक्यपद्धतेनेति भावः। अभिसन्धत्ते बाधते, पराजयते इति यावत्।

(ह) अपवार्य, "रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते। नाट्यधर्मीमनाभोगात् श्रुतं तदपवारितम्॥" इति लक्षणोक्तमपवारितं कृत्वा, अन्यतो मुखं परावृत्येत्यर्थः।

कौशिक इति।—कौशिकः विश्वामित्रः, अर्थी याचकः, भवान् दाता, महाक्रतुः

अपि च—

जगतीभारखिन्नानां विश्रामो भवतामयम्।
यत् यथाकामसम्पत्ति-प्रीतार्थिमुखदर्शनम् ॥ ४२ ॥

किं च विशेषेण—

पूरयितुमर्थिकामान् मैत्रावरुणेन गोत्रगुरुणा ते।
सन्दिग्धता सन्दिष्टः समाधिदृष्टोऽयमेवार्थः ॥ ४३ ॥

दशरथः। वामदेव! एवमेतत्—

ध्यानमयदृष्टिपातप्रमुषितकालाध्वविप्रकर्षेषु।
विषयेषु नैष्ठिकानां सर्वपथीना मतिः क्रमते ॥ ४४ ॥

(विमृश्य)।

नङायज्ञः, रक्षणीयः, चेत् यदि, रामभद्रः रक्षिता रक्षायुक्तां, यज्ञस्येति भावः, भवेदिति शेषः, तदा वयम् अनुतप्यामहे अनुशोदामहे। अनुष्टुप् छन्दम् ॥ ४१ ॥

जगतीति।—जगत्याः पृथिव्याः, भारेण पालनरूपकार्य्यातिशयेन, खिन्नानां क्लिष्टानां, म्लानानामित्यर्थः, भवता भवादृशानां भूपालानामित्यर्थः, अयम् एषः एव, विश्रामः श्रान्तिदूरीकरणं, श्रमापनोदनोपाय इति यावत्, यत् यत् कामम् अभिलषितमनतिक्रम्य इति यथाकामं प्राथमाऽनुरूपं दृष्ट्वं, तच्च सम्पत्त्या लाभेन, प्रीतानां हृष्टानाम्, अर्थिनां याचकानां, मुखदर्शनम्, अभिलाषानुरूपधनप्राप्त्या याचकानां प्रफुल्लमुखदर्शनजनितानन्दानुभव एव भवता चित्तविनोदनोपाय इति निष्कर्षः। अनुष्टुप् छन्दम् ॥ ४२ ॥

पूरयितुमिति।—अर्थिनां याचकानां, कामान् अभिलाषान्, पूरयितुं सफलयितुं, सन्दिग्धता वाचिकं प्रेषणता, ते तव, गोत्रगुरुणा कुलाचार्य्येण, मैत्रावरुणेन वसिष्ठेन, अयमेवार्थः विश्रामलाभ रामभद्रालङ्घनविषय इत्यर्थः, समाधिदृष्टः योगबलेन प्रत्यक्षीकृतः, अत एव सन्दिष्टः सन्मुखेन वाचिकतया प्रेषित इत्यर्थः। आर्य्या छन्दम् ॥ ४३ ॥

ध्यानेति।—नैष्ठिकानां निष्ठा उत्कर्षः, तत्र आसक्ताः नैष्ठिकाः तेषाम् उत्कर्षसक्तिनां, तपःसिद्धया उत्कर्षे प्राप्तानामित्यर्थः, निष्ठा व्रतं वा प्रयोजनमेषां नैष्ठिकानां व्रतपराणां, यम-नियमादिना सिद्धिं प्राप्तानामित्यर्थः, "निष्ठोत्कर्ष-व्यवस्थयोः। क्लेशे सिद्धौ तथाग्नेये निर्वाणे याचने व्रते" इति शब्दावली; सर्वपथीना सर्वमार्गप्रचारिणी, सर्वतोमुखीत्यर्थः, मतिः बुद्धिः, ध्यानमयेन चित्तज आत्मनिष्ठविषयिणी,

क्रियाणां रक्षाये दशरथमुपस्थाय विमुखे
मुनौ विश्वामित्रे भगवति गते सम्प्रति गृहान्।
तपोलेशक्लेशादुपशमितविघ्नप्रतिभये
प्रवृत्ते यष्टुं वा रघुकुलकथैवास्तमयते ॥ ४५ ॥

(मुनिं प्रति)। जगद्गुरो! गाधिनन्दन!—

त्वं चेद्दौक्षिष्यमाणो मे रामभद्रं प्रतीच्छसे।
तत्रः पतिव्रताद्वृत्तमियं चरतु मेदिनी ॥ ४६ ॥

करणात्मकेन, दृष्टिपातेन ज्ञानयोगेनेत्यर्थः, प्रकर्षेण अत्यर्थं, मुदितः अपहृतः, निराकृत इत्यर्थः, आसन्नः अतीतानागतरूपस्य, अध्वनः मार्गस्य च, विप्रकर्षः दूरत्वं येषां तथाभूतेषु, विषयेषु वस्तुषु, क्रमते प्रवरति, योगबलेन सर्वमवगच्छतीत्यर्थः। आर्या वृत्तम् ॥ ४४ ॥

क्रियाणामिति।—क्रियाणां यज्ञानामिति यावत्, रक्षाये रक्षणाय, दशरथम् उपस्थाय उपास्य, दशरथसमीपमागत्येत्यर्थः, भगवति सुनौ विश्वामित्रे विमुखे पराङ्मुखे, अभव्यकामे इति भावः, गृहान् आश्रमान्, गते प्रस्थिते, तथा तपोलेशस्य किञ्चिन्मात्रतपसः, क्लेशात् व्ययात्, यद्वा—तपसि तपस्यर्थाया, यः लेशक्लेशः ईषत्-क्लेशः तस्मात्, खल्वक्लेशार्जिततप प्रभावादित्यर्थः, न तु महता क्लेशेनार्जिततपःप्रभावात् ताहशतपःप्रभावस्य एतत्क्षुद्रविघ्नोपशमने निष्प्रयोजनत्वादिति भावः, उपशमितं निरस्तं, विघ्नेभ्यः यज्ञविघातकनिशाचरेभ्यः, प्रतिभयं त्रासः येन तथाभूते, तस्माद्दाढ्य विनाऽपि ईषत्मात्रेण तपःप्रभावेणैव यज्ञविघ्ने निराकृते सतीति भावः; यष्टुं यज्ञं सम्पादयितुं, प्रवृत्ते वा प्रक्रान्ते सति, रघुकुलस्य कथैव अर्थिना याचनापूरकत्ववार्तैव, अस्तम् अदर्शनं, लोपमिति यावत्, अयते गच्छति। विश्वरिणी वृत्तम् ॥ ४५ ॥

त्वमिति।—दौक्षिष्यमाणः दीक्षां प्रवेक्ष्यन्, यज्ञे दीक्षितो भविष्यन्नित्यर्थः, त्वं चेत् यदि, रामभद्रं प्रतीच्छसि अपेक्षसे, प्रत्यवेक्षक करोषि इत्यर्थो वा, तत् तदा, नः अस्माकम्, इयं मेदिनी पृथिवी, अयोध्या भूमिरित्यर्थः, पतिव्रताद्वृत्तम् एकपतिकाया नियमं, "प्रवासे नास्ति क्षमा" इत्यादिकमपीति यावत्, चरतु अनुतिष्ठतु; राम एवात्मा यस्याः पतिः, तत्र त्वया सह गमने प्रवाहित्वात् अस्याः प्रोषितभर्तृकतया तद्विरहजनितव्याधिकं भवति, तथा च, इयं भूमिः रामविरहेण नितरां व्यथिष्यते, तत् तस्मात् रामः प्रत्यवेक्षणीय इति भावः। अनुष्टुप् वृत्तम् ॥ ४६ ॥

(नेपथ्याभिमुखः)। कः कोऽत्र भोः!

(प्रविश्य)।

दौवारिकः। किमाज्ञापयति देवः?

दशरथः। आह्वयतां रामभद्रः।

वामदेवः। लक्ष्मणश्च।

दशरथः। (सात्मगतम्)। ऋषे! पृथक्प्रयत्नापेक्षो नाथमर्थः (क)। न खलु प्रकाशमन्तरेण (ख) तुहिनभानुरुज्जिहीते।

(दौवारिकः निष्क्रान्तः)।

(ततः प्रविशतो रामलक्ष्मणौ)।

रामः। (सहर्षम्)—

सुराधीशक्रोधाज्जगटपरथा कर्त्तुमपरे
पुराणब्रह्माणो भुवनपितरः सप्त च कृताः।
धृतास्तुष्टेनामी वह्निरपि च वैश्वानरपथात्
कथा पौराणी यच्चरितमिति ह स्म प्रथयति॥ ४७॥

(क) पृथगिति।—अयम् अथः लक्ष्मणाह्वानरूप इत्यर्थः, पृथक् स्वतन्त्रतया, द्वितीयमित्यर्थः, प्रयत्न प्रयासं, न अपेक्षते इति तथोक्तः, रामाह्वानेनैव लक्ष्मणस्यापि आह्वानस्य सिद्धरिति भावः।

(ख) प्रकाश प्रकाशते इति प्रकाशः आतपः, ज्योत्स्ना इति यावत्, "प्रकाशो द्योत आतपः" इत्यमरः। अन्तरेण विनेत्यर्थः। तुहिनभानुः शीतकिरणः, चन्द्र इत्यर्थः। उज्जिहीते उद्गच्छतीत्यर्थः।

सुराधीशेति।—सुराणाम् अधीशः इन्द्रः, तस्मिन् क्रोधः रोषः, तस्माद्धेतोः स्वस्मिन्यज्ञ स्वर्गात् भंशनजनित इति भावः तस्मात् हेतोः, अपरथा अन्यविधम्, एतदनुरूप इतीत्यर्थः, जगत् कर्त्तुं सृष्टुम्, अपरे च अन्ये च, एतज्जगत्सृष्टुः ब्रह्मणः अतिरिक्ताः इत्यर्थः, सप्त सप्तसङ्ख्याकाः, भुवनपितरः जगत्स्रष्टारः, पुराणब्रह्माणः इति यावत्, कृताः सृष्टाः, तथा तुष्टेन अनन्तरमेव इन्द्रादीना प्रतिपादात् प्रीतेन, प्रशमितक्रोधेन सतेति भावः, अमी आत्मना सृष्टाः सप्तसङ्ख्याका भुवनपितरः, वैश्वानरपथात् आग्नेयपथात्, आग्नेयीयप्रदेशविशेषादिति यावत्, यत्र मरीच्यादयः ब्रह्मपुत्राः सप्तर्षयः सन्तीति

कथं, सोऽपि भगवान् विश्वामित्रः स्वयमस्माभिरुपचरिष्यते (ग)!! (इति परिक्रामन् पुरोऽवलोक्य सहर्षातिशयं रूपयन्)। नूनं विनयनम्रयोस्तात-वामदेवयोस्तृतीयः प्रशान्तपावनीया कृतिः (घ) स भगवान् विश्वामित्रो भविष्यति।

लक्ष्मणः। (साश्चर्यमिवतम्)। आर्य!—

अयमयमीदृशप्रथमविस्मयनीयतनु-
र्भुवनभयङ्करोः कथमधत्त कृशोऽपि मुनिः?।
स्थितमिदमेव वा मृदुमनोऽनुषारतमा-
स्तमसि सति ज्वलन्ति सहसैव महौषधयः॥४८॥

भावः, यदि: अस्मिन् प्रदेशे इत्यर्थः, धृतास्त्र आपितास्त्र, इति एवं, पौराणी कथा पुरातनी वार्ता, यस्य विश्वामित्रस्य, आरसं प्रभावमिति यावत्, प्रथयति स विस्तारयति स्म, प्रकटयामास इत्यर्थः। इति पादपूरणार्थोऽनव्ययम्। शिखरिणी वृत्तम्॥४७॥

(ग) उपचरिष्यते सेविष्यते।

(घ) प्रशान्तेति।—प्रशान्ता सौम्या, पावनीया पवित्रताजनकी, आकृतिर्यस्य तथोक्तः।

अयमिति।—अयमयमिति सम्भ्रमे द्विरुक्तिः। अयमयं स एषः, मुनिः विश्वामित्रः, ईदृशेन प्रथमेन प्रकृष्टेन श्रमगुणेन, श्रमगृध्नुत्वादित्यर्थः, विस्मयनीया अद्भुतोया, तनुः शरीरं यस्य तथाभूतः अपि, भुवनानां भयङ्करौ भीतिजनकौ, कृशः क्षीणान्, अङ्गं येन प्रकारेण, अधत्त? धृतवान्? येन स्थितस्य जगतो विघ्नत्वम्, स्थितोयस्य जगतः सृष्टिश्च प्रारब्धेति भावः, वा अथवा, इदमेव स्थितं स्थितिः, सत्यार्थेत्यर्थः, नियम इति यावत्, यत तदेव; क्षीणत्वाः, मनोज्ञाः मनोहारिण्यः, तुषारतमाः तुषारवत अतिशीतलाः, अतिशीत्या इत्यर्थः, महौषधयः दिव्यौषधयः, महाप्रभावसम्पन्नाः पार्वत्यखतादिविशेषाः इत्यर्थः वा, तमसि अन्धकारे, तदाख्ये गुणे च सति, सहसैव ज्वलन्ति द्योतन्ते। क्षोणिजकं वृत्तं—"इय-ऋतु-नागरैर्यतियुतं यदि क्षोणिजकम्" इति तल्लक्षणात्। यस्य तु प्रायुक्तं "यदि भवतो न जौ न-ज ज-ला गुरु तदंटजकम्" इति तदंटजकमेव कृत्वादिरयतियुतं चेत् क्षोणिजकं नाम वृत्तमिति ज्ञातव्यम्॥४८॥

रामः। वत्स लक्ष्मण! एवं दुरवगाहगम्भीरार्थवत्तीयन्ते (ङ) महान्तः। अपि च—

व्रतविघ्नकरीभिरप्सरोभिः
सह जगदस्य निगृह्णतो मृगाक्ष्यः।
नमदमरशिरःकिरीटरोचि-
र्मुकुलितरोषतमांसि चेष्टितानि ॥४९॥

वामदेवः। (दृष्ट्वा सहर्षम्)। कथमागतो रामभद्रः!! (मुनिं प्रति)। भगवन्!—

ब्रह्मज्योतिर्विवर्त्तस्य चतुर्दा देहयोगिनः।
ऋष्यशृङ्गचरोरंशः प्रथमोऽयं महाभुजः ॥५०॥

विश्वामित्रः। (अवलोक्य सहर्षसम्भ्रमम्)। वामदेव! किमुच्यते, आरण्यकेषु (च) किमपि प्रनष्टतमं ब्राह्मण्यमृष्यशृङ्गस्य। न

(ङ) दुरवगाहेति।—दुरवगाहाः दुर्बोध्याः, गम्भीराः गभीरमतयश्च। वितीयन्ते आधीयन्ते प्रतीयन्ते, खीक्रिया चेतः चमत्कुर्वन्ति इति यावत्।

व्रतेति।—व्रतस्य तपसः, विघ्नं विघ्नं, कुर्वन्तीति तत्तीक्ष्णाभिः, अप्सरोभिः देवनर्त्तकीभिः, सह जगत् भुवनं, निगृह्णतः अक्षीकर्त्तुमुद्यच्छतः इत्यर्थः, अस्य मुनेः, नमता प्रणिपतताम्, अमराणां देवानां, शिरःकिरीटानि मौलिस्थमुकुटानि, तेषां रोचिर्भिः प्रभाभिः, चरणपतिताभिरिति भावः, मुकुलितं मुद्रितं, सङ्कुचितमित्यर्थः, उपजनितमिति यावत्, रोषः क्रोध एव, तम अन्धकारः येषु तथाभूतानि, चेष्टितानि चरितानि, गृणन्ति स्तुवन्ति, पौराणिका इति शेषः। पुष्पिताग्रा वृत्तम्—"अयुजि नयुगरेफतो यकारो युजि तु नजौ जरौ गश्च पुष्पिताग्रा" इति तल्लक्षणात् ॥ ४९ ॥

ब्रह्मेति।—महाभुजः, महाबाहुः, अयं राम इत्यर्थः, चतुर्दा चतुर्भागेन, देहयोगिनः शरीरसंयोगनवाप्नुवतः, प्रतिपन्नदेहस्य इत्यर्थः ब्रह्मज्योतिः ब्राह्मं तेजः, तस्य विवर्त्तस्य परिणामभूतस्य, ऋष्यशृङ्गचरोः ऋष्यशृङ्गकृताग्रेवर्त्तियतस्येति भावः, प्रथमः आद्यः, ज्येष्ठ इत्यर्थः, अंशः भागः। अनुष्टुप् वृत्तम् ॥ ५० ॥

(च) आरण्यकेषु अरण्यवासिषु, तापसेषु मध्ये इत्यर्थः। विभाण्डकः ऋष्यशृङ्गस्य जनकः।

केवलममुना वत्सेन ब्रह्मर्षिविभाण्डकः पुत्रवता धुरमारोपितः, दशरथोऽपि ।

दशरथः । भगवन् ! एवमेवैतत्—

ये मैत्रावरुणं पुरोहितवतो वंशे मनोर्जज्ञिरे
तास्ता वैनयिकीः क्रिया विदधिरे येषां च युष्मादृशः ।
तेषामञ्जलिमेष ते दशरथः सम्प्रत्ययी ये पुन-
र्जातास्ते ध्रुवमृष्यशृङ्गतपसामैश्वर्यमिच्छाकृतः ॥ ५१ ॥

(राम-लक्ष्मणावुपसर्पतः) ।

दशरथः । वत्सौ ! भगवानेष निःशेषभुवनमङ्गनीयो (छ) महामुनिः कौशिकः, प्रणम्यताम् ।

राम लक्ष्मणौ । (उपसृत्य) । भगवन् ! विश्वामित्र ! सावित्रौ (ज) राम-लक्ष्मणावभिवादयेते (झ) ।

विश्वामित्रः । वत्सौ ! आयुष्मन्तौ भूयास्ताम् । (इति भुजाभ्यां गृहीत्वा रामं निर्वर्ण्य च सबहुमानम् आत्मगतम्)—

वशिष्ठोक्तैर्मन्त्रैर्दधति जगतामाभ्युदयिकीं
धुरं सम्प्रत्येते दिनकरकुलीनाः क्षितिभुजः ।

ये इति ।—मैत्रावरुणं वाशिष्ठं, पुरोहितवतः पुरतः आपदतः, पुरोहितं कुर्वत इत्यर्थः, मनोः वंशे ये राजानः, जज्ञिरे जाताः, युष्मादृशः भवादृशाः, महर्षय इति शेषः, येषां मनुवंश्यानां, वैनयिकीः विनयाधानहेतुभूताः, ताः क्रियाः शिखादानादिकाः इत्यर्थः विदधिरे कृतवन्तः, ते तव, एषः अहं, दशरथः तेषां मनुवंशीयानाम्, अञ्जलिं प्रान्तदेशम्, शेष इत्यर्थः, युष्माभिः शिक्षितानां राज्ञां मध्ये अहमेव शेष इत्यर्थः, सम्प्रति अनौ एते, ये पुनः इक्ष्वाकवः इक्ष्वाकुवंशीयाः, रामादय इति भावः, जाताः उत्पन्नाः, ते ध्रुवं निश्चयेन, ऋष्यशृङ्गतपसाम् ऐश्वर्ये प्रभावः, माहात्म्यमित्यर्थः । आर्द्रूलविक्रीडितं वृत्तम् ॥ ५१ ॥

(छ) निःशेषेति ।—निःशेषस्य समग्रस्य, भुवनस्य महनीयः पूजनीयः ।

(ज) सावित्रौ सूर्यवंश्यौ ।

(झ) अभिवादयेते प्रणमतः ।

वशिष्ठोक्तैरिति ।—दिनकरकुलीनाः सूर्यवंशीयाः, एते क्षितिभुजः राजानः,

गृहे येषां रामादिभिरपि कलाभिश्चतसृभिः
स्वयं देवो लक्ष्मीस्तनकलशवारीगजपतिः ॥ ५२ ॥

अपि च—

त्वं तास्ताः स्मृतवानृचो दशतयीस्त्वत्प्रीतये यज्वभिः
स्वाहाकारमुपाहितं हविरिह त्वेताग्निराचामति।
त्वां क्षीरोदजलेशयं क्रतुलिहः पृथ्वीमवातीतर-
न्नुद्दृप्ता दशकन्धरप्रभृतयो निग्राहितारस्त्वया ॥ ५३ ॥

रामदेवः। (सस्मितम्)। वत्सौ! अयमप्यभवान् भवन्तौ नेतुमागतः।

राम लक्ष्मणौ। यदभिरुचितं भवते तातायच।

वशिष्ठेन गुरोः उपदिष्टैः, मन्त्रैः मन्त्रयाभिः, जगताम् आभ्युदयिकीम् अभ्युदयः मङ्गलं तत्साधनीमित्यर्थः, धुरं राज्यभारं, दधति धारयन्ति, वहन्तीत्यर्थः, येषां राज्ञां, गृहे सम्प्रति खल्वाः: स्तनकलशः कुचकुम्भः एव, वारी गजबन्धनस्तम्भविशेषः, "वारी तु गजबन्धनौ" इत्यमरः; तत्र वहति इति ग्रैवः, गजपतिः गजेन्द्रः, तत्सदृशः इत्यर्थः, लक्ष्मीकान्तः इति भावः, स्वयं साक्षात्, देवोऽपि नारायणोऽपि, रामादिभिः चतसृभिः कलाभिः अंशैः, अवतीर्ण इति शेषः। ग्रिहरिणी वृत्तम् ॥ ५२ ॥

सम्प्रति ब्रह्मास्त्रकथेव रामं स्तौति, त्वमिति।—हे राम! इत्यध्याहार्यं, त्वं ताः प्रसिद्धाः, दशतयीः दशसङ्ख्याकाः, ऋचः ब्रह्मस्तुतिरूपा ऋग्वेदोक्ता गाथा इति यावत्, स्मृतवान्? स्मरसि किम्? इत्यर्थः, इह जगति, त्वेताग्निः "गार्हपत्यो दक्षिणाग्निर्हवनीयस्त्रयोऽग्नयः। अग्नित्रयमिदं त्वेता—" इत्युक्तरूपस्त्रिविधोऽग्निः, यज्वभिः यथाविधि यागं कुर्वद्भिः याज्ञिकैः, "यज्वा तु विधिनेष्टवान्" इत्यमरः, तव प्रीतये खलीकाय, स्वाहाकारं स्वाहेति मन्त्रकरणकमित्यर्थः, उपाहितं दत्तम्, अग्नौ आहुतमित्यर्थः, हविः द्रव्यम्, आचामति भक्षयति, क्रतुलिहः यज्ञाग्निः देवाः, क्षीरोदजलेशयं क्षीरसागरशायिनं, त्वां भवन्तं, पृथ्वीं मेदिनीम्, अवातीतरन् अवतारयामासुः, राक्षसविनाशाय इति भावः; त्वया उद्दृप्ताः दुराचाराः, जनस्थानेऽस्मिन् इति यावत्, दशकन्धरप्रभृतयः रावणादयः, निग्राहितारः निगृहीतवन्तः, विनाशयितव्याः इत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ ५३ ॥

(दशरथो ससङ्कटमादाय भगवन्। कौशिक। इत्यर्धोक्ते मन्यूपोढनिगृह्यमाणकण्ठो (अ) वामदेवश्च मुखमीक्षते)।

वामदेवः। इमौ तौ राम-लक्ष्मणौ। (इत्यर्धयति)।

(विश्वामित्रः सादरं गृह्णाति)।

(नेपथ्ये शङ्खध्वनिः)।

(वामदेवी निमित्तमनुमोदमानो दशरथमुल्लासयति)।

(पुनर्नेपथ्ये)।

वैतालिकः (ट)। सुखाय माध्यन्दिनी (ठ) सन्ध्या भवतु देवस्य (ड)। सम्प्रति हि—

किरति मिहिरे विष्वद्रीचः करानतिवामनी
स्खलकमठवद्देहच्छाया जनस्य विचेष्टते।
गजपतिमुखोद्गीर्णैराप्यैरपि त्रसरेणुभिः
शिशिरमधुरामेषाः कक्षास्थलीमधिशेरते ॥५४॥

(अ) मन्यूपोढेति।—मन्यु शोकः, "मन्यु शोकौ तु युक् स्त्रियाम्" इत्यमरः; तस्य उत्पोढेन अनुद्रेकजनितपीडनातिशयेन, निगृह्यमाणः रुध्यमानः, कण्ठो यस्य तथोक्तः।

(ट) वैतालिकः बन्दी, राज्ञां स्तुतिपाठकः इत्यर्थः, "वैतालिका बोधकरा बन्दिनः स्तुतिपाठकाः" इत्यमरः।

(ठ) माध्यन्दिनी मध्याह्नवालिकी।

(ड) देवस्य दशरथस्य।

किरतीति।—मिहिरे सूर्ये, विष्वद्रीचः सर्वतः सञ्चारिणः इत्यर्थः, "विष्वङ्ङ् विष्वगञ्चति" इत्यमरः, करान् मयूखान्, किरति वर्षति सति, मध्याह्ने समुपस्थिते सतीत्यर्थः, जनस्य लोकस्य, अतिवामनी अतिह्रस्वा, देहच्छाया शरीरस्य प्रतिबिम्बं, स्खलकमठवत् स्खलितकूर्मवत्, विचेष्टते आचरति, लोकैर्दृश्यते इत्यर्थः, मध्याह्ने छाया अतिह्रस्वा पादप्रदेशे दृश्यते इति भावः, तथा एवाः हरिणाः, गजपतीनां सुखात् उद्गीर्णैः उत्क्षिप्तैः, आप्यैः, जलीयैः, त्रसरेणुभिः "जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः। प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते॥" इत्युक्तपरिमाणविशेषैः परिनिर्गच्छद्भिरित्यर्थः, शिशिराः शीतलाः, अत एव मधुराः मनोहारिण्यो याः ताद्दशीः

अपि चेदानीं पटीरतरुकोटरकुटीरमध्यासीनाः (ढ)—

प्रत्यक्षरस्रुतसुधारसनिर्विषाभि-
राद्रीर्भिरभ्यधिकभूषितभोगभाजः ।
गायन्ति कञ्चुकविनिष्कुतलोमहर्ष-
स्वेदोर्मयस्तव गुणानुरगेन्द्रकन्याः ॥५५॥

विश्वासिनः । सखे दशरथ ! प्रियमपि तथ्यम् (ण) आह्व इतालिकः,—

मन्दोद्भूते शिरोभिर्मणिभरगुरुभिः प्रौढ़रोमाञ्चदक्ष-
स्फायन्निर्मोकसन्धिप्रसरदविगलत्सम्मदस्वेदपूराः ।

ञ्चुकश्चौं क्लीबभूविष्टदंशं, "क्लीबं प्रायमनूर्षं स्यात् पुंसि कञ्चुस्त्वगाविषः" इत्यमरः ; विशीर्यते यस्मिन् स्वपन्तीत्यर्थः । दरिद्रोद्गतं—"न-स-म र-स-ला गः षड्देवैर्दयैर्दरिद्री मतः" इति तद्गुणत्वात् ॥ ५४ ॥

(ढ) पटीरेति ।—पटीरतरुश्चन्दनतरुः, "पटीरश्चन्दनतरौ" इति मेदिनी ; तस्य कोटरं रन्ध्रमेव, कुटीरं क्षुद्रगृहम् । अध्यासीनाः अधिनिषण्णाः ।

प्रत्यक्षरेति ।—प्रत्यक्षरम् अक्षरे अक्षरे, गानस्येति भावः, स्रुतः क्षरितः, यः सुधारसः अमृतरसः, तेन निर्विषाभिः विषयुक्ताभिः, सुधायाः विषहरत्वादिति भावः, आद्रीभिः दृष्टाभिः, "स्त्रो त्राद्रीर्हिताग्रहाऽक्षिदृग्दृशः" इत्यमरः, अभ्यधिकं यथा तथा भूषितो यो भोगः फणदेशः, "भोगः सुखे स्त्रादिभृतावहेश फण-कायथोः" इत्यमरः, भजन्ते इति तथोक्ताः, उरगेन्द्रकन्याः भुजङ्गकुमार्यः, कञ्चुकैः निर्मोकैः, विनिष्कुताः लोपिताः, लीनहर्षाः रोमाञ्चाः, गानरसास्वादजनितानन्दादिति भावः, स्वेदोर्मयश्च हर्षप्रवाहाश्च, गानश्रमजनिता इति भावः यासां तथाभूताः सत्यः, तव गुणान् गायन्ति कीर्तयन्ति । वसन्ततिलकं वृत्तम् ॥ ५५ ॥

(ण) तथ्यं सत्यम् ।

मन्दोद्भूतैरिति ।—मणिभरैश्च शिरःस्थितरत्नभारैश्च, गुरुभिः गुरुत्वसम्पन्नैः, दुर्वहैरिति भावः, अत एव मन्दं मन्थरं यथा तथा, उद्भूते उन्नीलिते, यद्वा—उत्क्षिप्ते, चालितैरित्यर्थः, शिरोभिः फणैः उपलक्षिता इत्यर्थः, विशेषणे तृतीया ; तथा प्रौढ़ः उत्कटः, रोमाञ्चः लीनहर्ष एव, दक्षः जगुः, रोमाञ्चस्य कार्श्यात् दृढ़काठिन्यराहित्यात् प्रसारितदेहस्य दण्डवत् दीर्घत्वाच्च दण्डलेनारोप इति भावः,

जिह्मायुग्माभिपूर्णाननविषमसमुद्गोर्णवर्णाभिरामं
वेलाशैलाङ्गभाजा भुजगयुवतयस्त्वद्गुणानुद्गुणन्ति ॥ ५६ ॥

(विनयविलसितं च)। राजर्षे! प्रत्यासीदति (त) दीक्षा-प्रवेशसमयः, तदेवंविधमधुरगोष्ठीभङ्गनिष्ठुराणां प्रथमे (थ) तावत् वयमेव भवितुमिच्छामः।

(दशरथो राम-लक्ष्मणावलोक्य बाष्पभरोत्तरङ्गितलोचनो मुनिं प्रति भगवन्। इत्यर्धोक्ते बाष्पःस्तम्भं नाटयति)।

वामदेवः। (सस्मयम्)। भगवन्! कौशिक! साधय, शिवाः (द) सन्तु पन्थानो वत्सयो राम-लक्ष्मणयोः।

(इत्युत्थाय सर्वे यथोचितमाचरन्ति)।

तेन स्फायन् स्फीयता गच्छन्, यः निर्मोकः कञ्चुकः, तस्य सन्धेः संयोगस्थानात्, टैङ्-निर्मोकयोः सन्धिस्थस्थूलप्रदेशादित्यर्थः, प्रसरन् विस्तारं गच्छन्, अभिगलंश्च अस्रवश्च स्वेदः सम्यक् हर्षः, खेदपूरः घर्मप्रवाहश्च, गात्रयमनजनित इति भावः यासां तथाभूताः; सन्धेरिति पञ्चमी एतत्र हेतौ अन्यत्रापादाने इति वोध्यम; वेला समुद्रकूलं, "वेला काले च सीमायामम्भः कूल-विकारयोः" इति मेदिनी; तत्र यः शैलः पर्वतः, तस्य अङ्गभागः उत्सङ्गवर्त्तिनि, भुजगयुवतयः भुजङ्गतरुण्यः, जिह्मायुग्मेन निम्नदयेन, भुजङ्गानां विलिङ्गत्वादिति भावः, अभिपूर्णं व्याप्तं, यत् आननं मुखं, तेन विषम विपर्य्यस्तं, दुर्वीक्ष्यं यथा तथा इत्यर्थः, समुद्गोर्णैः समुच्चारितैः, वर्णैः अक्षरैः, अभिरामं मनोज्ञं यथा तथा, तव गुणान् उद्गृणन्ति उच्चैर्गायन्ति, नागानां वैरी गरुडः, स च विष्णुः वाहनः, तस्मात् भयञ्च निवारको यो विष्णुः, स तव पुत्रत्वेनावतीर्ण इति यस्मात् भवानित्यन्वयेनेति भावः। सग्धरा वृत्तम् ॥ ५६ ॥

(त) प्रत्यासीदति प्रत्यासन्नो भवति, निकटीभवतीत्यर्थः।

(थ) एवंविधेति।—एवंविधा ईदृशी, मधुरा मनोहारिणी, या गोष्ठी सभा संलापो वा, "गोष्ठी सभा-संलापयोः शिवाम्" इति मेदिनी; तस्याः भङ्गेन भङ्गहेतुत्वेनेत्यर्थः, निष्ठुराः परुषाः, कठोरभाषिण इत्यर्थः, लोकाचारभङ्गभयादिति भावः तेषाम्। प्रथमे अग्रगण्याः।

(द) साधय गच्छ। "प्रायेण ण्यन्तस्य साधिर्गमेः स्थाने प्रयुज्यते" इति नाट्यशास्त्रात्। शिवाः शुभाः, निर्विघ्ना इत्यर्थः।

विश्वामित्रः । एवमास्यतां (ध) भवद्भ्यः । (इति राजपुत्रावासनं गच्छन्निष्क्रान्तः) ।

दशरथः । (दीर्घमुष्णं च निःश्वस्य) । वामदेव ! नूनमिदानीमस्मानिव भगवन्तमपि कौशिकमकारणवत्सलं (न) वत्सो मे रामभद्रः,—

क्वचिदस्मद्वियोगार्त्ति-दुःखो दुःखाकरिष्यति ।
अपूर्वविषयालोक-सुखो च सुखयिष्यति ॥५७॥

वामदेवः । (विहस्य) । राजर्षे ! वयं वा कौशिको वेति क्व पुनरेष कक्षाविभागो रामभद्रमाधुर्य्यस्य (प) ? पश्य—

यदिन्दोरन्वेति व्यसनमुदयं वा निधिरपा-
मुपाधिस्तत्रायं जयति जनिकर्त्तुः प्रकृतिता ।

(ध) आस्यतां उपविश्यताम् ।

(न) अकारणवत्सलम् अहैतुकस्नेहम् ।

क्वचिदिति ।—क्वचित् कदाचित्, कस्मिंश्चित् स्थाने वा, अस्माकम् अस्मत्तः सह इति वा, वियोगेन विच्छेदेन, या आर्त्तिः व्यथा, तया दुःखो व्याकुलः, रामभद्रः इति गद्यस्थकर्त्रृपदेनान्वयः; दुःखाकरिष्यति दुःखितं करिष्यति, कौशिकमिति गद्यस्थकर्मपदेनान्वयः, तथा क्वचित् अपूर्वः अदृष्टपूर्वः, यः विषयः प्रदेशादिः, तस्य आलोकेन दर्शनेन, सुखी प्रीतः सन्, सुखयिष्यति च सुखीकरिष्यति च, अत्रापि रामभद्रः कौशिकमित्यनेनान्वयः । अनुष्टुप् वृत्तम् ॥५७॥

(प) कक्षेति ।—कक्षायाः प्रदेशस्य इत्यर्थः, विभागः पृथक् करणम्, अयमात्मीयः अयं पर इति पात्रभेदेन भेदबुद्धिरिति यावत् । रामभद्रमाधुर्य्यस्य रामचन्द्रीयचरित्रस्य रमणीयतायाः, रामभद्रस्य निजः परो वेति भेदकुद्धिर्नास्ति सर्वात्मन्येव समतावुद्धेरिति भावः ।

यदिति ।—अपां निधिः समुद्रः, यत इन्दोश्चन्द्रस्य, व्यसनं विपत्तिं, कृष्णपक्षे अदर्शनमित्यर्थः, उदयं वा उन्नतिं वा, शुक्लपक्षे पुनः पूर्णतापाप्तिमित्यर्थः, अन्वेति अनुगच्छति, चन्द्रस्य अदर्शने उच्छ्रासाभावस उदये च उच्छ्रासं प्राप्नोतीति भावः, तस्य अनुगमे, अयम् एषः, उपाधिः कारणमिति यावत्, यत् जनिकर्त्तुः जनकस्य, प्रकृतिता स्वभावः, जयति उत्कर्षेण वर्तते इत्यर्थः, अपयशस इन्दोर्व्यसने व्यसनम्, उदये च

अयं कः सम्बन्धो यदनुहरते तस्य कुमुदम् ?
विशुद्धाः शुद्धानां ध्रुवमनभिसन्धिप्रणयिनः ॥५८॥

इत्यरवः । (विमृश्य) । एवमेतत्—

रत्नाकरो जनयिता सहजश्च वर्गः
किं कथ्यतामृत-कौस्तुभ पारिजाताः ।
किं तैरचिन्त्यमिह तत् पुनरन्यदेव
तत्त्वान्तरं कुमुदबन्धुरसौ यदिन्दुः ॥५९॥

(पुनरवलोक्य) । कथम् !! लोचनपथम् (फ) अतिक्रान्तः सराम-लक्ष्मणो भगवान् !! तत् वयमपि वत्सप्रवासदुर्मनायमानां दक्षिणकोशलेश्वरसुतां (ब) देवीमुपेत्य सान्त्वयामः ।

(इति निष्क्रान्ताः सर्वे) ।

(इति मुनीन्द्रवादो नाम प्रथमोऽङ्कः) ।

उदयो जनकश्च समुद्रश्च स्वाभाविकः इति सम्भाव्यत इति भावः, परन्तु कुमुदकैरवं, यत् तस्य इन्दोः, अनुहरते अनुगच्छति, चन्द्रे उदिते कुमुदमुल्लसति अस्तमिते च निमीलतीति भावः, अयमेव अनुहरणरूपः, सम्बन्धः सम्पर्कः, कः ? कोटग्र्यः ? इन्दुना सह कुमुदस्य न कोऽपि सम्बन्धोऽस्तीत्यर्थः, पिता पुत्रस्य उदये विपदि च तदनुरूप सुखं दुःखञ्चानुभवतीति स्वभावो दृश्यते, कुमुदेन च चन्द्रस्य कः सम्बन्धः, येन तथा आचरतीति भावः ; अतः सम्बन्धः न प्रणयहेतुरित्याह, विशुद्धा इति । विशुद्धाः निर्मलप्रकृतयः, शुद्धानां निर्मलप्रकृतीनाम्, अनभिसन्धिप्रणयिनः अकृत्रिमस्नेहभाजः, भवतीति शेषः, इति ध्रुवम् उत्प्रेक्ष । निष्क्रान्तौ इत्यम् ॥ ५८ ॥

रत्नाकर इति ।—रत्नाकरः समुद्रः, जनयिता उत्पादकः, अमृत-कौस्तुभ-पारिजाताश्च, सहजो वर्गः सोदरः, अत्र किं कथ्यताम ? किं वक्तव्यम ? तैः अमृत-कौस्तुभ-पारिजातैः रत्नाकरेण वेत्यर्थः, किम ? न किमपि प्रयोजनं चन्द्रस्येति भावः, पुनः किन्तु, इह जगति, अन्यदेव अपरं किञ्चित्, तत् अनिर्देश्यमिति भावः, अचिन्त्यम् अतर्कणीयं, तत्त्वान्तरं भावान्तरम्, अस्तीति शेषः, यत् अयं इन्दुः चन्द्रः, कुमुदबन्धुः कैरवबल्लभः ; अन्य-जनकभ्रातृसम्बन्धोऽस्त्यस्य इति भावः । वसन्ततिलकं वृत्तम् ॥ ५९ ॥

(फ) लोचनपथं दृष्टिमार्गम् ।

(ब) वत्सेति ।—वत्सौ रामलक्ष्मणौ, प्रवासेन भिन्नदेशत्वेन, विच्छेदेनेति

द्वितीयोऽङ्कः ।

(ततः प्रविशति यजमानशिष्यः) ।

शिष्यः । अये ! प्रभातप्रायैव रजनी !! तथा हि—

तमोभिः पीयन्ते गतवयसि पीयूषवपुषि
ज्वलिष्यन्मार्त्तण्डोपलपटलधूमैरिव दिशः ।
सरोजानां कर्षन्नलिमयमयस्कान्तमणिवत्
क्षणादन्तःशल्यं तपति पतिरद्यापि न रुचाम् ॥ १ ॥

अपि च—

जाताः पक्वपलाशपाण्डुमधुरच्छायाकिरस्तारकाः
प्राचीमङ्गुरयन्ति किञ्चन रुचो राजीवजीवातवः ।

यावत्, "प्रवासो भिन्नदेशित्वं कार्य्याच्छापाच्च सम्भ्रमात्" इति दर्पणे ; दुर्मनायमानां दुःखितमनसम् । दक्षिणकोशलेश्वरसुता कौशल्या ।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्यविरचिता
अनर्घराघवप्रथमाङ्कव्याख्या सुमाला ।

तमोभिरिति ।—पीयूषवपुषि अमृतमयदेहे अमृतरश्मौ चन्द्रे इत्यर्थः, गतम् अतीतं, वयः जीवनकालो यस्य तथाभूते, अस्त गते सतीत्यर्थः, ज्वलिष्यतः सूर्य्यकिरणयोगेन तेजः प्रकटयिष्यतः, मार्त्तण्डोपलपटलस्य सूर्य्यकान्तमणिनिचयस्य, धूमैरिव तमोभिः तिमिरैः, दिशः पीयन्ते आच्छाद्यन्ते इति यावत्, अद्यापि इदानीमपि, रुचां प्रभाणां, पतिः प्रभुः, सूर्य्यः इत्यर्थः, अयस्कान्तमणिवत् अयसो लौहस्य मणिरयमयस्कान्तमणिः, सरोजानां पद्मानाम्, अन्तःशल्यम् अन्तरस्थितशल्योद्धरणनिर्मलास्त्रविशेषम्, क्षणम् बहिर्निर्गमनम्, न तपति न सन्तापं जनयति, न प्रकाशं प्रापयतीत्यर्थः । उपमालङ्कारः । शिखरिणी वृत्तम् ॥ १ ॥

जाता इति ।—तारकाः नक्षत्राणि, पक्वः परिणतः, यः पलाशः, यवसेष्टः, "पँवाल" इति प्रसिद्धः, तद्वत् पाण्डु शुभ्रं, मधुरा मनोज्ञा च, या छाया

लूतातन्तुवितानवत्तुलमितो विस्तं दधच्चुम्बति
प्रातः प्रोषितरोचिरम्बरतलादस्ताचलं चन्द्रमाः ॥ २ ॥

(सर्वतोऽवलोक्य च)—

दिङ्मण्डलीमुकुटमण्डनपद्मराग-
रत्नाङ्कुरे किरणमालिनि गर्भितेऽपि ।
सौख्यप्रसुप्तिकमधुव्रतचक्रवाल-
वाचालपङ्कजवनीसरसाः सरस्यः ॥ ३ ॥

अपि च—

प्राचीविभ्रमकर्णिकाकमलिनीसंवर्त्तिकाः सम्प्रति
हे तिस्रो रमणीयमम्बरमणेर्ज्यामुच्चरन्ते रुचः ।

क्षान्तिः, ता किरन्ति विक्षिपन्ति, विस्तारयन्तीत्यर्थः तथाभूताः, लाताः, राजीवानां पद्मानां, जीवातवः जीवनौषधभूताः, "जीवातुर्जीवनौषधम्" इत्यमरः, रुचः प्रभाः, अरुणकिरणा इत्यर्थः, प्राचीं पूर्वां दिशं, किञ्चन किञ्चिन्मात्र, स्वल्पमात्रमित्यर्थः, अङ्कुरयन्ति उद्भवयन्ति, किञ्चित् प्रकाशयन्तीत्यर्थः, इतः अस्मिन्, प्रातः प्रभातसमये, प्रोषितरोचिः गतप्रभः, चन्द्रमाः लूता ऊर्णनाभाख्यकीटविशेषः, तस्याः तन्तुवितानवत् सूत्रविस्तारवत्, वर्तुलं गोलाकारं, चीणं धूसरवर्णमिति भावः, बिम्बं मण्डलं, दधत् बिभ्रत् सन्, अम्बरतलात् आकाशमण्डलात्, अस्ताचलं चुम्बति स्पृशति, अस्तगिरिशिखरम् आश्रयतीत्यर्थः । मार्दूलविक्रीडितं वृत्तम् ॥ २ ॥

दिङ्मण्डलीति ।—दिङ्मण्डल्याः प्राच्या दिश इत्यर्थः, मुकुटमेव मण्डनं भूषणं, तस्मिन् यत् पद्मरागरत्नं तस्य अङ्कुरः प्ररोहः तस्मिन्, किरणमालिनि सहस्रकिरणे, सूर्ये इत्यर्थः, गर्भितेऽपि गर्भस्थितेऽपि, गगनाभ्यन्तरस्थितेऽपीत्यर्थः, अनुदितेऽपीति भावः, सरस्यः सरोवराणि, सुखप्रसुप्ति सुखनिद्रां पृच्छन्तीति सौख्यप्रसुप्तिकाः, तथाभूता ये मधुव्रताः भ्रमराः, तेषां चक्रवालेन मण्डलेन, समूहेनेत्यर्थः, वाचालया बहुभाषिण्या, भ्रमराणामविरतगुञ्जनादिति भावः, "स्याज्जल्पाकस्तु वाचाली वाचाटो बहुगर्ह्यवाक्" इत्यमरः, पङ्कजवन्या कमलवनेन, सरसाः रसवत्यः, मनोहारिण्य इति भावः, जाता इति शेषः । वसन्ततिलकं वृत्तम् ॥ ३ ॥

प्राचीति ।—सम्प्रति प्राच्याः दिशः, नायिकाया इति ध्वनिः; विभ्रमाय विलासार्थं-मित्यर्थः, कर्णिकाः कर्णाभरणानि, "कर्णिका कर्णभूषणे" इत्यमरः; तत्स्वरूपा इति

सूक्ष्मोच्छ्वासमपोदमुत्सुकतया सम्भूय कोषाद्दहि-
र्निष्क्रामद्भ्रमरीघसम्भ्रमभरादम्भोजमुज्जृम्भते ॥ ४ ॥

अपि च—

एक-द्वि-प्रभृतिक्रमेण गणनाभिषामिवास्तं यतां
कुर्वाणा समकोचयद्दशशतान्यम्भोजसंवर्त्तिकाः।
भूयोऽपि क्रमशः प्रसारयति ताः सम्प्रत्यमून्युद्यतः
सङ्घातुं सकुतूहलेव नलिनी भानोः सहस्रं करान् ॥ ५ ॥

अपि च—

प्रत्यासन्नसुरेन्द्रसिन्धुरशिरःसिन्दूरसान्द्रारुणा
यत्तेजस्त्वसरेणवो वियदितः प्राचीनमातन्वते।

भावः, समलिनीसवर्त्तिकाः पद्मिनीनवदलानीत्यर्थः, तत्सदृशा इति भावः, अम्बरमणेः सूर्यस्य, इ तिस, उभयत्रापि वा इति शेषः, इ वा तिस्रो वेत्यर्थः, रुचः प्रभाः, द्यां आकाशम, उद्वरन्ते उद्गच्छन्ति, पूर्वाकाशमुद्भासयितुं प्रक्रमन्ते इत्यर्थः; सूक्ष्मोच्छ्वासमपि अल्पश्चिरश्वसन्त्यर्थात् ईषत् विकसितमपि, इदम् अम्भोज पद्मम, उत्सुकतया उत्कण्ठया, सदा बहिर्निर्गच्छतः इति उद्गमातिशय्यादित्यर्थः, सम्भूय मिलित्वा, कोषात् कुड्मलात, सार्धं मुकुलीभावं गतात् पद्मादित्यर्थः, बहिर्निष्क्रामतः निर्गच्छतः, भ्रमरीघस्य भ्रमरसमूहस्य, पूर्वसन्ध्याया अमलदलात्तः आवद्धस्य इति भावः, सम्भ्रमभरात् आवेगातिशयात् त्वरातिशयात् वा हेतोः, "सम्भ्रमस्त्वरा" इत्यमरः, उज्जृम्भते अत्यन्त विकसतीत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

एकेति।—नलिनी पद्मिनी, अस्तं यता गच्छताम, एषा किरणानाम, एक द्वि-प्रभृतिक्रमेण एकः किरणः अस्तं गतः, द्वौ किरणौ अस्तं गतौ, त्रयः किरणाः अस्तं गता इत्यादिरूपेण, गणनां सङ्ख्या, कुर्वाणेव कुर्वतीव, दशशतानि सहस्रमित्यर्थः, अम्भोज-संवर्त्तिकाः पद्मनवदलानि, "संवर्त्तिका नवदलम्" इत्यमरः; समकोचयत् न्यमीलयत, किरणानामस्तगमनवत् एकादिक्रमेण सङ्कुचिता अकरोदित्यर्थः, निजदलानि निमीलितवतीति यावत्, सम्प्रति इदानीम्, उद्यतः उदयं गच्छतः, भानोः सूर्यस्य, अमून् सहस्र करान् किरणान्, सङ्घातुं गणयितुं, सकुतूहलेव कौतुकवतीव, भूयोऽपि पुनरपि, ताः संवर्त्तिकाः, क्रमशः एक-द्वादिक्रमेण, प्रसारयति विस्तारयति, विकासयतीत्यर्थः। उत्प्रेक्षाऽलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

प्रत्यासन्नेति।—प्रत्यासन्नः निकटवर्ती, पूर्वदिगधिपत्वादिति भावः, यः सुरेन्द्रः

अङ्के सम्प्रति यावदभ्युदयते तत्तर्कुटङ्कोन्मृजा-
रज्यद्दिम्बरजश्छटाबलयितो देवस्त्वषामीश्वरः ॥ ६ ॥

(पुरः (क) अवलोक्य)। कथम्, इदमुदयाचलमौलिमाणिक्यम् (ख) अर्कमण्डलमद्यापि न विहायस्तलम् (ग) अलङ्करोति !! तदस्मद्गुरावितायमानयज्ञस्य कुलपतेः कौशिकस्यादेशात् समिदाहरणाय (घ) प्रस्थितोऽस्मि; तत् त्वरितं गच्छामि। (इति परिक्रामति)।

देवराज, तस्य सिन्धुरः सिन्धुः इभदान, गजमदजलमित्यर्थः, "सिन्धुः समुद्रे नद्याञ्च नदे देशभेदे नथौ" इति मेदिनी, स चास्य अस्तीति सिन्धुर इभो, ऐरावत इत्यर्थः, तस्य सिन्दूरश्च शोभार्थं मस्तके विन्यस्तसिन्दूरश्च, सान्द्र निबिडम, अतीवेत्यर्थः, अरुणा रक्ता., यश्च विश्वामीश्वरश्च, तेजसा द्युतीना, त्वमरैश्च परमाणुस्थूलात्मक-परिमाणावृत्तिभिः, ततः आत्मन् प्रदेशे, प्राचीनं वियत् पूर्वाकाशम, आतन्वते व्याप्नुवन्ति, प्रकाशयतीत्यर्थः, अतः अङ्के मन्ये, सम्प्रति तस्य तर्कुटङ्कादित्यवर्तुलं देवस्त्वष्टुः विश्वकर्मणश्च इत्यर्थः, तर्कुः चक्राकारयन्त्रावयवः, शाण इति यावत्, तस्य यत्कङ्क. पाषाण-दारवास्त्रविशेषः, तेन उन्मृजा विघृष्टिः, संस्कार इति यावत्, तथा रज्यत रक्तीभवत, सञ्जघनीभवदित्यर्थः, यत् बिम्ब मण्डलं, तस्य रजसा रेणूनाम, उन्मार्जनाद्धेतोः भूमौ पतितानां कणानामिति भावः, कूटाभिः समन्ततः प्रसृताभिः दीप्तिभिः, बलयितः वेष्टितः, त्विषा तेजसाम, ईश्वरः प्रभु, देवः सूर्यः, अभ्युदयते यावत् अविलम्बमेव उदेष्यतीत्यर्थः। "यावत् कालेऽवधारणे" इति मेदिनी, "यावत्पुराभ्यां भव्ये" इति सूत्रेण वर्तमानसामीप्यस्य स्यनि भावुयति लट्। शार्दूलविक्रीडितं वृत्तम् ॥ ६ ॥

(क) पुरः अवत.।

(ख) उदयति।—उदयाचलस्य मौलौ शिरसि, स्थितमिति शेषः, माणिक्य रत्न-विशेषः, तद्वदित्यर्थः।

(ग) विहायसतलं गगनतलम्।

(घ) अस्मद्गुरौ कौशिकाश्रम आचार्ये। कुलपतेः "शुनोना दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ॥" इत्युक्तलक्षणस्य। कौशिकस्य विश्वामित्रस्य। वितायमानयज्ञस्य विधीयमानक्रतोः। समिदाहरणाय काष्ठाहरणाय, "काष्ठं दारुन्धन इध इध्मेधः समित् स्त्रियाम्" इत्यमरः।

(प्रविश्य सम्भ्रान्तो बटुः (ङ))।

बटुः। अज्ज! सुणस्सेह! किं वि अच्चरिअं भीसणं च वट्टदि। *

शुनशैफः। (सचमत्कारं परिक्रम्य)। सखे पशुमेद्र! किमत्राश्चर्यं भीषणं च वर्त्तते ?

पशुमेदः। अज्ज! रामो त्ति को वि खत्तिअकुमारी आअदो त्ति सुणिअ कोदूहलेण धावन्तस्स तवोवणपेरंतपरिट्ठिदा (च) पत्थरपुत्तलिआ मच्चमाणुसीभविअ मम ज्जेव्व संमुहं परावडिदा (छ)। तं पेक्खिअ उत्तरासंगवक्कलं (ज) वि उज्झिअ (झ) पलाइदो म्हि। †

शुनशैफः। (विहस्य)। सखे! साधु कृतम्। दिष्ट्या हि जीवतः पुनरागत्तिः (ञ)।

पशुमेदः। ता रक्खदु मं अज्जो इमाए दुट्ठरक्खसीए मुहादो। ‡

(इति वेपमानः (ट) पादयोः पतति)।

---

* आर्य! शुनशैफ! किमप्याश्चर्यं भीषणं च वर्त्तते।

† अद्य राम इति कोऽपि क्षत्रियकुमार आगत इति श्रुत्वा कुतूहलेन धावतस्तपोवनपर्य्यन्तपरिस्थिता प्रस्तरपुत्तलिका सत्यमानुषीभूय ममैव सम्मुख परापतिता। तां प्रेक्ष्य उत्तरासङ्गवल्कलमप्युज्झित्वा पलायितोऽस्मि।

‡ तत रक्षतु मामार्य एतस्या दुष्टराक्षस्या मुखात्।

(ङ) बटुः ब्रह्मचारी।

(च) तपोवनपर्य्यन्तपरिस्थिता तपोवनप्रान्तवर्त्तिनी।

(छ) परापतिता उपस्थिता।

(ज) उत्तरासङ्गवल्कलम् उत्तरीयभूततरुत्वचम्।

(झ) उज्झित्वा त्यक्त्वा।

(ञ) दिष्ट्या भाग्येन। जीवतः जीवनेन चरतिष्ठमानस्य, तवेति शेषः; भाग्यवशेन जीवनेनावस्थाय मत्सकाशमागतोऽसीति भावः। पुनरागत्तिः पुनरागमनम्।

(ट) वेपमानः कम्पमानः।

शुनःशेफः। (सस्मितमुल्लाप्याकिञ्चा च)। वयस्य! शृणोषि भगवतो गोतमस्य महर्षेरहल्यां नाम धर्मदारान् (ठ)?

पशुमेढः। जा जणअबंसपुरोहिदस्स तत्थभवदो सदाणंदस्स जणणी? तदो तदो? *

शुनःशेफः। सेयं पुरा पुरुहूतखण्डितचरित्रा (ड) तस्य दीर्घतपसो मुनेर्मन्युना निजमेव (ढ) तद्विन्द्रियदौर्बल्यम् (ण) एवं विवर्त्तमानमनुभवन्ती (त) सम्प्रत्यस्य रघुराजपुत्रस्य तेजसा तस्मादन्धकारान्निरमुच्यत (थ)। तदलमावेगेन (द)।

पशुमेढः। (उन्मील्य चक्षुषी सदंतोऽवलोक्य)। अहो अच्छरिअं!! अज्जस्स पसादेण पुणो वि जोअलोए पविट्ठो म्हि। तह वि संकज्जारो अज्ज वि ण मं परिच्चअदि। ता अज्ज! सुणस्सेह! मुहुत्तअं विसमीअदु। †

शुनःशेफः। सखे! भयमिति किमेतत् ब्राह्मणस्य? तत् पर्य्यवस्थापयात्मानम् (ध)। (इत्युपविशतः)।

* या जनकवंशपुरोहितस्य तत्रभवतः शतानन्दस्य जननी? तदस्तु तः?

† अहो! आश्चर्यम्!! आर्य्यस्य प्रसादेन पुनरपि लोकलोके प्रविष्टोऽस्मि। तथापि मद्दुष्कृतोऽपि न मां परित्यजति। तदार्य्य! शुनःशेफ! मुहूर्तं विश्राम्यताम्।

(ठ) धर्मदारान् धर्मपत्नीम्।

(ड) पुरुहूतेति।—पुरुहूतेन इन्द्रेण, खण्डितं भ्रंशितं, चारित्रं पातिव्रत्यमिति यावत् यस्याः तथाभूता।

(ढ) दीर्घतपसः दीर्घकालं व्याप्य तपश्चरतः, महातपस्विन इत्यर्थः। मुनेः गोतमस्य। मन्युना क्रोधेन। निजमेव स्वमेव।

(ण) इन्द्रियदौर्बल्यम् इन्द्रियस्य स्पर्शेन्द्रियस्य, दौर्बल्यं विकारमिति यावत्।

(त) विवर्त्तमानं परिवर्त्तमानं। अनुभवन्ती भुञ्जाना।

(थ) तस्मादन्धकारात् प्रायश्चित्तावेशेन लोकलोकेन सह संसर्गमूलकपापादिति भावः। निरमुच्यत निर्मुक्ता अभूदित्यर्थः।

(द) आवेगेन उद्वेगेन।

(ध) पर्य्यवस्थापय स्थिरीकुरु। आत्मानं स्वम्।

पशुमेढः। (चिरं विमृश्य निःश्वस्य (न) च सविस्मयम्)। कथं, विसय-मिअतिण्हासलज्जालए (प) भअवदो हरिणो वि हरिणदा विट्पीअदि !! * (फ)।

शनःशैफः। (विहस्य)। साधु ब्रवीषि। अल्पीयान् (ब) खल्वयं लोकः कथमैहिकसुखाध्यवसायात् (भ) वै अमूर्भूयस्यो (म) रात्रयः पराहण्यन्ते (य)। किन्तु मनोहारिभिराहार्यैराक्ष्यिमाणलोचनहितयस्यापि (र) न जनो विवेकमङ्कुश-

* कथं, विषयमृगतृष्णासलज्जतया भगवतो हरेरपि हरिणता विट्प्यते !!

(न) निःश्वस्य कथ देवेन्द्रोऽपि दुष्टशमकार्ये कृतवानिति विषादादिति भावः।

(प) विषयेति।—विषयाः भोग्यवस्तूनि, सक्वन्दनवनितादयः एवेत्यर्थः, मृगतृष्णा मरीचिकाः, तासां सलज्जतया त्रीभया, चाञ्चल्येनेति यावत्, मोहेनेति भावः। "सलज्जा तु त्रीभायाम्" इति रत्नकोषः।

(फ) हरीन्द्रस्य। हरिणता हरित्वसत्ता, पशुत्वमिति यावत्, पाशवी वृत्तिरिति भावः। विट्प्यते उपार्ज्यते, विटपि-धातुस्तुदादिर्दृष्टव्यः। यद्वा—विट्प्यते विटप इव आचरतीत्यर्थः, शाखा यथा विस्तृतिं लभते, तथा इन्द्रस्य पाशवप्रवृत्तिरपि विस्तृतिं लभते इति भावः।

(ब) अल्पीयान् अल्पसङ्ख्यकः, विरल इत्यर्थः; यद्वा—क्षुद्राशयः।

(भ) ऐहिकेति।—ऐहिकम् एतज्जन्मसम्बन्धं, यत् सुखम् इन्द्रियभोगजनितं इति भावः, तस्य अध्यवसायात् आग्रहात्, एतज्जन्मसुखलाभसंशयेत्यर्थः। यद्वा—ऐहिकम् इहलोके भोग्यं, न तु परलोके भोग्यमिति भावः, यत् सुखं तत्र अध्यवसायात् निश्चयात्, तस्मादात् वा।

(म) भूयस्यः बह्व्यः।

(य) पराहण्यन्ते विनाश्यन्ते, क्षयं नीयन्ते इत्यर्थः, पारलिकसुखजनककार्येषु-मुख्येनेति भावः।

(र) आहार्यैः आयासेन सङ्ग्राह्यैरित्यर्थः, यद्वा—आहार्यैः कृत्रिमैः, चाक्चिक्यि-

यितुमधीष्टे (ल), किं पुनर्नयनसहस्रतयस्य तादृशि विभवे मरुतां पतिः? चक्षुःप्रीतिमुड्डवन्तीमनूड्डवन्ति चापराणि कुसुमचापचापलानि (व)।

पश्यमेदुः। (विदूषकः)। मन्ये, एदाए ज्जेव्व मुणिघरणीए पुण्णपरिणामो एत्थ रामभद्दस्स पवासे कारणं। *

शुनःशेफः। इदं तावत् प्रथमम् (श)।

पश्यमेदुः। (साभ्यर्थनम्)। अज्ज! दुदीअं (ष) वि सुणिदुं इमिणा दे वअणेण पज्जुस्सुओ (स) म्हि †।

शुनःशेफः। सखे! त्वयि किमकथनीयं नाम। अस्ति किष्किन्धायां पुरन्दरस्य (ह) नन्दनो वालिनाम प्लवगराजः।

* मन्ये, एतस्या एव सुनिःशङ्किताः पुण्यपरिणामोऽत्र रामभद्रस्य प्रवासे कारणम्।

† आर्य! द्वितीयमपि श्रोतुमनेन तव वचनेन पर्य्युत्सुकोऽस्मि।

रित्यर्थः, भोग्यवस्तुभिरिति भावः। आकृष्यमाणशोभनहृतयस्य आकृष्यमाणस्य नयनयुगलस्येत्यर्थः।

(ल) विवेकं विचार, सदसद्विचारबुद्धिमित्यर्थः। अङ्कुरयितुम् अङ्कुरीकर्तुं, तादृश लोचनयुगल विवेकज्ञानेन निवारयितुमिति यावत्। न अधीष्टे न प्रभवति।

(व) नयनसहस्रतयस्य नयनानां सहस्रत्वेनेत्यर्थः। विभवे ऐश्वर्ये सतीत्यर्थः। मरुतां पतिः देवेन्द्रः। चक्षु प्रीतिं नेत्रानुरागम्, उड्डवन्तीम् उत्पद्यमानाम्, अनु पश्चात्, अपराणि अन्यानि, कुसुमचापस्य कामस्य, चापलानि चपलताः, उड्डवन्ति उत्पद्यन्ते, दर्शनवासनापरिहरणानन्तरमेव वासनान्तरपरिहरणार्थं साधुविगीतानि परदारसम्भोगादयः अभिलाषरूपाणि कामविलसितानि जायन्ते इति भावः।

(श) प्रथमं मुख्यम्, आद्यं वा, कारणमिति शेषः।

(ष) द्वितीयं, कारणमिति शेषः।

(स) पर्य्युत्सुकः, समुत्सुकः, कुतूहलीत्यर्थः।

(ह) पुरन्दरस्य इन्द्रस्य। प्लवगराजः वानराधिपतिः।

तच्च रजनीचरचक्रवर्त्तिना दशकन्धरेण सह प्रवृत्तमैहौकम् अवलोक्य वानराक्षभल्ल-गोलाङ्गूलप्रभृतीनामाचार्य्यः सर्वामात्यानुमतः (क) जाम्बवानवादीत्।

पद्मसेनः। (सकौतुकम्)। तदो तदो ? *

धनञ्जयः। ततश्च "राजन्! मायाविनो (ख) वञ्चियं राक्षसजातिः; विशेषेण महेन्द्रावस्कन्दकन्दलितविक्रमः (ग) पितृवैरी तवायं रावणः। अपि च, त्वदीयदोर्मूलसम्पीड़नगलितपौरुषो (घ) न विश्वविजयीति स्वयमाशङ्कनीयः। नापि सामन्तान्तरजिघृक्षायामन्तरावर्त्तिनि समुद्रे लघुमसुत्यः (ङ), तदनेन विराद्धमण्डलेन महासुरविजयिना मैत्रमनर्थानुबन्धि

* ततस्ततः ?

(क) रजनीचरचक्रवर्त्तिना निशाचराधिपेन, राक्षसराजेनेत्यर्थः। प्रवृत्तमैहौकं सञ्जातनिश्चयभावम्। वानरेति।—वानराः, ऋक्षाः, भल्लुकाः, "ऋक्षभल्लुकौ। स्त्रियां ऋक्षभल्लभालूकाः" इत्यमरः; गोलाङ्गूलाः गोलाङ्गूलाकृतिलाङ्गूलविशिष्टाः कपिसुग्रीवानरविशेषाः, तत्प्रभृतीनाम्। आचार्य्यः गुरुः। सर्वामात्यानुमतः सर्वेषु अमात्येषु सर्वैरमात्यैर्वा समादृतः।

(ख) राजन्। नृपते। वासिन्!। मायाविनो कपटमयी, छलनापरायणेत्यर्थः।

(ग) महेन्द्रेति।—महेन्द्रस्य अवस्कन्देन आक्रमणेन, कन्दलितः उद्वेलं गतः, सर्वत्र प्रसार प्राप्त इत्यर्थः, विक्रमो यस्य तथोक्तः।

(घ) त्वदीयेति।—तव इदं त्वदीयं, यत् दोर्मूलं बाहुमूलं, तेन यत् सम्पीड़नं सम्यक् पेषणमित्यर्थः, तेन गलितः विनष्टः, पौरुषः पुरुषकारः, पुरुषोचितसामर्थ्यमित्यर्थः यस्य तथाभूतः। पुरा सख्यामुपासीन वालिनमुपेत्य रावणः सङ्ग्रामाय आचक्राम। स तु तं अक्षमारोप्य वलसा समुद्रेषु भ्रामयित्वा सख्या समाप्य च निर्जीवनेव सातिशयमनुनीतस्तथाजेति पुराणवार्त्ता।

(ङ) सामन्तेति।—सामन्तान्तरस्य राजान्तरस्य, जिघृक्षायां ग्रहीच्छायां, सत्यामपीति शेषः, तव नियडार्थम् अन्येषां राज्ञां साहाय्यकाननयेति भावः, अन्तरावर्त्तिनि मध्यवर्त्तिनि, समुद्रे लघु शीघ्रं, समुत्तिष्ठतीति तथोक्तः, तव बाहुमूलदर्पेण खण्डितपौरुषत्वात् अवज्ञानस्यादिति भावः।

(च)। किञ्च सर्वथैयमनुपकारिणो पुलस्त्यापत्येषु (छ) प्रीतिरिति भगवानिङ्गोदाहरणं हरिणाङ्कशेखरः (ज)। तथा हि—

उक्षा रथो भूषणमस्थिमाला
भस्माङ्गरागो गजचर्म वासः।
एकालयस्थेऽपि धनाधिनाथे
सख्यौ दशेयं त्रिपुरान्तकस्य ॥ ७ ॥

पयुमीढः। (सदासम्)। अहो! ठेरभल्लूअस्स मंतोवज्झासो (झ) परिहासकुसलदा अ। तदो तदो? *

* अहो! स्थविरभल्लूकस्य मन्त्रोपन्यासः परिहासकुशलता च। ततस्ततः?

(च) विराड्समञ्जसेन विराड् ज्ञातविरोध, सञ्जातवैरमिति यावत्, मण्डलं राष्ट्रं यस्य तादृशेन। असुरविजयिना सुरैर्यः विजय पराभवः सुरविजयः, स नास्ति यस्य तथाभूतेन सुरविजयिनेत्यर्थः, यद्वा—असुराणामपि विजयिना विजेता, न केवल सुराणामेव, असुराणामपि जय शस्तु, अत एव विराड्समञ्जसेनेत्यनेन भावः। "सुरविजयिना" इति "सुरासुरविजयिना" इति वा पाठः समीचीनः। अनयानुबन्धि परिणामे अशुभजनकम्। "सकृदुदृष्टश्च मित्रं यः पुनः सन्धातुमिच्छति। न स्वल्पमुपयुञ्जाति गर्भमश्वतरो यथा॥" इति। तथा, "अकृष्णा न हि सन्दध्यात् सुश्लिष्टापि सन्धिना। सुतप्तमपि पानीय शमयत्येव पावकम्॥" इति च नीतिशास्त्रमत्र द्रष्टव्यम्।

(छ) अनुपकारिणो उपकारपराङ्मुखो। पुलस्त्यापत्येषु पुलस्त्यस्य महर्षेर्विशेषतः, अपत्येषु सन्तानेषु, यत्तेश्वर राक्षसेश्वरादिरिति भावः।

(ज) उदाहरण दृष्टान्तः। हरिणाङ्कशेखर चन्द्रशेखरः, शिव इत्यर्थः।

उक्षेति।—सख्यौ मित्रे, धनाधिनाथे धनपतौ, कुबेरे इत्यर्थः, पुलस्त्यापत्ये इति भावः, एकालयस्थेऽपि एक एव आलयः अस्ति, कैलासः इत्यर्थः, तत्र स्थितेऽपि, विपक्षे स्थिते तु किं वक्तव्यमिति भावः, त्रिपुरान्तकस्य हरस्य, इयम् दृश्यमाना, दशा अवस्था, दुरवस्थेत्यर्थः; तथा च, दृश्यः यानं, वाहनमिति यावत्, उक्षा वृषः, भूषणम् अलङ्कारः, अस्थिमाला, अङ्गरागः अनुलेपनद्रव्यं भस्म, वासः वस्त्रं, गजचर्म। द्रष्टव्या दृश्या, "दृशिन्द्रष्टव्या यदि सौ न गौ गः" इति तल्लक्षणात्॥ ७॥

(झ) स्थविरभल्लूकस्य वृद्धभल्लूकस्य। मन्त्रोपन्यासः मन्त्रणावचनम्।

सुग्रीवः। ततस्य तद्वचनं जराप्रलपितम् (ज) इत्युपहसति हरीश्वरे उपांशु तदनुमत्या महामात्यस्य केसरिणः (ट) पुत्रो हनुमान् कुमारं सुग्रीवमादाय ऋष्यमूकं नाम पर्वतदुर्गमनुप्रविष्टः।

पद्मसेटुः। (साकूतम (ड))। अज्ज! जो सो मारुदी तेदामल्लो (ड) त्ति सुणीअदि?*

सुग्रीवः। अथ किम् (ढ)।

पद्मसेटुः। (सविचिकित्सम् (ण))। अज्ज! जधा तधा भोदु, सामी सामी व्भेव्व; तं (त) परिच्चइअ ण सरिसो (थ)तारिसस्स महाणुभावस्स पडिकूलपरिग्गहो† (द)।

---

* आर्ये! योऽसौ मारुतिस्तेतामल्ल इति श्रूयते?

† आर्ये। यथा तथा भवतु, स्वामी स्वामीव; तं परित्यज्य न सदृशस्तादृशस्य महानुभावस्य प्रतिकूलपरिग्रहः।

(ज) जरेति।—जरया वार्द्धकेन, प्रलपितम् अर्थशून्यं वचनम्, असङ्गतवाक्यमित्यर्थः, "प्रलापोऽनर्थकं वचः" इत्यमरः।

(ट) हरीश्वरे कपीन्द्रे, वानरराजे वालिनीत्यर्थः, "युग्वाहिकपिनेषु हरिः" इत्यमरः। उपांशु एकान्ते। तदनुमत्या तस्य मन्त्रिवतः, अनुमत्या आदेशेन। महामात्यस्य महामन्त्रिणः। केसरिणः तदाख्यस्य वानरस्य।

(ठ) साकूतं साभिप्रायम्।

(ड) मारुतिः मरुतः वायोरपत्यं पुमान्, केसरिणः क्षेत्रे अञ्जनायां वायुना जात इति पुराणवार्त्तानुसन्धेया। तेतामल्लः त्रेता द्वितीयं युगं, तस्य मल्लः वीरः।

(ढ) अथ किं तच्छब्दार्थः। "अथ किं स्वीकियाप्रश्नेषु" इति भरतः।

(ण) सविचिकित्सं ससंशयं, "विचिकित्सा तु संशयः" इत्यमरः।

(त) तं स्वामिनम्।

(थ) न सदृशः न युक्तः।

(द) महानुभावस्य महात्मनः, महावीरस्य हनुमत इत्यर्थः। प्रतिकूलपरिग्रहः प्रतिकूलस्य प्रतिवादिनः, सुग्रीवस्येत्यर्थः, परिग्रहः स्वीकारः, सुग्रीवस्य प्रभुत्वस्वीकारस्येत्यर्थः, तदाश्रयत्वमित्यर्थो वा, "परिग्रहः स्वजने च मूल्ये स्वीकारयोरपि" इति मेदिनी।

शुनःशेफः। (विहस्य)। पुरैव किलायमाञ्जनेयः (ध) भगवतः सहस्रकिरणात् (न) व्याकरणविद्यामधीयानस्तदात्मजस्यानो वानरयोनेः (प) सुग्रीवस्य साहायकमभिप्रायन्नो गुरुदक्षिणीं चकार (फ)।

पशुमेद्रः। (सानन्दम्)। हुं। ता उचिदं खलु गुरुपुत्तो सबम्हचारी (ब) वा अणुवट्टीअदि। तदो तदो? *

शुनःशेफः। ततश्चाहिभयोपजापजर्जरं सुहृद्गृहम् (भ) उपश्रुत्य राक्षसराजः खर-दूषण-त्रिशिरोभिर्महामात्यैरधिष्ठितमात्मबलैकदेशं सिन्धोरुदीचि (म) कूले बालिप्रतियत्नाय (य) प्राहिणोत्।

पशुमेद्रः। कधं, अपरिहीणमित्तधम्मो (र) वि सो रक्खसो†।

शुनःशेफः। सखे! किमुच्यते, रावणः खल्वसौ।

---

* हुम्। तदुचितमेव गुरुसुतः सब्रह्मचारी वा अनुवर्त्यते। ततस्ततः?

† कथम्, अपरिहीनमित्रधर्मोऽपि स राक्षसः।

(ध) आञ्जनेयः अञ्जना नाम काचित् वानरी तस्या सुतः, हनुमानित्यर्थः।

(न) सहस्रकिरणात् सूर्यात्।

(प) तदात्मजन्मनः तत्सुतस्य, सूर्यात्मजस्येत्यर्थः। वानरयोनेः वानरीगर्भजस्य।

(फ) साहायकं साहाय्यम्। अभिप्रायन्नः आययन्नः, गुरोः सूर्यस्येति भावः। गुरुदक्षिणीचकार गुरुदक्षिणात्वेन स्वीकृतवानित्यर्थः।

(ब) सब्रह्मचारी सतीर्थ्य, सहाध्यायीत्यर्थः।

(भ) अहिभयेति।—गरुडत्वात् आहृताहारत्वाच्च खल्वयं पक्ष एव अहिः, तस्मात् भयम् अहितुल्यात् खपक्षात् भयमित्यर्थः, "नकौमुलमहिभयं खपक्षप्रभवं भयम्" इत्यमरः; उपजापः भेदश्च, ताभ्यां जर्जरं जीर्णं, दुर्बलमिति भावः। सुहृद्गृहं सुहृदः मित्रस्य, बालिन इत्यर्थः, गृहम्।

(म) सिन्धोः समुद्रस्य। उदीचि उत्तरे।

(य) बालिप्रतियत्नाय बालिनः साहाय्यायेत्यर्थः।

(र) अपरिहीनेति।—न परिहीनः न परित्यक्तः, मित्रधर्मः येन तथाभूतः।

प्रियाकर्त्तुं त्वस्मै नवनिजशिरःकर्त्तनरस-
प्रहृष्यद्रोमाणः स परमिह लङ्कापरिवृढः।
विलक्ष्यव्यापारं किमपि दृढमूर्यस्य दशमं
शिरस्ते मूर्द्धानः क्षणधृतपुनर्जन्मसुभगाः॥ ८॥

पद्मभेदः। (सकौतुकम्।) तदो तदो?*

मनःशैफः। ततः सुकेतुसुता नागसहस्रबलधारिणी ताडका नाम राक्षसी तस्मादनीकात् (ल) आगत्य मनुष्यलङ्कलविहार-कौतुकात् (व) इमाममादीयां भूमिमधिवसति।

पद्मभेदः। (सकौतुकम्)। आमन्नहस्सबला इत्थी अत्ति त्ति अम्हदपुव्वं कव्व एदं। तदो तदो?†

---

* ततस्ततः?

† नागसहस्रबला स्त्री अस्तीत्यभूतपूर्वं खल्वेतत्। ततस्ततः?

प्रियाकर्त्तुमिति।—नवनिजशिरःकर्त्तने नवखड्गकल्पकस्तकर्त्तने, यो रसः अनुरागः, तेन प्रहृष्यन्ति उद्गच्छन्ति, रोमाणि यस्य तथाभूतः सञ्जातरोमहर्षः, यः लङ्का-परिवृढः लङ्काधिपः, "प्रभु, परिवृढोऽधिपः" इत्यमरः, स तु स एव, इह जगति अस्मै राक्षिणे, यद्वा—त्वस्मै अन्यस्मै, त्व शब्दः सर्वादिगणपाठात्, अन्यार्थकः, प्रियाकर्त्तुं प्रिय कर्त्तुं, पर प्रसन्न, समर्थ इति यावत्; "प्रियाकर्त्तुं कस्मैचन निजशिर कर्त्तन रस—"इति पाठे—कस्मैचन अनिर्वचनीयस्वरूपाय, अद्भुतायेत्यर्थः, यस्य रावणस्य, कस्मैचन कर्त्तनायेत्यर्थः, भूत गृहीतं, यत् पुनर्जन्म पुनरुत्थानं, तेन सुभगाः अतिप्रिया इत्यर्थः, ते कर्त्तितनवखड्गाकाः, मूर्द्धानः, शिरांसि, दशमं शिरः एकमपि विलक्ष्यः, सलक्ष्यः, व्यापारः यस्य तथोक्तं, अद्भुतसञ्जीवकादिकं एते, नाहमिति खल्वाविधुरमिति भावः, दृढमूर्यः। शिरस्त्रिंशो इत्यम्॥ ८॥

(स) सुकेतुसुता सुकेतुनाम कथित यत्तः तस्य तनया। नागसहस्रबलधारिणी दृढिसहस्रबलसमर्थबलवती। राक्षसी अगस्त्यशापात् राक्षसीभावमापन्नेति यावत्। अनीकात् सैन्यात्, राक्षसराजप्रेरितादिति भावः।

(व) मनुष्यति।—मनुष्याणां मण्डल चक्रं, तस्मिन् विहारे विचरणे, यत् कौतुकम् औत्सुक्य तस्मात्।

सूत्रधारः । ततश्च श्रीतस्य विधेः प्रत्यूहमाशङ्क्य (ग) शङ्कमानः कुलपतिर्भिक्षो दाशरथी रामलक्ष्मणावानीतवान् ।

पञ्चमेदुः । जाणे, रामभद्दो त्ति को वि रक्खसाणं उवरि अवइस्सो (घ) क्खु एसो * ।

सूत्रधारः । मखे । एवमेतत् । रामभद्र इति कोऽप्यर्थं चतुरक्षरो राक्षसरक्षानिबन्धमन्त्रः (ङ) । विशेषेण पुनरिदानीं भगवता कौशिकेन ब्रह्मज्योतिषः (च) तादृशं विवर्त्तम् (छ) आश्चर्यं दिव्यास्त्रमन्त्रपारायणम (ज) अध्यापितः ।

पञ्चमेदुः । मञ्ञे, मंतमईहिं अत्थटेवदाहिं समं बलादिबलाओ (झ) मत्तीओ वि रामे संकमिस्सदि † ।

सूत्रधारः । अथ किम् । तदपि ब्रुत्तमेव ।

---

* जाने, रामभद्र इति कोऽपि राक्षसानामुपरि अवतीर्णः खल्वसौ ।

† मन्ये, मन्त्रमयीभिरस्त्रदेवताभिः समं बलातिबले अपि रामे सङ्क्रमिष्यतः ।

(ग) श्रौतस्य श्रुतिविहितस्य, विधेः यज्ञस्येत्यर्थः । प्रत्यूहं विघ्नम् । अङ्क्ष्य: ताडकायाः, मकाराद्रिति शेषः ।

(घ) राक्षसानाम् उपरि अवतीर्णः राक्षसेभ्यः अधिकबलशालित्वेनावतीर्णः इत्यर्थः, राक्षसान् हन्तुम् अवतीर्ण इति भावः ।

(ङ) चतुरक्षरः चतुर्भिरक्षरैः निष्पन्न इति यावत् । राक्षसरक्षेति ।—राक्षसेभ्यः रक्षायां निबद्धमन्त्रः प्रत्यक्षफलप्रदः मन्त्र इति यावत् ।

(च) ब्रह्मज्योतिषः ब्रह्मतेजसः ।

(छ) विवर्त्तं परिणामभूतम् ।

(ज) दिव्यास्त्रेति ।—दिव्यानाम् अलौकिकानाम्, अस्त्राणां क्षुद्रास्त्रतनयानां, ये मन्त्राः रहस्योपनिषदः, तेषां पारायणं पारगमनं, साङ्गत्यमित्यर्थः ।

(झ) बलातिबले बला च अतिबला च ते, विश्वामित्रेणौ, अत्रयोः पाठे सुबा-विषासाराहित्य ज्ञात् । उक्तञ्च रामायणे—"बुत्-विषासे न ते राम ! भविष्यते नरोत्तम !। बलामतिबलाञ्चैव पठस्तात राघव ! ॥" इति ।

प्रथमनेटः। अज्ज! जं भणासि, जइ णिआओ एव्व सत्तीओ, णिआओ एव्व अत्थविज्जाओ, ता किं त्ति अत्तणो विग्गहो वण्णणे राहवस्स गोरवमुप्पादेदि तत्थभवं कोसिओ? अहवा पाउसइत्थेण सव्वमारद्धं (च) खु एदं। *

प्रथमनेपथ्यः। सखे! अनभिज्ञोऽसि, स्वयं प्रयोगादस्तेवासिभिः (ङ) विहितः प्रयोगो महिमानमाचार्यायासुपचिनोति (च)। उक्तञ्च—

स्थानेषु शिक्षनिवहैर्विनियुज्यमाना
विद्या गुरुं हि गुणवत्तरमातनोति।
आदाय मुक्तिषु बलाहकविप्रकीर्णैः
रत्नाकरो भवति वारिभिरम्बुराशिः॥ ८॥

---

* आर्ये! ननु भणासि, यदि निजा एव शक्तयः, निजा एवास्त्रविद्याः, तत् किमिति आत्मनो विग्रहोपन्यासे राघवस्य गौरवमुत्पादयति तत्रभवान् कौशिकः? अथवा प्रावृषेण्येन सर्वमारब्धं खल्वेतत्।

(च) प्रावृषेति।—प्रावृषः अतिथिः, "प्रावृषेण्यतिथिर्वर्षः" इति त्रिकाण्डशेषः; तस्य इदम्। यदि वर्षौ इयति तदा प्रावृषेण्यमेव, यदि वर्षः प्रावृषेण इत्यते तदा प्रावृषेण्यमेव; स्वयं मन्त्रादिप्रयोगसामर्थ्येऽपि यदि तत् न स्मरति तदा स्वयमेव नाम्ना इति भावः।

(ङ) स्वयं प्रयोगात् स्वयं प्रयोगमपेक्ष्येत्यर्थः, अस्त्रादीनामिति शेषः, तस्मात् प्रयोगः। अस्तेवासिभिः शिष्यैः।

(च) उपचिनोति वर्धयति।

स्थानेष्वित।—स्थानेषु योग्यस्थलेषु, शिक्षानिवहैः शिक्षासमूहैः, विनियुज्यमाना विशेषेण प्रयुज्यमाना, विद्या गुरुम् आचार्यं, गुणवत्तरम् अतिशयेन गुणवन्तम्, आतनोति हि अस्त्रापवत्त्वेन; तथा हि, अम्बुराशिः समुद्रः, आदाय स्वीकृत्य, मुक्तिषु मुक्ताशुक्तिषु, "मुक्ताशुक्तिः स्त्रियां शुक्तिः" इत्यमरः; बलाहकैर्मेघैः, विप्रकीर्णैः विक्षिप्तैः, वारिभिः जलैः, करैः, मुक्ताकरैरेव परिपूर्णतामेति

किञ्च, दीक्षिष्यमाणाः (क) न क्रुध्यन्तीति रक्षितारं क्षत्रिय-मुपाददते (ज)।

पद्मनेत्रः। अज्ज! सोहणं मंतेसि। अम्हं वि किं वि पुच्छिदु-कामो म्हि। *

शुनःशेफः। किं तत्?

पद्मनेत्रः। सव्वधा णिगूढं (झ) वि बाणराणं कुग्गणअं (ञ) कधं अज्जेण पडिवण्णं (ट)? †

शुनःशेफः। सखे! सर्वमेतदयोध्यायात्रायां समाधिमयेन (ठ) चक्षुषा साक्षात्कृतत्रिभुवनवृत्तान्तस्य तार्क्षविश्वामित्रस्य मुखादश्रौषम्। (सर्वतोऽवलोक्य)। अये! प्राभातिकी (ड) भुव-नस्य लक्ष्मीः (ढ)। तथा हि—

---

* आर्य! शोभनं मन्त्रयसे। अस्मदपि किमपि प्रष्टुकामोऽस्मि।

† सर्वथा निगूढमपि वानराणां षाड्गुण्यं कथमार्येण प्रतिपन्नम्?

भावः, रत्नाकरः रत्नानाम् आकरः उत्पत्तिस्थानमित्यर्थः, भवति। स्वातिनक्षत्रयोगे मेघाः इव समुदस्यन्त्यस्मिन्नु पतित मौक्तिकं भवतीति प्रसिद्धिरत्रानुसन्धेया। प्रतिवस्तूपमालङ्कारः, उक्तञ्च दर्पणे—"प्रतिवस्तूपमा सा स्यात् वाक्ययोर्धर्म्यसाम्ययोः। यत्रोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्।" इति। वसन्ततिलकं वृत्तम् ॥ ९ ॥

(क) क्षिप्त अत्यन्त। दीक्षिष्यमाणाः यज्ञं करिष्यन्तः।

(ज) उपाददते गृह्णन्ति, आश्रयन्तीत्यर्थः।

(झ) निगूढम् अतिगुप्तम्।

(ञ) षाड्गुण्य षण्णां गुणानां सन्ध्यादीनां प्रयोग इत्यर्थः; "सन्धिनां विग्रहो यानमासनं द्वैधमाश्रयः। षड्गुणाः—" इत्यमरः।

(ट) प्रतिपन्न विदितम्।

(ठ) अयोध्यायात्रायां रामानुजनाशम् श्रुत्वा रामागमनकाले इत्यर्थः। समाधि-प्रधान ध्यानमयेन।

(ड) प्राभातिकी प्रातःकालीना।

(ढ) लक्ष्मीः शोभा।

प्रत्यग्रज्वलितैः पतङ्गमणिभिर्नीराजिता भानवः
सावित्राः कुरुविन्दकन्दलरुचः प्राचीमलङ्कुर्वते।
प्रौढ़ध्वान्तकरालितस्य वपुषश्छायाच्छलेन क्षणा-
दप्रक्षालितनिर्मलं जगदहो! निर्मीकमुन्मुच्यति॥ १०॥

अपि च—

पीत्वा भृशं कमलकुड्मलशुक्तिकोषा
दोषातनीं तिमिरदृष्टिमथ स्फुटन्तः।
निर्यन्मधुव्रतकदम्बमिषाद्दमन्ति
बिभ्रन्ति कारणगुणानिव मौक्तिकानि॥ ११॥

प्रत्यग्रेति।—प्रत्यग्रज्वलितैः अभिनवं यथा यथा प्रदीप्तैः, सूर्यकरस्पर्शादिति भावः, पतङ्गमणिभिः सूर्यकान्तोपलैः, नीराजिता, कृतारार्तिकाः, उत्तेजिता इत्यर्थः, अत एव कुरुविन्दस्य पद्मरागस्यैव, कन्दलवत् नवाङ्कुरवत्, रुक् प्रभा येषां तथाभूताः, सावित्राः सौराः, भानवः रश्मयः, प्राचीं पूर्वां दिशम्, अलङ्कुर्वते शोभयन्ति; अहो! आश्चर्ये, जगत् भुवनं, अप्रक्षालितं अप्रमार्जितं, "छाया सूर्यप्रिया ज्ञानिः प्रतिबिम्बमनातपम्" इत्यमरः; तच्छलेन तदुच्चाजेन, प्रौढ़ेन उद्भटेन, ध्वान्तेन तिमिरेण, करालितस्य भीषणायितस्य, भयङ्करवत् प्रतीयमानस्येत्यर्थः, वपुषः अवयवस्य, अपक्षालितम् अथच निर्मलं निर्मीकं भयशून्यं, उन्मुच्यति त्यजति। अपह्नुतिरलङ्कारः, तदुक्तं दर्पणे—"प्रकृतं प्रतिषिध्यान्यत्साध्यते स्यादपह्नुतिः" इति। मार्दूलविक्रीडितं वृत्तम्॥ १०॥

पीत्वेति।—कमलानां पद्मानां, कुड्मलाः मुकुलाः, ते एव शुक्तिकोषाः मुक्ताशुक्टयः इवेत्युत्प्रेक्षा, दोषातनीं नेत्रीं, तिमिरदृष्टिम् अन्धकाररूपां दृष्टिं, भ्रमम् अन्धत्वं, पीत्वा अथ अनन्तरं, प्रातरिति भावः, स्फुटन्तः विकसन्तः सन्तः, निर्यन् निर्गच्छन्, यः मधुव्रतकदम्बः भ्रमरवृन्दं, तन्मिषात् तदुच्चाजात्, कारणगुणान् कारणस्य उद्भटस्य तिमिरस्य, गुणान् कार्यान् इत्यर्थः, बिभ्रतीव दधानानीव, मौक्तिकानि मुक्ताफलानि, यमन्ति उद्गिरन्ति, "कारणगुणाः कार्यगुणमारभन्ते" इति न्यायादिति भावः। अपह्नुत्यनुप्राणितोत्प्रेक्षालङ्कारः। वसन्ततिलकं वृत्तम्॥ ११॥

अपि च—

विकसितसङ्कुचितपुनर्विकस्वरेष्वम्बुजेषु दुर्लक्ष्याः ।
अलिकाः कथयति नूतनविकासिनोमधुलिहामर्घः ॥ १२ ॥

(आदित्यमण्डलं निर्दिश्य)—

कटुभिरपि कठोरचक्रवाकी-
त्कारविरहजन्यशोल्लिखीतवीर्यैः ।
तिमिरहृतमयं महोभिरच्छन्
जयति जगदयं घनप्रभातुः ॥ १३ ॥

तदनुजानीहि मां समिदाहरणाय ।

पद्मसेट्ठि । अहं वि क्खत्तिअकुमारार्ण दंसणे उक्कंठिदोम्हि ; ता कहेहि, कहिं पेक्खामि ।*

---

* अहमपि क्षत्रियकुमारयोर्दर्शनाय उत्कण्ठितोऽस्मि, तत् कथय, कुत्र पश्ये ।

विकसितेति ।—मधुलिहां भ्रमराणाम्, अर्घः पूजा, समादर इति यावत्, "मूल्ये पूजाविधावर्घः" इत्यमरः ; विकसितानि विकासं गतानि, पुनः सङ्कुचितानि निमीलितानि, रात्रावित्यर्थः, पुनः विकस्वरेषु प्रफुल्लेषु, सूर्योदयस्योत्तरमित्यर्थः तेषु, अम्बुजेषु पद्मेषु, दुर्लक्ष्याः अभिज्ञाः पुरातनीवां एता इति लक्षयितुमशक्याः, नवीना इत्यर्थः, अलिकाः भ्रमराः, नूतनविकासिनः नवविकसराः, विकासोन्मुखीरित्यर्थः, कथयति सूचयति, प्रकाशयतीति यावत्, पुरातनीषु पीतत्वेन मधुनः अभावात् भ्रमराश्च न यान्ति, नवासु च मधुसद्भावात् भ्रमराणां समादर इति भावः । आर्या छन्दः ॥ १२ ॥

कटुभिरिति ।—अयम् उदयोन्मुखः, घनप्रभातुः सूर्यः, कटुभिरपि दुःसहोष्णैरपि, कठोरैः दारुणैः, दुर्विषह इत्यर्थः, यः चक्रवाकोत्करानां चक्रवाकवृन्दानां, विरहः नेत्रविश्लेषः, तेन यः ज्वरः सन्तापः, तस्य आत्मा उपशमेन, क्षीणं क्षीणतां, क्षीणनिर्वेगं, क्षीणे सेवां ताडने, महीभिः तेजोभिः, मयूखैरिति यावत्, तिमिरहृतमयं अन्धकारविनष्टं, जगतां भवनीव नेत्रसमूहम्, अच्छम् अकं कुर्वन्, विस्पष्टिनिर्वेगं, अजस्रमेव अनवरतमित्यर्थः पुनरानन्दम् इति भावः, जयति राजते । पुष्पिताग्रा छन्दः—"अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणात् ॥ १३ ॥

सूत्रधारः। (विलक्ष्य)। मन्ये तावदेव यज्ञवाटमुत्तरेण विहारभूमिषु (च) क्रीडतः; तदुपेत्य निःग्रहमवलोकय।

(इति निष्क्रान्तौ)।

(विष्कम्भकः (त))।

(ततः प्रविशतो राम-लक्ष्मणौ)।

रामः। अहो! विचित्रमिदमायतनं (थ) विद्याश्रमपदं नाम भगवतो गाधिनन्दनस्य—

तत्तादृक् क्षपयन्नकोपनयनक्लेशाश्चिरेहेषिभि-
र्मेध्या वत्सतरी विहस्य वटुभिः सोल्लुण्ठमालभ्यते।
अप्येष प्रतनूभवत्यतिथिभिः सोच्छ्वासनासापुटै-
राघ्रातो मधुपर्कवाकसुरभिः प्राग्वंशजन्मानिलः॥ १४॥

(च) यज्ञवाट यागभूमिम्, उत्तरेण यागभूमेरुत्तरस्यां दिशीत्यर्थः। विहार-भूमिषु विचरणभूमिषु।

(त) विष्कम्भकः,—तदुक्तं दर्पणे—"शुद्ध-मिश्रसंकीर्णानां चतुर्णामपि निदर्शनः। सङ्क्षेपोक्तिश्च विष्कम्भ आद्यावङ्कस्य दर्शितः॥ मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः॥" इति।

(थ) आयतनं यज्ञस्थानम्, आश्रमपदमिति वा।

तदिति।—तत्र वत्सतरीनिमित्तमित्यर्थः, तादृक्षः प्रभूतस्नेहस्येत्यर्थः, क्षपयन्नकोपनयनक्लेशाश्चिरेहेषिभिः, क्षपयन्नयनम् आहरणं, वत्सतरीणां यावाहमिति भावः; तेन यः क्लेशः तस्मात् चिरहेषिभिः सततविरुतैरिति यावत्, वटुभिः मुनिबालकैः, विहस्य हासं कृत्वा, मेध्या पवित्रा, वत्सतरी द्विहायना गौः, सोल्लुण्ठं सोपहासं यथा तथा, आलभ्यते स्पृश्यते; आङ्पूर्वकस्य लभेर्नानार्थत्वात्; वत्सतरीग्रहणम् अतिशिशुपरिचर्यार्थं विहितम्; तथा च श्रुतिः,—"नहोच वा वत्सतरीं दधादतिशये यदी" इति। तथा मधुपर्कश्च पाकेन सुरभिः सुगन्धः, एव प्राग्वंशजन्मानिलः पवित्रत्वात् पूर्वभागे जातः, अनिलः वायुः अपि, "प्राग्वंशः प्राग्विनिर्देशात्" इत्यमरः; अतिथिभिः अभ्यागतैः, सोच्छ्वासानि सोष्मसहितानि, मधुपर्कश्च सुगन्धद्रव्यार्थमाम्रार्थतवायुनीलवः, यानि नासापुटानि तैः, आघ्रातः सम्यक् पीतः, आघ्रात इति यावत्, प्रतनूभवति क्षीणतां याति। प्राग्वंशावलोकितं इलम्॥ १४॥

चक्रः। आर्ये! किलावैव—

देवः कौस्तुभकिञ्जल्कनीलोत्पलमसौ हरिः।
स्वयं किमपि तत्तेपे तपः कपटवामनः॥ १५॥

इत्यमेतन्महातीर्थमध्यासीना द्विजातयः।
अकृतोभयसञ्चाराः षट्कर्माणि प्रयुञ्जते॥ १६॥

(अन्वास्य दृष्ट्वा)। आर्ये!—

पश्यैतं पशुबन्धवेदिवलयैरौदुम्बरीदन्तुरै-
र्नित्यश्रान्वितगार्हपत्यविधयो रम्या गृहस्थाश्रमाः।
यत्रामी गृहमेधिनः प्रचलितस्वाराज्यसिंहासना
वैतानेषु कपोटयोनिषु पुरोडाशं वषट्कुर्वते॥ १७॥

देव इति।—कौस्तुभः नारायणवक्षःस्थितमणिविशेषः एव, किञ्जल्कः केसरः यस्य तादृशम्, "किञ्जल्कः केसरोऽस्त्रियाम्" इत्यमरः; नीलोत्पलं नीलोत्पलसदृशवर्णं इत्यर्थः, रूपकसमासः, असौ देवो हरिः विष्णुः, कपटवामनः मायाकल्पितस्वर्ग-हेतुः सन्, स्वयं किमपि अनिर्वचनीयं, तत् प्रसिद्धं, तपः कान्द्रायणादिकं व्रतं, तेपे चचार। अनुष्टुप् वृत्तम्॥ १५॥

इत्यमिति।—द्विजातयः ब्राह्मणाः, इत्थम् अनेन प्रकारेण, वामनतपश्चरणेन हेतुनेति यावत्, महातीर्थम् अतीव पुण्यस्थानम्, एतत्, त्रैवमिति शेषः, अध्यासीनाः अधिवसन्तः, अकृतोभयसञ्चाराः निर्भयाः, सञ्चाराः येषां तथाभूताः निःशङ्कसञ्चारिणः सन्तः, षट्कर्माणि "अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥" इति मनूक्तानि अध्यापनादीनि, प्रयुञ्जते प्रकुर्वन्ति। अनुष्टुप् वृत्तम्॥ १६॥

पश्यैतमिति।—पश्य अवलोकय, एते गृहस्थाश्रमाः गार्हस्थ्यधर्माः, पशुबन्धो याग-विशेषः, यागार्थं पशुबन्धनं वा, तस्य वेदिः परिष्कृता भूमिः, "वेदिः परिष्कृता भूमिः" इत्यमरः; तद्वलयैः तच्छाकारवेदिभिरित्यर्थः, औदुम्बरीभिः उदुम्बरकाष्ठनिर्मित-यूपकाष्ठाकारखण्डविशेषैः, दन्तुरैः उन्नतावनतैः सद्भिः, नित्यं सततं, श्रान्विता अग्निहोत्रं, गार्हपत्यविधयः गार्हपत्यसम्बन्धीनि विधानानि येषु तथाविधाः, अत एव रम्याः सुशोभाकारिणः, इत्यर्थः इति शेषः; यत्र येषु गृहस्थाश्रमेषु, अमी गृहमेधिनः गृहादि द्वारा, "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति स्मरणात्; तैः मेधकै

राजा। (सदर्षमात्मगतम्) वत्स! इतोऽपि तावत् कृतार्थं-यावः (द) चक्षुषो। प्रसन्नपावनः (ध) अयमृषीणां समवायः (न)। इदममीषां—

पूरयित्वेव सर्वाङ्गमतिरिक्ताः शिरातती:।
जटारूपेण बिभ्राणैः शिरोभिर्गहनं सदः॥ १८॥

किञ्च—

तपःक्षपरुषैरङ्गैः स्रष्टुमाकारितैरिव।
सायं प्रातरमी पुण्यमग्निहोत्रं प्रयुञ्जते॥ १९॥

(इति परिक्रामतः)।

सङ्कल्पते इति तथोक्ताः, सप्तलोकाः सृष्टिरित्यर्थः, प्रपञ्चित प्रकल्पितं, स्वाराज्यञ्च स्वर्गराज्यञ्च, निष्ठानं येषां तथाभूताः सन्तः, यागस्य स्वर्गफलकत्वादिति भावः, चैतानेषु यज्ञीयेषु क्रोडीनेषु अग्निषु, "अग्नेर्वैश्वानरो वह्निः...क्रव्यादोऽग्निर्ज्वलनः" इत्यमरः। पृषोदरा इत्या, वषट्कुर्वते जुह्वति। शार्दूलविक्रीडितं वृत्तम्॥ १७॥

(द) कृतार्थावेव कृतीकुर्वः।

(ध) प्रसन्नपावनः प्रसन्नः सौम्यः, पावनः पवित्रतालक्षणहेत्यर्थः।

(न) समवायः समाजः।

पूरयित्वेति।—अमीषाम् ऋषीणाम् इदम् इति गद्यस्थेनान्वयः, सदः सभा, गोष्ठीत्यर्थः, सर्वाङ्गं पूरयित्वेव अतिरिक्ताः अधिकाः, सर्वाङ्गव्यापनात्तत्रं या अधिकाः सन्ति ता इत्यर्थः, शिरातती, शिरासमूहान्, जटारूपेण जटाव्याजेन, बिभ्राणैः दधानैः, शिरोभिः गहनं निविडं, सञ्जातमिति शेषः। अनुष्टुप् वृत्तम्॥ १८॥

तप इति:—अमी ऋषयः, तपोभिर्याज्ञायणादिभिः, क्षपरुषैः अतीव क्रूरैरित्यर्थः, अस्थिचर्मनाड्यादिग्रथितैरिति भावः, अत एव स्रष्टुं निर्मातुम्, आकारितैरिव आहूतैरिव, आनीतैरिवेति यावत्, अङ्गैः उपलक्षिता इति विशेषणे हृतीया; यथा चित्रलिखनादौ प्रथमं रेखा क्रियते, ततः वर्णकाभिः पूरणं क्रियते, तद्वत् एतानिः अस्थिचर्मनाड्यादि अङ्गानि रक्तमांसादिभिः पूरयितुमिवेति भावः, सायं प्रातः पुण्यं पवित्रम्, अग्निहोत्रं यज्ञविशेषं, प्रयुञ्जते कुर्वते, "सायं जुहुयात् प्रातर्जुहुयात्" इति श्रुते सायं-प्रातरुभयकालीयहोमविधानात्। अनुष्टुप् वृत्तम्॥ १९॥

नटः । (सहासम्) । आर्ये ! रमणीयमितो वर्त्तते—

वालेयतण्डुलविलोपकदर्थिताभि-
रेताभिरग्निशरणेषु सधर्मिणीभिः ।
तन्नाम हन्तुमपि दण्डमुदस्यमान-
मात्मातुमिच्छति मृगे मुनयो हसन्ति ॥ २० ॥

रामः । (परिक्रामन् सकौतुकानुरागम्) । वत्स ! दृतस्तावत्—

आर्द्रप्रसूतिरियमङ्गनयत्नवेदि-
नेटिष्ठमेव हरिणी हसति हरं च ।
वल्कोद्यतापसकुमारकरोपनीत-
नीवारनिर्वृतमपत्यमवेक्षते च ॥ २१ ॥

अपि च—

विष्वक् तपोधनकुमारसमर्प्यमाण-
श्यामाकतण्डुलकृता च पिपीलिकानाम् ।

वालेयेति ।—अग्निशरणेषु होमगृहेषु, मृगे आश्रमपालिते मृगे, वालेयञ्च बलिः पूजा, "बलिः पूजोपहारयोः" इत्यमरः ; तत्के इदं वालेयं तत्र, तण्डुलञ्च विलोपेन भक्षणेन, कदर्थितानि: विरलीकृतानि:, मृगैरिति भावः, एताभिः सधर्मिणीभिः सदृशधर्मचारिणीभिः, मुनिपत्नीभिरित्यर्थः, तत्र भक्षिततण्डुलत्व आश्रमपालितत्व मृगस्य हेतुः, वारयितुमपि मारयितुमपि, उदस्यमानम् उत्क्षिप्यमाणं, दण्डम् आत्मातुमिच्छति यति मुनयः हसन्ति, एवायं दूरापातं दण्डमपि वारदानाद्-मुत्क्षिप्यमाणं मन्यमानो निश्चलीति हासकारणं, तपोधनश्च आत्मत्वेन नि.शङ्कत्वमिति च ध्वन्यते। वसन्ततिलकं वृत्तम् ॥ २० ॥

आर्द्रेति ।—आर्द्रा अभिनवा, प्रसूतिः प्रसवो यस्याः तथोक्ता सत्यःप्रसूतेत्यर्थः, इयं हरिणी अङ्गनयत्नवेदिनेटिष्ठमेव अतिरभसमेव त्वरितमेव, हरं हसति अवलयति च, वल्कोद्याः वल्केभ्यः हिताः, मृगशिशुषु खेदपरायणा इत्यर्थः, ये तापसकुमाराः तेषां करैः उपनीतेन दत्तेन, नीवारैश्च धान्यविशेषैश्च, निर्वृतं हृष्टम्, अपत्यं वत्सम् अवेक्षते च पश्यति च। वसन्ततिलकं वृत्तम् ॥ २१ ॥

श्रेणीभिराश्रमपदाः प्रथमानचित्र-
पत्रावलीवलयिनो मुदमुद्वहन्ति ॥ २२ ॥

वकुलः। अहो! पशूनामप्यपत्यवात्सल्यम्!! (घ) अहो! स्निग्धानामपि सत्कर्मतारुच्छोल्यम्!! (ङ)

राजा। (चकितोऽवलोक्य)।—

मुनिविनियोगविलूनप्रकृढ़मृदुग्राद्वलानि बर्हींषि।
गोकर्णतर्णकोऽयं तर्णीत्युपकण्ठकच्छेषु ॥ २३ ॥

(इति परिक्रामतः)।

वकुलः। आर्य!—

दृषमेभिराश्रवाम्भः पदे पदे ग्रन्थिलासु कुल्यासु।
तीव्रतमा जलवेणिः प्रवहति विश्रम्य विश्रम्य ॥ २४ ॥

द्वित्यनिति।—आश्रमपदाः तपोवनसीमानः, तपोवनकुमारैः ऋषिबालकैः, सत्कर्म-तारुच्यात् दोषनाशात्, श्यामाकतरुणाम् श्यामाकाख्यतृणजातानाम् तर्कुणाम्, दर्शनं तपस्वीति तपोज्ञानम्, विपोषिकाणां श्रेणीभिः विधिवत् खननात्, प्रवलानाः विस्तारं प्राप्नुवन्तः, चिह्नाः मनोज्ञाः, याः पत्रावल्यः पत्रपङ्क्तयविशेषाः, ताभिः वलयं कङ्कणं, तद्वतः शुभ्राः, मुदम् आनन्दम्, उद्वहन्ति जनयन्तीत्यर्थः। वसन्ततिलकं वृत्तम् ॥ २२ ॥

(घ) अपत्यवात्सल्यं सन्तानेषु स्निग्धता।

(ङ) सत्कर्मेति।—सत्सु साधुषु, कर्मसु दयादिकृत्येषु, तारुच्यं तत्परतावत्त्वम्, श्रीतत्त्रिरित्यर्थः।

मुनीति।—अयं गोकर्णतर्णकः मुनिविनियोगाय मखीयातत्रावकः, "गोकर्णोऽग्नि-रुद्रेऽपि आत्मुग-उपविशेषयोः" इति मेदिनी। "तर्णकस्तु तर्णकः" इत्यमरः; उपकण्ठकच्छेषु, वस्तिततनदीतटेषु, "कच्छो नदीतटेऽपूपे" इति विश्वः; मुनीनां विनियोगार्थं यज्ञकर्मणि व्यवहारायेत्यर्थः, विलूनानि छिन्नानि, ततः प्रकृढ़ानि पुनः सञ्जातानि, मृदूनि कोमलानि, ग्राद्वलानि हरितानि इति यावत्, बर्हींषि कुशान्, तर्णीति खादति इत्यर्थः। आर्या वृत्तम् ॥ २३ ॥

दृषदिति।—इयं तीव्रतमा अतिवेगवती, जलवेणिः जलप्रवाहः, वेणीरूपं जलं यस्याः, वृक्षप्रवाहजेन कुटिलमार्गेण चेति भावः, श्रमिः परिश्रमणैः, आश्रमाम्भः आश्रमसम्बन्धिकारचित यज्ञवाटारवेष्टनैः, पदे पदे आगे आगे,

रामः। वत्स! साधु दृष्टम्—

आलवालवलयेषु भूरुहां
मांसलं स्तिमितमन्तराऽन्तरा।
केरलीचिकुरभङ्गिभङ्गुरं
सारणीषु पुनरम्बु दृश्यते॥ २५॥

तदेहि, भगवतीं कौशिकीमालोकयन्तौ मुहूर्त्तमात्रमात्मानं पुनीवहे (ब)। (परिक्रम्यावलोक्य च)। क्वचित् साङ्ग्रामिकोऽपि विशेषो नैसर्गिकमतिशेते। तथा हि—

जडस्वच्छस्वादुप्रकृतिरुपहृतेन्द्रियगणो
गुणो यद्यप्यासामयमयुतसिद्धो विजयते।
तथाऽप्युत्कर्षाय स्फुरति सरितामाश्रमसदा-
मिदानीं वानीरद्रुमकुसुमजन्मा परिमलः॥ २६॥

न्धिलासु पर्वतीषु, पल्वियुक्तवत् परिदृश्यमानासु इत्यर्थः, स्रोतोविघ्नकरीष्विति भावः, कुल्यासु क्षुद्रसरिस्सु, "कुल्याऽल्पा क्लिमा सरित्" इत्यमरः; विभक्त्य विभक्त्य स्खिला स्खिला," प्रवहति वहतीत्यर्थः। प्रतीयमानोत्प्रेक्षा। आर्या वृत्तम्॥ २४॥

आलेति।—भूरुहां वृक्षाणाम्, आलवालवलयेषु वृक्षमूलवर्त्तिवलयाकार-जलाधारसमूहेषु, अन्तरा अन्तरा मध्ये मध्ये, मांसलं प्रचुरं, स्तिमितं निश्चलञ्च, तथा सारणीषु खल्पनदीविशेषेषु, "खल्पनद्याञ्च सारणी" इति विश्वः; पुनः किन्तु, केरली केरलदेशीया स्त्रीणां, तत्रापि केरलानां, भङ्गिवत् कुटिलतेव, भङ्गुरं कुटिलम्, अम्बु जलं, दृश्यते। केरलीनां केशाः कुटिला इति प्रसिद्धिः। रूपोद्भटा वृत्तं, "रात् परेर्ण-र-ल-ग रूपोद्भटा" तेति तल्लक्षणात्॥ २५॥

(ब) कौशिकीं नदीविशेषम्। पुनीवहे पवित्रीकुर्वः।

जडेति।—आसा सरितां नदीनां, जडा शीता, स्वच्छा निर्मला, स्वादी सुस्वादा, प्रकृतिः स्वभावो यस्य तथाभूतः, तथा उपहृतः आहृतः, आकृष्ट इति यावत्, इन्द्रियगणः इन्द्रियसमूहो येन तथाविधः, प्रेम-स्वादुत्वोपभोगायेति भावः, अयम् अयुतसिद्धः अवीवसिद्धः, गुणान्तरानिश्रत्वेन खतःसिद्ध इत्यर्थः, स्वाभाविक इति यावत्, गुणः

वसुः। आर्य! पुरस्तादनुकौशिकीतीरम् (भ) आलोकय—

तैर्मेधाजननव्रतप्रणयिभिर्व्यूढैर्वटूनामियं
सिक्ता नित्यवसन्तविभ्रमवती रम्या पलाशावली।
एतस्यां हरिणारिपाणिजसृणिश्रेणिश्रियः कोरका
गोपायन्ति तपोवनं वनकरिक्रीडाकराकर्षणात्॥ २७॥

(नेपथ्ये)।

रामभद्र! किंयच्चिरमवलोकनेन कृतार्थीक्रियन्ते (म) तपोवनविहारभूमयः? सम्प्रति हि—

परिणमयति ज्योतिर्वृत्त्या यजूंषि ऋचां पतिः
किमपि शमिनः सावित्राख्यं रहस्यमुपासते।

यद्यपि विलसते सर्वोत्कर्षेण वर्णने, तथाऽपि इदानीम् आश्रमसदाम् आश्रमवासिनाम्, उत्कर्षार्थं परितोषार्थेत्यर्थः, बालैरटुमाना नदीतीरवर्तिना वेतसतरूणां, कुसुमेभ्यः जन्म उत्पत्तिर्यत्र तादृशः, परिमलः सौरभं, पूर्वोक्तगुणनिधिरिति भावः, स्फुरति प्रसरति। त्रिष्टुबिन्द्रवज्रा वृत्तम्॥ २६॥

(भ) पुरस्तात् अग्रतः। अनुकौशिकीतीरं कौशिक्या नद्याः तीरस्यसमीपम्।

तैरिति।—मेधा धारणावती बुद्धिः, "धीर्धारणावती मेधा" इत्यमरः; तस्या जननाय उत्पादनाय, यत् व्रतं नियमः, तत्प्रणयिभिः तदासक्तैरित्यर्थः, तैः पूर्वोक्तैः, वटूनां मुनिबालकानां, व्यूढैः समूहैः, सिक्ता जलैरार्द्रीकृता, अत एव नित्यः सन्ततः, सार्वकालिक इत्यर्थः, यो वसन्तविभ्रमः वासन्तिकविलासः, वासन्तिकत्वेन विशिष्टसमो वा तद्वती, रम्या मनोज्ञा, इयं पलाशावली पलाशवृक्षश्रेणी, दृश्यते इति शेषः, एतस्यां पलाशावल्यां, हरिणारिः सिंहः, तस्य पाणिजाः नखरा एव, सृणिश्रेण्यः अङ्कुशावल्यः, ताभ्यः श्रीरिव श्रीर्येषां तथोक्ताः, कोरकाः कलिकाः, "कलिका कोरकः पुमान्" इत्यमरः; वनकरिणां आरण्यगजानां, क्रीडया क्रीडाकलितेनेत्यर्थः, यत् करेः शुण्डादण्डे, आकर्षणं तस्मात्, तपोवनं गोपायन्ति रक्षन्ति, वनकरिभयात्रस्ता पलाशकलिका सन्तता इदा छिन्नशुण्डरान् सन्धानाः प्रसारयन्ति इति भावः। मेधाजननव्रतं छन्दोब्रह्मचारिभिः क्रियते, तत्र कलेन पलाशसुखसेचनं विहितमिति वेदविदां समाचारः प्रसिद्धः। प्राटुखविक्रीडितं वृत्तम्॥२७॥

(म) कृतार्थीक्रियन्ते सफलीक्रियन्ते।

गुरुरयमनुष्ठाताध्वाध्वन्दिनीं सवनक्रिया-
मिह मखविधौ नेदीयांसं भवन्तमपेक्षते ॥ २८ ॥

रामः। (चतुरमभिनीय बालरामम्)।—

वारांक्षीनभिमुखते विदधते वन्ये; शरीरस्थितौ-
वेक्षेयां त्वचि संक्रिमन्ति वसते चापि त्वचस्तारवीः।
तत् पश्यन्ति च धाम नाभिपतितो यच्चार्मणे चक्षुषी
धन्यानां विरजस्तमा भगवतो चर्म्यंयमाह्लादते ॥ २९ ॥

(नेपथ्ये पुनरुक्तं पठ्यते)।

परिचमयतीति।—कृषां पतिः प्रभाकरः, ज्योतिर्हंस्या तेजोरूपेण, तैजसत्वव-हारेणेत्यर्थः, प्रभाविकीरणेनेति भावः, यजूंषि यजुर्वेदान्, परिचमयति पाठयतीति शेषः, यजूरूप दधातीति भावः, तथा च पुराणम्—"ऋक्सामः प्रातरादित्यो मध्याह्ने च यजुर्मयः। सायं सामसमायुक्तो ब्रह्मेशस्य उदाहृतः॥" इति, अमिनः प्रभागुणप्रधानाः सूनवः, किरणा इति भावः, आविव स्यं आवरणात्मकमेवं, हरेः तत्त्वम्, छादयन्त आवारयन्ति; चाहिण्यमन्ति भ्रमन्तीत्यर्थः; अयं गुरुः आचार्यः विश्वामित्रः, माध्याह्निनीं माध्याह्नकालीं, सवनक्रियां सोमविधिरूपं अनुष्ठातुमिच्छन्, इह अस्मिन्, मखविधौ यागविधौ, भवन्तं नेदीयांसं निकटवर्त्तिनम्, अपेक्षत प्रतीक्षते, खयमेवैष भवदानयनं प्रतीक्षते इत्यर्थः। तारवो हंसः—"न सु-म-र-स सा ग; षड्वेदेर्वेहरिणी मता" इति कोषात् ॥ २८ ॥

वारांनिधि।—अत्र ये हंसच्छाद्यौ, ये क्षीरं वारां वारयेयम्, अभिमुखते खादि, "मवेदभिमुखः खाने" इति विश्वः, वन्ये वनजाते:, प्रकृतभूताद्भावति शेषः, शरीर-स्थितौ: देहपालनादि, जीवनरक्षणमित्यर्थः, विदधते कुर्वन्ति, ऐक्षेया जनकत्वान्मम, त्वचि चर्मणि, संक्रामन्ति खादि, तारवो: तरुवल्लिनो:, त्वच, वल्कं वा इत्यर्थः, वसतेऽपि च आच्छादयन्ति च, किंच, चार्मणे चर्मनयी, चक्षुषी यत् यमेत्यः, न पतितः न गच्छतः, चर्मचक्षुषा यत् न दृश्यते इति भावः, तत् धाम तेजः, परमात्मतत्त्व-मित्यर्थः, पश्यन्ति च, अतः धन्यानां साध्यानां, तेषामिति शेषः, पूर्वोक्तरूपाणां सुकृतवतां तेषामनुभवानामित्यर्थः, इह अमवतो गाढात्मकतो, सर्वज्ञानसंस्कारवशादनादि भावः, विरजस्तमा रजस्तमोभावनसृष्टेत्यः, आह्लादतीति यावत्, चर्म्यं अनुष्ठातृमित्यः, ब्रह्मा तत् सुकृतयतीत्यर्थः, अत्यन्तसुकृतिनं इमं प्रतीमः। ब्रह्मर्षिमिति शेषः ॥ २९ ॥

रामः। (सुत्वा सस्मयमूर्धनवलोक्य च)। कथं गगनमध्यमध्यारूढो निदाघदीधितिः!! (म) वत्स! तदेहि, यत्रवाटमधिष्ठाय क्रमेण लतार्कस्य भगवतः कौशिकस्य प्रत्यनन्तरीभवावः (य)।

(इति परिक्रामतः)।

लक्ष्मणः। (सर्वतो दृष्ट्वा)। आर्य!—

उद्दामद्युमणिद्युतिव्यतिकरप्रक्रीडदर्कोपल-
ज्वालाजालजटालजाङ्गलतटीनिष्कुजकोयष्टयः।
भौमोष्मप्लवमानसूर्यकिरणक्रूरप्रकाशा दृशो-
राविष्कर्म समापयन्ति धिगमूर्मध्याह्नशून्या दिशः॥ १०॥

(म) निदाघाः उष्णाः, "निदाघो ग्रीष्मकाले स्यादुष्ण स्वेदाम्बुनीरवि" इति मेदिनी; दीधितयः रश्मयो यस्य सः निदाघदीधितिः उष्णरश्मिः, सूर्य इत्यर्थः।

(य) प्रत्यनन्तरीभवावः समीपे वर्त्तावहै इत्यर्थः।

उद्दामेति।—उद्दामा उत्कटा, या द्युमणिद्युतिः सूर्यतेजः, तस्याः व्यतिकरेण सम्पर्केण, प्रक्रीडन्तो विहरन्तो, प्रज्वलन्तोमिति यावत, अर्कोपलानां सूर्यकान्तमणीनां, ज्वालाजालेन प्रभासमूहेन, जटालाः सम्बद्धाः, या जाङ्गलतटी निर्जलप्रदेशः, "जाङ्गलं निर्जलस्थानम्" इति धरणिः, तत्र निष्कुजाः कुञ्जलतारहिताः, निर्मद्रा इति यावत, कोयष्टयः टिट्टिभाः यासु तथोक्ताः, "कोयष्टिकाष्टिट्टिभकः" इत्यमरः; तथा भौमे पार्थिवे, ऊष्मणि सन्तापे, प्लवमाने: सन्तरद्भिः, संसृज्य इति यावत, सूर्यकिरणैः क्रूराः दारुणाः, इन्धवत प्रतीयमानत्वात् दुःसहा इति यावत, प्रकाशाः भासो तथाभूताः, मध्याह्ने दिवसमध्यभागे, शून्याः सैरतेजःप्रतिघातात् दर्शनाभावा इति यावत, यद्वा—शून्याः निर्जनाः, जनसमागमविरहिता इत्यर्थः, "शून्यं विन्दौ च निर्जने" इति हैमः; प्रखरसूर्यतापाप्रसहिष्णुतया इति भावः, अमूः दिशः "मध्येऽह्नि शून्या दिशः" इति पाठान्तरम; दृशो नेत्रयोः, आविष्कर्म आविष्कारं, दर्शनव्यापारमित्यर्थः, प्रसारयन्तिति यावत, समापयन्ति विघ्नयन्तीत्यर्थः, प्रखरातपे दृष्टिप्रतिघातादिति भावः, अतो धिक् निन्दायां, "धिङ्नमर्त्सन निन्दयोः" इत्यमरः; एता दिशः निन्दामीत्यर्थः। "आविष्कर्म" इत्यत्र "आयुष्कर्म" इति

अन्तिकतमा (ङ) चेयं यज्ञवाटभूमिः, तदेतदेव न्यग्रोध-च्छायामण्डपम् (च) अध्यासीना ऋत्विजः प्रत्यवेक्षावहे (छ)। गलितयौवने (ज) पुनरह्नि भगवन्तं द्रक्ष्यावः ।

रामः। एवमस्तु ।

(इति परिक्रम्य नाट्येनोपविशतः)।

लक्ष्मणः। (पार्श्वतोऽवलोक्य)। आर्य !—

मध्ये व्योम क्रीडयित्वा मयूखान्
भानोर्बिम्बे लम्बमाने क्रमेण ।
खेरं खेरं मूलतः पादपानां
पश्य च्छायाः कञ्चिदाकर्षतीव ॥ २१ ॥

रामः। (समन्तादवलोक्य)। वत्स ! मध्यन्दिनमतिक्रान्तम् (झ) इति दिनमप्यतिक्रान्तमेव। पश्य—

पाठे—आयुष्मन् प्रावधारणोपयोगिव्यापारवासप्रयोगिण्यः। आर्क्षविक्रीडितं इत्यम् ॥ २० ॥

(ङ) अन्तिकतमा अतिसमीपवर्त्तिनी।

(च) न्यग्रोधेति।—न्यग्रोधः वटः, "न्यग्रोधो बहुपात् वटः" इत्यमरः; तस्य छाया एव मण्डपं गृहं तम्।

(छ) प्रत्यवेक्षावहे पश्यावः।

(ज) गलितयौवने अतीततारुण्ये, विगततरुण्यमाने इत्यर्थः, प्रशमिततीव्रातपे इति भावः। अह्नि अपराह्णे इत्यर्थः।

मध्ये इति।—मध्ये व्योम आकाशमध्ये, मयूखान् करान्, क्रीडयित्वा स्वार्थ्य, भानोः सूर्यस्य, बिम्बे मण्डले, क्रमेण क्रमशः लम्बमाने खेरमाकाशमभिपतति सतीत्यर्थः, कश्चित् जनः, पादपानां वृक्षाणां, छायाः मूलतः मूलदेशात्, खेरं खेरं मन्दं मन्दम्, आकर्षतीव आकृष्य नयतीव, पश्य अवलोकय। आक्षिणी इत्यं—"आक्षी नौ चेत् आक्षिणी वेदयोक्तेः" इति तत्त्वचिन्तामणौ ॥ २१ ॥

(झ) अतिक्रान्तम् अतीतम्।

गगनाग्रखरमुदयाद्रेरधिरूढाः कृष्णकर्करयखरयः।
अस्तमहीधरमधुना झटिति सुखेनावरोहन्ति ॥ १२ ॥

वज्रः। आर्य्य! ननमद्य रक्षांसि परापतिष्यन्ति (ङ), यदयमध्वरवेदिकासन्निधानं ते (च) मुनःश्रेष्ठमुखेन भगवानुपाध्यायः प्रशास्ति (छ)।

रामः। (सरोषाडम्बरम्)। वत्स! यद्येवं (ज) स्यात्—

कल्पान्तकर्कशरुजन्तभयङ्करं मे
निष्पन्दनः क्रतुविघातकृतामभीषाम्।
नीरात्तसां वसुमतीमपि कर्तुमद्य
पुण्याष्टमङ्गलमिदं धनुरादधातु ॥ १३ ॥

गगनेति।—उदयाद्रेः उदयाचलात्, गगनग्रखरम् अन्तरीक्षशिरोभागम्, अध्यारोहन्तीति भावः, कृष्णं यथा तथा, निम्नादृश्यपर्वताधिरोहणस्य क्लेशकरत्वात् इति भावः, अधिरूढाः प्राप्ताः आरूढाः इत्यर्थः, अर्कस्य सूर्यस्य, रथखराः रथवाहाः, रथधौरेयाः इत्यर्थः, अधुना झटिति शीघ्रं, सुखेन अक्लेशेन, अस्तमहीधरम् अस्ताचलम्, अवरोहन्ति अवतरन्ति, इच्छन्ति च खलु, निम्नपर्वतात् पर्वताद्यूर्ध्वपर्वताधिरोहणकाले कष्टोपदेशो जायते, तेन च क्लेशात् मनैः मनैः किञ्चित् गत्वागत्वा गन्तुं शक्नोति, न तु अवरोहणकाले तथा इच्छन्ति इति भावः; उच्चतिरेव क्लेशसाध्या, अवनतिस्तु अनायाससाध्येति तात्पर्यम्। आर्य्या छन्दः। १२।

(ङ) परापतिष्यन्ति यानमिष्यन्ति।

(च) अयं विश्वामित्रः। अध्वरवेदिकासन्निधानं यज्ञवेदेः समीपप्राप्तिमित्यर्थः। ते तव।

(छ) उपाध्यायः आचार्यः। प्रशास्ति आज्ञापयति।

(ज) यदि एवं राक्षसानां परापतनमित्यर्थः।

कल्पान्तेति।—कल्पान्ते प्रलयसमये, कर्कशः दारुणः, यः क्षणात् यमः, इदं भयङ्करं भीषणं, क्रतुविघातकृतां यज्ञावघ्नकारिणाम्, अमीषां राक्षसानां, कर्मणि यज्ञे; निष्पन्दनः निश्चयतः, मे मम, इदं रक्षोघ्ननिति ज्ञायत, खलु; अद्य वसुमतीं पृथ्वीं, नीरात्तसां राक्षसरहितां, कर्तुं विधातुं, पुण्याष्टमङ्गलं पुण्यदिनमङ्गल्यमङ्गलाचरणम्, आदधातु आचरतु, श्रीतु इत्यर्थः, सार्द्धसप्तविंशतिनाथ धनुर्धारणमिति

लक्ष्मणः। (विहस्य)। कथं रजनीचरचक्रविनाशोत्कण्ठा विसंस्थुलमार्यहृदयमदीर्घदर्शिनं भगवन्तं कौशिकमपि सम्भावयति !! (ग)—

अविद्याबीजविध्वंसादयमार्षेण चक्षुषा।
कालौ भूत-भविष्यन्तौ वर्त्तमानमवीविशत् ॥ ३४ ॥

रामः। किमुच्यते, तत्रभवान् विश्वामित्रः,—

प्रज्ञातब्रह्मतत्त्वोऽपि स्वर्गैयैरेष खेलति।
गृहस्थसमयाचार-प्रक्रान्तैः सप्ततन्तुभिः ॥ ३५ ॥

भावः। राक्षसकुलं समूलघातं हन्तुमद्य कृतचित्तं राक्षसविनाशरूप पुण्याहमाचरतु इति निष्कर्षः ॥ ३३ ॥

(ग) रजनीति।—रजनीचराणां राक्षसानां, चक्रस्य समूहस्य, विनाशाय या उत्कण्ठा उत्कण्ठिका, व्यग्रता इति यावत्, तया विसंस्थुलं विवशं, व्याकुलमित्यर्थः, अत एव अदीर्घदर्शिनम् अदूरदर्शिनमित्यर्थः। आर्यहृदयम् आर्यस्य रामस्य हृदयम्। अयं भावः,—भगवान् कौशिकः राक्षसविघ्नमचिरात् रामेण विनाश्यते इति जानन्नपि कथं तदर्थमुत्कण्ठितिशयं व्यनक्तीत्यस्मादीर्घदर्शित्वमिति भावः। यद्वा—विसंस्थुलमिति आर्यहृदयमित्यस्य विशेषणम्; तत्र चायमर्थः,—राक्षसविनाशप्रतिबन्धत्वात् आर्यहृदय महाप्रभावस्य विश्वामित्रस्य प्रभावं विज्ञाय यत् धनुर्यज्ञाय उद्योजयति, तेन तस्य अदीर्घदर्शित्वं प्रमाणयतीव, वस्तुतस्तु धनुर्यज्ञस्य प्रयोजनमेव नास्ति, भगवतः प्रभावेणैव राक्षसध्वंसरूपकार्यनिष्पादनादिति भावः।

अविद्येति।—अयं विश्वामित्रः, अविद्या अज्ञानं, तस्या बीजं मूलं, रजसमसोरत्यन्तरमित्यर्थः, तस्य विध्वंसात् विनाशात्, सत्त्वोद्रेकादिति भावः, आर्षेण ज्ञानमयेन, चक्षुषा भूत-भविष्यन्तौ अतीतानागतौ, कालौ वर्त्तमानं कालम् अवीविशत् प्रवेशयामास, भूत भाविनश्च कालं वर्त्तमानत्वेन परिणमयामासेत्यर्थः, विज्ञानशक्तिरयमिति भावः। अनुष्टुप् वृत्तम् ॥ ३४ ॥

प्रज्ञातेति।—प्रकर्षेण सम्यगित्यर्थः; ज्ञातं विदितं, ब्रह्मतत्त्वं परमार्थतत्त्वं येन सोऽयं प्रज्ञातब्रह्मतत्त्वः अपि, एषः विश्वामित्रः, स्वर्गैयैः स्वर्गेहितैः, स्वर्गसाधनैरिति यावत्, गृहस्थानां समय नियमः, तस्य आचारेण आचरणेन, प्रक्रान्तैः प्रारब्धैः, सप्ततन्तुभिः वैधैः, "यज्ञः सवोऽध्वरो याग: सप्ततन्तुर्मखः क्रतुः" इत्यमरः; खेलति क्रीडति;

अपि च—

आर्द्रीकृतो विनयनम्रमहेन्द्रमौलि-
मन्दारदाममकरन्दरसैरिवायम्।
प्रक्रान्तकुण्ठलितनूतनभूतसर्ग-
स्त्रैयङ्कवं चरितमङ्कुतमाततान ॥ २६ ॥

अन्वयः। (पुरोऽवस्थितं सङ्कर्षणम्)।—

आभिरध्वरचय्याभिः श्रौतमर्थं कृतार्थयन्।
अयं! कुलपतिः सोऽयमित एवाभिवर्त्तते ॥ २७ ॥

(ततः प्रविशति दीक्षितवेषः (घ) विश्वामित्रः)।

रामः। (निर्वर्ण्य सबहुमानम्)। वत्स लक्ष्मण! पश्य—

कर्मणः श्रूयमाणस्य व्यक्तैरधिकोज्ज्वलाम्।
तपस्तेजोमयीं लक्ष्मीमद्य पुष्णाति मे गुरुः ॥ २८ ॥

आत्मतत्त्वविदा मुक्तावधिकारात् स्वर्गफलयज्ञक्रियाचरणम् अनात्मवेदिदृष्टिकर्तव्यं क्रीडैव, तत्फलाकाङ्क्षाविरहादिति भावः। यदि वा, लोकग्रिप्रायमेव ते क्रीडाच्छलेन यज्ञादिकमाचरन्तीति भावः। अनुष्टुप् छन्दः ॥ २५ ॥

आर्द्रीकृत इति।—अयं विश्वामित्रः, विनयेन नम्रस्य विनतस्य, महेन्द्रस्य मौलि-मन्दारदाम्नः शिरःस्थितमन्दारकुसुममालायाः, मकरन्दरसाः कौसुमा रसाः तैः, आर्द्रीकृत इव परिषिक्त इव, स्नातो नीत इव इति भावः, अत एव प्रक्रान्तः आदौ प्रारब्धः, कुण्ठलितः पश्चात् सङ्कोचितः, नूतनः अभिनवः, भूतसर्गः प्राणिसृष्टिर्येन तथाभूतः सन्, देवेन्द्रप्रतिपातेन विघ्नेन्द्रः स्वगोरोधव्याघातजनितकोपात् प्रारब्धं नूतनसर्गं परित्यजन्निति भावः, अद्भुतम् आश्चर्यं, त्रैयङ्कवं त्रिभङ्कुसम्बन्धं, चरितम् आख्यानम्, आततान विस्तारयामास। वसन्ततिलकं छन्दः ॥ २६ ॥

आभिरिति।—अयं इति सन्निधिसूचकं विप्रकर्षसूचकं वा अव्ययम्; सोऽयं कुलपतिः आचार्यः, विश्वामित्र इति शेषः, आभिः अध्वरचय्याभिः यज्ञकर्मभिः, श्रौतं श्रुतिविहितम्, अर्थं तत्त्वं, विषयमिति वा, श्रुतेरुद्देश्यमित्यर्थः, कृतार्थयन् सफलयन्, आचरन्नित्यर्थः, इत एव अवेव, अभिवर्त्तते आगच्छति। अनुष्टुप् छन्दः ॥ २७ ॥

(घ) दीक्षितवेषः कृतयज्ञवेषः, परिदधतप्रतिपरिच्छद इत्यर्थः।

कर्मण इति।—अद्य मे गुरुः, आचार्यः विश्वामित्रः, श्रूयमाणस्य श्रुति-

विश्वामित्रः । (परिक्रामन् सहर्षम्) । हन्त ! कृतकृत्यप्रायमात्मानं पश्यामः । यतः,—

निर्हेतो बहु तावदध्वरभुजामातर्पणोऽयं विधि-
र्दायादेन समं सुकेतुदुहिता चाद्यैव घानिष्यते ।
पाणौकृत्य पुनर्वृषध्वजधनुर्भङ्गैकशुल्कां बधू-
मैक्ष्वाके सुरकार्यसिद्धि चलति स्वास्थ्यं विधातास्महे ॥ ३८ ॥

(राम-लक्ष्मणानुव्याधीपरिवर्तते) ।

विश्वामित्रः । (रामलक्ष्मणविरचितं निर्वर्त्यं सकौतुकम्) ।—

विहितस्य, कर्मणः क्रियायाः, यज्ञे अनुष्ठयस्य इति भावः, व्यञ्जनैः चिह्नैः, तत्तद्-यज्ञोपयिकैरिति भावः, अधिकोज्ज्वलाम् अधिकदीप्तिमतीं, तपसः यत् तेजः ज्योतिः, तन्मयीं तदात्मिकां, लक्ष्मीं श्रियं, पुष्णाति धारयतीत्यर्थः । अनुष्टुप् छन्दः ॥ ३८ ॥

निर्हेत इति ।—अध्वरभुजां देवानाम्, आतर्पणः सम्यक् तर्पणजनकः, अयं विधिः यज्ञानुष्ठानमित्यर्थः, बहु तावत् विपुलभावेनैव, साकल्येनेत्यर्थः, साङ्गमेव, न तु कैनचिदङ्गेन हीनमिति भावः, तत् यथा तथा, "यावत्सावयवं साकल्येऽवयवी मानेऽवधारणे" इत्यमरः, निर्हेतः सम्पन्नः ; च किञ्च, सुकेतुदुहिता ताडका, दायादेन दायं पैतृकं धनम् आदत्ते इति दायादः पुत्रादिः तेन, समं सह, अद्यैव घानिष्यते विनाशयिष्यते, रामेणेति शेषः, पुनः किन्तु, वृषध्वजस्य हरस्य, धनुर्भङ्ग एव, न तु धनादि-रिति भावः, एकः अद्वितीयः, शुल्कः पणः यस्याः तथोक्तां, वधूं भार्यां, जानकीमित्यर्थः, पाणौकृत्य उद्वेक्ष्य, पाणौ गृहीत्वेत्यर्थः, तद्धनुर्भङ्गेन परिणीयेति भावः, ऐक्ष्वाके रामे, सुरकार्यस्य देवकार्यसाधनाय, राक्षसविनाशायेति भावः, या दिशः दक्षिणा इत्यर्थः, दक्षिणदिग्वासिनः प्रदेशा इति भावः तान्, चलति गच्छति, रावणवधार्थं दक्षिणां दिशं प्रयाति सतीत्यर्थः, स्वास्थ्यं स्वस्थता, विधातास्महे धारयिष्यामः, अनुभविष्याम इत्यर्थः, सुखी भविष्याम इति यावत् । निर्वर्त्यं यज्ञसमाप्तिमवेत्य वा इति या आशङ्का आसीत्, रामप्रभावेण सा दूरीभूता, यज्ञविघ्नकारिणी ताडकापि अद्यैव रामेण घानिष्यते इति भाव्यामङ्काऽपि अचिरमेव दूरीभविष्यति, एवञ्च सर्वविधे अक्षुण्णता-धारणे दूरीभूतेऽपि यावत् रामो राक्षसकुलविनाशार्थं न प्रयास्यति, तावत् न हन्युक्तं स्वास्थ्यं वयमान इति निष्कर्षः । आर्द्रवृत्तिरीक्षितं छन्दः ॥ ३८ ॥

एष वैहारिकं वेषमादधानो धनुर्द्धरः।
तत्त्वमान्तरमस्माकममृतेरिव लिम्पति ॥ ४० ॥

उभौ। (उपसृत्य)। भगवन्! दाशरथौ राम-लक्ष्मणावभिवादयेते।

विश्वामित्रः। (आशिषं)। वत्सौ! किमन्यदाशास्महे (ङ)—

युवाभ्यामभिनिर्वृत्त-योगक्षेमस्य वज्रिणः।
ऐश्वर्यप्रक्रियामात्र-कृतार्थाः सन्तु हेतयः ॥ ४१ ॥

(उभौ तूष्णीमधोमुखौ स्तः)।

विश्वामित्रः। (विहस्य)। वत्सौ! समन्तादुपशोभितोऽयं सन्निवेशः (च)? कच्चिदस्मदीयास्तपोवनभूमयो रमयन्ति वाम्? उपक्लेदयति (छ) वा गार्हस्थ्यम् (ज) ऋषीणाम्?

एष इति।—वैहारिकं विहारसम्बन्धिनं, क्रीडार्थमित्यर्थः, वेषं परिच्छदम्, आदधानः परिदधानः, एष धनुर्द्धरः रामः, अस्माकम् आन्तरं तत्त्वम् अन्तःकरणम् अन्तरात्मानं वा, अमृतेः सुधायाः, लिम्पतीव लिप्तं करोतीव। अनुष्टुप् छन्दः ॥ ४० ॥

(ङ) आशास्महे आशिषा पूरयाम इत्यर्थः।

युवाभ्यामिति।—युवाभ्याम् अभिनिर्वृत्तः सुसम्पन्नः, योगः अलब्धलाभरूपः, क्षेमः लब्धस्य रक्षादिसंपादनरूपः, अथवा योगः अपूर्वलाभः, "योगो ध्यानेऽप्यपूर्वलाभे" इति धरणिः, क्षेमः विघ्नाभावेन सकुशलं यस्य तथाभूतस्य, वज्रिणः इन्द्रस्य, हेतयः अस्त्राणि, वज्रादीनीति भावः, ऐश्वर्ये प्रभुत्वे, तस्य प्रक्रियामात्रम् आधिकारमात्रं, प्रभुत्वस्य अवश्यधारणीयत्वेन तदर्थव्यवस्थापारमात्रमित्यर्थः, "प्रक्रिया त्वधिकारः स्यात्" इत्यमरः, तेन कृतार्थाः सफलाः, सन्तु भवन्तु, युवाभ्यामेव तत्कार्यसमाधानादिति भावः। अनुष्टुप् छन्दः ॥ ४१ ॥

(च) उपशोभितः परिष्टः इति यावत्, युवाभ्यामिति शेषः। सन्निवेशः आश्रमप्रदेश इत्यर्थः।

(छ) रमयन्ति सुखयन्ति। वां युवाम्। उपक्लेदयति तर्पयति, स्निग्धो करोतीत्यर्थः।

(ज) गार्हस्थ्यं गृहस्थोचिताचारः।

उभौ । (सप्रश्रयम् (झ)) । भगवन् !—

रम्यमेतदरम्यं वा कः परिच्छेत्तुमर्हति ? ।
किन्तु द्वयातिगं चित्तमद्य नौ पश्यतोरभूत् ॥ ४२ ॥

(इति सर्वे यथोचितमुपविशन्ति) ।

विश्वामित्रः । (साकूतस्मितम्) । वत्सौ !—

इह वनेषु स कौतुकवामनो
मुनिरतप्त तपांसि पुरातनः ।
तमिव वामवलोक्य तपस्विनो
नयनमद्य मनागुदमीमिलन् ॥ ४३ ॥

(उभौ सुहृदंमुन्मनीभवतः (अ)) ।

विश्वामित्रः । (स्वगतम्) । अये ! किमप्युल्लाघवर्धनाय प्राग्भवीयम् (ट) अनुस्मारितमन्तःकरणमनयोः ; तदेतावदस्तु,

---

(झ) सप्रश्रयं सविनयम् ।

रम्यमिति ।—एतत् ऋषीणां गार्हस्थ्यमित्यर्थः, रम्यं मनोज्ञम्, अरम्यम् अमनोज्ञं वा, कः जनः, परिच्छेत्तुं निर्णेतुम्, अर्हति ? शक्नोति ? न कोऽपीत्यर्थः, किन्तु पश्यतोः अवलोकयतोः, नौ आवयोः, चित्तम् अद्य द्वयातिगं रजस्तमोऽतिक्रान्तं, सत्त्वनिष्ठमिति भावः, यद्वा—द्वयातिगं रम्यारम्यधीधातीतं, कैवाद्यनिर्वचनीयभावेन भावितमित्यर्थः, अभूत् । अनुष्टुप् वृत्तम् ॥ ४२ ॥

इहेति ।—सः प्रसिद्धः, कौतुकवामनः कपटवामनमूर्तिः, पुरातनः मुनिः नारायणः, इह एषु, वनेषु अरण्येषु, तपांसि अतप्त तपश्चचार ; तपस्विनः मुनयः, अद्य तमिव वामनमेवमिव, वां युवाम्, अवलोक्य दृष्ट्वा, नयनं नेत्रं, ध्यानमुदितलोचनमिति भावः, मनाक् अल्पं यथा तथा, उदमीमिलन् उन्मीलयन्ति स्म, ध्यानदृष्ट्या तमिव युवां पश्यन्ति स्मेति, ध्यानदृष्ट्या तमिव युवानं अवलोक्य वाभ्यामेवोन्मीलयितुमीषत् नयनोन्मीलनं कृतवन्तः इति वा भावः । द्रुतविलम्बितं वृत्तं—"द्रुतविलम्बितमाह न-भौ भ-रौ" इति तल्लक्षणात् ॥ ४३ ॥

(अ) उन्मनीभवतः उत्कण्ठितमनसौ भवतः, पूर्वजन्मदृष्टाभीष्टावलोनेनेति भावः ।

(ट) प्राग्भवीयं पूर्वजन्मदृष्टम् ।

अन्यतः प्रक्षिपामि (ठ)। (प्रत्यग्रवलोक्य प्रकाशं सम्भ्रमम्।) कथमुदयगिरिकाश्मीरकुङ्कुमकेदारस्य प्रभातसन्ध्यालतायाः प्रथमस्तवको गभस्तिमाली हस्ताहस्तिकया कुतूहलिनीभिर्दिगङ्गनाभिर्वारुणीं यावदुपनीतः (ड)। (सनिर्वेदं च)।—

यातोऽस्तमेष चरमाचलचूडचुम्बी
पङ्केरुहप्रकरजागरणप्रदीपः।
आः! सर्वतः स्फुरतु कैरवमाः! पिबन्तु
ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः॥ ४४॥

(ठ) अन्यतः प्रक्षिपामि अन्यस्मिन् विषये मनो नयामि।

(ड) उदयेति।—उदयगिरेः उदयाचलस्य, काश्मीरं तद्देशभवं, यत् कुङ्कुमं तस्य केदारस्य क्षेत्रस्य, यथा—उदयगिरिरेव काश्मीरकुङ्कुमकेदारः तस्य, प्रभातसन्ध्या प्रातःसन्ध्या एव, सैव वल्ली तस्याः, प्रथमस्तवकः प्रथमसञ्जातगुच्छः, कुङ्कुमस्तबकाभिनवोद्भिन्नगुच्छसदृश इत्यर्थः, उभयोरेवारुण्यादिति भावः, गभस्तिमाली सूर्यः, हस्ताहस्तिकया एकस्याः हस्ताभ्यामपरस्याः हस्तौ हस्तेनेत्यर्थः, "हाताहाति" इति प्रसिद्धयेत्यर्थः, कुतूहलिनीभिः कौतुकवतीभिः, दिगङ्गनाभिः दिश एव अङ्गनाः नार्यः तानिः, वारुणीं पश्चिमां दिशं, यावत् प्रतीत्यर्थः, उपनीतः प्रापितः।

यात इति।—पङ्केरुहाणां पद्मानां, प्रकरस्य समूहस्य, जागरणाय प्रबोधाय, विकासायेति यावत्, प्रदीपः प्रदीपतुल्यः, एषः सूर्यः, चरमाचलचूडचुम्बी अस्तगिरिशिखरस्पर्शी सन् अस्तं यातः अदर्शनं गतः, आः। इति कोपसूचक सन्तापसूचकं वा अव्ययम्; "आः खरेऽप्यङ्कारवे कोप-सन्तापयोरपि" इति मेदिनी, कैरवं कुमुदं, सर्वतः समन्तात्, स्फुरतु विकसतु, आः। उदरम्भरयः उदरभरणार्थिनः, उदरसंज्ञा इत्यर्थः, चकोराः पक्षिविशेषाः, ज्योत्स्नाकरम्भं चन्द्रिकारूपं दधिसक्तुकं, ज्योत्स्ना-करम्भयोः उभयोरेव भावल्यादिति भावः, "करम्भो दधिसक्तवः" इत्यमरः; पिबन्तु, सर्वलोकपावनः जगच्चक्षुरादित्यः अदर्शनं गतः, दैवप्रियाणि लोकविस्मरणानि कमलानि च मुदितानि, इदानीं तुच्छकैरवाणाम् उदरसंज्ञचकोराणाञ्च उत्सवः समयः समागतः इति महतां विपत्तिदशनेन तुच्छानाञ्चाभ्युदयदर्शनेन कोपः सन्तापो वा आः इत्यव्ययद्वयेन सूच्यते इति मन्तव्यम्। वसन्ततिलकं वृत्तम्॥ ४४॥

(सर्वतोऽवलोक्य)।—

अयमपि खरयोषित्कर्षकाषायमीष-
द्विलुमरतिमिरोर्णाजर्जरोपान्तमर्चिः ।
मटकलकलविद्वीकाकुनान्दीकरेभ्यः
क्षितिरुहशिखरेभ्यो भानुमानुच्चिनोति ॥ ४५ ॥

अपि च—

मन्त्रसंस्कारसम्पन्नास्तन्वतीदन्वतीरपः ।
एतन्त्रयीमयं ज्योतिरादित्याख्यं निमज्जति ॥ ४६ ॥

राम: । (सर्वतो निर्वर्ण्य)। वत्स लक्ष्मण !—

तापनैरेव तेजोभिः प्रुष्टनिर्वाणमेचकाः ।
दिशो जाताः प्रतीचौ तु समुदाचरति क्रमात् ॥ ४७ ॥

अयमिति ।—अयम् अस्मीक्षुखः, भानुमान् सूर्यः अपि, मदकलानां मदोत्कटानां, अलानानित्यर्थः, "मदोत्कटो मदकलः" इत्यमरः; अलविद्वीनां चटकीनां, "चटकः अलविद्वः स्यात्" इत्यमरः; काकुरेव विकृतध्वनिविशेष एव, "काकुः स्त्रियां विकारो यः शोक भीत्यादिभिर्ध्वनेः" इत्यमरः; नान्दी स्तुतिवादः, तत्करेभ्यः, क्षितिरुहशिखरेभ्यः इत्यर्थः, खरयोषित: गर्दभ्याः, चर्मवत् कषायं कषायेण एतन्निव कषाय कषायरसरञ्जितमित्यर्थः, ईषत् अल्प यथा तथा, विलुनत् प्रसरत्, यत् तिमिरम् अन्धकारं, तदेव ऊर्णा लोम्यत्वात् कृष्णवर्णसैवादिलोम, "ऊर्णा मेषादिलोम्नि स्यात्" इत्यमरः; तया जर्जरं यत्समिति यावत्, उपान्तं प्रान्तदेशो यस्य तत् तादृशम्, अर्चिः तेजः, उच्चिनोति सङ्कलयति, अग्नेः अग्नेः आकर्षतीत्यर्थः। मालिनी वृत्तं—"न-न म य-युतेयं मालिनी भोगिलोकैः" इति तल्लक्षणात् ॥ ४५ ॥

मन्त्रेति ।—त्रयीमयं वेदत्रयात्मकम्, आदित्याख्यं सूर्यस्वरूपं, तेजोनिमित्तं: एतत् ज्योतिः तेजः, उदन्वतः समुद्रस्येमा औदन्वत्यः ताः औदन्वतीः समुद्रसम्बन्धिनीः, अपः जलानि, मन्त्रसंस्कारसम्पन्नाः मन्त्रेण यज्ञ वेदमन्त्रात् वेदिकमन्त्रेण, यः संस्कारः विधिः, तत्सम्पन्नाः तत्सहिताः, तन्वत् कुर्वत्, निमज्जति समुद्रं प्रविशतीत्यर्थः। अनुष्टुप् वृत्तम् ॥ ४६ ॥

तापनैरिति ।—दिशः प्राच्यादयः, तापनैः तप्तैः एव, तेजोभिः तत्तापैः, प्रुष्टाः दग्धाः, उदयात् निर्वाणे प्राप्ते, तेजसामयमने इत्यर्थः, मेचकाः श्यामलाः,

किञ्च—

काश्चिद्विभ्रति भूतिमाश्रमभुवो वेतानवेश्मानर-
ज्वालोपप्लवमानधूमवलभीविभ्रान्तदिग्भित्तयः।
श्रूयन्ते वटवस्तृतीयसवनस्वाध्यायदीर्घानपि
स्वर्वाक्यश्रमनोदनं प्रतिमुहुः स्वान् द्राघयन्तः स्वरान् ॥४८॥

विश्वामित्रः। वत्स राघव!—

उन्मृष्टाभिर्दिवसमधुना सर्वतस्ताभिरेव
स्वच्छायाभिर्निचुलितमिव प्रेक्ष्यते विश्वमेतत्।
पर्य्यन्तेषु ज्वलति जलधौ रत्नसानौ च मध्ये
चित्राङ्कोयं रमयति तमःस्तोमकीला धरित्री ॥ ४९ ॥

"आश्रमाश्रमनीवृच्चा:" इत्यमरः; जाता:, निर्वाणाङ्गारा यथा कृष्णवर्त्मा भवन्ति, तथा सूर्य्यतापदग्धाः अस्ताद्रयश्चिनी दिशः सूर्य्यसन्तापनिर्वाणादस्ताद्रारोदयाच्च कृष्णवर्त्मा दृश्यन्ते इति भावः, तु किन्तु, प्रतीची पश्चिमा दिक्, जलात् जलमुद्भूय, येन कारणेन अन्या दिशो मेचकाः जाताः, तं जलमतिक्रम्येत्यर्थः, समुदाचरति सम्यक् राजते, अस्तोन्मुखत्व सूर्य्यस्य अरुणकिरणसम्पर्कादिति भावः, सम्यक् विशेषेण वा, अन्याभ्यां दिग्भ्यामतिशयादर्शनादिति भावः, "समुदाचारस्तु शोभायां पूर्वरूपे मर्य्यादायां च" इति विश्वः। यद्वा—समुदा सदर्थां, इवेति शेषः, आचरति, अन्या दिशो मलिना जाताः, प्रतीची तु जलमुद्भूय दृष्टेव आचरतीति निष्कर्षः। "तापनेरेव" इत्यत्र "तापनेरिव" इति पाठः समीचीनः; तत्काले जाता इवेत्युत्प्रेक्षा। अनुष्टुप् वृत्तम् ॥ ४७ ॥

काश्चिदिति।—आश्रमभुवः तपोवनभूमयः, वेतानक यज्ञीयस्य, वेश्मानश्च अग्नेः, ज्वालाया: शिखायाः, उपप्लवमानः दहन्तः सधूमान्, यः धूमः स एव वलभी गोधोपरि वर्त्तमानं चुद्गृहं, तत्र विभ्रान्ताः विशेषेण भ्रान्ति गीताः, दिश एव भित्तयः, कुड्यानि यासां तथाभूताः सत्यः, काश्चित् अग्निर्धूमगोधामिति भावः, सुतिं सम्यक्, गोधामित्यर्थः, "भूतिर्भस्मनि सम्पदि" इत्यमरः; विभ्रति दधति, वटवः ब्राह्मणकुमाराः, तृतीयसवने सायंसवनाख्ये, यः स्वाध्यायः वेदाध्ययनं, तेन दीर्घान् अपि उच्चैस्वरान् अपीत्यर्थः, स्वान् निजान्, स्वरान् उदात्तादीन्, प्रतिमुहुः पुनः पुनः, अर्द्धाः परस्परविरोधाद्याः, यत्नेन निर्बन्धेन, आपादयन्तीत्यर्थः, मनोहरं मनोज्ञं यथा तथा, द्राघयन्तः अतिदीर्घीकुर्वन्तः, शृण्वते। आर्द्रवृत्तिरोक्तिः वृत्तम् ॥ ४८ ॥

उन्मृष्टाभिरिति।—एतत् विश्वं जगत्सर्वं, दिवसं दिवसं आश्रित्येत्यर्थः, अधुना,

अन्वयः। (सप्तिर्देशम्)।—

तेजोमयं तमोमयमन्यतरस्यां तटेव दिक्चक्रम्।
किमपि विचित्रा धात्रा सृष्टिरियं भुवनकोषस्य ॥ ५० ॥

(सर्वतोऽवलोक्य)।—

चूडारत्नैः स्फुरद्भिर्विषधरविवराण्युज्ज्वलान्युज्ज्वलानि
प्रेक्ष्यन्ते चक्रवाकीमनसि निविशते सूर्यकान्तात् क्षशानुः।
किञ्चामी ग्रस्तयन्तस्तिमिरमुभयतो निर्भराद्दस्तमिस्रा-
सङ्कृष्टोत्पिष्टसन्ध्याकणनिकरपरिस्पर्द्धिनो भान्ति दीपाः ॥५१॥

रामः। (विलोक्य)।—

संयोगे द्वितीया; उन्मुखाभिः, परित्यक्ताभिः, सूरेण तेजसा तिरोहितत्वाददृश्याभिरिति भावः, ताभिरेव याः दिवाऽपि आसन् ताभिरित्यर्थः, स्वच्छायाभिः निजच्छायाभिः, अधुना अस्तमनसमये इत्यर्थः, सर्वतः समन्तात्, निचुलितमिव कवलितमिव, प्रेक्ष्यते दृश्यते, तमसा तिमिरान्धा, क्षीरस्य समुद्रस्य, क्षीरा विलासः, विसरणमित्यर्थः यस्यां तथाभूता, इयं धरित्री पृथ्वी, पर्यन्तेषु प्रान्तेषु, जलधेः समुद्रे, पृथिव्याः प्रान्तस्थसमुद्र-अतुष्टये इत्यर्थः, तथा मध्ये मध्यदेशस्थे, रत्नसानौ सुमेरौ च, "मेरुः सुमेरुर्हेमाद्रिः रत्नसानुः सुरालयः" इत्यमरः, ज्वलति दीप्यमाने सति, समुदञ्च सुमेरोश्च अभ्यन्तरस्थ-रत्नानां प्रभया दृश्यमाने सतीत्यर्थः, सौरे तेजसीति वा भावः, चित्राङ्गी विविध-वर्णरञ्जिता सती, रमयति प्रीतिमुत्पादयति, लोकानामिति शेषः। मन्दाक्रान्ता वृत्तम् ॥ ४९ ॥

तेजोमयमिति।—तटेव दिक्चक्रं दिग्मण्डलं, तेजोमयं एकस्यां तेजोबहुलम्, अस्तोन्मुखसूर्यकरसम्पर्कात् पश्चिमत उज्ज्वलमिति भावः, अन्यतरस्यां प्राच्यादा-वितिभावः, तमोमयं तिमिरात्मकम्, अन्धकाराच्छन्नमिति यावत्, अतः धात्रा विधिना, भुवनकोषस्य ब्रह्माण्डस्य, इयं परिदृश्यमाना, सृष्टिः रचना, विधातृकर्तृकं निर्माणमित्यर्थः; "एकदा तूभयप्राप्तौ कर्मण्येव न कर्तरि" इति नियमात् भुवनकोष-स्येति कर्मणि षष्ठी धात्रेति कर्तरि तृतीया, किमपि अनिर्वचनीय यथा तथा, वाङ्मात्रागोचरातीता इत्यर्थः, विचित्रा आश्चर्यकरीत्यर्थः। आर्या वृत्तम् ॥ ५० ॥

चूडारत्नैरिति।—विषधराणां भुजङ्गानां, विवराणि रन्ध्राणि, स्फुरद्भिः दीप्य-मानैः, तिमिरोदयादिति भावः, चूडारत्नैः शिरोमणिभिः, विषधराणामेवेति भावः, उज्ज्वलानि उज्ज्वलानि, भास्वराणि भास्वराणि, चक्रवाकीमनोऽनुरागीत्यर्थः, प्रेक्ष्यन्ते

विश्वं चाक्षुषमस्तमस्ति हि तमःकैवल्यमौपाधिक-
प्राच्यादिव्यवहारबीजविरहाद्दिङ्मात्रमेव स्थितम्।
दृश्यन्ते भयहेतवः पटुभिरप्यन्तैर्भाति च
ध्वान्तेनातिघनेन वस्तु वचसा ज्ञातः खरैरामुक्तः॥ ५२॥

दृश्यन्ते, सूर्यकान्तात् सूर्यकान्ताख्योपलात्, जन्मानुः अग्निः, चक्रवाकीणां मनसि चेतसि, निविशन्ते प्रविशन्ति, सूर्यतेजसा सूर्यकान्तः अग्निमुद्गिरतीति प्रसिद्धम्, एवञ्च सूर्यालोकगमनात् सूर्यकान्तञ्च निसर्गजत्वात् तत्जः अग्निः चक्रवाकीणां चेतसि प्रविशन्ता: सन्तापयतीत्यर्थः; सूर्यविरहसम्पर्कात् प्रभावतः सूर्यकान्ताः सूर्यञ्च अस्तमननात् निसर्गजः, चक्रवाकीणां मनांसि च निशागमे प्रियविच्छेदात् सन्तप्तानि भवन्तीति निष्कर्षः; किञ्च, अमी प्रत्यक्षविता इति भावः, दीपाः प्रदीपाः, तिमिरम् अन्धकारं, ग्रस्यन्तः क्षपयन्तः, उभयतः उभयोः पार्श्वयोः, निर्भरम् अत्यन्तम्, अङ्गसिमस्यः दिवसान्धकाररजस्यः, "तमिस्रा तामसी रात्रिः" इत्यमरः; यः सङ्घट्टः सम्मेलनं, तेन उत्पिष्टा विमर्दिता, या सन्ध्या तस्याः अवनिरुहं विलुठनम्, सत्येवकात् सन्ध्यावसानविच्युतमिति यावत्, सन्ध्याया औदित्यादिति भावः, परिवर्तन्ते अनुकुर्वन्तीति तथोक्ताः सन्तः, भान्ति राजन्ते। सुधरा इत्तं—"सन्ध्यायां वयेच निसुनियतियुता सुधरा कीर्त्तितेयम्" इति तल्लक्षणात्॥ ५१॥

विश्वमिति।—चाक्षुषं चक्षुरिन्द्रियग्राह्यं, विश्वं जगत्, अस्तम् अदर्शनं गतं, तिरोहितमिति यावत्, अन्धकारस्याकृत्यात् चक्षुरिन्द्रियेण विश्वं न दृश्यते इति भावः, तमसाम् अन्धकाराणां, कैवल्यं केवलं तम इति यावत्, अस्ति हि वर्त्तते एव, उपाधिर्निमित्तं तत्सम्बन्धी औपाधिकः निमित्तसम्बद्ध इत्यर्थः, यः प्राच्यादिव्यवहारः दिक्त्वाभिनेऽपि इयं प्राची दिक्, इयं प्रतीचीत्यादिरूप इत्यर्थः, तस्य बीजं हेतुः, सूर्य इत्यर्थः, सूर्यस्य उदयास्तादिक्रमेणैव दिग्व्यवहारादिति भावः, तस्य विरहात् अभावात्, अस्तमयादिति यावत्, दिङ्मात्रमेव स्थितं केवलं दिगिति प्रसिद्धिस्तिष्ठति, न तु प्राच्यादिरूपेणेति भावः; पटुभिः समर्थैरपि, वस्तुयन्ते इति भावः, चक्षुरन्यैरन्यैरिन्द्रियैः, त्वगादिभिरित्यर्थः, भयहेतवः भीतिकारकाणि, पदार्था इति शेषः, गृह्यन्ते, अन्धकारे दर्शनाक्षमत्वात् रज्जवा सर्पवदिति भावः; अतिघनेन अतिसान्द्रेण, ध्वान्तेन तमसा, वस्तु घटपटादिकं, वचसा आप्तवाक्येन, अयं घटः अयं पट इत्यादिरूपेणेति भावः, भाति राजते, ज्ञायते इति यावत्, अन्धकारेण तददर्शनाक्षमत्वादिति

किञ्च—

घनतरतिमिरघुणोत्करजग्धानामिव पतन्ति काष्ठानाम् ।
छिद्रैरमीभिरुडुभिः किरणव्याजेन चूर्णानि ॥ ५२ ॥

(नेपथ्ये कलकलः) ।

(सर्वे सप्रश्रममाकर्णयन्ति) ।

(पुनस्तत्रैव) ।

निर्मज्जच्चक्षुरत्नभ्रमदतिकपिशक्रूरतारा नरास्थि-
ग्रन्थिं दन्तान्तरालग्रथितमविरतं जिह्वया घट्टयन्ती ।
ध्वान्तेऽपि व्यक्तवक्त्रज्वलदनलशिखाजर्जरे व्यक्तकर्मा
निर्मान्ती गृध्ररौद्रीं दिवमुपरि परिक्रीडते ताड़कैयम् ॥ ५४ ॥

भावः, स्वरेण कण्ठध्वनिना, परिचितेनेति शेषः, अमुकः अयं पुमान्, ज्ञातः विदितः, भवति । अत्यकारधर्मवर्णनमिदम् । मार्दूलविक्रीडितं वृत्तम् ॥ ५२ ॥

घनेति ।—घनतरं गाढतरं, यत् तिमिरम् अन्धकारः, स एव घुणोत्करः काष्ठ-भक्षकक्षोटसमूहः, तैः जग्धानां भक्षितानां, कृतच्छिद्राणामित यावत्, काष्ठानां दिशां, दारुणामिति ध्वनिः, "दिशस्तु ककुभः काष्ठाः" इति "काष्ठं दार्विन्धनम्" इति चामरः; चूर्णानि छिद्रैरिव रन्ध्रैरिव, अमीभिः ऊर्ध्वाकाश परिदृश्यमानैः, उडुभिः नक्षत्रैः, तिमिरघुणोत्कीर्णकाष्ठानां नक्षत्ररूपविवरैरिति ध्वनिः, "नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम्" इत्यमरः; किरणव्याजेन मयूखनिषेण, पतन्ति । उत्प्रेक्षाऽलङ्कारः । आर्यां वृत्तम् ॥ ५३ ॥

निर्मज्जदिति ।—निर्मज्जती निमग्नीभवती, क्षोटं प्रविशती इति यावत्, ये चक्षुषी नेत्रे, तयोः अक्ष्नः अक्ष्णतयोः, भ्रमन्त्यो घूर्णमाने, अतकपिशे अत्यन्तपिङ्गले, क्रूरे भीषणे, तारे कनीनिके यत्रा: तथोक्ता, "तारकाऽक्ष्णः कनीनिका" इत्यमरः; दन्तानाम् अस्थ्नां राशि सङ्घे, ग्रन्थिं सुदृढम् आखुं, चर्मच्छलीं इति शेषः, नराणाम् अस्थि मनुष्यकङ्कालास्थि, जिह्वया अविरतम् अजस्रं, घट्टयन्ती चालयन्तीत्यर्थः, निष्प्रयोजनार्थमिति भावः, व्याप्त विस्तृतं, यत् वक्त्र वदनं, तस्मिन् ज्वलतः अनलस्य अग्नेः, शिखया ज्वालया, जर्जरे जर्जरतां गते, विध्वस्ते इति यावत्, ध्वान्ते अन्धकारे, अपि, व्यक्तं प्रकटं, कर्म हिंसादिनिष्ठुरक्रिया यस्यास्तथाविधा, इयं ताड़का उपरि ऊर्ध्वदेशे, दिवम् आकाशं, गृध्ररौद्रीं गृध्राणां श्मशानादिकपक्षिविशेषाणां सम्बन्धिनीं,

अपि च—

वेताग्निकुण्डपूरं च वर्षन्तो रुधिरच्छटाः।
हिंसाः सुबाहुमारीच-मिश्रा नः परिरक्षते ॥ ५५ ॥

विश्वामित्रः। (साकूतम् (ढ))। कथं ताडका!! वत्स रामभद्र!—

विधानमानुश्रविकं गृहेषु नः
प्रतिस्किरन्तौ किमियं प्रतीच्यते?।
सुबाहुमुख्यैः समसाततायिभि-
र्गृहाण चापं निगृहाण ताडकाम् ॥ ५६ ॥

रौद्रौ भयङ्करौ, निर्मांसौ कुर्वन्तौ सतौ, परिक्रीडते विहरतोत्यर्थः। खरधरा इत्यम् ॥ ५४ ॥

वेतेति।—हिंसाः क्रूरकर्माणः, सुबाहु मारीचमिश्राः सुबाहु मारीचाभ्यां संयुक्ताः, राक्षसा इति शेषः, वेताग्निः "दक्षिणाग्निर्गार्हपत्यो हवनीयस्त्रयोऽग्नयः। अग्नित्रय-मिदं वेता—॥" इत्युक्तलक्षणमाग्नित्रयं, तस्य कुण्डः आधारः, तस्य पूरं, पूरणं यस्मिन् तत् यथा तथा, रुधिरच्छटाः रक्तविस्तारान्, शोणितबिन्दून् वा, वर्षन्तः सन्तः, नः अस्मान्, परिरक्षते रक्षन्ति, रक्षन्तस्मि वा। अनुष्टुप् इत्यम् ॥ ५५ ॥

(ढ) साकूतं साभिप्रायम्, आदीति अध्याहार्याक्रियाविशेषणम्।

विधानमिति।—नः अस्माकं, गृहेषु आश्रमेषु, आनुश्रविकं वैदिकं, विधानम् अनुष्ठानं, प्रतिस्किरन्तौ नाशयन्तौ, इयं ताडका, किं कथं, प्रतीक्ष्यते? अत्यत? क्षत्रिय इति शेषः, चापं धनुः, गृहाण, सुबाहुमुख्यैः सुबाहुप्रभृतिभिः, आततायिभिः वधीयतैः, राक्षसैरिति शेषः, समं सह, "आततायी वधीयते" इत्यमरः; तस्य षड्विधत्वमुक्तं, यथा—'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्र-दारापहारी च षडेते आततायिनः॥" इति, तस्य वधे दोषो नास्तीत्युक्तं मनुना—"आततायिन-मायान्तमपि वेदान्तग वधे। निघातस्त निघांसीयान्न तेन ब्रह्महा भवेत्॥" इति, "नाततायिवध दोषो हन्तुर्भवति कश्चन" इति च, ताडकां निगृहाण निगृह्य कुरु, लहि इत्यर्थः। वंशस्थविल इत्यम्—"जतौ तु वंशस्थविल ज-तौ ज-रौ" इति तल्लक्षणात् ॥ ५६ ॥

रामः । (सतृष्णातिरेकम् (च)) । भगवन् ! स्त्रियम् (त) इमाम् !!

(पुनर्नेपथ्ये) ।

अलक्ष्मणमलक्ष्मणम् (थ) । भोस्तात ! विश्वामित्र ! परिभूयामहे (द), प्रह्रीयतामधिज्यधन्वा दाशरथिः (ध) ।

रामः । (विहस्य नेपथ्यावलोकितकेन) । बालर्षे ! शुनःशेफ ! मुहूर्त्तं धीरो भव—

अलं क्लिशित्वा गुरुमल्पकोऽयं
विधिस्त्वदाज्ञैव गरीयसी नः ।
न कौशिकस्य त्वयि धर्मपुत्रे
पुत्रे मधुच्छन्दसि वा विशेषः ॥ ५७ ॥

(च) सतृष्णातिरेकं सानुकम्पातिशयमित्यर्थः, आङ्गैति अध्याहार्य्यक्रियाविशेषणम् ।

(त) स्त्रियमिमां, निरक्षामि !! इति शेषः, स्त्रीवधस्य गर्हितत्वादिति भावः ।

(थ) अलक्ष्मणम् अवध्यम्, अवध्यौ नाम्नी प्रयोज्यमिदम्, "अलक्ष्मणमवध्यौ" इत्यमरः ।

(द) परिभूयामहे निरक्षामहे, वयमिति शेषः, तत परिवाययेति भावः ।

(ध) प्रह्रीयतां प्रेष्यताम् । अधिज्यधन्वा न्यारोपितधनुष्कः, सज्जितधनुष्कः इत्यर्थः । दाशरथिः रामः ।

अलमिति ।—गुरुम् आचार्य्यं, विश्वामित्रमित्यर्थः, क्लिशित्वा खेदयित्वा, क्लिष्ट्वा इत्यर्थः, अल्पं गुरवे क्लेशो न दातव्य इत्यर्थः, अयं विधिः विधानं, राक्षसावध्यत्वज्ञानमित्यर्थः, अल्पः तुच्छः, अनायाससाध्य इत्यर्थः, तव आज्ञा आदेश एव, नः अस्माकं, गरीयसी अतिशयिता, कौशिकस्य विश्वामित्रस्य, धर्मपुत्रे धर्मेण पालिते पुत्रे, त्वयि, वा अथवा, पुत्रे, औरसे इति शेषः, मधुच्छन्दसि वशिष्ठः प्रभेदः, न, अस्तीति शेषः, "गुरुवत् गुरुपुत्रेषु गुरुदारेषु चैव हि" इति मनुवचनेन गुरुपुत्रस्य गुरुवन्मान्यत्वकीर्त्तनात् गुरोश्च धर्मपुत्रस्यौरसपुत्रवीर्त्तिशैथिल्यात् तदाज्ञयैव कार्य्ये बाधयामीति भावः । उपजातिवृत्तम् ॥ ५७ ॥

विश्वामित्रः । वत्स ! कृतमुत्तरोत्तरेण (न) । नन्वयं नेदीयः आश्रमोपघातः (प) ।

सख्यः । (सव्यथमिव (फ) स्वगतम्)—

मीमांसते किमार्य्योऽयं कौशिकेऽप्यनुशासति ? ।
वाचमेषामृषीणां हि शास्त्रमेवानुवर्त्तते ॥ ५८ ॥

राम: । (स्वगतम्)—

गुर्वादेशादेव निर्मीयमाणो
नाधर्माय स्त्रीवधोऽपि स्थितोऽयम् ।
अद्य स्थित्वा स्त्रो गमिष्यद्भिरस्मै-
र्लज्जाऽस्माभिर्मीलिताक्षैर्जितैव ॥ ५९ ॥

(न) कृतमुत्तरोत्तरेण पुनः पुनः प्रतिवचसा, कृतम् अलम्, उत्तरोत्तरं विघ्नमिति तत्प्रयोजनं नास्तीति भावः ।

(प) ननु भो. ! नेदीयान् सन्निहितः, उपस्थित इत्यर्थः । आश्रमोपघातः आश्रमपीडा ।

(फ) सव्यथमिव सदुःखमिव, आश्रमोपघातमश्रवणेनेति भावः ।

मीमांसते इति ।—कौशिके विश्वामित्रे, अनुशासति आदिशति अपि, अयम् आर्य्यः रामः, किं कं विषयं, मीमांसते ? विचारयति ? अत्र किमपि विचार्यं नास्तीति भावः, हि यतः, शास्त्रमेव एषाम् ऋषीणां वाचम् अनुवर्त्तते अनुसरति, एषां वाणीव शास्त्ररूपेण चलति, तत् कथं अवध्याः स्त्रियः इति शास्त्रानुसरणे आशङ्का विचारः ? इति भावः । अनुष्टुप् वृत्तम् ॥ ५८ ॥

गुर्वादेशादेति ।—गुरोः विश्वामित्रस्य, आदेशादेव आज्ञयैव, निर्मीयमाणः स्त्रियमाणः, अयम् एषः, स्त्रीवधोऽपि नारीहत्यायामपि, अधर्माय न स्थितः न प्रभवतीति भावः, अद्य अस्मिन् दिने, स्थित्वा, अत्रेति शेषः, श्वः परदिने, गमिष्यद्भिः अस्मैः शास्त्रकैः, अस्माभिः मीलिताक्षैरेव निमीलितनयनैरेव सद्भिः, लज्जा जिता, भविष्यतीति शेषः, दुष्कार्य्यकारिणां जनसन्दर्शने एव लज्जा, तस्य नयनोन्मीलनसाध्यं, तदभावात् निमीलितनयनेनात्मादृश्यीकरणात् सत्वरप्रस्थाने कैमपि दृष्टशास्त्रैरेवत्वात् च लज्जाग्रहर इति भावः । यद्वा—मीलिताक्षैः उन्मीलितनयनैः, वाक्यालापकार्यं गुर्वादेश एव बलवान्, तदाज्ञयैव नया अवध्यम् इदं क्रूरमपि नाम मे आदिशद्भि

किन्तु—

दीर्घं प्रजाभिरतिकौतुकिनीभिरामि-
रस्मिन्नकीर्त्तिपटहे मम ताड्यमाने ।
ज्योतिर्मयेन वपुषा जगदन्तसाक्षी
लङ्घिष्यते कुलगुरुर्भगवान् वसिष्ठः ॥ ६० ॥

(नेपथ्ये)।

अलमिष्टा मखान् मूर्खाः ! खड्गधारेयमस्ति नः ।
अदवीयानयं पन्थाः स्वर्लोकमुपतिष्ठते ॥ ६१ ॥

रामः । (श्रुत्वा सरोषं खड्गमुद्यम्य सविनयमञ्जलिं बद्ध्वा)।

भगवन् ! जगत्त्रयगुरो ! गाधिनन्दन !—

लज्जा, अतः स्त्री मननकाले उन्मीलितनयनैरेवात्माभिगन्तव्यमिति भावः । साक्षिणी इति—"नास्ती मी चेच्चाक्षिणी वेदलोकैः" इति तल्लक्षणात् ॥ ५९ ॥

दीर्घमिति ।—अतिकौतुकिनीभिः अत्यर्थं कृतं रघुवंशीयेन रामेणेति कौतूहलवतीभिः, आभिः प्रजाभिः जनैः, अस्मिन् मम अकीर्त्तिपटहे स्त्रीवधोऽनेन कृत इति अयशःख्यापकवादिनभेदे, ताड्यमाने आहन्यमाने सति, ज्योतिर्मयेन तेजोमयेन, वपुषा शरीरेणेत्यर्थः, ज्योतिर्मयेन वपुषा उपलक्षित इति वा, जगदन्तसाक्षी जगतां अन्तश्च प्रलयश्चापि, साक्षी साक्षात् द्रष्टा, तत्कार्यं न किमपि गोपयितुं शक्यते केनापीति भावः, कुलगुरुः वंशक्रमागतः आचार्यः, भगवान् सर्वज्ञशक्तिमान्, वसिष्ठः दीर्घम् अत्यन्तं, लङ्घिष्यते, मनसेन क्रमेणेति भावः । वसुलतिलकं वृत्तम् ॥ ६० ॥

अलमिति ।—रे मूर्खाः ! यागिका इति शेषः, मखान् यज्ञान्, इष्ट्वा अर्चयित्वा, लब्धेत्यर्थः, यज्ञैर्देवान् अभ्यर्चयंति यावत्, अलं इष्ट्वा, यज्ञार्थोऽयमायासो वः शिरश्छेदनमेव इति भावः, नः अस्माकम्, इयं खड्गधारा अस्ति वर्त्तते, यया युष्मान् नाशयाम इति भावः, अयम् अदवीयान् अदूरवर्त्ती, सरल इति यावत्, शीघ्रगमनाय इति भावः, पन्थाः मार्गः, उपाय इति भावः, स्वर्लोकं स्वर्गम्, उपतिष्ठते उपस्थितो भवति, शीघ्रं स्वर्गं प्रापयतीति भावः ; बहुभिरायासैः खलु यागः क्रियते, तेनापूर्वं पुण्यं जन्यते, ततश्च स्वर्गलाभ इति स्वर्गगमने युष्माकं कुटिलः पन्थाः, अस्माकन्तु खड्गाघातेन शीघ्रं स स्वर्गो लभ्यते इति ऋजुः सुगमश्चायं पन्थाः, तत् युष्मान् निहत्य स्वर्गं प्रेषयाम इति भावः । अनुष्टुप् वृत्तम् ॥ ६१ ॥

दशरथगृहे सम्भूतं मामवाप्य धनुर्धरं
दिनकरकुलाकाशेन्दोः कोऽयं कलङ्कनवाङ्कुरः ! ! ।
इति न वनितामेतां हन्तुं मनो विचिकित्सते
यदधिकरणं धर्मस्यैवं तवैव वधादिषु नः ॥ ६२ ॥

(प्रविश्य नेपथ्याभिमुखम्)। भोस्तपोधनाः ! मा भैष्ट (ब)—

रजनिचरचमूरमूरपाङ्ग-
क्षयमहमागत एव रामचन्द्रः ।
कुशिकसुतकुशाग्रतोयबिन्दो-
रिदमनुकल्पमवेत कार्मुकं मे ॥ ६३ ॥

(इति धनुरारोपयन् (भ) निष्क्रान्तः)।

दशरथेति।—दशरथस्य गृहे सदने, पक्षान्तरे वा, "न गृहं गृहमित्याहुर्गेहिनी गृहमुच्यते" इति शास्त्रात्, सम्भूतं समुत्पन्नं, धनुर्धरम् अस्त्रशस्त्रधनुर्वेदं, मां मामवाप्य प्राप्य, दिनकरस्य सूर्यस्य, कुलाकाशेन्दोः वंशाकाशचन्द्रस्य इत्यर्थः, कलङ्कस्य लोपातस्य इति अकीर्त्तेः, नवः अङ्कुरः प्ररोहः, दिनकरकुले एवंविधकलङ्कस्य मयैव प्रथमसमर्पणादिति भावः, अयं कः? समुत्पन्न इति शेषः, इति—जना एवं वदिष्यन्ति इति विचिन्त्य इत्यर्थः, मनः एतां वनितां ताडकां, हन्तुं न विचिकित्सते न संशेते, एतस्या हनने जनाः मां सूर्यवंशकलङ्कं करिष्यन्ति इति यः संशयः प्रागासीत्, स इदानीं त्वदाज्ञया अपगत इति भावः, "विचिकित्सा तु संशयः" इत्यमरः; यत यतः, तवैव वचसि अनुज्ञावाक्यानीत्यर्थः, नः अस्माकं, धर्मस्यैव धर्मस्थितिमूलं, धर्मप्रवर्त्तकमिति यावत्, अधिकरणम् अवलम्बनं, तव वच एव धर्म इति कृत्वा एतां हन्मीत्याशयः। इरिणी वृत्तं—"न स-म-र-स-ला गः षड्वेदैर्हयैरिणी मता" इति तल्लक्षणात् ॥ ६२ ॥

(ब) मा भैष्ट भीतिं न कुरुध्वम्।

रजनीति।—अयमहं रामचन्द्रः अमूः उपरि दृश्यमाना इति भावः, रजनिचरचमूः राक्षससेनाः, अपाङ्गम् दूरीकुर्वन्, आगत एव उपस्थित एव, मे मम, इदं उपस्थितमिति भावः, कार्मुकं धनुः, कुशिकसुतस्य विश्वामित्रस्य, कुशाग्रे यत तीर्थं जलं, तच्चोन्नतपूतमिति भावः, तस्य बिन्दोः कणस्य, अनुकल्पम् अनलस्त्रं, मौर्वीविभागमित्यर्थः, प्रतिनिधिस्वरूपमिति भावः, अवेत जानीत, राक्षसनिधने गुरोः मन्त्रपूतकुशाग्रजलमेव मुख्यं कारणं, धनुरिदन्तु मम तस्य प्रतिनिधिस्वरूपं, अतः तेनैव

वत्सः । (साम्रङ्गमालम्बतम्)। दिष्ट्या बालेन धर्मेण कौमार-मप्यशून्यम् (म) आर्य्यस्यासीत् । (नेपथ्याभिमुखमवलोक्य हर्षं नाटयन् प्रकाशम्)। भगवन्! कौशिक! पश्य पुरस्तात्, आर्य्यं भृतधनुषि—

वायव्यास्त्रव्यतिकरनिरालम्बनस्ताडकेयः
प्राप्तो जीवन्मरणमसुभिर्विप्रमुक्तः सुबाहुः ।
क्षत्तोन्मुक्ता भुवि च करुणाऽऽर्य्यबीभत्सहास-
त्रासक्रोधोत्तरलमृषिभिर्दृश्यते ताडकेयम् ॥ ६४ ॥

विश्वामित्रः । (विलोक्य)। वत्स लक्ष्मण! विस्मयेन प्रमोदेन

कुमलक्षितेऽपि प्राणेऽवतः, मम तु बलुर्निमित्तमावलिति भावः । "मुख्य स्यात् प्रथमः श्रेष्ठोऽनुत्तमस्तु ततोऽधमः" इत्यमरः । पुष्पितायां वृत्तम्—"अयुजि नयुगरेफतो यकारो युजि तु न-जौ ज-र-गाश्च पुष्पितायाः" इति तल्लक्षणात् ॥ ६२ ॥

(म) आरोपयन् सत्यं कुर्वन् ।

(म) दिष्ट्या भाग्येन, "दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः" इत्यमरः । बालेन अविशीर्णितेन । धर्मेण आचारेण । कौमार बाल्यम् । अशून्यम अविरहितमित्यर्थः, बाल्यमपि बालधर्मपुरस्कृतमिति यावत्, आर्य्यो बालकोऽपि न चल-धर्मपराङ्मुख इति भावः ।

वायव्येति ।—ताडकाया अपत्यं पुमान् ताडकेयः, नारीच इत्यर्थः, वायव्यस्य वायु-दैवतस्य, अस्त्रस्य बाणस्येत्यर्थः, व्यतिकरेण सम्बन्धेन, आघातेनेति यावत्, निरालम्बनः आलम्बनः आश्रयः तद्रहितः, शून्ये एव निराश्रयतया अवतिष्ठमानः सन् इत्यर्थः, जीवन् प्राणन्, अपीति शेषः, मरणं प्रायः जीवन्मृतः सन् निरालम्ब इत्यर्थः ; सुबाहुः तन्नाम्नो राक्षससेनापतिः, ताडकाया एव अपरः पुत्र इति कोचित्, असुभिः प्राणैः, विप्रमुक्तः वियुक्तः, निर्गत इति यावत्, क्षत्ता क्षिप्रा, भुवि पृथिव्याम्, उन्मुक्ता त्यक्ता, पतितेति यावत्, दयया ताडका करुणया स्नेहसिक्तया दयया, आर्य्येण विश्वामित्रेण, अयं मदास्त्रावलीढो बालोऽनेन निर्दयेनेत्थंरूपेणेति भावः ; बीभत्सेन घृण्या, जुगुप्सिताचारदर्शनेनेति भावः, त्रासेन आत्मन्यनिष्टेन त्रासेन, त्रासेन मत्वं निर्दया न वा, पुंश्चलीयं चेद्दिति भयेन, क्रोधेन कोपेन, तत्कृतात्याचारस्मरणजेनेति भावः, उत्तरलं चपलं यथा तथा, ऋषिभिः मुनिभिः, दृश्यते । मन्दाक्रान्ता वृत्तं—"मन्दाक्रान्ताम्बुधि-रस-नगैर्मो भनौ तौ गयुग्मम्" इति तल्लक्षणात् ॥ ६४ ॥

च परवन्तो (य) वयं न वाचामधोऽग्रहे (र)। वक्तव्यमेव वा किमस्ति, न खल्वियमद्यतनी (ल) वः प्रतिष्ठा (व)—

दिक्कूलङ्घकीर्त्तिधौतवियतो निर्व्याजवीर्य्योद्धता-
स्ते यूयं रघवः प्रसिद्धमहसो यैः सोऽपि देवाधिपः।
विभ्राणैरसुराधिराजविजयक्रीड़ानिदानं धनुः
पौलोमीकुचपत्रभङ्गरचनाचातुर्य्यमध्यापितः॥ ६५॥

लक्ष्मणः। भगवन्! पश्य—

अद्य नैर्ऋाचरीं सेनामेनामुन्मूलयन्नयम्।
आधानं वीरधर्मस्य निर्माय त्वामुपस्थितः॥ ६६॥

(प्रविश्य)।

रामः। (सवैलक्ष्यस्मितम (श))—

(य) परवन्तः पराधीनाः।

(र) अधोऽग्रहे प्रभवामः, वाक्प्रसरोऽस्माकं नास्तीति भावः।

(ल) अद्यतनी आधुनिकी।

(व) वः युष्माकम्। प्रतिष्ठा गौरवं, ख्यातिरिति यावत्।

दिगिति।—दिशां कूलङ्घका प्राप्तस्थायिनी, दिगन्तव्यापिनीत्यर्थः, या कीर्त्तिः यशः, तया धौतं क्षालितं, वियत् आकाशं यैः तथाभूताः, निर्व्याजवीर्य्योद्धताः अकपटपराक्रमोन्नताः, ते प्रसिद्धाः, रघवः रघुवंश्याः, यूयं प्रसिद्धमहसः प्रख्यात-तेजसः, विश्वविदितपराक्रमा यूयमित्यर्थः, असुराधिराजानाम् असुरमुख्यानां, विजयः पराभव एव, क्रीड़ा खेला, तस्या निदानं हेतुभूतं, धनुः कार्मुकं, विभ्राणैः दधद्भिः, यैः युष्माभिः, सः प्रसिद्धः, देवाधिपोऽपि इन्द्रोऽपि, पौलोम्याः पुलोमनन्दिन्याः शच्याः, कुचयोः स्तनयोः, पत्रभङ्गरचनायां पत्रावलिलेखनायां, चातुर्य्यं वैदग्ध्यं, पाटवमित्यर्थः, अध्यापितः शिक्षितः, तत्साध्यैरासुरविजयैश्च रघुवंशीयैः सख्याद्दनात् देवराजः केवलं शच्या सह सततं क्रीड़तीति भावः। शार्दूलविक्रीड़ितं छन्दः॥ ६५॥

अद्येति।—अयं रामः अद्य एनां परिदृश्यमानां यज्ञविघातकारिणीं, नैर्ऋाचरीं राक्षसीं, सेनां उन्मूलयन् समूलं विनाशयन्, वीरधर्मस्य वीरत्वस्य, आधानं स्थापनं, रक्षणमिति यावत्, निर्माय कृत्वा, त्वामिति शेषः, त्वां उपस्थितः प्राप्तः। अनुष्टुप् छन्दः॥ ६६॥

(श) सवैलक्ष्यस्मितं सलक्ष्मणमुद्दिश्य।

पूषा वसिष्ठः कुशिकात्मजोऽयं
त्रयस्त एते गुरवो रघूणाम् ।
महामुनेरस्य गिरा कृतोऽपि
क्लेशो वधो मां न सुखाकरोति ॥ ६७ ॥

(आत्मानमवलोक्य) ।—

प्रत्यासन्नतुषारदीधितिकरक्लिश्यत्तमोवल्लरी-
कल्पाभिर्मखधूमवल्लिभिरमी सम्मीलितव्यञ्जनाः ।
ध्रुवः सच्छवरयिष्यमाणवटुकव्याधूतशुष्यत्त्वचो
निद्राणातिथयस्तपोधनगृहाः कुर्वन्ति नः कौतुकम् ॥ ६८ ॥

(पुरतोऽवलोक्य) ।—

स्फुरति पुरतो मायन्मायच्चकोरविलोचन-
प्रकरकिरणश्रेणीदत्तस्वहस्तघनं महः ।

पूषेति ।—पूषा सूर्यः, वसिष्ठः रघूणां कुलगुरुः, अयम् अनापत्तिकः, कुशिकात्मजस्य विश्वामित्रस्य, ते प्रसिद्धाः, एते त्रयः रघूणां रघुवंशीयानां, गुरवः, किन्तु महामुनेः अस्य गुरोर्विश्वामित्रस्य, गिरा वाचा, कृतोऽपि अनुष्ठितोऽपि, क्लेशः क्लेशकरो, वधः विनाशः, ताडकाहननमित्यर्थः, मां न सुखाकरोति न प्रीणयति । उपजातिः वृत्तम् ॥ ६७ ॥

प्रत्यासन्नेति ।—प्रत्यासन्नः उदयोन्मुखः, यस्तुषारदीधितिचन्द्रः, तस्य करैव किरणैव, क्लिश्यन्त्यः पीड्यमानाः, दूरं पलायमाना इत्यर्थः, वल्लीवल्लर्थः अन्धकारलक्ष्यः, अन्धकाररूपा इत्यर्थः, तत्कल्पाभिः तत्सदृशीभिः, मखधूमवल्लिभिः यज्ञीयधूमलतासदृशीभिः, सम्मीलितं समाच्छन्नं, व्यञ्जनं चिह्नं, दारकृत्यादिरूपमिति भावः येषां तथाभूताः, तथा श्रुवः परदिने, सच्छवरयिष्यमाणाः परिव्राजयमानाः, अत एव वटुकैः ब्रह्मचारिभिः, व्याधूताः विशेषेण कम्पिताः, आन्दोलिता इत्यर्थः, शोषयाथेनमिति भावः, शुष्यन्त्यः शोषं गच्छन्त्यः, त्वचः वल्कलानि येषु तथाविधाः, तथा निद्राणाः सुप्ताः, अतिथयः अभ्यागता येषु ताडकाः, तपोधनगृहाः ऋषीणाम् आश्रमस्थभवनानि, नः अस्माकं, कौतुकम् आनन्दं, कुर्वन्ति जनयन्तीत्यर्थः । आर्यूवृत्तम् ॥ ६८ ॥

स्फुरतीति ।—मायतां मायताम् अतिशयेन तृष्यतामिति यावत्, चन्द्रोदयः दर्शनेनेति भावः, चकोराणां पक्षिविशेषाणां, ये विलोचनप्रकराः नेत्रसमूहाः, तेषां

हृदय ! लघु मा भूः प्रेयोदर्शनप्रतिभूरयं
कुवलयदृशामिन्दुर्नेत्रे सुधाभिरनक्ति नः ॥ ६९ ॥

अपि च—

उन्मीलन्ति मृणालकोमलरुचो राजीवसंवर्त्तिका-
संवर्त्तव्रतवृत्तयः कतिपये पीयूषभानोः कराः।
अप्यस्मैर्धवलीभवन्तु गिरिषु क्षुब्धोऽयमुन्मज्जता
विश्वेनेव तमोमयो निधिरपामङ्काय फेनायते ॥ ७० ॥

किरणश्रेणीभिः मरुखनिधर्यैः, दत्तेन अर्पितेन, खड्गेन इत्यावखण्डनेनेत्यर्थः, सादरदृष्टिपातेनेति भावः, घन सान्द्र, नेत्रकिरणैः सह चन्द्रकिरणस्य सम्मिश्रणादिति भावः, सह: तेजः, प्रभा इत्यर्थः, चान्द्रमिति भावः, पुरतः अग्रतः, स्फुरति राजते, हे हृदय ! लघु अचपलम, उत्सुकमित्यर्थः, मा भूः न भव, कुवलयदृशा नीलोत्पलाक्षीणा, प्रेयोदर्शनप्रतिभूः प्रियतमदर्शने लग्नकः, तत्स्वरूप इत्यर्थः, अयम् उदयोन्मुखः, इन्दुचन्द्रः, नः अस्माकं, नेत्रे सुधाभि. अमृतकिरणैः, अनक्ति लिम्पति, प्रीतयतीति यावत्। इन्दुर्हि विरहोद्दीपकतया विरहिणीनां प्रियसमागमसाधकोऽपि यन्मम नेत्रे प्रीतयति, तेन प्रीत्र मे प्रियया समागमः सम्भवितेति कथं ते समुत्सुकतेति दुर्बलं हृदयं मेत्रिलोदर्शनोत्सुकं प्रति रघुपतेरुक्तिरियमिति बोध्यं, वस्तुतस्तु प्राक्चमनेतत् प्रदर्शनमिति चिन्त्यम। हरिणी वृत्तम् ॥ ६९ ॥

उन्मीलन्तीति।—मृणालवत् कोमलाः सुकुमाराः, रुचः कान्तयः येषां तथाभूताः, राजीवानां पद्मानां, या: संवर्त्तिकाः नवदलानि, "संवर्त्तिका नवदलम्" इत्यमरः; तासां संवर्त्तं प्रलये, ध्वंसे इत्यर्थः, सङ्कोचने इति भावः, यत् व्रतं सङ्कल्पपूर्वकनियम इत्यर्थः, तदेव वृत्तिर्व्यापारो येषां तथाविधाः, कमलदलसङ्कोचका इति यावत्, चन्द्रस्य कमलदलसङ्कोचकारित्वस्वभावादिति भावः, पीयूषभानोः, अमृतकिरणस्य चन्द्रस्य, कतिपये अल्पसङ्ख्यकाः, न तु समग्रा नवोदितत्वादिति भावः, कराः किरणाः, उन्मीलन्ति प्रसरन्ति, उच्चैः किरणैः, गिरिषु पर्वतेषु, धवलीभवन्तु श्वेतीभवन्तु सन्तु, उन्मज्जता उन्मज्जनं कुर्वतेव, अन्धकारसमुद्रे निमग्नावस्थातो मस्तकोत्तोलनं कुर्वतेव इत्यर्थः, विश्वेन जगता, क्षुब्धः नक्रितः, अथ तमोमयः अन्धकारमयः, नीलत्वादिति भावः, अपां निधिः समुद्रः, अङ्काय झटिति, फेनायते फेनमुद्गिरति। उत्प्रेक्षाः वृत्तिः। शार्दूलविक्रीडितं वृत्तम् ॥ ७० ॥

(प्रतिषेधम्)।—

इन्दुर्यद्युदयाद्रिमूर्द्धनि न भवत्यद्यापि तन्मा स्म भू-
न्नाशीरेऽपि तमःसमुच्चयमसूरुन्मूलयन्ति त्विषः।
अप्यक्ष्णोर्मुदमुन्निरन्ति कुमुदैरामोदयन्ते दिशः
सम्मत्यूर्ध्वमसौ तु लाञ्छनमभिव्यङ्क्तुं प्रकाशिष्यते ॥ ७१ ॥

(प्रहर्षम्)।—

काश्मीरेण दिङ्मानमम्बरतलं वामभ्रुवामाननै-
र्द्वैराज्यं विदधानमिन्दुहरितां भिन्दानमभ्राःशिराः।
प्रत्युद्यत्युरुहंतपत्तनबधूदत्तार्घदर्भाङ्कुर-
श्रीर्बोत्सङ्गमैन्दवमिदं बिम्बं समुज्जृम्भते ॥ ७२ ॥

इन्दुरिति।—अद्यापि इदानीमपि, यदि इन्दुश्चन्द्रः, उदयाद्रेः उदयाचलस्य, मूर्द्धनि शिरसि, न भवति नोदेतीत्यर्थः, तत् तदा, मा स्म भूत् न भवतु, नोदेत्वित्यर्थः, ननु तर्हि तमोनाशादिकं कथं स्यात् ? इत्याह, नाशीरे इति।—अमूः त्विषः किरणाः, नाशीरेऽपि अग्रेऽपि, उदयात् प्रागपीत्यर्थः, "नाशीरोऽग्रयाने स्यादग्रेऽपि" इति विश्वः; तमसाम् अन्धकाराणां, समुच्चयं समूहम्, उन्मूलयन्ति नाशयन्ति, तथा अक्ष्णोरपि नेत्रयोरपि, मुदं प्रीतिः, "मुत् प्रीतिः प्रमदो हर्षः" इत्यमरः; उन्निरन्ति प्रकटीकुर्वन्ति, जनयन्तीत्यर्थः, तथा कुमुदैः कैरवैः, तद्विकासैरिति भावः, दिशः आमोदयन्ते सुरभीकुर्वन्ति, तु पुनः, असौ इन्दुः, सम्मति निजत्विषा तत्तन्नाशादिकार्य-समाधानानन्तरमित्यर्थः, लाञ्छनं कलङ्कं, व्यक्तीयमिति भावः, अभिव्यङ्क्तुं प्रकटयितुम्, कृते सति, प्रकाशिष्यते उदेष्यति, स्वकार्यैः सत कार्यं साध्यते, स्वयं प्रकाशे तु सकलङ्क इति सकल दुर्भाग्यमिन्दोरिति प्रस्तुतवर्णनेन कस्यापि अप्रस्तुतस्य व्यवहारयोगात् समासोक्तिरलङ्कारः; तदुक्तं दर्पणे—"समासोक्तिः समैर्यत्र कार्य-लिङ्ग-विशेषणैः। व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः॥" इति। मार्कण्ड-विक्रीडितं वृत्तम् ॥ ७१ ॥

काश्मीरेणेति।—काश्मीरेण कुङ्कुमेन, "काश्मीरं कुङ्कुमेऽपि स्यात्" इति मेदिनी; अम्बरतलम् अम्बरीषं, दिङ्मानं दिग्यं कुर्वत्, विस्तरयदित्यर्थः, वामभ्रुवां सुन्दरीणाम्, आननैश्च मुखैश्च, वैराज्यं द्वयोः राज्योः कर्म परस्परप्रतियोगिकत्वरूपं विरोधित्वमित्यर्थः; आननैर्वैराज्यं मुखप्रतिपक्षता, मदनप्रतिस्पर्द्धितामिति यावत्, विदधानं

एताश्च—

श्रीलोमीकुचकुम्भकुङ्कुमरजःस्नाजन्यजन्मोद्धताः
श्रीतांशोर्द्युतयः पुरन्दरपुरीसीम्नामुपस्कुर्वते।
एताभिर्लिहतोभिरन्धतमसान्युद्ग्रथ्नतीभिर्दिशः
श्रीणीमास्तृणतीभिरन्तरतमं व्योमेदमोजायते॥ ७१॥

अपि च—

नैवायं भगवानुदञ्चति शशी गव्यूतिमात्रीमपि
द्यामद्यापि तमस्तु कैरवकुलश्रीचाटुकाराः कराः।

कुर्वत्, इन्दुहृदा चन्द्रकान्तोपलानाम्, अम्भःस्रिरः जलनाडिकाः, चन्द्रकान्तस्रिताया: जलनिर्गमनमार्गानित्यर्थः, भिन्दानं खण्डयत्, परिस्फोटयदित्यर्थः, चन्द्रोदये चन्द्र-कान्तस्रिताः जलं निःसरतीति अरघादिति भावः, प्रसृमरीभिः प्रसृद्धरीभिः, अर्घदानार्थमिति भावः, पुरुहूतपत्तनवधूभिः इन्द्रपुरवासिनीभिः वनिताभिः, देवाङ्-नाभिरित्यर्थः, दत्तः यः अर्घः दूर्वाऽक्षतादिरूपपूजोपकरणं, तत्र यः दर्भाङ्कुरः कुशाङ्कुरः, तस्मै तद्ग्रहणार्थमित्यर्थः, क्रीडः मत्तः, अतिचञ्चल इत्यर्थः, उत्सङ्गकुरङ्गः क्रोडस्थहरिणः यत्र तथाभूतम्, इदम् उपरि परिदृश्यमानम्, ऐन्दवम् इन्दुसम्बन्धि, बिम्बं मण्डलं, समुज्जृम्भते समुल्लसति। शार्दूलविक्रीडितं वृत्तम्॥ ७२॥

पौलोमीति।—पुलोम्नः अपत्यं स्त्री पौलोमी शची, तस्याः कुचकुम्भयोः स्तन-कलसयोः, यत् कुङ्कुमरजः काश्मीरपरागः, तस्य स्नाजन्ये स्नाकुल्ये, यत् जन्म उत्पत्तिः, तेन उद्धताः गर्विताः, श्रीतांशोश्चन्द्रस्य, द्युतयः प्रभाः, पुरन्दरस्य इन्द्रस्य, पुरी स्वर्गनगरी, तस्याः सीम्नां प्रदेशानाम्, उपस्कुर्वते गुणान्तराधानं कुर्वन्ति, तत्प्रदेशान् श्रीमयन्तीत्यर्थः, अन्धतमसानि गाढान्धकारान्, लिहतीभिः ग्रसन्तीभिः, ग्रासयन्तीभिरिति यावत्, दिशः उद्ग्रथ्नतीभिः प्रकटयन्तीभिः, श्रीणीं पृथ्वीम्, आस्तृणतीभिः आच्छादयन्तीभिः, व्याप्नुवन्तीभिरिति यावत्, एताभिः द्युतिभिः प्रभाभूताभिः, अन्तरतमम् अतिमध्यम्, इदं व्योम आकाशम्, ओजायते ओजस्वि-वदाचरति, अतिशयेन उज्ज्वलीभवतीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्॥ ७३॥

नैवेति।—अयं भगवान् शशी चन्द्रः, अद्यापि इदानीमपि, गव्यूतिमात्रीमपि क्रोशद्वयपरिमाणामपि, "गव्यूतिः स्त्री क्रोशयुगम्" इत्यमरः; द्यां आकाशं, नैव उदञ्चति उत्तिष्ठति, उदयाचलात् क्रोशद्वयमात्रमपि ऊर्ध्वं न उत्तिष्ठतीत्यर्थः, तु किन्तु, कैरवकुलानां कुमुदवृन्दानां, श्रीः शोभा, चाटुकाः लोभकाः, प्रकाशं इति

मथ्नन्ति स्खलसोक्षि शैलगहनोत्सङ्गेषु संरुन्धते
जीवग्राहमिव क्वचित् क्वचिदपि च्छायासु गच्छन्ति च ॥७४॥

(क्षीरखाऽतिशयं विभाव्य)।—

किं नु ध्वान्तपयोधिरेष कृतकज्योदेरिवेन्दोः करै-
रत्यच्छोऽयमधश्च पङ्कमखिलं छायाऽपदेशादभूत् ।
किंवा तत्करकर्त्तरीभिरभितो निस्तक्षणादुज्ज्वलं
व्योमैवेदमितस्ततश्च पतिताश्छायाच्छलेन त्वचः ॥ ७५ ॥

(परिक्रम्य पार्श्वतोऽवलोक्य च)।—

यावत्, "तृपादेर्वर्णने चाटुरालोके चाटुरिष्यते" इति धरणिः ; तौ कुर्वन्तीति तथोक्ताः, करा: किरणाः, तम: अन्धकारं, स्खलसीति स्खलदेशे, मथ्नन्ति विलोडयन्ति, विध्वंसयन्तीत्यर्थः, शैलाना पर्वताना, गहनानाञ्च निबिडारण्यानाञ्च, उत्सङ्गेषु क्रोडेषु, अभ्यन्तरेष्विति यावत्, संरुन्धते अवरुद्धं कुर्वन्ति, तत्र तत्र अन्धकाराधिक्यादिति भावः, तथा क्वचित् क्वचित् कुत्रापि कुत्रापि, छायासु अपि अनातपप्रदेशेष्वपि, जीवग्राहमिव जीवस्य जीवनस्य, ग्राहः यद्यत् यस्मिन् कर्मणि तत् यथा तथा, गच्छन्ति धावन्ति, छायाविलोनमपि स्वस्वप्रदेशेभ्यः स्वयं प्रवेशेन निष्काशयन्तीवेत्यर्थः, उचितश्चैतत् भृत्यानामिति ध्वनिः। मार्दूलविक्रीडितं वृत्तम् ॥ ७४ ॥

किमिति ।—अयमेषः ध्वान्तपयोधिः अन्धकारसमुद्रः, कृतकज्योदेरिव "निर्मलो" इति प्रसिद्धजलप्रसादनफलविशेषचूर्णादिव, इन्दोश्चन्द्रस्य, करैः किरणैः, अत्यच्छः अतिनिर्मलः, तथा अखिलं समस्तं, पङ्कं कर्दमं, ध्वान्तपयोधिरिति भावः, छायापदेशात् छायाच्छलात्, अधश्च इत्यादीना निखमित्यर्थः, अभूत् किं नु ? कर्दमाविलजले कृतकचूर्णप्रवेशेन पङ्कादिक्षयः पतति, जलञ्च उपरिभागे निर्मलं भवतीति प्रसिद्धिमाश्रित्योक्तं, वा अथवा, तस्य इन्दोः, करा: किरणा एव, कर्त्तव्यैः कर्त्तरिकाः, "काटारी" इति प्रसिद्धास्त्रविशेषाः, क्षुद्रकृपाणविशेषा वा, ताभिः अभितः सकलात् निस्तक्षणादेव कर्त्तनादेव, इदं व्योम आकाशम्, उज्ज्वलं प्रभासम्पन्नं, किं नु ? भवतीति शेषः, तथा छायाच्छलेन छायाव्याजेन, इतस्ततः तस्य त्वचः चर्माणि, निक्षिप्ता इति शेषः, पतिताश्च, अथवा किं नु ? इति पदद्वयमाक्षेपार्थकम्, यथा अन्यस्यापि निकृत्तस्य तथादेस्तस्य इतस्ततः पतन्ति, तद्वदिति भावः। सन्देहालङ्कारः, तदुक्तं दर्पणे—"सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः" इति। मार्दूलविक्रीडितं वृत्तम् ॥ ७५ ॥

दलवितततिभृता तले तरूणा-
मिह तिलतण्डुलितं मृगाङ्करोचिः ।
मदचपलचकोरचक्षुकोटी-
कवलनतुच्छमिवान्तरान्तराऽभूत् ॥ ७६ ॥

(विभाव्य च) ।—

त्रिभुवनतमोलुण्टाकोनामहो ! मिहिरत्विषा-
मभिविधिरसौ कोकश्रेणीमनस्यवशिष्यते ।
क्षुधमपि तमः कोपादन्तः प्रविश्य विनिग्रतः
ग्रशधरकरानच्छिन्नाग्रास्यरन्ति चकोरकाः ॥ ७७ ॥

दलेति ।—दलवितततिभृता दलै. पत्रै, वितति विस्तृतिं, बिभ्रति धारयन्तीति तादृशाना विस्तृतपल्लवशालिनामित्यर्थः, तरूणा द्रुमाणाम्, इह अस्मिन्, तले अधःप्रदेशे, मृगाङ्करोचिः चन्द्रकिरणः, तिल-तण्डुलितं तिल-तण्डुलाभ्यामिव आचरितं, कुत्रचित् तिलाच्छन्नमिव कृष्ण, कुत्रचिद्वा तण्डुलाहतमिव शुभ्रमित्यर्थः, अतिघनपत्रत्वात् यत्र चन्द्रकिरणो न पतति गाढान्धकारत्वात् तत्र तिलायितं, यत्र च पत्रान्तरालेभ्यः चन्द्रकिरणः अधः पतति तत्र शुभ्रत्वात् तण्डुलायितमिति भावः, अत एव अन्तरा अन्तरा मध्ये मध्ये, तिलायितप्रदेशे इति भावः, मदेन हर्षेण, चपलानां अस्थिराणा, चन्द्रिकापानाशया इति भावः, चकोराणां चन्द्रिकापायिपक्षिविशेषाणां, चक्षु-कोटीभः चक्षुर्भिः, कवलनेन ग्रसनेन, तुच्छमिव शून्यमिव, चन्द्रिकाविरहित-मिवेत्यर्थः, अभूत् । उत्प्रेक्षाऽलङ्कारः । पुष्पिताग्रा वृत्तम् ॥ ७६ ॥

त्रिभुवनेति ।—अहो ! आश्चर्ये, त्रयाणां त्रिभुवनानां समाहारस्त्रिभुवनम्, तस्मिन् अन्धकारस्य, लुण्टाक्य लुण्ठनकारिण्यः तासां, मिहिरत्विषा सौरतेजसाम्, असौ अभिविधिः अभिव्याप्तिः, कोकश्रेणीना चक्रवाककुलाना, मनसि चेतसि, अवशिष्यते अवतिष्ठते, मिहिरत्विषः दृढानीं चक्रवाकहृदयेषु एव वर्तन्ते, नान्यत्र ; अन्धकारस्य तु रात्रौ सरस्यविरहात् सर्वत्रा भवन्तीति भावः ; चकोरकाः चकोरपक्षिणः, कोपात् क्रोधात्, अतः तमसामेव अन्धकारमिति भावः, प्रविश्य मुखं क्षुधा, क्षुधारूपमित्यर्थः, क्षीणोऽपि अन्धकारश्च, विनिग्रतः विनाशयतः, अच्छिन्नाग्रान् सम्पूर्णानित्यर्थः, दूरमसारिण इति भावः, ग्रशधरकरान् चन्द्रकिरणान्, चरन्ति खादन्ति, पिबन्तीत्यर्थः । पुष्पिताग्रा वृत्तम् । ७७ ॥

अपि चेदानीं—

तथा पौरस्त्यायां दिशि कुमुदकेदारकलिका-
कपाटघ्नोमिन्दुः किरणलहरीमुल्लसयति ।
समन्तादुन्मीलद्दलजलविन्दुस्तवकिनो
यथा पुष्णायन्ते प्रतिगुडकमेणाङ्कमणयः ॥ ७८ ॥

(परिक्रामद्भूमवलोक्य)।—

तरुणतमालकोमलमलौममेतदयं
कलयति चन्द्रमाः किल कलङ्कमिति ब्रुवते ।
तदनृतमेव निर्दयविधुन्तुददन्तपद-
व्रणविवरोपदर्शितमिदं हि विभाति नभः ॥ ७९ ॥

तथेति।—इन्दुश्चन्द्रः, पौरस्त्यायां प्राच्यां, दिशि कुमुदाना कैरवाणां, केदारः क्षेत्रं, कुमुदाकरं सर इत्यर्थः, तस्य याः कलिकाः कोरकाः, अविकसित-कुमुदानीत्यर्थः, तासां कपाटघ्नीं सङ्कोचनाग्रिमीमिति यावत्, विधायिनीमिति भावः, किरणलहरीं मयूखततिं, तथा तेन प्रकारेण, उल्लसयति प्रसारयति, यथा येन प्रकारेण, समन्तात् सर्वतः, उन्मीलद्भिः उच्छूनद्भिरित्यर्थः, प्रसरद्भिरिति यावत्, बहुलैः प्रभूतैः, जलबिन्दुभिः जलकणैः, सवलितः सगुच्छाः, एवञ्च पुष्णोभवनात् गच्छत् प्रतीयमाना इत्यर्थः, जलबिन्दुवर्षिण इति यावत्, एणाङ्कमणयः, मृगाङ्कमणयः, चन्द्रकान्तशिला इत्यर्थः, प्रतिगुडकं गुटिकां गुटिकां प्रति, पुष्णायन्ते राशीभूता भवन्ति, विलृता भवन्तीति यावत्। शिखरिणी वृत्तं—"रसैरुद्रैश्छिन्ना यमनस-भ-लगः शिखरिणी" इति तल्लक्षणात् ॥ ७८ ॥

तरुणेति।—अयं चन्द्रमाः तरुणः अभिनवः, यतमालः तदाख्यतरुः, तद्वत् कोमलं मृदुलं, तथा मलीमसं मलिनञ्च, कृष्णवर्णमित्यर्थः, अत्र यत् इति पदमध्याहार्य्यं, यत् एतत् चन्द्रं परिदृश्यमानं किमपि वस्त्विति यावत्, कलयति भवते, तत् कलङ्कमिति ब्रुवते वदन्ति, किलेति प्रसिद्धौ, लोका इति शेषः; तत् लोकवचनं इति भावः, अनृतमेव अलीकमेव, हि यतः, इदं परिदृश्यमानं वस्तु निर्दयञ्च निष्ठुरञ्च, विधुन्तुदस्य राहोः, दन्तपदेन दन्तचिह्नेन, दन्ताघातेन इत्यर्थः यत् व्रण क्षतः, तदेव विवरं रन्ध्रं, तेन उपदर्शितं प्रकटितं, नभः आकाशं, विभाति राजते। राहोर्दन्ता-घातेन चन्द्रावयवे छिद्रं सञ्जातं, तेन छिद्रेण पश्चादुक्तं कृष्णवर्णम् आकाशं परिदृश्यते,

किञ्च—

कविभिरभितप्तटङ्कोत्कीर्णैरिव त्रसरेणुभि-
र्यदुडुभिरपि च्छेदैः स्थूलैरिव भिद्यते नभः।
प्रकृतिमलिनो भास्वद्बिम्बोन्मृजाकृतकर्मणः
स्तदयमपि हि त्वष्टुः कुन्दे भविष्यति चन्द्रमाः॥ ८०॥

लक्षणः। (सर्वतोऽवलोक्य)।—

भूयस्तरामि यदमूनि तमस्विनीषु
ज्योत्स्नीषु च प्रविरलानि ततः प्रतीमः।

न खेतन चन्द्रबलइनिति भावः। कोविलक्षं इत्तं—"इय-च्चतु खागरैर्यातयुतं यदि कोविलक्षम्" इत्युक्तलक्षणम् अथ तु प्रगेव "यदि भवतो न नौ भ-ज-ज-ज-ग युक् तदेदं नर्दटकम्" इत्युक्तलक्षणम् नर्दटकस्य सत्त्वात् तदेव इयदिवसियुतचेत् कोविलक्षम् इति ज्ञातव्यम्॥ ७९॥

कविभिरिति।—अभितः समन्तात्, यत् टङ्कोत्कीर्णैः पाषाणदारणास्त्रविशेषा-घातोत्थिते, त्रसरेणुभिरिव "नाखात्परगते भानौ यत् किञ्चित् दृश्यते रजः। प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते॥" इत्युक्तप्रमाणैरत्युत्सेधैरिव, कविभिः सदृशैः, इतस्ततः प्रसृतराशिभिरित्यर्थः, तथा स्थूलैः त्रसरेणुभेदेन किञ्चित् दृढतरैरित्यर्थः, छेदैरिव खण्डैरिव, उडुभिः नक्षत्रैरपि, नभः आकाशं, भिद्यते पूर्यते, तत् प्रकृतिमलिनः स्वभाव-कृष्णः, अयं चन्द्रमाः भास्वद्बिम्बस्य सूर्यमण्डलस्य, उन्मृजायाम् उन्मार्जने, तत्त्वे इति यावत्, आधाराधेयभेदेन तत्रैव निवेश्य क्षमतासम्पादनव्यापारे इत्यर्थः, कृतकर्मणः कृतव्यापारस्, स्व पृथक्त्वेत्यर्थः, त्वष्टु विश्वकर्मणः कुन्दे "कुंद" इत्याख्यभित्तिबन्धविशेषे, "कुन्दो माध्वीस्त्री सुकुन्द मपि निष्पन्नरेषु ना" इति मेदिनी, भविष्यति हि चन्द्रमा एव भविष्यतीत्यर्थः, नेता दृश्यः, किन्तु विश्वकर्मणष्टङ्कोत्कीर्णास्त्रसरेणव एते, नेतानि नक्षत्राणि, किन्तु विश्वकर्मणष्टङ्कोत्कीर्णास्छेदविशेषा एते, तस्मादत्रैव प्रकृति-मलिनश्चन्द्रमा औज्ज्वल्यविधानार्थं, यस्मिन् यत्र निविश्य दृढधाराः कांस्यधारा वा खड्गादिमुत्कीरन्ति, विश्वकर्मा तस्मिन् कुन्दाख्ययत्रे चन्द्रं निवेश्य तमुत्कीरति, (चङ्गोवा. यं "कुंदे तोला" वा "खुंदे तोला" इति वदन्ति) इत्युत्प्रेक्षा। पुरा सूर्य-किरणैरिव अवदह्यमानया सूर्यपत्न्या संज्ञया प्रार्थितः पिता विश्वकर्मा सूर्यं यन्त्रादृढ़ कृत्वा क्षौमतैलक्षमकरोदिति पुराणेषु नाऽनानुसन्धेया। दरिणी वृत्तम्॥ ८०॥

भूयस्तरामीति।—यत् यस्, अमूनि उडुनीत्यर्थः, तमस्विनीषु रात्रीषु ज्योत्स्नीषु

सन्ध्यानलेन भृशमम्बरमूषिकाया-
मावर्त्तितैकडुभिरेव भृतोऽयमिन्दुः ॥ ८१ ॥
(विदूषकः)। हन्त ! यथाधर्मम् (ष) एतत्—
यत्पोयूषमयूखमालिनि तमःस्तोमावलीढायुषां
नेत्राणामपमृत्युहारिणि पुरः सूर्य्यौढ़ एवातिथौ ।
अम्भोजानि पराञ्चि तन्निजमघं दत्त्वेव तेभ्यस्ततो
गौराङ्गीवदनोपमासुकृतमादत्ते पतिर्यज्वनाम् ॥ ८२ ॥

भूवस्तरादि प्रभूतानि, ज्योत्स्नीषु च चन्द्रिकान्वितासु रात्रिषु च, "ज्योत्स्नी चन्द्रिकयाऽन्विता" इत्यमरः; प्रविरलानि स्वल्पानि, इच्छन्ते इति शेषः, ततः तस्मात्, प्रतीतः सन्ध्यानद्दे, सन्ध्या एव अनलः अग्निः, तेन अम्बरमाकाशमेव, मूषिका मूषा, "मुषि" इति ख्यातः सुवर्णादिद्रवीकरणपात्रविशेषः इत्यर्थः, तत्र आवर्त्तितैः द्रवीकृतैः, उडुभिरेव नक्षत्रैरेव, अयम् इन्दुः चन्द्रः भृतः पूरितः, पूर्णतां गत इत्यर्थः, ज्योत्स्नीषु रात्रिषु इति शेषः, ततश्च चन्द्रोदये नक्षत्राणां स्वल्पता, द्रवीभूतानां तेषां चन्द्रेण सह एकीभूतत्वादिति भावः। उत्प्रेक्षाऽलङ्कारः। वसन्ततिलकं वृत्तम् ॥ ८१ ॥

(ष) यथाधर्मं धर्मानुसारीत्यर्थः ।

यदिति ।—यत् यतः, तमःस्तोमेन तिमिरसङ्घातेन, अवलीढं भक्षितं, नाशितमित्यर्थः, आयुः जीवनं, जीवनचिह्नस्वरूपदर्शनव्यापार इति यावत् येषां तथाविधानां, नेत्राणाम् अपमृत्युहारिणि विघातनाशिनीति यावत्, जीवनचिह्नस्वरूपदर्शनव्यापारसम्पादिनीति भावः, पीयूषमयूखमालिनि अमृतरश्मौ एव, चन्द्रे एवेत्यर्थः, सूर्य्यौढ़े सूर्य्यस्तमनकाले समागते, अतिथौ अभ्यागते जने, पुरः अग्रतः, पूर्वस्यां दिशि वा, उपस्थिते सतीति शेषः, अम्भोजानि पद्मानि, पराञ्चि पराङ्मुखानि, सङ्कुचितानि इति यावत्, भवन्तीति शेषः, तत् तस्मात्, यज्वनां पतिः द्विजराजचन्द्रः, अतिथिरूप इति भावः, निजम् अघं पापं, नाशयिष्यति यावत्, तेभ्यः अम्भोजेभ्यः, दत्त्वेव ततः तेभ्यः, अम्भोजेभ्य एव [लब्धात्] इत्यर्थः, गौराङ्गी वा नारी तस्या वदनेन वा उपमा सादृश्यं तया [तुल्यमङ्गीकृत्येत्यर्थः, सुकृतं पुण्यम्, अम्भोजानामिति भावः, आदत्ते गृह्णाति, सुन्दरीवदनञ्च चन्द्रसाम्यप्रसिद्धेः। तथा चोक्तं धर्मसंहितासु—"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते। स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥" "अतिथौ विमुखे प्रोक्ते गते यत् पातकं गृहात्। तदेवाष्टगुणं प्रोक्तं सूर्य्यौढ़े विमुखे

विश्वानिलः। (सर्वतोऽवलोक्य सस्मितम्)। अहह!! नामधेय-माधुर्य्यादपरमार्थदृश्यानो विप्रलभ्यन्ते (स)। तथा हि—

क्षीरा दिशः कुमुदसृष्टिदुरं पिबन्ति
ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः।
आः! कौट्टगत्रिमुनिलोचनदूषिकायां
पीयूषदीधितिरिति प्रथितोऽनुरागः!! ॥ ८३ ॥

(रामं च दृष्ट्वा सहर्षस्मितम्)। कथमयं कुमाराङ्कविजयप्रत्या-गतोऽपि ताडकानिग्रहेण क्षिणीयमानः (इ) सहसा नोप-

---

गते॥" इति च। अतिथिखण्डं चन्द्र समुत्पन्नं दृष्ट्वाऽपि अब्धीजानि सप्तोच्चखण्डं वैमुख्य गतानि, तेन च विमुखीभूतः अतिथिचन्द्रः निजकखण्डात्मकं लाञ्छनं तेभ्यो दत्त्वा तेषां सौन्दर्य्यात्मकं सुकृतं गृहीतवान्, ततश्च अब्धीजानि सुकृतालाभात् मलिनानि जातानि, चन्द्रश्च अब्धीजेभ्यः खदुष्कृतसमर्पणात् सुकृतग्रहणाच्च रमणीयदर्शनः बभूव इति निष्कर्षः। प्रार्टूलविक्रीडितं वृत्तम्॥ ८२॥

(स) नामधेयेति।—नामधेयमात्रस्य केवलस्य, माधुर्य्यात् मनोज्ञत्वात्। अपर-मार्थदृश्यानः अयथार्थदर्शिनः, भ्रान्ता इति यावत्। विप्रलभ्यन्ते प्रतार्य्यन्ते।

क्षीरा इति।—दिशः क्षीराः प्रकाशमौलाः, खत एव प्रकाशस्वभावाः इत्यर्थः, न तु चन्द्रकरसङ्गादिति भावः, कुमुदं केरवम्, सृष्टिदुरं खत एव विशदरं, रजन्यामिति भावः, उदरम्भरयः खोदरपरायणाः, उदरमात्रपूर्त्तिलालसा इति यावत्, चकोराः ज्योत्स्नाकरम्भ ज्योत्स्नारूपदधिसक्तून्, "करम्भो दधिसक्तवः" इत्यमरः; पिबन्ति, दधिसक्तुभान्त्या, न तु ज्योत्स्नाबुद्ध्येति भावः, आः!! इति विस्मौ, तथाऽपीति भावः, अत्रिमुनेः लोचनयोः दूषिकायां मले, मलभूते चन्द्रमसीति यावत्, "दूषिका नेत्रयोर्मलम्" इत्यमरः, "अथ नयनसमुत्थ ज्योतिरत्रेरिव द्यौः" इति कालिदासः; पीयूषदीधितिः अमृतकिरणः, इति अनुरागः आरक्तिः, आरक्तवर्णमिति यावत्, लोकानामिति शेषः, प्रथितः प्रख्यातः; मलमाण्डे सुधाभाण्डभ्रान्तिः लोकानां मूढतालोकिता, अमृतमेतदिति भावः। वसन्ततिलकं वृत्तम्॥ ८३॥

(इ) कुमारेति।—कुमाराङ्कः प्रथमं युद्धं, तस्मिन्, यद्वा—कुमाराङ्के कुमारचिह्ने, त्रिशूलबीजकचिह्ने सत्यपीत्यर्थः, शैशवावस्थायामेवेति भावः, यो विजयः अनुविनाशः, तस्मात् प्रत्यागतः प्रत्याहृतः, अनून् विनाश्य समागत इत्यर्थः। ताडकाया निग्रहेण वधेन। क्षिणीयमानः अल्पीयमानः, क्षीरत्वाया अकर्षण्यत्वात् मर्दनीयतायेति भावः।

तिष्ठते (क) वत्सः। (खजवं प्रति)। वत्स सौमित्रे! अस्माकमनेन हृत्ताम्रेन प्रदोषलक्ष्मोः (ख) इयमनूद्यते (ग)। पश्य—

निशाचराणां तमसां निहन्ता
पुरोऽयमुद्गच्छति रामचन्द्रः।
अथोल्लसद्भिर्नयनैर्मृगीणा-
मय कुमुद्वानजनि प्रदेशः॥ ८४॥

राम:। (विभाव्य)।—

मदयति यदुत्पन्नो दुग्धाम्बुधेरयमम्बुधीन्
नयति नयनादानन्दाश्रूणि प्रियाजनितो मुदं नयनानि च।
तदखिलसुरश्रेणीसाधारणप्रणया प्रची-
सङ्गचरचरुक्षाली सोमः समुल्लसमीहते॥ ८५॥

(क) उपतिष्ठते समीपमागच्छति।

(ख) प्रदोषलक्ष्मीः रजनीमुखशोभा, "प्रदोषो रजनीमुखम्" इत्यमरः।

(ग) अनूद्यते पुनरुक्ता भवति, द्वियुग्मं श्रोभते इत्यर्थः, रामचन्द्रेण आदौ निशाचरतमांसि हत्वा प्रदोषलक्ष्मीरुत्पादनादिति भावः।

निशाचराणामिति।—निशाचराणां राक्षसानां, तमसाम् अन्धकाराणाम्, अन्धकारसदृशानां निशाचराणामिति भावः, निहन्ता विनाशकः, अयं राम एव चन्द्रः पुरः अग्रतः, उद्गच्छति उदेति, उपतिष्ठते इत्यर्थः, अथ रामचन्द्रोदयानन्तरमित्यर्थः, उल्लसद्भिः विकसद्भिः, आनन्दातिशयादिति भावः, मृगीणां नयनैः लोचनैः, अयं प्रदेशः आश्रमभूमिः, कुमुद्वान् कैरववान्, कुमुदवदुच्च इवेत्यर्थः, अजनि, मृगीणां नयनाभ्येव कुमुद्वानि विकसन्तीति भावः। उपमालङ्कारः। उपेन्द्रवज्रा छन्दः—"उपेन्द्रवज्रा प्रथमे लघौ सा" इति तल्लक्षणात्॥ ८४॥

मदयतीति।—अयम् उदयं गच्छन्, सोमः इति शेषः, दुग्धाम्बुधेः क्षीरसागरात्, यत् यतः, उत्पन्नः समुत्थितः, तस्मात् अम्बुधीन् समुद्रान्, मदयति हर्षयति, अतः, इन्दोरमृतैः, नयनात् जातः, अत एव नयनानि, क्षीरोदानीति शेषः, मुदम् आनन्दं, नयति प्रापयति च, मुल्लसेत् अस्य जनस्यत्यादिति भावः, किन्तु अखिलसुरश्रेणीनां सर्वदेवानां, साधारणः समानः, प्रणयः अनुरागः, आसक्तो इत्यर्थः अस्मात् तादृशी, प्रचीमुद्गचरच्च इन्दुश्च, चकोराश्चो इन्दोरद्रव्यभाक्त्वमित्यर्थः, सोमः चन्द्रोदयः चन्द्रश्च,

(सञ्ज्ञमुपसृत्य)। भगवन्! अभिवादये।

विश्वामित्रः। (सञ्ज्ञेऽवदृसानमालिङ्ग्य)। वत्स रघुनन्दन! सत्यमेव—

प्रकृष्टकर्त्रभिप्राय-क्रियाफलवतो विधीन्।
प्रयुञ्जानास्त्वया वीर! परिपाल्यामहे वयम्॥ ८६॥

रामः। (स्वगतम्)। शिरसा गृहीतमाचार्यवचनम्।

विश्वामित्रः। (समरजुलिधूसरं रामस्य जटीनमुन्मार्जयन्)। यत् सत्यम्, अमुना नक्तञ्चरव्यतिकरेण (घ) प्रियसुहृदा सौरध्वजेन वितन्यमाने वैताने कर्मणि कम्पितमिव मे हृदयम् (ङ)।

रामः। (सगौरवम्)। भगवन्! क एष सौरध्वजो नाम, यम् (च) अद्य ते त्रिभुवनदुर्लभोऽयं प्रियसुहृच्छब्दप्रयोगः कमपि महिमानमारोपयति (छ)?

विश्वामित्रः। वत्स! शृणोषि विदेहेषु मिथिलां नाम नगरीम?

रामः। यत्र पवित्रमाचार्यहृदयं जनाः कथयन्ति—सकलराजकदुराकर्षमैन्दुशेखरं (ज) धनुः, लाङ्गलमुखोल्लिखितविश्वम्भराप्रसूतिरगर्भसम्भवा (झ) मानुषी?

"सोमः सोमलताद्याश्च चन्द्रे च" इति विश्व; तत्र प्रसिद्धं, सकलञ्च सकोशं, युक्तमित्यर्थः, दृश्यते चेष्टते, एतत् तु निःसम्बन्धतया जटीवयुक्तमिति भावः। हरिणी-छन्दसम्॥ ८५॥

प्रकृष्टेति।—हे वीर! प्रकृष्टत्व उत्कृष्ट, कर्त्रभिप्रायं कर्त्तारमभिप्रेतीति तच्छीलं, कर्त्तृनिष्ठमित्यर्थः, यत् क्रियाफलं तत् विद्यते येषु तान्, विधीन् वैदिकयज्ञादीन्, प्रयुञ्जानाः कुर्वन्तः, वयं मुनयः, त्वया परिपाल्यामहे रक्षणीयाः। अनुष्टुप् छन्दसम्॥ ८६॥

(घ) नक्तञ्चरव्यतिकरेण निशाचरसम्बन्धेन च।

(ङ) सौरध्वजेन तन्नाम्ना जनकेन। वितन्यमाने विस्तार्यमाणे, क्रियमाणे इत्यर्थः। वैताने यज्ञिये। नक्तञ्चरास्पदीयं यज्ञं यदि विघ्नयतीति हृदयकम्पनमिति भावः।

(च) य सौरध्वजम्।

(छ) कमपि अनिर्वचनीयं, महिमानं गौरवम्, आरोपयति नयति।

(ज) सकलेति।—सकलैः राजकैः राजभ्यः, दुराकर्षम् अशक्याकर्षणं, नमयितुः सज्जयितुमिति यावत्। ऐन्दुशेखरं शैवम्।

विश्वामित्रः। (विहस्य)। अथ किम्।

रामः। (सकौतुकम्)। ततः किं तस्याम्?

विश्वामित्रः।—

असौ सीरध्वजो राजा यो देवात् द्युमणेरपि।
अध्यैष्ट याज्ञवल्क्यस्य मुखेन ब्रह्मसंहिताम्॥ ८७॥

तस्य संन्यस्तयज्ञस्य (ञ) पुराणराजर्षेर्जनकवंशजन्मनो दीक्षाविलोपशङ्का पर्य्याकुलयति (ट) माम्। तदेतम् (ठ) आयुष्मन्तौ, विधिशेषम् (ड) अस्मदीयं समाप्य सहैव (ढ) मिथिलामुपतिष्ठामहे (ण)।

रामः। (सहर्षमपवार्य)। वत्स लक्ष्मण! ममापि तस्मिन्-तत्कणरोहिणीरमणचूडामणिपाणिप्रणयिनि धरासने चिरस्य कौतुकम् (त) अस्ति।

(झ) साङ्गलेति।—साङ्गलमुखेन हलाग्रेण, लिखिता कृष्टा, विश्वम्भरा भूमिरेव, प्रसूतिः जननी यस्याः तथाभूता। अयोनिजातेत्यर्थः।

असाविति।—यः असौ राजा सीरध्वजः, याज्ञवल्क्यस्य मुनेर्मुखेन, तथा देवात् द्युमणेः सूर्य्यात् अपि, ब्रह्मसंहिता वेदसंहिताम्, अध्यैष्ट अधीतवान्। यद्वा—यः याज्ञवल्क्य इति भावः, देवात् द्युमणेरपि ब्रह्मसंहितामध्यैष्ट, तस्य याज्ञवल्क्यस्य मुखेन असौ सीरध्वजः ब्रह्मसंहितामध्यैष्ट, याज्ञवल्क्येन सूर्य्यादधीतं, सीरध्वजेन तु याज्ञवल्क्यादिति भावः। अनुष्टुप् छन्दः॥ ८७॥

(ञ) संन्यस्तयज्ञस्येति।—संन्यस्तं परित्यक्तं, यज्ञं येन तथाभूतस्य, स्वयमात्मदक्षयज्ञमस्येति भावः।

(ट) दीक्षाविलोपशङ्का नक्षत्ररात्रिमध्यात् यज्ञव्याघातशङ्केत्यर्थः। पर्य्याकुलयति सर्वतोभावेन व्याकुलयति, अत्यर्थमुद्वेजयतीत्यर्थः।

(ठ) तत् तस्मात्, तस्य दीक्षारक्षणार्थमिति भावः, एतम् आगच्छतम्।

(ड) विधिशेषं यज्ञस्य शेषविधिम्।

(ढ) सहैव मिलित्वैवेति यावत्।

(ण) उपतिष्ठामहे गच्छामः।

(त) अतएवेति।—अत एव, तवेत्यर्थः इति यावत्, रोहिणीरमणचूडामणिः,

अजमः। (सपरिवारम्)। आर्य्यायामयोनिजन्मनि राजकन्यकायाम् (थ) अपि।

रामः। (सरोषस्मितम्)। कथमन्यदेव किमपि प्रहसनं सूचयति (द) भवान्? (मुनिं प्रति)। भगवन्! इक्ष्वाकुवंशगुरो! यदभिरुचितं भवते।

(इति परिक्रम्य निष्क्रान्ताः सर्वे)।

इति कौमारविक्रमो नाम द्वितीयोऽङ्कः।

तृतीयोऽङ्कः।

(ततः प्रविशति कञ्चुकी (क)।)

अङ्गानविर्यस्य सः तथोक्तस्य, हरस्येत्यर्थः, पार्श्वितथयिनि इलप्रथयति, सर्वदा धारयात् इलाख्या सह परिचिते इत्यर्थः, शरासने शरा अस्यन्ते क्षिप्यन्ते अनेनेति शरासनं धनुः तस्मिन्। कौतुकम् औत्सुक्यं, तद्दर्शनलालसेति यावत्।

(ख) आर्य्यायां मान्यायाम्। अयोनिजन्मनि अगर्भसम्भूतायाम्। राजकन्यायां जानक्यामित्यर्थः।

(द) प्रहसनं परिहसनीयम्। सूचयति सूचयति, अवतारयतीत्यर्थः।

इति श्रीगोविन्दविद्यासागरभट्टाचार्य्यकृता
अनर्घराघवद्वितीयाङ्कव्याख्या समाप्ता।

(क) कञ्चुकी "अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। सर्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते॥" इत्युक्तलक्षणः कश्चित् अन्तःपुरवर्ती वृद्धब्राह्मणः। उक्तञ्च भरतेन—"जराविकल्पयुक्तेन विप्रेण गतिवेष कञ्चुकी" इति। "अन्तःपुरे त्वधिकृतः स्थाद्वृद्धस्तोमरको नरः। कौविदल्लाः कञ्चुकिनः स्थापत्याः कैविदल्लाय ते॥" इत्यमरस्य।

बटुकौ । (जरावैक्लव्यविसंस्थुलानि (ख) पतिपित् पदानि गत्वा आत्मा) इति सखेदोपालम्भम् (ग) ।—

गात्रैर्गिरा च विकलश्चटुमोघराणां
कुर्वन्नयं प्रहसनस्य नटः कृतोऽस्मि ।
तत्त्वां पुनः पलितवर्णकभाजमेनं
नाट्येन केन नटयिष्यति दौर्घमायुः ? ॥ १ ॥

(पुरो विलोक्य) । अयि !! सीतापादमूलोपजीविनो कल-हंसिका ।

(प्रविश्य) ।

कलहंसिका । अज्ज ! पणमामि । *

बटुकौ । वत्से ! कल्याणिनी भूयाः ।

कलहंसिका । अज्ज ! चिरेण कुदो तुम्हे ? †

---

* आर्ये ! प्रणमामि ।

† आर्ये ! चिरेण कुतो यूयम् ?

(ख) जरेति ।—जरया वार्द्धकेन, यत वैक्लव्य विह्वलता, सततदुःखतेत्यर्थः शक्तान्यपि धारयितुमसामर्थ्यमिति यावत्, तेन विसंस्थुलानि पदे पदे स्खलितप्राया-नीति यावत् ।

(ग) सखेदोपालम्भं सदुःखाक्षेपम्, आक्षेपो अध्याहार्यक्रियाविशेषवचम् ।

गात्रैरिति ।—गात्रैः अङ्गैः, गिरा वाचा च, विकलः अवशः, अयम् एव, अहमिति शेषः, दुःस्वराणां प्रभूणां, चटुं चाटु, प्रियभाषितमिति यावत्, "चटुश्चाटौ प्रियवचे च" इति मेदिनी ; कुर्वन् प्रहसनस्य नाट्यविशेषस्य, परिहासस्य वा, नटः अभिनेता कृतः, वार्द्धकेन स्रष्ट्रा वा इति शेषः, अयि ; तत् तस्मात्, दौर्घम् आयुः दीर्घकालजीवि-तवान्, पलितवर्णकभाजं पलितेन जरालक्षणेन केशादौ श्वेतेन, "पलितं जरसा श्वेते केशादौ" इत्यमरः ; यत् वर्णकं विलेपनम्, अङ्गरागविधानमित्यर्थः, "नाट्यानुलेपनो वर्त्तिर्वर्णकं स्यात् विलेपनम्" इत्यमरः ; तद्भाजं तद्वन्तम्, शुक्लवर्णं अनुरञ्जनानमित्यर्थः, एवं त्वां पुनः इदानीमपीत्यर्थः, केन नाट्येन नटनाख्य व्यापारेण, अभिनयव्यापारेणेत्यर्थः, नटयिष्यति ? नर्तयिष्यति ? तत्र जाने इति शेषः इदानीमपि तव नटनं न घटनामर्हतीति मन्ये इति भावः । वसन्ततिलकं वृत्तम् ॥ १ ॥

कञ्चुकी। (विमृश्य)। तत् किं न कथ्यते, वत्से! विदितमेव भवत्याः, यथा तत् तादृगद्भुतं दारकद्वयम् (घ) आदाय भगवान् कौशिको यजमानं (ङ) महाराजं सौरध्वजमुपस्थितः।

कञ्चुकिका। अध इं। अज्ज! पहवं (च) णामधेअं अ ताणं सुणिदुं अत्थि मे कोदूहलं। *

कञ्चुकी। वत्से! कथयामि—

त्रयस्त्रिंशत्कोटिविदशमयमूर्त्तेर्भगवतः
सहस्राशोर्वंशे जयति जगदीशो दशरथः।
यदस्त्रैरस्निग्धैरसुरयुवतिश्वासपवन-
प्रकोपे सिद्धे न स्पृशति शतकोटिं शतमखः॥ २॥
इमौ तस्य विश्राम्यत्पुरात्मजौ राम-लक्ष्मणौ।
ययोर्भरत-शत्रुघ्नावनुजौ द्वन्द्वचारिणौ॥ ३॥

* अज्ज किम्। आर्य्ये। प्रभवं नामधेयं च तयो. श्रोतुमस्ति मे कौतूहलम्।

(घ) दारकद्वयं कुमारयुगलम्।

(ङ) कौशिकः विश्वामित्र.। यजमानं यागनिरतम्।

(च) प्रभवं प्रभवत्यस्मादिति प्रभवः उत्पत्तिस्थानं तं, अस्मिन् कुले जातमित्यर्थः, पितरमिति यावत्।

त्रयस्त्रिंशदिति।—त्रयस्त्रिंशत्कोटिविदशमयी त्रयस्त्रिंशत्कोटिदेवतात्मिका, मूर्त्तिर्यस्य तथाभूतस्य सर्वदेवात्मभूतस्येत्यर्थः, भगवतः सहस्राशोः सूर्य्यस्य, वंशे दशरथो नाम जगदीशः राजा, जयति सर्वोत्कर्षेण वर्त्तते; शतमखः शतक्रतुः इन्द्रः, अस्त्रैरस्निग्धैः दारुणैः, यच्च दशरथस्य, अस्त्रैः असुरयुवतीनाम् असुराङ्गनानां, श्वासपवनस्य निःश्वासवातस्य, प्रकोपे इद्धो, सिद्धे सम्पन्ने सति, भर्तृणां असुराणां निहतत्वादिति भावः, शतकोटिं वज्रं, न स्पृशति, दशरथेनैव स्वकार्य्यस्यासुरपराजयस्य साधितत्वादिति भावः। त्रिखरिणी वृत्तम्॥ २॥

इमाविति।—इन्द्वचारिणौ युगलबलवत् युग्मचारिणौ, सततमेकत्र विचरणशीलौ इत्यर्थः, इमौ रामलक्ष्मणौ नाम तस्य विश्राम्यतुः नृपतेः दशरथस्य, आत्मजौ

कञ्चुकिका। जधा अम्हघरे भट्टदारिआ (क) सीदा उम्मिला अ मंडवी सुदकित्ती अ। (विचिन्त्य हर्षं निरूपयन्ती)। कधं महाकुलप्पसूदा एदे वि कुमारआ। (मुहुर्त्तमिव स्थित्वा दीर्घमुष्णं च निःश्वस्य)। कुदो अम्हाणं ईरिसो भाग्गधेओ? * (ज)

वसुकी। भवति! मा विषीद। सर्वं भविष्यति देवब्राह्मणानुग्रहात्।

कञ्चुकिका। तदो तदो? †

वसुकी। ततश्च हट्टान्तःपुराणामभ्यर्थनया (झ) तौ विकर्त्तनकुलकुमारकौ (ञ) दृष्ट्वा निवर्त्तमानः पुरोधसा गौतमेन (ट) अहमाहूय राजपुत्रीणां सौभाग्यदेवताऽऽराधनाय संविहितोऽस्मि (ठ)।

---

* यथा अस्मद्गृहे भर्तृदारिका सीता ऊर्मिला च माण्डवी सुतकीर्त्तिश्च। सर्वं महाकुलप्रसूता एतेऽपि कुमारकाः॥ कुतोऽस्माकमीदृशं भागधेयम्?

† ततस्ततः?

पुत्रौ, काकाक्षिगोलकवत् इन्द्वारिणौ इत्यत्र उभयत्रापि अन्वयः कर्त्तव्यः; एवञ्च इन्द्वारिणौ भरत-शत्रुघ्नौ यथाः रामः-लक्ष्मणयोः, अनुजौ कनिष्ठौ, रामस्य अनुजः भरतः, ततः लक्ष्मणः, ततश्च शत्रुघ्न इति निष्कर्षः। अनुष्टुप् वृत्तम्॥ २॥

(क) भर्तृदारिका राजकन्या, "राज्ञो भट्टारको देवस्तत्सुता भर्तृदारिका" इत्यमरः।

(ज) भागधेयं भाग्यम्, दुष्टप्रैः कुमारैः सह राजदारिकाणां परिणयस्य अनाप्यधीनत्वमिति भावः।

(झ) हट्टान्तःपुराणाम् अन्तःपुरवर्त्तिनीनां हट्टानां महिलानामित्यर्थः। अभ्यर्थनया प्रार्थनया, अनुरोधेनेत्यर्थः।

(ञ) विकर्त्तनकुलकुमारकौ सूर्य्यवंशीयौ बालकौ।

(ट) पुरोधसा पुरोहितेन, "पुरोधास्तु पुरोहितः" इत्यमरः; गौतमेन गौतमऋषिपुत्रेण, अक्षपादेनेत्यर्थः।

(ठ) सौभाग्येति।—सौभाग्यं शुभाहष्टं, शुभवस्तुनिक्षाभहेतुभूतमिति भावः; तस्य

जवनिका। (सहर्षम्)। अज्ज! सव्वजणमणोसिदाणुकूलं (ङ) विअ तत्थभवदो सदाणंदस्स वअणं। *

जनकः। वत्से! एवमेतत्। न खल्वतथ्यमगम्भीरम् आङ्गिरसो (ढ) ब्रवीति।

जवनिका। ता किं मण्णेध संकरसरासणारोवणव्ववसाएण (ण) राएसिणो जणअस्स पडिस्सासाहसं णिव्वाहेस्सदि राहवो? † (त)

जनकः। वत्से! अस्मानपि तर्कीयं तरलीकरोति (थ)।

* आर्ये! सर्वजनमनोवितानुकूलमिव तत्रभवतः सदानन्दस्य वचनम्।

† तत् किं मन्यध्वे, शङ्करशरासनारोपणव्यवसायेन राजर्षेर्जनकस्य प्रतिज्ञासाहसं निर्वाहयिष्यति राघवः?

या देवता तदधिष्ठातो देवो, गौरीति भावः, तस्याः आराधनाय सम्पूजनाय। संविहितोऽस्मि समादिष्टोऽस्मि, नियुक्तोऽस्मि इति वा।

(ङ) सर्वजनेति।—सर्वेषां जनानां मनोवितं वाञ्छितं, मनोरथसिद्धिरिति यावत्, तस्य अनुकूलं सपक्षमित्यर्थः, सदाशयभूतमिति यावत्।

(ढ) अतथ्यम् अवृतम्। अगम्भीरम् अगूढार्थमित्यर्थः, परिहासवचनमिति यावत्। आङ्गिरसः अङ्गिराः ब्रह्मणः पुत्रः, तस्य अपत्यं पुमान् आङ्गिरसः अङ्गिरःकुलसम्भूत इत्यर्थः, ब्रह्मणः पुत्रः अङ्गिराः, तत उतथ्यः, तस्मै दीर्घतमाः, तत्पुत्रो गौतमः, ततश्च शतानन्द इत्यङ्गिरःसन्तान इति यावत्।

(ण) शङ्करेति।—शङ्करस्य इदं, यत् शरासनं धनुः, तस्य आरोपणं नौर्व्यां संयोजनं, तत्र व्यवसायः सङ्कल्पः, निश्चय इत्यर्थः, उद्यमो वा तेन।

(त) प्रतिज्ञासाहसं प्रतिज्ञा अङ्गीकारः, अस्मिन् कर्मणि साधिते इदानीं दास्यामि, नान्यथा इत्येवं पण इति यावत्, सैव साहसं दुष्करं कर्म प्रतिज्ञासाहसं तत्पूरणरूपं दुःसाध्यव्यापारमित्यर्थः, "साहसन्तु दमे दुष्करकर्मणि। अविमृश्यकृतौ चार्ष्यं" इति हैमः; निर्वाहयिष्यति साधयिष्यति। राघवः रघुकुलोद्भवः, राम इत्यर्थः।

(थ) तर्कः वितर्कः, संशय इति यावत्। तरलीकरोति चपलयति, आकुलयतीति यावत्।

तथा हि—

पूर्णेऽपि कर्मणि हतेष्वपि राक्षसेषु
विज्ञाय मैथिलसुतामपि वीर्यशुल्काम् ।
बालं पितुः प्रियमसुं रघुराजपुत्र-
मेतावतीं भुवमृषिः कथमानिनाय ? ॥ ४ ॥

कञ्चुकिका । (स्वगतमभिनीय सविषादम्) । अज्ज ! पडत्ति-विसेसलंभेण दुम्मणायमाणमत्ताणं पंचालिआकेलिवावारेण विणोअअंतीं (द) भट्टदारिअं पेक्खिअ उब्बिग्गाए (ध) कारणं पारद्धिज्जिदुं (न) आगदाए अज्जस्स दंसणेण मए विसुमरिदं, इमिणा उण टे रक्खसणाममग्गहणेण सुमरावि दम्हि ।*

* आर्य ! प्रकृतिविशेषलक्षणेन दुर्मनायमानमात्मानं पाञ्चालिकाकेलिव्यापारेण विनोदयन्तीं भर्तृदारिकां प्रेक्ष्य सादृश्यात् कारणं प्रतिपत्तुमागतया आर्यस्य दर्शनेन मया विस्मृतम्, अनेन पुनस्ते राक्षसनामग्रहणेन स्मारितास्मि ।

पूर्णेऽपीति ।—ऋषिः विश्वामित्रः, कर्मणि यज्ञविधौ, पूर्णे समाप्तेऽपि, राक्षसेषु सुबाहुप्रभृतिषु निशाचरवर्गेषु, हतेषु विनष्टेषु अपि सत्सु, वीर्यमेव पराक्रम एव, शुल्कं पण: यस्या: तथाभूतां, विज्ञायापि विदित्वाऽपि, पितु: दशरथस्य, प्रियं अतीव प्रेमास्पदं, मुहूर्तमपि अदर्शनमक्षमिति भाव:, रघुराजपुत्रं रघुकुल-कुमारम्, अमुं बालं कुमारं, कथं किमर्थम्, एतावतीं भुवम् एतावद्दूरदेशमित्यर्थ:, आनिनाय ? आनीतवान् ? एवं तर्क: अस्मान् तरलीकरोति इति गद्यस्थवाक्यो-त्थापित्व:, एतत् सर्वं विदित्वाऽपि यत् मुनिरमुम् आनीतवान् तत्र कोऽपि निगूढाशय: कथ्यतेऽनेति भाव:। वसन्ततिलकं वृत्तम् ॥ ४ ॥

(द) प्रकृतीति ।—प्रकृतिर्वर्णा, "वर्णो प्रकृतिर्वर्त्मनि:" इत्यमर:; तस्या विशेष: असामान्यता, अलक्ष्यमविदितत्वं कस्यचित् मुकुतरव्यापारस्येत्यर्थ:, तस्य लक्षणेन प्राप्त्या। दुर्मनायमानं दु:खितमना इव आचरतीति तथोक्तम्। पाञ्चालि-केति ।—पाञ्चालिका वस्त्रादिविरचिता कृत्रिमपुत्रिका, मूर्तिविशेष इति यावत्, "पुत्तलिका" वा "पुत्तल" इति भाषा, "पाञ्चालिका पुत्रिका स्यात् वस्त्रदन्तादिभि: कृता" इत्यमर:; तया केलि: क्रीडनमेव, व्यापार: तेन। विनोदयन्तीं प्रीणयन्तीम्।

कञ्चुकी। (सविषादम्)। वत्से! कीदृशी सा प्रवृत्तिः, या तव भर्तृदारिकामपि दुर्मनायायति ? (घ)

कलहंसिका। सुणादु अज्जो, जधा किल सीदादेवीं पत्थिदुं दसग्गीवपुरोहिदो (ङ) आअदो त्ति। *

कञ्चुकी। (तथावस्थां नाटयन् सहर्षम्)। कथमेतावदपि कार्य्यं वत्सा जानकी जानाति!! यदनेनोदन्तेन (च) दुर्मनीभूयते। नूनमिदानीमस्याः कृतावतरणमङ्गलानि (छ) अङ्कानि यौवनस्य पर्य्यानमीक्षन्ते (ज)।

कलहंसिका। अज्ज! एव्वं सोदम्। अज्जए (झ) सित्ति सिढ़िलीकिदलज्जा संपदि ज्जेव्व अणुहूदं (ञ) किंपि णिवेदेमि।†

(संस्कृतमाश्रित्य) (ट)—

---

* अथवा आर्य्यः, यथा किल सीतादेवीं प्रार्थितुं दशग्रीवपुरोहित आगत इति।

† आर्ये! एवं त्विदम्। आर्य्यया कृतिमिव शिथिलीकृतलज्जा सम्प्रत्येव अनुभूतं किमपि निवेदयामि।

(घ) अविदग्धया सज्ञातोद्वेगया।

(ङ) प्रतिपक्ष ज्ञातुम्।

(च) दुर्मनायायति दुर्मनस्कमिवाचरयति।

(छ) दशग्रीवपुरोहितः रावणपुरोधाः।

(ज) उदन्तेन वृत्तान्तेन, "वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्" इत्यमरः।

(झ) कृतावतरणं प्राप्तप्रवेशं, यौवनस्येति भावः, मङ्गलं मङ्गलाय्यं ज्ञानं यैः तथाभूतानि।

(ञ) ईक्षन्ते पश्यन्ति, आगच्छत् यौवनमभिनन्दितुं लाक्षितमङ्गल्यानि सनाथत्व मपेक्षन्ते इति भावः।

(ट) आर्य्यया नान्यया भवते।

(ठ) अनुभूतं उचितम्।

(ड) संस्कृतमिति।—चेटीनां क्वचित् संस्कृतभाषणमुक्तं भरतेन, यथा—"संस्कृतभाषाचाराः प्रायो नाट्येषु न स्त्रियः स्त्रियाः। क्वचिदपि पृथुप्रयोगात्

अनाकूतैरेव प्रियसहचरीणां शिशुतया
वचोभिः पाञ्चालीनिधुनमधुना सङ्गमयितुम्।
उपादत्ते नो वा विरमति न वा केवलमियं
कपोली कल्याणी पुलकमुकुलैर्दन्तुरयति ॥ ५ ॥

कञ्चुकी। (सदर्पम्)। दिष्ट्या चिरस्य जीवद्भिरस्माभिर्यौवनवती वत्सा जानकी दृष्टा। (सलज्जितम्)। ततस्ततः?

कञ्चुकिका। तदो अ पुणो पुणो वि ताहिं उज्जुआहिं णिव्वंधिज्जमाणा लज्जिदुं (व) वि लज्जेदि। *

कञ्चुकी। (विहस्य)। वत्से! सङ्कीर्णं (श) वयसि खल्वियं वर्त्तते। अत्र हि—

---

* ततश्च पुनः पुनरपि ताभिः ऋजुकाभिः निर्बध्यमाना लज्जितुमपि लज्जते।

विदग्धतावीक्षणाच्च प्रस्खलेत्॥" इति। अन्यच्च—"चेटी प्राकृतभाषिणी स्याच्च संस्कृतभाषिणी" इति।

अनाकूतैरिति।—इयं कल्याणी कल्याणभाजनं सीता, प्रियसहचरीणां प्रियवयस्यानां, शिशुतया बालत्वेन हेतुना, सुग्धत्वेन भावानभिज्ञतयेति भावः, नास्ति आकूतम् अभिप्रायो येषु तथाभूतैः, भावयूनेत्यर्थः, निधुनमधुनेति अनाभज्ञतया तदृश्यविरहितैरिति यावत्, वचोभिः एतौ परिणाय्य एकप्रण्याया आर्य इत्यादिकथैर्वाक्यैः, उपलक्षितेति शेषः, विशेषणे ततोया, अधुना इदानीम्, अधुना इत्यनेन पूर्वमेव बहुशः कृतनिरूपणमस्ति; पाञ्चालीनिधुनं कृत्रिमपुत्रिकायुगलं, सङ्गमयितुम् एकत्र मेलयितुं प्रापयितुं वा, नो वा उपादत्ते न वा गृह्णाति, लज्जावशादिति भावः, न वा विरमति न वा निवर्त्तते, बालसुलभकं तूष्णीमादिति भावः, केवलं कपोली गण्डदेशौ, पुलकमुकुलैः रोमाञ्चकलिकाभिः, दन्तुरयति उन्नतानतौ करोति, "दन्तुरौ तून्नतानतौ" इत्यमरः, कण्डूयनादिति भावः। शिष्टमिदं स्पष्टम् ॥ ५ ॥

(व) ताभिः सहचरीभिः। ऋजुकाभिः सरलाभिः। निर्बध्यमाना आग्रहातिशयेन गृह्यमाणा। लज्जितुं लज्जां प्रकटयितुम्।

(श) सङ्कीर्णे सम्मिश्रिते, बाल्ययौवनाभ्यामिति शेषः, बाल्ययौवनयोः सन्धौ इति भावः।

मनोऽपि यद्भमानाभिर्बालाभिरुपजीव्यते।
अषड्गुणैश्वर्यगुणं तन्नो मकरकेतनः॥ ६॥

कञ्चुकिका। (सलज्जम्)। अज्ज! रमणीअं मन्तअसि, सव्वस्स वि अणुहवसंवादिणी (घ) दे वाआ।*

कञ्चुकी। किङ्कः, वत्से!—

तदालप्रोन्मीलन्मदिरमणीयात् कठिनतां
निचित्य प्रत्यङ्गादिव तरुणभावेन घटितौ।
स्तनौ सम्बिभ्राणाः क्षणविनयवैयात्यमसृण-
स्मरोल्लेखाः केषामुपरि न रसानां युवतयः?॥ ७॥

कञ्चुकिका। (विहस्य)। भोदु, ता ण किं वि तुम्हेहिं सुदं?†

* आर्ये! रमणीयं मन्त्रयसि; सर्वस्यापि अनुभवसंवादिनी ते वाक्।

† भवतु, तत् न किमपि युष्माभिः श्रुतम्?

मन इति।—मनः चित्तमपि, यद्भमानाभिः सन्दिह्यमानाभिः, मनो जानाति यत् भावमिति ततोऽपि बिभ्यतीभिरिति भावः, बालाभिः कुमारीभिः, न सन्ति षट् ऐश्वर्ये यस्य तत् तथोक्तं, षट् गुणाः सन्ध्यादयः ते एव षाड्गुण्यं, "सन्धिर्नां विग्रहो यानमासनं द्वैधमाश्रयः। षट्गुणाः—" इत्यमरः; अषड्गुणैश्वर्यं हतीयाद्यगोचरं, द्वाभ्यामेव कृतमित्यर्थः, "अषड्गुणैश्वर्यं यस्य तीयाद्यगोचरः" इत्यमरः, तच्च तत् षाड्गुण्यञ्चेति अषड्गुणैश्वर्यषाड्गुण्यं हतीयाद्यगोचरसन्ध्यादिगुणषट्कं, तन्नमजानीति तादृश, (कर्मधारयः) हतीयाद्यगोचरसन्ध्यादिगुणषट्कमजानाति, मकरकेतनः कामः, उपजीव्यते सेव्यते, कामः सेव्यते, पर न केनापि तत् कथ्यते इति भावः। अनुष्टुप् वृत्तम्॥ ६॥

(घ) अनुभवेति।—अनुभवानुसारिणीत्यर्थः।

तदालेति।—तदाले तत्काले, यौवनोन्मेषसमये इत्यर्थः, "तत्कालस्तु तदाले स्यात्" इत्यमरः; प्रवर्षेण उन्मीलन् प्रादुर्भवन्, यः सदिना मार्दवं, तेन रमणीयात् मनोज्ञात्, प्रत्यङ्गात् अङ्गात् अङ्गात्, कठिनतां काठिन्यं, यौवनोद्भेदात् प्राक् अङ्गेषु यत् किञ्चित् काठिन्यमासीत् तत् काठिन्यमिति भावः, निचित्य सनाङ्कत्य, तरुणभावेन

बटुकः । वत्से ! न तावदर्थोऽयमन्यापि राजगोचरीभवति, यदि च स्यात्, किमेतावता ? (स)

अवलम्बिका । तदा कृतार्थो रावणो देवीं (ह) परिणेदि ।*

बटुकः । (विहस्य)—

हस्ते-करिष्यति जगत्त्रयजित्वरोऽपि
कस्तादृशो दुहितरं जनकेश्वरस्य ? ।
प्राणाधिकं विपुलबाहुभृतामपीदं
वैयम्बकं किमपि कार्मुकमन्तरायः ॥ ८ ॥

नापि दशकन्धरानुरोधेन स्वयं प्रतिज्ञातमन्यथा करिष्यति महाक्षत्रियो विदेहराजः ; तन्न किञ्चिदेतत् ।

---

* तदा कृतार्थो रावणः देवीं परिणयति ।

यौवनेन, अभिनवभावेनेत्यर्थो वा, घटितौ निर्मितौ, स्तनौ सन्निभाणाः धारयन्त्यः, तथा चण्डे प्रतिज्ञाभङ्गनिमित्ते, विनयः प्रश्रयः, श्लाघता इत्यर्थः, अनौद्धत्यमिति यावत्, 'वैयाम्बम्' इत्यत्रापि 'चण्डे' इति पदमाकृष्य अन्वयः कर्त्तव्यः, एवञ्च, चण्डे च वैयात्ये धार्ष्ट्ये, त्यागपक्ष्यमित्यर्थः, ताभ्यां मसृणः मधुरः, स्मरोन्मेषः मदनावेशः यासां तादृश्यः, भुवतयः तरङ्गाः, केवाः रेखानाम आह्लादानाम्, उपरि न, वर्त्तन्ते ? इति शेषः, अपि तु सुतरामेवोपरिवर्त्तिन्यः भवन्तीत्यर्थः । स्त्रिखरिणी वृत्तम् ॥ ७ ॥

(स) अयमर्थः एष विषयः, रावणपुरोहितानामनधिकृत इति भावः । राजगोचरीभवति राज्ञा विदितो भवतीत्यर्थः । यदि च स्यात् यद्यपि राजगोचरीभवेदित्यर्थः । एतावता एतेन, राजगोचरीभवनेनेत्यर्थः ।

(ह) देवीं सीताम् ।

हस्ते इति ।—जगत्त्रयस्य त्रिभुवनस्य, जित्वरोऽपि विजेताऽपि, तादृशः तत्रविधः, सीतापाणिग्रहणयोग्य इति भावः, कः जनकेश्वरस्य जनकराजस्य, दुहितरं कन्यां, हस्ते-करिष्यति ? पाणौ ग्रहीष्यति ? परिणेष्यति ? इत्यर्थः, न कोऽपीति भावः ; अनन्तरार्द्ध—प्राणाधिकमिति । विपुलबाहुभृता महाभुजानां, महाधनुर्धराणामपीति यावत्, प्राणाधिकं बलाधिकम्, अतिदुर्द्धर्षमिति यावत्, किमपि अनिर्वचनीयम्, इदं वैयम्बकं त्र्यम्बकं शम्भोः, कार्मुकं धनुः, अन्तरायः विघ्नः, विघ्नस्वरूपं इत्यर्थः,

चतुरिका। (विहस्य)। एव्व भोदु। अज्ज! संपदं कहिं ते राम-लक्खणा? *

चतुरः। नन्वेतावेव देवताऽऽगारवेदिकायाम् (क)—

मुनीन् कौशिकवैदेह-गौतमानभिराध्यतः।

ढौकितौ ज्ञानकर्मभ्यां मोक्षस्वर्गाविव स्वयम् ॥ ९ ॥

तदेहि, महच्चिरमागतानामस्माकम् (ख)। कन्याऽन्तःपुरमेव गच्छामः।

(इति निष्क्रान्तौ)।

(विष्कम्भकः)।

(ततः प्रविशति जनकः विश्वामित्रः शतानन्दो राम-लक्ष्मणौ च)।

जनकः। (सहर्षम्)। भगवन् विश्वामित्र!—

लुभ्यन्नदृष्टजामातृ-सम्पदा शुचमद्य नः।

त्वदागमनजन्माऽयमानन्दः सुदिनायते ॥ १० ॥

---

* एवं भवतु। आर्ये। कस्मिन् कृत्ये ते राम-लक्ष्मणौ?

भविष्यतीति शेषः, कुरबकुवि अभग्ने न कोऽपि तां परिणेतुं शक्नोतीति निष्कर्षः। वसन्ततिलकं वृत्तम् ॥ ८ ॥

(क) एतावेव राम-लक्ष्मणावित्यर्थः। देवताऽऽगारवेदिकायां देवालयसम्मुखस्थ-मण्डपस्थितभूमौ।

मुनीनिति।—ज्ञान-कर्मभ्याम् आत्मतत्त्वविज्ञान यागादिक्रियाभ्यां, ढौकितौ प्रेषितौ, समर्पितौ इत्यर्थः, स्वयं मूर्तिमन्तौ, मोक्ष स्वर्गाविव मुक्ति-सुरलोकाविव, कौशिक वैदेह-गौतमान् विश्वामित्र-जनक-शतानन्दान्, मुनीन्, अभिराध्यतः सेवेते। अनुष्टुप् वृत्तम् ॥ ९ ॥

(ख) महदिति।—आगतानाम् अन्तःपुरात बहिरायातानाम्, अत्र समेतानामिति यावत्, अस्माकं आर्यस्य, महत चिर भूयान् विलम्बो जात इति यावत्।

लुभ्यन्निति।—अद्य न दृष्टा न प्राप्ता इति यावत् जामातृसम्पत् जामातृलाभ-रूपसम्पत्तिः यैः तथाभूतानाम् अप्राप्तदृष्टजामातृकाणामित्यर्थः, अनास्वादित-जामातृलाभानन्दानामिति यावत्, कुरबकुभंङ्क्त्वा केनापि नम प्रथमपूरणाशामभ्यंदिति

अपि च—

अद्य प्रदक्षिणशिखावलयः क्षमानु-
रग्नाति मे जनपदेषु वषट्कृतानि ।
त्वत्तेजसि स्फुरति शान्तिक-पौष्टिकेषु
स्रां च स्रुचं शिथिलमाङ्गिरसो बिभर्त्ति ॥ ११ ॥

विश्वामित्रः । सखे सीरध्वज ! चिरस्य शान्तः पुष्टश्च (ग) तवायं जनपदः,—

यत्र त्वं ब्रह्ममीमांसा-तत्त्वज्ञो दण्डधारकः ।
पुरोधाश्चैव यस्यासावङ्गिरःप्रपितामहः ॥ १२ ॥

भावः, [नः अस्माकं, शुचं शोकं, तदलाभनिमित्तं मनोदुःखमित्यर्थः, क्षरन् क्षरन्, तव आगमनात् जन्म उत्पत्तिर्यस्य तादृशः, अयम् अनुभूयमानः, आनन्दः सुहृन्मात्रे सुखहेतुनिष्ठाचरति । अनुष्टुप् छन्दम् ॥ १० ॥

अद्येति ।—अद्य मे मम, जनपदेषु देशेषु, अधिकृतराज्येषु इत्यर्थः, क्षमानुरग्निः, यज्ञीयाग्निरिति यावत्, प्रदक्षिणा प्रकर्षेण दक्षिणा दिशं गता, दक्षिणावर्त्तेनोद्गता इत्यर्थः, शिखा एव वलयं वेष्टनं यस्य तथाभूतः सन्, वषट्कृतानि "वषट्" इति मन्त्रेण अग्नौ हुतानि, "अग्नौ तु हुतं विषु वषट्कृतम्" इत्यमरः, अश्नाति भुनक्ति, सत्र जनपदस्य सर्व्वथा कल्याणसूचकमेतत्, दक्षिणावर्त्तेनोद्गताया होमानलशिखायाः सर्व्वथा कल्याणसूचकत्वात्, परन्तु एतत् तवैव प्रभावादिति भावः ; किञ्च, शान्तिक-पौष्टिकेषु शान्तिकर्मसु पुष्टिसाधनकर्मसु च, तव तेजसि प्रभावे, स्फुरति राजति सति, तव प्रभावेणैव शान्तिक पौष्टिककर्मसु संसाधितेष्विति भावः, आङ्गिरसः अङ्गिरोगोत्रसम्भूतः अतानन्दः, स्रां स्रुचं यज्ञीयपात्रविशेषं, शिथिलम् अदृढं यथा तथा, अनाबद्धत्वादिति भावः, बिभर्त्ति धारयति । वसन्ततिलकं छन्दम् ॥ ११ ॥

(ग) चिरस्य दीर्घकालं व्याप्य इत्यर्थः । शान्तः शान्तियुक्तः, निरापदित्यर्थः । पुष्टः पुष्टियुक्तः, सबल इति यावत् ।

यत्रेति ।—यत्र यस्मिन् जनपदे, ब्रह्मणः वेदस्य, मीमांसायाः विचारपूर्व्वक-सिद्धान्तस्य, तत्त्वज्ञः यथार्थवित्, वेदज्ञ नियूढतत्त्वनिश्चय इत्यर्थः, ब्रह्मपारायण इति यावत् ; यद्वा—ब्रह्ममीमांसायाः ब्रह्मविषयकसंशयनिरासकस्य वेदान्तशास्त्रस्येत्यर्थः, तत्त्वज्ञः रहस्यवित्, त्वं दण्डधारकः शास्ता, तथा अङ्गिराः तन्नामा ऋषिः, प्रपितामहः

(अितं कृत्वा)। जामातुरदर्शनजन्मा शोकः पुनरस्माकमुपशमयितुमवशिष्यते (घ)। किञ्च, शोक-हर्षौ नाम लोकयात्रेयं भवतः (ङ)। तथा हि—

यजूंषि तैत्तिरीयाणि मूर्त्तानि वमति स्म यः।
स योगी याज्ञवल्क्यस्त्वां वेदान्तानध्यजीगपत् ॥ ११ ॥

ग्रस्य तपोधनाः, अङ्गिरसः प्रपौत्र इत्यर्थः, अग्नी यतानलः, पुरोधाः पुरोहितश्च वर्त्तते इति शेषः, तस्य तव जनपदस्य प्राप्त पुष्टत्वे किं वक्तव्यमिति भावः। अनुष्टुप् वृत्तम् ॥ १२ ॥

(घ) अस्माकमित्यनेन मैथिलेन स्वस्यात्मीयभावप्रकटनम्। उपशमयितुं नाशयितुम्। अवशिष्यते अवशिष्टो वर्त्तते, अन्यस्मिन् विषये अस्माकं शोको नास्ति, केवलं सदृशजामातृलाभाभावादेव शोको वर्त्तते इति भावः।

(ङ) किञ्चेति।—भवतश्चक्रवर्त्तिनश्च, शोक-हर्षौ शोक हर्षप्रकटनं, केवलं लोकव्यवहारो लौकिकजीवनयापनमात्रं, सांसारिकभावेषु वर्त्तमानस्य भवतः संसारधर्म्याः शोक-हर्षयोः प्रकटनं, न त्वेतत् ब्रह्मपरस्य तव तात्त्विकमिति भावः; "यावा तु यापनोपाये मतौ दैवार्चनोत्सवे" इति विश्वः।

यजूंषीति।—यः याज्ञवल्क्यः इति भावः, मूर्त्तानि मूर्त्तिमन्ति, यजूंषि यजुर्वेदमन्त्रान्, तैत्तिरीयाणि तित्तिरिरूपेभ्यो विप्रेभ्योऽधिगतानि, याज्ञवल्क्येन उद्गिरणानन्तरं तित्तिरिरूपिभिः विप्रैः भक्षितानि, ततश्च तेभ्य एव विप्रान्तरैर्गृहीतानीति भावः, वमति स्म उद्गिरति स्म, स योगी याज्ञवल्क्यः त्वां वेदान्तान् उपनिषदः, अध्यजीगपत् अध्यापितवान्, ब्रह्मतत्त्वप्रतिपादिकानाम् उपनिषदां तात्पर्य्यावबोधात् तव शोक-हर्षयोर्नावसर इति भावः। पुरा याज्ञवल्क्यः शाकल्यमुनेः सकाशात् यजुर्वेदमधीत्य गुरुदक्षिणार्थमुद्यतम्। गुरुणा च शाकल्येन दक्षिणा न गृहीता। ततश्च याज्ञवल्क्यस्य निर्बन्धेन शातकौशा मुनिभिर्न विद्या दीयतामित्युवाच। याज्ञवल्क्येन च सकोपेन अधीतयजुर्वेदः उद्गीर्य दत्तः। ततश्च तच्छात्रैरन्तेवासिभिः तत्तत्त्वैः तित्तिरिरूपिभिर्दत्तं परिगृह्य स वाजी वेदः भक्षितः। तेभ्यश्च तित्तिरिरूपिभ्यः अन्तेवासिभ्यो विप्रेभ्यः या शाखा प्रचारिता सा तैत्तिरीया शाखेति कृष्णयजुरिति संज्ञया च प्रसिद्धमभूत्। याज्ञवल्क्यश्च पुनः सूर्य्यात् यजुर्वेदमधीतवान्, तच्छाखा च शुक्लयजुःसंज्ञा प्रसिद्धेति शास्त्रान्तरसंमेया। अनुष्टुप् वृत्तम् ॥ १३ ॥

लक्ष्मणः । (जनान्तिकम् (च)) । आर्य्य ! अयमयं स राजा वैदेहः, प्रविलम्बपरिमेयाश्चर्य्यं यज्ञावदानम् (छ) उपाध्यायादनुश्रूयते ।

रामः । (सप्रमोदानुरागम्) । वत्स ! स एवायं शतपथकथाऽधिकारी (ज) पुरुषः, प्रणाय्यायान्तेवासिने (झ) यस्मै वाजसनेयो (ञ) याज्ञवल्क्यः सूक्तानि (ट) यजूंषि प्रोवाच ।

विश्वामित्रः । (सहर्षं निर्वर्ण्य)—

निजाय तस्मै गुरवे यतीनां
जैत्राय विश्राणितगोसहस्रम् ।
तं गोसहस्राधिपतेः प्रपेदे
मुपास्महे मैथिलमातिथेयम् ॥ १४ ॥

(च) जनान्तिकं "विषयान्तरेणान्यानपवार्यान्तरा कथाम् । अन्योऽन्यामन्त्रणं श्रुत् स्यात् जनान्ते तज्जनान्तिकम्" इति भरतः ।

(छ) अवदानं पूर्वकृतं कर्म, युद्धं कर्म वा, "अवदानं कृतकर्म युद्धं कर्म च कीर्तितम्" इति विश्वः ।

(ज) शतपथेति ।—शतं पन्थानो यस्य स शतपथः शतमार्ग इति यावत्, शतपथब्राह्मण इति प्रसिद्धयजुर्वेदीयग्रन्थविशेषः, यजुर्वेदस्य शतमार्गत्वादिति भावः, तस्य कथायां वार्तायाम्, अधिकारी अधिकारवान्, व्युत्पन्न इति यावत् ।

(झ) प्रणाय्याय निरभिलाषाय, बालसारङ्गिताय इत्यर्थः, मुमुक्षवे इति यावत्, "प्रणाय्योऽभिलाषशून्यः स्यात्" इति हारावल्याम् । अन्तेवासिने शिष्याय, "छात्रान्तेवासिनौ शिष्ये" इत्यमरः ।

(ञ) वाजसनेयः यजुर्वेदवित् ।

(ट) सूक्तानि सुष्ठु उक्तानि, समीचीनतया विरचितानीत्यर्थः ।

निजायेति ।—यतीना योगिना, जैत्राय जेता एव जैत्रः तस्मै, योगिप्रवरायेति यावत्, निजाय स्वकीयाय, गुरवे आचार्याय, तस्मै याज्ञवल्क्याय, विश्राणितं दत्तं, गवां सहस्रं येन तथोक्तं, "त्यागो विहापितं दानमुत्सर्जन-विसर्जने । विश्राणनम्—"इत्यमरः; गवां पृथ्वीनां, किरणानामित्यर्थः, सहस्रं गोसहस्रं सहस्रसङ्ख्याकधेनवः, "स्वर्गेषूपशुवाग्वज्र दिङ्नेत्रपृथिभूजले । लक्ष्यदृष्ट्या स्त्रियां धेनुः गौः—"इत्यमरः; तस्य अधिपतेः ईश्वरस्य, सूर्यस्येत्यर्थः, प्रपेदे शिष्यमिच्छुः,

जनकः। (सप्रश्रयम् (ठ))। भगवन्! यदन्यत् किञ्चिदभिदधाति, (ड) तत्र प्रभविष्णु (ढ)भवान्। तत्रभवतः सहस्रमयूखान्तेवासिनो योगीश्वरात् (ण)अध्ययनमिति महीयसी(त)इयमस्माकं यशःपताका।

विश्वामित्रः। (विहस्य)। भो महायोगिन्!—

किं याज्ञवल्क्यो जनकः किमेवं
न वः स्वरूपं कवयोऽपि विद्युः।
प्रवाहनित्यानधिरुह्य युष्मान्
सहस्रशाखाः श्रुतयः प्रयन्ति॥ १५॥

सूर्यशिष्यश्च याज्ञवल्क्यश्च शिष्यनिष्ठयोः, अतिथेयम् अतिथिषु साधुः तम्, अतिथिसेवापरायणमित्यर्थः, मैथिलं मिथिलाधीश्वरं, तं प्रसिद्धं, लोकप्रथितम्, यथा कथं तथाऽज्ञानः। उपजातिवृत्तम्॥ १४॥

(ठ) सप्रश्रयं सविनयम्।

(ड) अभिदधाति वदति।

(ढ) प्रभविष्णुः समर्थः। विविधप्रश्नोत्तरादौ भवान् पटुः, परमहं तत्राजानं नेति भावः, यदा—मद्विषयकं यत् किञ्चित् प्रशंसावचनं भवता उक्तं, तत् सर्वं भवत्प्रभावादेव मयि सम्भाव्यते, नान्यथेति भावः।

(ण) तत्रभवतः पूज्यात्। सहस्रमयूखान्तेवासिनः सूर्यशिष्यात्। योगीश्वरात् योगिनां प्रधानात्, याज्ञवल्क्यादित्यर्थः।

(त) महीयसी अतिमहती।

किमिति।—याज्ञवल्क्यः किम्? वस्त्विति शेषः, जनको वा किम्? वस्त्विति शेषः, कवयोऽपि विद्वांसोऽपि, वः युष्माकं, स्वरूपं तत्त्वम्, एवम् इत्थं, न विद्युः न जानीयुः, किमपरे? इति भावः, याज्ञवल्क्य-जनकयोर्न विशेषोऽस्तीति तात्पर्यं, प्रवाहेण सन्ततया, गुरु-शिष्यपरम्परया इति यावत्, नित्यान् अविनाशिनः, युष्मान् अधिरुह्य अवलम्ब्येत्यर्थः, सहस्रशाखाः सहस्रं शाखा यासां तादृश्यः, श्रुतयः वेदाः, प्रथन्ते प्रख्याता भवन्ति। यद्यपि सामवेदस्य सहस्रशाखत्वं, यजुषां शतशाखत्वम्, ऋचामेकविंशतिशाखत्वमिति वेदानां सहस्रशाखाधिकत्वमुक्तं, तथाऽप्यत्र सहस्रशाखा इति वचनं शाखाबाहुल्यमात्रप्रतिपत्त्यर्थमिति न दोषः। उपजातिवृत्तम्॥ १५॥

प्रतानन्दः। भगवन् कौशिक! एवमीदृशाः खल्वमी त्रिभुवन-महनीयमहिमानो मनीषिणः (थ)।

जनकः। (सवैलक्ष्यस्मितम् (ट))—

निर्माय कार्मणमृचामघमर्षणीना-
मुन्मार्जनीर्जगदघानि तवाद्य वाचः।
श्रोतुं चिरप्रणयि कौतुकमस्ति चेतो
दुःखाकरोति पुनरेष ममार्थवादः॥ १६॥

तद्दिरम। (इति शिरस्कम्पं घटयति (ध))।

विश्वामित्रः। (सस्मितमात्मगतमुद्दाटयन्)। सखे सीरध्वज! संक्रिय-ताम् (न) अञ्जलिः, अमी तूष्णीम्भूताः (प) स्मः। कात्यायनी-कामुककार्मुकारोपणपणप्रणयप्रवीणेन दुहितुः पत्या (फ) सम्प्रत्यपर्युषितप्रतिज्ञो (ब) भूयाः।

(ध) त्रिभुवनेति।—त्रिभुवने महनीयः पूजनीयः, आदरणीय इति यावत्, महिमा प्रभावः, यैषां तथोक्ताः। मनीषिणः विद्वांसः, तत्त्वज्ञानसम्पन्नाः महानुभावाः इति यावत्।

(ट) सवैलक्ष्यस्मितं सलज्जमन्दहासम्।

निर्मायेति।—अघमर्षणीनां पापहारिणीनाम्, ऋचाम् ऋग्वेदीयमन्त्रविशेषाणां, कार्मणं कर्मणे हितं कार्मणं कर्मठं, सुष्ठुतया कर्मानुष्ठानार्हं संस्कारविशेषमित्यर्थः, "कार्मणं मन्त्रतन्त्रादि-योजने कर्मठेऽपि च" इति मेदिनी, निर्माय कृत्वा, जगतां जगद्वासिनाम्, अघानि पापानि, अघानीति ऋदृशोरञ्मेघि षष्ठीबाधश्चिन्त्यः; उन्मार्जनीः संशोधनीः, तव वाचः वचनानि, श्रोतुम् अद्य मम कौतुकं कौतूहलम्, अभिलाष इति यावत्, अस्ति, पुनः किन्तु, एषः त्वत्प्रयुक्तः, अर्थवादः स्तुतिः, प्रशंसेत्यर्थः, मम चिरप्रणयि चिरं त्वयि बद्धानुराग, चेतः मनः, दुःखाकरोति दुःखितं करोति। वसन्ततिलकं वृत्तम्॥ १६॥

(ध) घटयति शीर्षयति।

(न) संक्रियताम् अपनीयताम्, उन्मुच्यतामिति यावत्।

(प) तूष्णीम्भूताः मौनिनः।

(फ) कात्यायनीति।—कात्यायन्याः गौर्याः, कामुकः अभिलाषुकः, हरः

सत्यः । (अपवार्य(म)) । आर्ये ! परस्परेषां पौरुषोत्कर्ष-प्रशंसारमणीयः पावनोऽयममीषां समवायः (म) ।

राजा । वत्स ! यदात्थ (य)—

स्मरन्ति लोकार्थममी किल श्रुतो-
रिति प्रतिष्ठामधिगन्तुमीश्महे ।
परं यदेषां पुनरस्ति वैभवं
तदेत एव व्यतिविद्रते यदि ॥ १७ ॥

इत्यर्थः, तस्य कार्मुके धनुषि, आरोपणं मौर्वीयोजनमेव, पणः प्रतिज्ञा इत्यर्थः, तस्य प्रत्यर्थे अनुरागे, तत्पूरणायेत्यर्थः, प्रवीणः निपुणः, अविच्छिन्नसन्ततिरिति भावः सखीभूतेन, भवता इति शेषः, दुहितुः पत्या जामात्रा, जामातृत्वाभेदेनेत्यर्थः ।

(व) अपर्य्युत्सितप्रतिज्ञः पूर्णप्रतिज्ञः ।

(म) अपवार्य्य अपवारितं कृत्वा, अन्यतो मुखं कृत्वेत्यर्थः, पराङ्मुखीभूयेति यावत् । तल्लक्षणमुक्तं विश्वनाथेन—"तद्भवेदपवारितम् । रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते ॥" इति ।

(म) परस्परेषाम् अन्योऽन्येषाम् । पौरुषेति ।—पौरुषस्य पुरुषकारस्य, यः उत्कर्षः अतिशयः, तस्य प्रशंसया स्तुतिवादेन, रमणीयः मनोज्ञः । पावनः पावनाशयः । समवायः सम्मेलनम् ।

(य) आत्थ ब्रवीषि ।

स्मरन्तीति ।—अमी ऋषयः, लोकार्थं जगदुपकारार्थं, श्रुतीः वेदान्, स्मरन्ति स्मृतिविषयीभूताः कुर्वन्ति, किलेति प्रसिद्धौ, स्मृतिनिबन्धरूपेण परिणमयन्तीति प्रसिद्धिः, वेदार्थस्मरणज्ञानानाम् ऋषिवाक्यानामेव स्मृतित्वात्, अत एव तेषां स्मृतिकर्तृत्वमिति भावः, इति अस्माद्धेतोः, प्रतिष्ठां गौरवं, ख्यातिमिति यावत्, अधिगन्तुं लब्धुम्, ईश्महे प्रभवामः, शक्नुमः इत्यर्थः, एतेषां स्मृत्यनुसारेण अनुष्ठानादिकं कृत्वा जनाः ख्यातिं लभन्ते इति भावः, पुनः किन्तु, एषाम् ऋषीणां, यत् परं महत्, वैभवं माहात्म्यम्, अस्ति वर्त्तते, तत् एते एव ऋषय एव, यदि सम्भावनायां, व्यतिविद्रते परस्परं जानन्ति, एतेषां वैभवम् एते एव जानन्तीत्यर्थः सम्भाव्यते, नान्ये इति भावः; एतेषामादेशानुपालनमेवास्माकं गौरवस्यादकं, परन्तु माहात्म्यनिर्णये अक्षमा वयमिति निष्कर्षः । वक्ष्यविक्ष इतम् ॥ १७ ॥

जनकः । (सहर्षम्) । भगवन् ! परमनुगृहीतोऽस्मि । यतः,—

समस्या वा सान्त्वा बहिरवहिरंहःपरिमृजा-
मृचां वा संवादः किमपि यजुषां वा परिपणः ।
त्वदाशीर्वादोऽयं बहुविषयसाक्षात्कृतफलो
वरं मे वत्सायाः प्रथयति पुरोवर्त्तिनमिव ॥ १८ ॥

विश्वामित्रः । (साकूतस्मितम् (र)) । सखे सौरध्वज ! एवमेतत्—

दवीयस्यो दूरादपथमिह चामुत्र च शुचां
त्रिवेदीवाक्यानामनतिचिरभग्ना इव खिलाः ।
श्रुतिग्राह्यं ज्योतिः किमपि बहिरन्तर्मलमुषो
मृजायाः मज्जानः क्व नु विपरियन्ति द्विजगिरः ? ॥१९॥

समस्येति ।—बहिः बाह्यदेशेषु, अबहिः अभ्यन्तरेषु च, अंहःपरिमृजा पापापनोदिना, सान्त्वा समस्या समाधारः सङ्क्षेपो वा, "समस्या तु समाधार्या" इत्यमरः ; ऋचां ऋग्वेदानां, संवादः सम्भाषणं वा, किमपि अनिर्वचनीयस्वरूप इत्यर्थः, यजुषां परिपणः मूल्यधनं वा, "पणो परिपणो मूल्यधनम्" इत्यमरः ; वा शब्दवयमुपमावाचकं विकल्पार्थे वा, "वा स्यादिवल्योपमयोर्विकल्पेऽपि समुच्चये" इत्यमरः ; बहुषु विषयेषु साक्षात्कृतं प्रत्यक्षीभूतं, फलं यस्य तथाभूतः, अयं तव आशीर्वादः "दुहितुः पत्या सम्यक्पर्य्युपितप्रतिज्ञो भूयाः" इत्याशीर्वचनं, मे मम, वत्सायाः सीतायाः, वरं पतिं, पुरोवर्त्तिनमिव अग्रतोवर्त्तमानमिव, प्रथयति प्रकटयति । त्रिखरिणी वृत्तम् ॥ १८ ॥

(र) साकूतस्मितं साभिप्रायमन्दहासम् ।

दवीयस्य इति ।—दूरात् अतिशयेनेत्यर्थः, दवीयस्यः महत्य इत्यर्थः, यद्वा—दूरादपि दवीयस्यः अतिदूरवर्त्तिन्यः, सर्वथा अलक्ष्या इति भावः, इह च अस्मिन् लोके च, अमुत्र च परस्मिन् लोके च, शुचां शोकानाम्, अपथम् अमार्गं, शोकाविषयीभूता इत्यर्थः, शोकनाशहेतुभूता इति यावत्, त्रिवेदीवाक्यानां वेदत्रयवचसाम्, अनतिचिरभग्नाः तत्क्षणप्रकटिता इत्यर्थः, खिलाः इव अप्रकृतभूमय इव, कृत्स्नाप्रतिष्ठतवेदवाक्यानीव इत्यर्थः, "हे खिलाप्रकृते समे" इत्यमरः ; श्रुतिग्राह्यं श्रवणेन्द्रियग्रहणीयं, किमपि अनिर्वचनीयं, ज्योतिः तेजोमय इति भावः, बहिरन्तर्मलमुषः बाह्याभ्यन्तरपापहारिण इत्यर्थः, मृजायाः शुद्धेः, मज्जानः सारभागाः, "सारो मज्जा नरि" इत्यमरः ; द्विजगिरः ब्राह्मणवाचः, क्व नु कुत्र खलु, विपरियन्ति ?

अतानन्दः। (सगतम्)। नूनं रामभद्रमेव जामातरमभिसन्धाय (ल) भगवानयं पुनः पुनर्वक्रोक्तिभिः (व) सीरध्वजं परिमोहयते (श)। भवतु, अहमस्य प्रबोधनार्थमसंविदान इव (ष) पृच्छामि। (प्रकाशम्)। भगवन्! कस्येदं अकुन्तराजकेतोरिव (स) कौस्तुभ-श्रीवत्सौ रत्नहयम्? (ह)।

विश्वामित्रः। (विहस्य सगतम्)। साधु वत्स अतानन्द! साधु, यदेतत् कृतं तौर्यं विवक्षितस्य वस्तुनः सुखावताराय (क्ष)। (प्रकाशम्)। वत्स गौतम! ककुत्स्थकुलसम्भवौ कुमारावेतौ।

अतानन्दः। (सप्रत्यभिज्ञमिव) (ख)—

पुत्रार्थं जगदेकजाङ्गिकथयूहाभभ्रमत्कीर्त्तिना
चातुर्होत्रविधौ विधेर्विधुवसुधाचक्रेण चक्रे मखः।

विपरिवर्त्तन्ते? नैव कुत्रापि विपरीतानि भवन्तीत्यर्थः, सत्याशिषो ब्राह्मणा इति भावः। शिखरिणी छन्दः॥ १९॥

(ल) अभिसन्धाय अभिप्रेत्य, मनसाधायेत्यर्थः।

(व) वक्रोक्तिभिः अलीकव्यक्तैर्वचनैरिति यावत्।

(श) परिमोहयते विमुग्धं करोति।

(ष) प्रबोधनार्थं स्पष्टतया वक्तुम् अवसरदानार्थमित्यर्थः। असंविदान इव अजानन्निव।

(स) अकुन्तेति।—अकुन्तराजः पक्षिराजः गरुडः, केतुर्यस्य स अकुन्तराजकेतुः गरुडध्वजः, विष्णुरित्यर्थः तस्येव।

(ह) कौस्तुभ-श्रीवत्सौ विष्णोर्वक्षोभूषणद्वयं, ततस्वरूपौ। रत्नद्वयं महामूल्यघनमूर्तं बालकद्वयम्। "दारकद्वयम्" इति पाठान्तरम्।

(क्ष) तौर्यं सोपानं, "तौर्यं सोपानपङ्क्तौ स्यात्" इति धरणिः। विवक्षितस्य वक्तुमिष्टस्य, वस्तुनः विषयस्य, सुखावताराय सुखेन अवतारणाय सुत्थापनायेत्यर्थः, सूचनार्थे इति यावत्।

(ख) सप्रत्यभिज्ञमिव पूर्वानुभूतस्य स्मारं प्रत्यभिज्ञा तत्सहितमिव, पूर्वानुभूतविषयं अवलम्बेत्यर्थः।

राज्ञा षड्क्लिरथेन यत्र सकलस्वर्वासिसर्वातिथौ
स स्वेनैव फलप्रदः फलमपि स्वेनैव नारायणः ॥ २० ॥

तत्किमेतावेव तौ दाशरथी, यौ किल राम-लक्ष्मणौ ताड़का-मथनमङ्गलोद्गातवितीर्णदिव्यास्त्रमन्त्रपारायणेन (ग) भगवतैव विनीतौ वैतानिकस्य (घ) कर्मणश्छिद्रापिधानदक्षिणया (ङ) भगवन्तमुपासाञ्चक्रतुः ? (च)

पुरार्थं इति ।—जगति भुवने, एकः अद्वितीयः, आद्विक: अङ्गावलग्नाक्षो, अति-वेगगामीत्यर्थः, ययुरेव अश्वमेधीयोऽश्व एव, "ययुरश्वोऽश्वमेधीयः" इत्यमरः ; उद्गाता ऋत्विक्, भ्रमन्तो चरन्तो, कीर्तिर्यस्य तथाभूतेन, चत्वार: होतार: चतुर्होतारः, ते एव चातुर्होत्राः, स्वार्थे अ-प्रत्ययः ; ऋग्वेदो एकः, सामवेदो द्वितीयः, यजुर्वेदो तृतीयः, अथर्ववेदो चतुर्थः इति चत्वार: होतार इति यावत् तेभ्यः, वितीर्णं दक्षिणात्वेन दत्तं, विश्वं समस्तं, वसुधाचक्रं भूमण्डलं येन तादृशेन, राज्ञा षड्क्लिरथेन षड्क्लिः दश, षड्क्लिषु दशसु दिक्षु, रथः यस्य तादृशेन, रथनादस्य दशदिग्विजयिना दशरथेन इत्यर्थः, "षड्क्लिर्दशाक्षरच्छन्दो-दशसङ्ख्यादिषु स्त्रियाम्" इति मेदिनी ; मखं यज्ञः, चक्रे कृतः, सकलाः सर्वे, स्वर्वासिनः स्वर्गवासिनः देवाः, सर्वे अतिथयः अभ्यागताः यत्र तथाभूते, यद्वा—सकलाः कलाभिः सहिताः, सपरिवारा इत्यर्थः, स्वर्वासिनः सर्वे अतिथयो यत्र तादृशे, "अतिथिर्ना गृहागते" इत्यमरः ; यत्र मखे, स प्रसिद्धः, स्वेनैव स्वयमेव, फलप्रदः यज्ञफलदाता, नारायणः स्वेनैव स्वयमेव, फलमपि, अभूदिति शेषः, नारायण एव यज्ञीयफलरूपेणाऽऽविर्भूत इत्यर्थः । आर्दूलविक्रीडितं वृत्तम् ॥ २० ॥

(ग) ताड़केति ।—ताड़कायाः मथनं निधनमेव, मङ्गलं तस्य उद्गाते उपक्रमे, "उद्गातस्तु पुनान् पाद-स्खलने समुपक्रमे" इति मेदिनी ; वितीर्णं दत्तं, दिव्यास्त्राणां मन्त्रपारायणं मन्त्रजपमभीष्टं येन तथाभूतेन, "पारायणमभीष्टं स्यात् तत्परास्त्रय-जोरपि" इति मेदिनी ।

(घ) विनीतौ शिक्षितौ । वैतानिकस्य यज्ञीयस्य ।

(ङ) छिद्रापिधानदक्षिणया छिद्रमन्तरायः, तस्य अपिधानं तिरोधानं, निरा-करणमित्यर्थः, तदेव दक्षिणा गुरवे निष्क्रयरूपेण दत्तं वस्तु तया ।

(च) उपासाञ्चक्रतुः आराधयामासतुः ।

विश्वामित्रः। (सकौतुकम्)। अथ किम्।

(जनकसभायां सर्वेऽवहितमानं पश्यन्ति)।

शतानन्दः। तदनयोः कतरो रामभद्रः? कतरश्च लक्ष्मणः?

विश्वामित्रः। (रामं निर्दिश्य)। वत्स आङ्गिरस!—

ये चत्वारो दिनकरकुलक्षत्रसन्तानमाली-
मालाऽम्लानस्तवकमधुरा जज्ञिरे राजपुत्राः।
रामस्तेषामचरमभवस्ताड़काकालरात्रि-
प्रत्यूषोऽयं सुचरितकथाकन्दलीमूलकन्दः॥ २१॥

शतानन्दः। (लक्ष्मणं निर्दिश्य)। अयं चापरो लक्ष्मणः? दिष्ट्या भगवद्वशिष्ठप्रसूतं (क्वं) क्षत्रकुलमृध्यते (ज)।

जनकः। (विहस्य)। साधु भगवन्! अस्माद्दृशेषु प्रजासु प्रविश्य क्रीड़सि (झ)—

क्रोधाग्नौ पुरुहूतदुष्कृतिपराभूतत्रिशङ्कुव्रपा-
सम्पातज्वलिते जगत्त्रयमयीं त्वय्याहुतिं जुह्वति।

ये इति।—दिनकरस्य सूर्यस्य, कुले वंशे, ये क्षत्रसन्तानाः क्षत्रियसमूहाः, त एव मालीमालाः; मल्लिकापुष्पसङ्घः, मल्लिकाश्चपङ्क्तय इत्यर्थो वा, "माला तु पङ्क्तौ पुष्पादिदामनि" इति हैमः; तासाम् अम्लानस्तवका अभिनवोद्भिन्नगुच्छा इव, मधुराः; मनोहराः, रमणीयदर्शना इति यावत्, ये चत्वारः राजपुत्रा जज्ञिरे जाताः, ताडका एव कालरात्रिः प्रलयरजनी, तस्याः प्रत्यूषः प्रभातं, तस्याः संहर्त्तेति भावः, सुचरितस्य कथा आलाप एव, कन्दली कदल्याख्याः वृक्षविशेषः, तस्याः मूलं प्रधानं, कन्दः मूलं, यमाश्रित्य सुचरितकथा प्रवर्त्तते इति भावः, अयं रामः तेषां राजपुत्राणाम्, अचरमभवः अन्त्यजः। मन्दाक्रान्ता वृत्तं—"मन्दाक्रान्ताऽम्बुधि-रसनगैर्मो भनौ तौ गयुग्मम्" इति तल्लक्षणात्॥ २१॥

(क्व) भगवदिति।—भगवता वशिष्ठेन प्रसूतं संस्कृतमित्यर्थः।

(ज) ऋध्यते वर्द्धते।

(झ) प्रजासु सन्तानेषु, "प्रजा स्यात् सन्ततौ जने" इत्यमरः; प्रविश्य क्रीड़सि अस्माकं सङ्कल्पानुचारेण तत्तत्सङ्कल्पितार्थसिद्ध्यर्थं विचरसीति भावः।

सम्भ्रान्तोपनतस्य नाटितजरावैक्लव्यशीर्णाक्षरा:
प्रत्यूहाय बभूवुरम्बुजभुवो देवस्य चाटूक्तय: ॥ २२ ॥
तमपि नाम भगवन्तं यजमानमन्ये गोपायितार: !! (अ)।

अतानन्द:। राजर्षे! एवमेतत्। किं पुनर्नं दोग्धिष्यमाणा: (ट) क्रुध्यन्तीति रक्षितारं क्षत्रियमुपादत्ते (ठ)।

जनक:। (सहर्षं राम-लक्ष्मणौ निर्वर्ण्य जनान्तिकम्) आर्य अतानन्द!—

भवति न तथा भानो: शिष्ये गुरौ वसतो न च
स्वयमपि मुनौ विश्वामित्रे गृहानधितिष्ठति।
दशरथसुतावेतौ दृष्ट्वा यथोच्छ्वसितं मन:
शिथिलयति मे प्रत्यग्ज्योति:प्रबोधसुखासिकाम् ॥ २३ ॥

क्रोधाग्नाविति।—पुरुहूतस्य इन्द्रस्य, हुङ्कृत्या हुङ्कारेण, परामृत: स्वर्गात् भ्रंशित:, यस्त्रिशङ्कु, तस्य तपाया: लज्जाया:, सम्पातेन सम्पादनेन, ज्वलिते उद्दीपिते, क्रोधाग्नौ क्रोधानले, जगत्त्रयमयौं त्रिभुवनमयीम्, लोकत्रयकर्षिणीमित्यर्थ:, आकृष्टिं त्वयि जुह्वति सति, विश्वामित्रो: स्वर्गात् भ्रंशनतपया प्रज्वलितेऽपि त्वयि सृष्टिसंहारं कर्तुमुपक्रममाणे सतीति भाव:, सम्भ्रान्त: सत्वर: सन्, उद्यत: सन् इति वा, उपनत: समीपोपस्थित: तस्य, देवस्य अम्बुजभुव: पद्मयोनेर्:, नाटितेन सञ्चालितेनेति यावत्, जरावैक्लव्येन वार्द्धकविजृम्भितत्वा, शीर्णानि स्खलितानि, अक्षराणि वर्णा: यासु तथाभूता:, चाटूक्तय: प्रियभाषणानि, त्वत्सन्तोषकराणि वचनानीति यावत्, प्रत्यूहाय विघ्नाय, बभूवु:,, प्रियभाषणेन त्वां भगवान् जमदग्नियोनिर्जगत्संहारात् निवारयामासेति भाव:। शार्दूलविक्रीडितं छन्दस् ॥ २२ ॥

(अ) यजमानं यज्ञं कुर्वन्तम्। गोपायितार: रक्षितार:।

(ट) दोग्धिष्यमाणा: यत्स्यमाणा:।

(ठ) उपादत्ते गृह्णति, आश्रयति।

भवतीति।—एतौ दशरथसुतौ राम लक्ष्मणौ, दृष्ट्वा उच्छ्वसितम् उल्लसितं, मे मन: यथा प्रत्यग्ज्योति: परज्योति:स्वरूपक परात्मन:, प्रबोधे ज्ञाने, सुखासिका सुखावस्थां, निरतिशयानन्देन स्थितिमिति यावत्, शिथिलयति मन्दीकरोति, भानो: सूर्यस्य, शिष्ये शिष्यत्वे, वसत: अनुरागात्, तथा तादृक्, न भवति; किञ्च,

शतानन्दः। राजर्षे वैदेह! एवमेतत्। ममापि राजपुत्राविमौ साक्षात्कुर्वतो वत्से सीतोर्मिले न हृदयादवरोहतः (ङ)।

जनकः। (विश्वामित्रं प्रति)। भगवन्!—

इदं वयो मूर्त्तिरियं मनोज्ञा
वीराद्भुतोऽयं चरितप्ररोहः।
इमौ कुमारौ वत पश्यतो मे
कृतार्थमन्तर्नटतीव चेतः॥ २४॥

विश्वामित्रः। (सोत्प्रासम् (ढ))। सखे सीरध्वज! हृदयमेवामन्त्रयस्व, (ण) किमर्थं कृतार्थमसीति।

जनकः। (सखेदस्मितम्)—

यज्ञोत्सस्य प्रथमपुरुषस्तेजसामीश्वरोऽयं
येषां धर्मप्रवचनगुरुर्ब्रह्मवादी वशिष्ठः।

स्वयं मुनौ विश्वामित्रे गृहान् अधितिष्ठत्यपि सनागत्य वर्त्तमानेऽपि, न च, तथा भवतीति पूर्वेणान्वयः, तदत उच्छ्वसितं मनः प्रत्यग्ज्योतिःप्रबोधसुखात्किञ्चा न निर्विशतीत्यर्थः; यद्वा—भवति त्वयि, तथा भावोः मिथ्ये इति वाऽर्थः। "वसतः" इत्यत्र "वसतः" इति पाठे—गुरौ गुरुसमीपे, वसतः तिष्ठतः, समेत्यनेन सम्बन्धः। एतौ दृष्ट्वा आत्मतत्त्वं मया विस्मृतमिति, एतद्दर्शनजनितानन्दात् आत्मतत्त्वज्ञानजनितानन्दः अधरीभूत इति वा भावः। इतिशो हसम् ॥ २३॥

(ङ) अवरोहतः अवतरतः, अपगच्छत इति भावः।

इदमिति।—इदं प्रत्यक्षं यौवनयोः सन्धिरूपमिति भावः, वयः, मनोज्ञा मनोहारिणी, इयं मूर्त्तिः आकृतिः, वीराद्भुतः वीररसेन सह अद्भुतः चमत्कारी, अयं चरितप्ररोहः चरित्रलाङ्कुरः, अभिनवप्रकाशितचरित्रविशेषः इति भावः, अनयोरिति सर्वत्र ऊहनीयः, वत हर्षे, इमौ कुमारौ पश्यतः अवलोकयतः, मे मम, चेतः कृतार्थं शिक्षणीयार्थं सत्, अन्तः अभ्यन्तरे, नटतीव नृत्यतीव। उपजातिः वृत्तम् ॥ २४॥

(ढ) सोत्प्रासम् ईषद्धास्यसहितम्, "उत्प्रासः स मनाक् स्मितम्" इत्यमरः।

(ण) आमन्त्रयस्व पृच्छ।

ये वर्त्तन्ते तव च हृदये सुष्ठु सम्बन्धयोग्या-
स्ते राजानो मम पुनरसौ दारुणः शुल्कसेतुः ॥ २५ ॥

राम-अज्ञौ। (सविमर्शम् (त))। कथमस्मदीयाः कथाः प्रस्तूयन्ते।

विश्वामित्रः। (सस्मितम्)। राजर्षे! यदि शुल्कसंस्थैव (थ) केवलमन्तरायः, (द) तत्र किञ्चिदेतत्।

जनकः। (सखेदं विमृशन् (ध) अपवार्य)। भगवन्नाङ्गिरस!—

यद्दिदृक्षुरपि विष्टपत्रयीं
पाणिपीडनविधेर्महार्घताम्।
एवमाह मुनिरेष कौशिक-
स्तेन मुह्यति चिराय मे मनः ॥ २६ ॥

यदिति।—तेजसाम् ईश्वरः श्रेष्ठः, अयम् ऊर्ध्वं परिदृश्यमानः, सूर्यः, येषां गोत्रस्य कुलस्य, प्रथमपुरुषः आदिपुरुषः, ब्रह्मवादी वेदवित् तत्त्वज्ञो वा, "वेदस्तत्त्व तपो ब्रह्म" इत्यमरः; वसिष्ठः येषां धर्मवचने धर्मशिक्षायां गुरुः आचार्यः, ये च तव हृदये मनसि, वर्त्तन्ते सदैव अवतिष्ठन्ते, तव हृदयं येषां हिताय जागर्त्ति इति भावः, ते पूर्वोक्तरूपाः, राजानः सुष्ठु सम्यक्, सम्बन्धयोग्याः वैवाहिकसम्बन्धार्हाः, पुनः किन्तु, मम असौ शुल्कसेतुः पणव्यवस्था, दारुणः कठिनः, प्रतिबन्धक इति भावः। मन्दाक्रान्ता वृत्तम् ॥ २५ ॥

(त) सविमर्शं सवितर्कम्।

(थ) शुल्कसंज्ञा पणव्यवस्था।

(द) अन्तरायः विघ्नः, कन्यादानं प्रतीति शेषः।

(ध) विमृशन् विचिन्तयन्।

यदिति।—त्रिष्टपत्रयीं त्रयीणां त्रिलोक्याः, पाणिपीडनस्य विधेर्य एव, विधिः व्यापारः तस्य, यद्वा—पाणिपीडनस्य पाणिग्रहणस्य, यः विधिः विधानं, नियम इत्यर्थः तस्य, महार्घतां महामूल्यताम्, अवश्यकर्त्तव्यमिति भावः, विदन्नपि जानन्नपि, एष मुनिः कौशिकः विश्वामित्रः, यत् एवम् इत्थं, "न किञ्चित्" इत्येवं रूपम्, आह ब्रवीति, तेन कथनेन, मे मम, मनः चिराय सुष्ठु अति मोहं प्राप्नोति, नात्र लाघवम् आरभतीति भावः। रथोद्धता वृत्तम् ॥ २६ ॥

तदेव स्थाणवीयं वा धनुः स्यादिदमीदृशम् ?।
एतदारोपणं नाम पणो वा मम जर्जरः ? ॥ २७ ॥

अतानन्दः। शान्तं शान्तं (न)—

दुर्लङ्घ्यमीश्वरशरासनमप्रमोच्य-
शुल्कग्रहस्त्वमसि सर्वमिदं तथैव।
किं त्वस्य राघवशिशोः सहजानुभाव-
गम्भीरभीषणमतिस्फुटमेव वृत्तम् ॥ २८ ॥

जनकः। (मुनिं प्रति)। भगवन् कौशिक! चिरमपि

तदिति।—तदेव सुप्रसिद्धम्, इदं पञ्चविधबीभूतं, स्थाणवीयं स्थाणवं, धनुः कार्मुकम्, ईदृशम् अनेन बालकेन आरोपणीयमिति भावः, वा स्यात् ? एतस्य धनुषः, एतस्मिन् वा, आरोपणं ज्याबोजनं, नाम मम पणः, जर्जरः जीर्णः, विफल इति यावत्, वा, स्यात् ? इति शेषः, अस्य बालकस्य तादृशं सामर्थ्यं विदित्वा विश्वामित्रेण तथोक्तम्, अथवा चिरकृतस्य पणस्यस्थानुरोधेन वयस्या कन्या कथं दत्त्यते ? दीयतामस्मै कुमारायेति विश्वामित्रादेशे पणो मम वितथः स्यात् इति भावः। यदा—तदेव इदं स्थाणवीयं धनुः दुर्लङ्घ्यम् एवभूतं, यथापूर्वमविकृतमेव इति भावः, वा स्यात् ? वा अथवा, एतदारोपणं नाम मम पणः जर्जरः भग्नः स्यात् ? बालोऽयं धनुरिदं भङ्क्त्वा मम पणभङ्गं कुर्यादिति भावः। अनुष्टुप् वृत्तम् ॥ २७ ॥

(न) शान्तं शान्तं निवृत्तं निवृत्तम्, एवं न वक्तव्यमित्यर्थः, तव मनस्तापः शाम्यतु शाम्यत्विति भावः।

दुर्लङ्घ्यमिति।—ईश्वरस्य हरस्य, शरासनं धनुः, दुर्लङ्घ्यं दुरतिक्रमं, दुरारोपणीयमित्यर्थः, त्वया अप्रमोच्यं अत्याज्यं, शुल्कग्रहः पणबन्धः यस्य तथाभूतः, असि, इदं सर्वं धनुषः दुर्लङ्घ्यत्वं तव च अमोच्यशुल्कग्रहत्वं, तथैव पूर्ववदेव, तथ्यमेवेत्यर्थः, किन्तु अस्य राघवशिशोः रघुकुलकुमारस्य, रामस्य इत्यर्थः, सहजेन स्वाभाविकेन, अनुभावेन प्रभावेन च, गम्भीरं दुरवगाहं, भीषणं भयङ्करम्, अत्युद्भटमिति यावत्, वृत्तं चरितं, ताडकावधादिरूपमिति भावः, अतिस्फुटमेव सुव्यक्तमेव, यतोऽयं महाप्रभावः, तस्मात् सम्भाव्यते अनेन ते पणबन्धः सफलीकरिष्यते इति भावः। वसन्ततिलकं वृत्तम् ॥ २८ ॥

विकल्पयन् (प) न भवन्निरामभिधेयम् (फ) अद्यापि निश्चिनोमि।

विश्वामित्रः। (विहस्य)। तदुपदर्शय कार्मुकमैन्दुशेखरं,(ब) रामभद्र एव व्याकरोतु (भ)।

रामः। (सहर्षं जनकम्)। कथमलीकविकल्पैः (म) आत्मानं प्रमोहयामि (य)। नन्वयं ममैव कौतुकं (र) पूरयितुमैश्वरं धनुरभ्यर्थयते भगवान्। (जनकं च दृष्ट्वा सविनयम् (ल))। अहह!!—

बालेन सम्भाव्यमिदं च कर्म
ब्रवीति च प्रत्ययितो महर्षिः।
इति ध्रुवं मन्त्रयते नृपोऽयं
दत्ते किमत्रोत्तरमाकुलोऽस्मि ॥ २९ ॥

जनकः। (मुहूर्तमिव स्थित्वा दीर्घमुष्णं च निःश्वस्य)। भगवन्! क्व

(प) विकल्पयन् विचारयन्, विचिन्तयन् इति यावत्।

(फ) अभिधेयं प्रतिपाद्यम्।

(ब) कार्मुकं धनुः। ऐन्दुशेखरं शाम्भवम्।

(भ) व्याकरोतु व्यक्तीकरोतु।

(म) अलीकविकल्पैः वृथासंशयैः, मिथ्याकल्पनाभिरिति वा।

(य) प्रमोहयामि? विमुग्धं करोमि? आशान्वितं करोमीत्यर्थः।

(र) कौतुकं कौतूहलं, धनुर्दर्शनार्थम् औत्सुक्यम् इत्यर्थः।

(ल) सविनयं सविनम्रम्।

बालेनेति।—प्रत्ययितः सञ्जातप्रत्ययः, विश्वस्त इत्यर्थः, महर्षिः विश्वामित्रः, बालेन मया, इदं कर्म ऐश्वरधनुषि गुणारोपणरूपं, सम्भाव्यं साध्यं, ब्रवीति च जनयति च; यद्वा—इदञ्च कर्म बालेन मयेव, सम्भाव्यं किम? इति शेषः, च अथच, प्रत्ययितो महर्षिः ब्रवीति, अयं नृपः ध्रुवं निश्चितम्, इति इत्थं, मन्त्रयते विचारयति, तदस्य धनुरारोपणविषये, किम् उत्तरं दत्ते, तस्य आकुलः व्याकुलः, अस्मि भवामि, यदि धनुरसम्भावारोपणं वृथा जानीयेदित्याकुलताऽहमस्मीति भावः। उपजातिवृत्तम्॥ २९॥

तादृशं भागधेयमस्माकं, येन भगवता विश्वामित्रेण नाथवन्तो (व) वयं मैथिलीमेतस्मै रघुकुलकुमाराय प्रतिपाद्य चिराय कृतार्थीभवामः।

(रामो लज्जते)।

जनकः। किं च भगवन्!—

येषां चापममर्पितत्रिभुवनच्छिद्रापिधानव्रतं
जातं रोहितमेव केवलमपज्याबन्धमैन्द्रं धनुः।
तैऽपि प्रेक्ष्य पुरा शरासनमिदं मौर्वीकिणश्यामिका-
कस्तूरीसुरभीकृतानविभरव्यर्थं भुजान् भूभुजः॥ ३०॥

विश्वामित्रः। (विहस्य)। सखे सीरध्वज! कथं महापुण्यराशिमात्मानमवमन्यसे?—

त्वद्भागधेयमपि तादृशमुत्सवाना-
मेतादृशां वयमपि प्रथमोक्षितारः।

(व) नाथवन्तः आश्रयवन्तः, ममाद्या इत्यर्थः, ममताया इति यावत्।

येषामिति।—चापममर्पितत्रिभुवनच्छिद्रापिधानव्रतमिति ममकं पदम। ऐन्द्रं इन्द्रसम्बन्धि, धनुः कार्मुकं, येषां भृभुजां, चापेषु धनुषु, समर्पितं न्यस्तं, त्रिभुवनस्य लोकत्रयस्य छिद्रापिधानम् अन्तरायदूरीकरणमेव व्रतं नियमः, व्यापार इति यावत् येन तथाभूतम्, अत एव अपगतः परित्यक्तः, व्याजस्य मौर्व्यारोपण छलस्य तादृशं सतः, केवलं रोहितमेव ऋजु एव, सरलमेव इत्यर्थः, "रोहितं कुङ्कुमे रक्ते ऋजुशक्रशरासने" इति विश्वः, "इन्द्रायुध शक्रधनुस्तदेव ऋजु रोहितम्" इत्यमरश्च; जातं, न तु कदाचित् व्याजारोपणाय नमितमिति भावः, ये इन्द्रकार्यसुरक्षादिकं बाहुबलेन चक्रुरिति फलितार्थः, तैऽपि भृभुजः राजानः, पुरा पूर्वम्, इदं शरासनं धनुः, प्रेक्ष्य अवलोक्य, मौर्वीभिः धनुर्ज्याभिः, व्याजकर्षणैरिति भावः, यः किणः जायन्ते, "कडा" इति प्रसिद्धः, तस्य श्यामिका कालिमा एव, कस्तूरी मृगमदः, तया सुरभीकृतान् सुगन्धीकृतान्, सुष्ठ्वतिभारजनीकृतानिति भावः, भुजान् बाहून्, व्यर्थं निष्फलं यथा तथा, अबिभरुः बिभ्रति स्म। शार्दूलविक्रीडितं वृत्तम्॥ ३०॥

त्वदिति।—तव भागधेयमपि भाग्यमपि, तादृशं रघुकुलकुमाराय जानकीदानेन

सन्त्येव विश्वभुवनाभयदानशौण्डाः
क्षौणीभुजः परममी तु न रामभद्रः ॥ ३१ ॥

जनकः। (स्वगतम्)। कथमुपाध्यायेनैवैतदभिहितं यदस्मि वक्तुकामः।

जनकः। भगवन्! सत्यमचिन्त्यो (ग) मणिमन्त्रौषधीनामिव रघुकुलकुटुम्बकानामनुभावः। परम् (घ) एतत् ब्रवीमि—

गिरीशेनाराद्धस्त्रिजगदवजैत्रं दिविषदा-
मुपादाय ज्योतिः सरसिरुहजन्मा यदसृजत्।
हृषीकेशो यस्मिन्निषुरजनि मौर्वी फणिपतिः
पुरास्तस्रो लक्ष्य धनुरिति किमप्यद्भुतमिदम् ॥ ३२ ॥

कृतार्थीभवनरूपं महोत्सवमाजगमिति भावः, वयमपि एतादृशा सीता रामयोः परिणय-रूपाया, उत्सवाना, त्वदीयानामिति शेषः, प्रसन्नचित्तारः द्रष्टारः, तवोत्सवदर्शनेनैव वयं सुखीभविष्याम इति भावः, विश्वभुवनाना सर्वजगताम, अभयदाने निर्भयत्व-सम्पादने, भयनिवारणे इत्यर्थः, शौण्डा विख्याता, अत्यागतरक्षितृत्वेन प्रसिद्धा इत्यर्थः, "शौण्डो मत्ते च विख्याते विपण्यव्याञ्च भवेत् स्त्रियाम्" इति मेदिनी; क्षौणीभुजः राजानः, सन्ति एव विद्यन्ते एव, परं किन्तु, अमी राजानः, रामभद्रा न, ते रामभद्रसदृशा नेति भावः। वसन्ततिलक वृत्तम् ॥ ३१ ॥

(ग) अचिन्त्यः चिन्तयाऽपि अज्ञेयः, अतर्क्यो वा इत्यर्थः।

(घ) रघुकुलकुटुम्बकाना रघुवंशीयानामित्यर्थः। अनुभावः प्रभावः। परं किन्तु।

गिरीशेनेति।—गिरीशेन हरेण, आराद्ध: सेवितः, प्रार्थित इति यावत्, सरसिरुह-जन्मा ब्रह्मा, दिविषदां देवाना, ज्योतिः तेजः, उपादाय समाहृत्य, त्रिजगतां त्रिलोकानाम्, अवजैत्रं जयशीलं, विध्वंसकमिति यावत्, यत धनुः असृजत् निर्मितवान्, यस्मिन् धनुषि, हृषीकेशः नारायणः, इषुः शरः, तथा फणिपतिः सर्पाधीश्वरः वासुकिः, मौर्वी ज्यारूपो, अजनि अभूत, तथा तिस्रः पुरः त्रिपुरा-सुरनगर्यः, लक्ष्य वेध्यं, यस्य धनुष इति शेषः, इतीत्थम्, इदम् अद्भुतम् आश्चर्यं, अहो! किमपि अनिर्वचनीयमेव, वर्तते इति शेषः। शिखरिणी वृत्तम् ॥ ३२ ॥

प्रतानन्दः। आः!! (स) किमनया पुनःपुनः पिनाकप्रशस्ति-पञ्जिकया? (ह)। तदेतत् कौशिकमेव प्रमाणयन्तो (क) बहुमन्यामहे। अपि च, किमशक्यं रामभद्रस्य—

उत्पादयन् क्वमपि कौणपकोटिहोमं
तेजाहुताग्नसमिन्धनसामिधेनीम्।
यस्ताडकामकृत बालसखैः पृषत्कै-
रीषज्जयः स्फुटमनेन दशाननोऽपि॥ ३२॥

(नेपथ्येऽईप्रविष्टः)।

पुरुषः। दशाननपुरोहितः शौष्कलो महाराजं दिदृक्षते।

प्रतानन्दः। (सोद्वेगम्)। आः!! आगच्छतु।

(पुरुषो निष्क्रान्तः)।

रामः। (सव्यथं जनान्तिकम्)। वत्स लक्ष्मण! कथमन्त-रितः (ख) अयमनेन दुरात्मना राक्षसेन कामारिकार्मुकपरि-चर्य्यामहोत्सवः (ग)।

(ङ) आः इति विरक्तिसूचकमव्ययम्।

(ह) पिनाकप्रशस्तिपञ्जिकया ऐश्वरधनुषः प्रशंसाविस्तारेण।

(क) प्रमाणयन्तः प्रमाणं कुर्वन्तः, विश्वस्तत्वेन गच्छन्तः इत्यर्थः, कौशिकवाक्ये आस्थां व्यापयन्त इति भावः।

उत्पादयन्निति।—यः रामः, क्वमपि अनिर्वचनीयं, कौणपकोटिहोमं राक्षसकोटि-होमं, "राक्षसः कौणपः क्रव्यात्" इत्यमरः, उत्पादयन् कुर्वन्नित्यर्थः, कर्तुमिच्छन्निति यावत्, बालसखैः बालस्य सखायः तैः शैशवसहचरैरित्यर्थः, पृषत्कैः बाणैः "पृषत्का-बाण-विशिखाः" इत्यमरः; ताडकां, तेज एव प्रताप एव, हुताशनः अग्निः, तस्य समिन्धने सम्यक् ज्वालने, सामिधेनीम् अग्निसन्धायक ऋचम्, "ऋक् सामिधेनी याज्या च या स्यादग्निसमिन्धने" इत्यमरः; अकृत कृतवान्, अनेन रामेण, दशाननोऽपि स्फुटं सुव्यक्तम्, ईषज्जयः प्रायेण जेतव्य इति यावत्। वसन्ततिलकं वृत्तम्॥ ३२॥

(ख) अन्तरितः दूरीकृतः, विघ्नीकृत इत्यर्थः।

(ग) कामारीति।—कामस्य अरिः हरः, तस्य कार्मुकं धनुः, तस्य परिचर्य्या आराधनरूपा सेवा, सैव महान् उत्सवः आनन्दजनकव्यापारः।

सूत्रधारः । आर्ये ! न केवलमयम्—(घ) (इत्यर्धोक्तिं रचयति) ।

(रामः सप्रणय-रोष-स्मितं तमपाङ्गेन पश्यति) ।

(प्रविश्य) ।

मौक्तिकः । (प्रत्येकमवलोक्यात्मगतम्) । कथमत्रैव जनकसुता-नन्दाभ्यां पुरस्कृतो विश्वेषाम् (ङ) अस्माकममित्रो (च) विश्वामित्रः । (विचिन्त्य) । तिष्ठतु, कोऽयम् ? (छ) (इत्यदक्षिणेन (ज) । इदा) । अये ! कावेतौ क्षत्रियब्रह्मचारिणौ ?—

पुण्यलक्ष्मीकयोः कोऽयमनयोः प्रतिभासते ।
मौञ्जयादिव्यञ्जनः शान्तो वीरोपकरणो रसः ॥ २४ ॥

निसर्गोदग्रम् (झ) इदं च कुमारद्वयम् !!—

पार्श्वे त्रयाणामेतेषामृक्सामयजुषामिव ।
कृपाभ्यां विधिमन्त्राभ्यामथर्वैव प्रदीप्यते ॥ २५ ॥

(घ) न केवलमयं केवलम् अयं महोत्सवः न, अन्यत्रिति शेषः, सीतापरिणय-महोत्सवोऽपि अन्यत्रिति भावः ।

(ङ) विश्वेषां सर्वेषाम् ।

(च) अमित्रः शत्रुः ।

(छ) कोऽयम् अयं विश्वामित्रः कः ? न किमपि कर्तुं समर्थ इति भावः ।

(ज) इत्यदक्षिणेन इत्यस्य दक्षिणदिग्भा ।

पुण्येति ।—पुण्या पवित्रा, लक्ष्मीः श्रीः ययोः तथाभूतयोः, अनयोः ब्रह्मचारिणो-र्मध्ये इत्यर्थः, कः अयं मौञ्जो मुञ्जतृणनिर्मिता मेखला, आदिपदेन यज्ञदण्डादीनां ग्रहणं, मौञ्जादिः व्यञ्जनं चिह्नं यस्य तादृशः, वीरोपकरणः वीररसपरिपोषितः, शान्तः रसः भावविशेषः, अयं कः प्रतिभासते ? स्फुरति ? अनुष्टुप् वृत्तम् ॥ २४ ॥

(झ) निसर्गेति ।—निसर्गेण स्वभावेन, उदग्रम् उन्नतं, महाप्रभावमित्यर्थः ।

पार्श्वे इति ।—ऋक्-साम-यजुषामिव एतेषां जनक-सुतानन्द विश्वामित्राणा-मित्यर्थः, त्रयाणां पार्श्वे विधिरनुष्ठानं, मन्त्रश्च ताभ्याम् अथर्वैव चतुर्थवेद इव, कृपाभ्याम् आकृतिभ्यां, प्रदीप्यते प्रकर्षेण ज्वलति, कुमारद्वयमिति मन्त्रस्तेनान्वयः । अनुष्टुप् वृत्तम् ॥ २५ ॥

(विमृश्य।) आः!! नूनं स एव लक्ष्मणदितीयो रामहन्तकः कौशिकमृषिमनुप्लवमानो (अ) मिथिलामुपस्थितः। (सक्रोधमोक्षम्)। हा वत्से सुकेतुनन्दिनि ताडके! कथमीदृशान्मनुष्यडिम्भात् (ट) तादृशो देवदुर्विपाकः (ठ) ते संवृत्तः!! कष्टमनरण्यवंशजन्मनः (ड) क्षत्रियशिशोरनात्मवेदिता (ढ)—

सुन्दासुरेन्द्रसुतशोणितशोधुपान-
दुर्मत्तमार्गणनिरर्गलवीरशब्दः।
द्रोहं चकार दशकण्ठकुटुम्बकेऽपि
सोऽयं वटुः कुशिकनन्दनयज्ञबन्धुः॥ १६॥

(अ) अनुप्लवमानः अनुगच्छन्।

(ट) मनुष्यडिम्भात् मानवशिशोः, "पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः" इत्यमरः।

(ठ) देवदुर्विपाकः दैवात् नियतिवशात्, दुष्टो विपाकः परिणामः, विरुद्धं फलमिति यावत्, सत्सुरिति भावः, "विपाकः पटले खेदे कर्मणो विरुद्धफले" इति मेदिनी।

(ड) अनरण्यवंशजन्मनः अनरण्यः दशरथस्य पूर्वपुरुषः कश्चित् राजा प्राक् रावणेन निहतः, तस्य वंशे जन्म यस्य तथाभूतस्य, रावणनिर्जितवंशोद्भूततया अतितुच्छस्येति भावः।

(ढ) अनात्मवेदिता आत्मज्ञानाभिज्ञता, स्वस्वरूपस्य सामान्यज्ञानाभाव इति यावत्।

सुन्देति।—कुशिकनन्दनस्य विश्वामित्रस्य, यज्ञबन्धुः यज्ञरक्षके सहायभूतः, सः अयं वटुः ब्रह्मचारी, राम इति भावः, सुन्दो नाम असुरेन्द्रः, तस्य सुतः सुबाहुः, तस्य शोणितमेव शोधुः आसवः, मद्यविशेष इत्यर्थः, "मैरेयमासवः शोधुः" इत्यमरः; तस्य पानेन दुर्मत्ता अतिशयेन मत्ताः, ये मार्गणा शराः, "कङ्क-मार्गण शराः" इत्यमरः; तैः निरर्गलः अप्रतिबद्धः, वीरशब्दः अयं वीर इति आख्या यस्य तथाभूतः सन्, दशकण्ठकुटुम्बकेऽपि रावणपरिवारेऽपि, द्रोहम् अनिष्टं, चकार, अहो! मानवशिशुस्य अहो इति भावः। वसन्ततिलकं वृत्तम्॥ १६॥

भवतु, द्रष्टव्यमस्य भुजाशौण्डीर्यम् (ब)। (उपेत्य)। अपि सुखिनो यूयं जनकमिश्राः?

जनकः। स्वागतं पौलस्त्यपुरोहितस्य। इत आस्यताम् (त)।

(औत्सुक्यमभिनीय)।

जनकः। अपि कुशलं ते राज्ञो रावणस्य? अथवा—

विपदां प्रतिकर्त्तारो यस्योपायैरथर्वभिः।
त्वादृशाः सन्ति किं तस्य कल्याणमनुयुज्यते?॥ १७॥

श्रोत्रियः। (विहस्य)। श्रोत्रिय सीरध्वज! प्रत्यङ्गरिष्यामैव (थ) वयं यदि स्वभुजमरुन्नौमत्तवारणावलीवलयितोरः-प्रासादसुस्थितचतुर्दशलोकलक्ष्मीमहान्तःपुरे लङ्कापतौ किमपि प्रतिकार्य्यमभविष्यत् (द)। पश्य—

(ब) भुजाशौण्डीर्यं बाहुवीर्यम्।

(त) आस्यताम् उपविश्यताम्।

विपदामिति।—त्वादृशाः भवदिधाः, महात्मान इति भावः, अथर्वभिः अथर्ववेदविहितैरित्यर्थः, उपायैः प्रक्रियाभिः, मारणस्तम्भनादिभिरिति भावः, तस्य विपदाम् अनर्थानां, प्रतिकर्त्तारः प्रतिकारिणः, सन्ति विद्यन्ते, तस्य रावणस्य, कल्याणं मङ्गलं, किम् अनुयुज्यते? पृच्छ्यते? अनुयोग एव अनावश्यकः, तस्य सततमेव कल्याणशीलत्वादिति भावः। यद्वा—त्वादृशा दुरात्मान इति भावः, अथर्वभिः उपायैः यस्य विपदा प्रति, प्रति-योगे द्वितीया; कर्त्तारः विपत्कर्त्तार इत्यर्थः, तस्य कल्याणं किम् अनुयुज्यते? पृच्छ्यते? न कदाऽपि कल्याणं तस्य सम्भवतीति भावः। "प्रश्नाकु-शोनः पृच्छा च" इत्यमरः। अनुष्टुप् छन्दः॥ १७॥

(थ) प्रत्यङ्गरिष्याम प्रतीकारम् अकरिष्याम।

(द) स्वभुजेति।—स्वस्य भुजानां बाहूनां, विक्रमितस्य प्रभावस्यानीति भावः, मरुतः समूहा एव, मत्तानां मदजलिषां, वारणानां द्विपानाम्, आवलयः समूहाः, तैः, यद्वयिते वेष्टिते, उरःप्रासादे वक्षःस्थलरूपराजसदनेऽपि, "प्रासादो देवभूभुजाम्" इत्यमरः; सुस्थिता सुष्ठु : अवस्थिता, चतुर्दशानां चतुर्दशसङ्ख्याकानां, लोकानां भूरादीनां भुवनानां, लक्ष्मीरेव श्रीरेव, महत् अन्तःपुरम् अन्तःपुरिका, राजसदृशीति यावत् यस्य तथाभूते। लङ्कापतौ रावणे। एतादृशस्य रावणस्य किमपि प्रतिकार्य्यमस्ति? इति भावः।

यच्चेष्टाः समलोकसीमनि परिक्लिष्टः पराङ्मुखमपि
प्रत्यक्षीकुरुते सहस्रनयनः पृष्ठोऽपि वैरस्त्रिभिः।
चक्रे वर्त्म च नागलोकजयिनीं यात्रामिव प्रस्तुवन्
यः कैलासमुदस्य कौतुकमपादानं तु तस्यापदाम्? ॥ १८ ॥

लक्ष्मणः। (सानर्षं जनान्तिकम्)। आर्य! कथमसौ सहस्रार्जुन-बालिभ्यामवलीढ़शौर्य्यसारो (ध) दुरात्मा रावणः प्रस्तूयते (न)।

रामः। वत्स! न वक्तव्यमिदं, महान्तो हि ताद्दशाः। किञ्च—

ख्यातां नाम कपीन्द्र हैहयपतौ तस्यावगाढ़ान्तर-
ख्यामानौ दशकन्धरस्य महतो स्कन्धप्रतिष्ठा पुनः।

यच्चेष्टा इति।—समलोकसीमनि सङ्ग्रामभूमौ, "समौ लोकोऽस्त्री रणे भूमौ" इति विश्वः; परिक्लिष्टः परितः क्लान्तं गतः, अत एव पराङ्मुखं पराङ्मुखीभवन्नपि, सहस्रनयनः इन्द्रः, पृष्ठोऽपि पृष्टदेशमागतैः, अपि त्रिभिः त्रिभिः, यस्य सहस्रनयनत्वात् पृष्ठेऽपि अक्षिसद्भावादिति भावः, यस्य रावणस्य, चेष्टाः रणव्यापारान्, प्रत्यक्षीकुरुते साक्षात् पश्यति, यस्य नागलोकजयिनीं पातालजयसाधनीं, यात्रां युद्धार्थं प्रयाणं, प्रस्तुवन्निव कुर्वन्निव, कैलासं तदाख्यपर्वतम्, उदस्य उत्क्षिप्य, वर्त्म मार्गे, नागलोकस्येति भावः, चक्रे कृतवान्, तस्य रावणस्य, आपदाम् अपादानं प्राप्तिः, कौतुकमस्तु? किमत्यद्भुतमेव? नैव तत्रापदां सम्भवति, याताभिः प्रतिज्ञाभिरिति भावः। आर्दूल-विक्रीडितं वृत्तम् ॥ १८ ॥

(ध) सहस्रार्जुन-बालिभ्यां सहस्रार्जुनः सहस्रबाहुरर्जुनः, बालिश्चार्जुनः शुक्लश्चेत्, यः रणे सहस्रबाहुर्भवतीति तस्य सहस्रार्जुन इति संज्ञा, बाली वानरराजः ताभ्याम्, अवलीढ़ः आक्रान्तः, नाशित इति यावत्, शौर्य्यसारः शौर्य्यरूपं धनं यस्य तथाभूतः।

(न) प्रस्तूयते प्रस्तर्षेण स्तूयते, प्रशस्यते इति यावत्।

ख्यातामिति।—कपीन्द्र-हैहयपतौ बालि-सहस्रार्जुनौ, तस्य दशकन्धरस्य रावणस्य, अवगाढ़ं गभीरं, गभीरभावेन ज्ञातमिति यावत्, आन्तरस्यात् आन्तरं यत् सानर्षं वा बाह्यं तद्भावौ, ख्यातां ज्ञातां, पुनः किन्तु, स्कन्धप्रतिष्ठा स्कन्धख्यातिः,

सद्यःपाटितकण्ठकौकसकणाकीर्णा यदंसस्थलीः
स्वेनेभाजिनपल्लवेन मुदितः प्रास्फोटयत् धूर्जटिः ॥ ३९ ॥

अपि च—

मघोनस्तद्वीरं कुलिशमलसीकृत्य समरे
भुनक्ति स्वाराज्यं त्रिभुवनभटोऽयं दशमुखः ।
श्रियो नानास्थानभ्रमणरमणीया चपलता-
मवच्छिद्य स्वस्मिन्नपि भुजवने पूरयति यः ॥ ४० ॥

जनकः । (औक्षव्रतिं) ब्रह्मन् ! सत्यमीदृशो राक्षसराजः ।

औक्षवः । राजर्षे जनक !—

सन्तुष्टे तिसृणां पुरामपि रिपौ कण्डूलदोर्मण्डलो-
क्रीडाक्लृप्तपुनःप्ररूढशिरसो वीरस्य लिप्सोर्वरम् ।

अवदंसस्य हृदता इत्यर्थो वा, "रुपादिपञ्चके स्कन्धः काधेऽंसे भुजतावपि" इति विश्वः; मदतो भूयसो, धूर्जटिः शम्भुः, मुदितः प्रीतः सन्, स्वेन निजेन, इभाजिनपल्लवेन गजचर्मांशुलेन, सद्यः तत्क्षणं, पाटितानां निकृत्तानां, कण्ठानां गलदेशानां, नवसङ्ख्याकानामिति भावः, औक्षसकणैः अस्थिखण्डैः, क्षुद्रास्थिभिरित्यर्थः, "औक्षसं कुल्यमस्थि च" इत्यमरः, आकीर्णाः व्याप्ताः, यस्य रावणस्य, अंसस्थलीः स्कन्धदेशान्, प्रास्फोटयत् भीषयति स्मेत्यर्थः, महासाहसिकोऽयं शिवभक्तश्चेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ३९ ॥

मघोन इति ।—त्रिभुवनभटः त्रिलोकीवीरः, अयं दशमुखः रावणः, समरे युद्धे, मघोनः इन्द्रस्य, तत् प्रसिद्धं, घोरं भीषणं, कुलिशं वज्रम्, अलसीकृत्य निश्चेष्टीकृत्य, मघवन्तं जित्वेति भावः, स्वाराज्यं स्वर्गराज्यं, भुनक्ति, तथा यः रावणः, श्रियः लक्ष्म्याः, नानास्थानेषु भ्रमणेन विचरणेन, रमणीया विलासयोग्यानित्यर्थः, चपलता चापल्यम्, अवच्छिद्य निरस्य, लक्ष्म्याश्चपला इति लोकदूरीकृत्येति भावः, स्वस्मिन् आत्मीये, भुजवने भुजारण्ये, विंशतिसङ्ख्याकभुजेषु इत्यर्थः, पूरयति आपयति आप, चपलतां श्रियं भुनक्ति चेति भावः । शिखरिणी वृत्तम् ॥ ४० ॥

सन्तुष्टे इति ।—तिसृणां पुरां त्रिपुरारौ शम्भौ, सन्तुष्टेऽपि प्रीतेऽपि, तपःप्रभावादिति भावः, कण्डूला कण्डूयना, या दोर्मण्डली भुजावली, तस्याः क्रीडया लीलया, क्रीडावदनायासेनेति भावः, कृत्तानि छिन्नानि, पुनः प्ररूढानि उत्पन्नानि,

याञ्चादैन्यपराणि यस्य कलहायन्ते मिथस्त्वं वृणु
त्वं वृणित्यभितो मुखानि स दशग्रीवः कथं वर्ण्यताम् ?॥४१॥

सोऽपि—

कन्यामयोनिजन्मानं वरीतुं प्रजिघाय माम्।
पुरोधसा गौतमेन गुप्तस्य भवतो गृहान् ॥ ४२ ॥

विश्वामित्रः। सखे सीरध्वज! पश्य, पिनाकदर्शनोल्लासिकौतुकविसंष्ठुलचित्तवृत्तिरिव (प) वत्सो रामभद्रः।

जनकः। (विहस्य)—

किमेतदेव भगवन्नभिधीयै पुनस्तराम्।
इक्ष्वाकवो विदेहाश्च परवन्तस्त्वया वयम् ॥ ४३ ॥

औचित्यम्। भोः सीरध्वज! किमिदमस्माकमाकाशवचनम्?(फ)

स्तुतितामीति यावत्, गिरांसि यस्य तथाभूतस्य, वरं देवादभीष्टं, त्रिलोकीः चक्षुस्त्रिलोकीः, यस्य वीरस्य याञ्चायां प्रार्थनायां, यत दैन्यं खातत्र्यं, तेन पराङ्मुखानि, विमुखानि, पश्चादावर्त्तितानीति यावत्, मुखानि दशसङ्ख्याकानि, मिथः परस्परम्, अभितः समन्तात्, त्वं वृणु त्वं वृणु इतीत्थं, कलहायन्ते कलहं कुर्वन्ति, स दशग्रीवः दशाननः, कथं केन प्रकारेण, वर्ण्यताम् ? व्याख्यायताम् ? न केनापि प्रकारेण वर्णितुं शक्यते इत्यर्थः। "वर्ण्यताम्" इत्यत्र "कथ्यताम्" इति पाठान्तरम्। शार्दूलविक्रीडितं छन्दसम् ॥ ४१ ॥

कन्यामिति।—अयोनिजन्मानम् अगर्भसम्भवा, कन्यां सीतामित्यर्थः, वरीतुं प्रार्थयितुं, पुरोधसा पुरोहितेन, गौतमेन अहल्यापतिना, गुप्तस्य रक्षितस्य, भवतः तव, गृहान् मां प्रजिघाय प्रेषितवान्, स इति गद्यशेषान्वयः। अनुष्टुप् छन्दसम् ॥ ४२ ॥

(प) पिनाकेति।—पिनाकस्य ऐश्वरधनुषः, दर्शने या उल्लासिका औत्सुक्य, तया विसंष्ठुला चञ्चला, चित्तवृत्तिः यस्य तथाभूत इव।

किमिति।—हे भगवन्! एतदेव पुनस्तरां पुनः पुनरित्यर्थः, किं कथम्, अभिधीये? कथ्ये? भवता कथनमिति शेषः, मा पुनः पुनः कथं ब्रवीषि? इत्यर्थः, इक्ष्वाकवः इक्ष्वाकुवंशीयाः, विदेहाश्च विदेहाधिपाश्च, वयं त्वया परवन्तः पराधीनाः, त्वदधीना इत्यर्थः, त्वं यथाऽऽज्ञापयसि तथैव करोमीति भावः। अनुष्टुप् छन्दसम् ॥ ४३ ॥

(फ) आकाशवचनम् आकाशे भूयदेशे, भूयं सभीऽस्त्वित्यर्थः, वचनं कथं युक्तम् ? इति भावः।

उत दुष्परिच्छेद्य (ब) एवायमर्थः ? यदुत्तरमपि न प्रतिपद्यसे (भ)। पश्य—

दातव्येयमवश्यमेव दुहिता कस्मैचिदेनामसौ
दोर्लीलामसृणीकृतत्रिभुवनो लङ्कापतिर्याचते ।
तत् किं मूढवदीक्षसे ननु कथागोष्ठीषु नः प्राक्तना
स्त्वद्वृत्तानि परोरजांसि मुनयः प्राच्या मरीच्यादयः ॥ ४४ ॥

प्रतानन्दः । ब्रह्मन् ! चिराय दत्तमेवोत्तरमस्माभिः ।

औचल्यः । हन्त ! राजपुत्रीसमर्पणादन्यत् कीदृशं तत् ?

प्रतानन्दः । शृणु—

शाम्भवं चापमारोप्य योऽस्मानानन्दयिष्यति ।
पूर्णपात्रमियं तस्मै मैथिली कल्पयिष्यते ॥ ४५ ॥

औचल्यः । (विहस्य) । श्रान्तम् । अहह !! युष्माकमप्यमून्यक्षराणि (म)—

(ब) दुष्परिच्छेद्यः दुर्बोधः ।

(भ) प्रतिपद्यसे ददासीत्यर्थः ।

दातव्येति ।—इयम् अयोनिजा एषा, दुहिता कस्मैचित् वराय, अवश्यमेव दातव्या, न तु यदृच्छयेति भावः, दोर्लीलया भुजविलासेन, भुजबोः क्रीडाश्रमेण इत्यर्थः, असृणीकृतं अश्लथीकृतं, समीकृतमित्यर्थः, एकार्णवीकृतमिति भावः, त्रिभुवनं येन तथाभूतः, असौ लङ्कापतिः रावणः, एनां कन्यां, याचते प्रार्थयते, तत् तर्हि, मूढवत् कर्तव्यविमूढ इव, किं कारणम्, ईक्षसे ? पश्यसि ? ननु भोः । कथागोष्ठीषु विविधालापेषु, प्राक्तनाः पुरातनाः, मरीच्यादयः मुनयः परोरजांसि रजोगुणात् परानि, सात्त्विकानीति यावत्, तव वृत्तानि चरितानि, नः अस्मान्, शासति कथयन्ति, एतादृशस्य सकलीयचरितस्य तव तादृशसत्पात्रे कन्यादानं युक्तमिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ४४ ॥

शाम्भवमिति ।—यः शाम्भवं शैवं, चापं धनुः, आरोप्य मौर्व्यां संयोज्येत्यर्थः, अस्मान् आनन्दयिष्यति तोषयिष्यति, तस्मै पूर्णपात्रं व्रतादिसमापनकाले देयं घृतादिपूर्णभाजनरूपम्, इयं मैथिली कल्पयिष्यते दास्यते । अनुष्टुप् वृत्तम् ॥ ४५ ॥

(म) अक्षराणि इदमार्द्धारोपणविषयाणि, रावणं प्रतीति भावः, श्रान्तानि भवन्तु इति शेषः ।

तेनाङ्गुलीभवतनिष्टकुबेरशैल-
कण्ठाग्रदोःकुलिशकन्दलविक्रमेण।
माहेश्वरेण महता दशकन्धरेण
कर्मेदृशं कथमनार्यमधिक्रियेत ? ॥ ४६ ॥

भृतानन्दः। (विहस्य)। ब्रह्मन्!—

अयं महाक्षत्रियगोत्रजन्मा
दृढप्रतिज्ञो जनकाधिराजः।
न चापमारोपयिता दशास्य-
स्तथाऽपि जानासि यदुत्तरं नः ॥ ४७ ॥

श्रीकण्ठः। (सहासम)—

अङ्गिरास्य पुलस्त्यस्य प्रसवौ परमेष्ठिनः।
पौलस्त्ये भ्रातिधर्मोऽयं तत् किमाङ्गिरसस्य ते ? ॥ ४८ ॥

तेनेति।—अङ्गुलीना भवं तेन, विंशतिभुजत्वात् प्रत्येक भुजे पञ्चानामङ्गुलीनां सद्भावात् साकल्येन अङ्गुलीना भवत्वङ्गुलीनां तत्सङ्ख्यकत्वमिति दृष्टव्य, निष्टः निष्पिष्टः, उत्पाटनात् निपीडित इति भाव', यः कुबेरशैलः कैलासः, तेन हेतुना कण्ठेन उक्ता: सुश्लिष्टतया प्रकटिताः दृश्यथः, दोष्णा भुजाना, कुलिशकन्दलवत वज्रप्ररोहवत्, अभिनवत्रज्रवदित्यर्थः, विक्रमः शौर्यं यस्य तथाभूतेन, महता महात्मना, माहेश्वरेण शैवेन, दशकन्धरेण रावणेन, इदृशम इष्टदेवचापभङ्गरूपमिति भाव:, अनार्यम असत् कर्म, कथं केन प्रकारेण, अधिक्रियेत ? स्वीक्रियेत ? न कथमपि स्वेष्टदैवस्य अवमानना-जनकं कर्म सेवकेन कर्तुं शक्यते इति भाव:। वसन्ततिलक वृत्तम ॥ ४६ ॥

अयमिति।—महता महिम्नाखिना, क्षत्रियाणा गोत्रे कुले, जन्म यस्य तथाभूत: महाकुलीन इत्यर्थ', अयं जनकाधिराज: जनपदवासीयानामधिपति: सीरध्वज', दृढ-प्रतिज्ञ: नियमसङ्कल्प:, प्रतिज्ञाम अन्यथा कर्तुमशक्त इति यावत्, तथाऽपि दशास्य: रावण:, चाप धनु:, न आरोपयिता न आरोपायष्यति, चेदिति शेष:, तदा न अजाक, अत उत्तर पूर्वमुक्तं, तत जानासि। उपेन्द्रवज्रा वृत्तम ॥ ४७ ॥

अङ्गिरास्येति।—अङ्गिरास्य पुलस्त्यस्य एतौ द्वौ, परमेष्ठिन ब्रह्मण:, प्रसवौ पुत्रौ, तत तस्मात, आङ्गिरसस्य आङ्गिरस:प्रपौत्रस्य, ते तव, पौलस्त्ये पुलस्त्यपौत्र रावणे, अयं भ्रातृधर्म, भ्रातिलानधर्मण, विहग इति यावत्, किम् ? अनुष्टुप् वृत्तम् ॥ ४८ ॥

(सामर्षम् (य))—

माहेश्वरो दशग्रीवः क्षुद्राश्चान्ये महीभुजः।
पिनाकारोपणं शुल्कं हा सीते! किं भविष्यसि ॥ ४९ ॥

अतानन्दः। (सरोषं-व्यङ्गम्)। ब्रह्मन्! एवमनेन धनुषा किमपि विनयाधिकारिकमध्याप्यते, (र) यदद्य परममाहेश्वरस्ते रावणोऽपि (ल) संवृत्तः,—

श्रान्तोराधारमचलमुत्क्षेतुं भुजकौतुकी।
माहेश्वरो धनुः क्रष्टुमहो! ते दशकन्धरः!! ॥ ५० ॥

(श्रौष्कलवर्जमन्ये श्लाघन्ते (व))।

अतानन्दः। (सरोषावहित्थम् (श))। दाशरथे!—

(य) सामर्षं सक्रोधम्।

माहेश्वर इति।—दशग्रीवः माहेश्वरः महेश्वरभक्त इति यावत्; यद्वा—महेश्वर एव माहेश्वरः विज्ञानत्वतिरित्यर्थः, अन्ये अपरे, महीभुजः राजानः, क्षुद्राः क्षीणाः अल्पप्राणा इत्यर्थः, पिनाकस्य शैवधनुषः, आरोपणं मौर्वीयोजनं, शुल्कं पणः, इ इति खेदे सीते! किं भविष्यसि? त्वमिति शेषः, क्षुद्रा राजानः पिनाके गुणयोजनं कर्तुं कदाऽपि न शक्नुयुः, अतस्तव भाग्ये परिणयो नास्तीति हा! तव दुर्भाग्यमिति भावः। अनुष्टुप् वृत्तम् ॥ ४९ ॥

(र) विनयाधिकारिकं विनयस्य अधिकारी विनयाधिकारी विनयीत्यर्थः, तस्य भावः विनयाधिकारिकं विनयित्वमित्यर्थः, भावे कन्-प्रत्ययः, अध्याप्यते शिक्ष्यते

(ल) रावणोऽपि तथाविधदुराचारोऽपीति भावः, परममाहेश्वरः महाशैवः अस्य धनुरारोपणस्य अशक्यत्वादेव महेश्वरे विनयित्वं रावणस्येति भावः।

श्रान्तोरिति।—ते तव, दशकन्धरः रावणः, श्रान्तोः शिवस्य, आधारं निवासचेतनं अचलं पर्वतं, कैलासमित्यर्थः, उत्क्षेतुं स्थानात् उत्पाटयितुमित्यर्थः, भुजकौतुकं बाहुवीर्यप्रदर्शनार्थं कौतुकवान् अभूदिति शेषः, तदा माहेश्वर नेति भावः, अद्य धनुः क्रष्टुम् आरोपयितुं, माहेश्वरः महेश्वरभक्तः, संवृत्त इति शेषः, अहो! आश्चर्यम्। अनुष्टुप् वृत्तम् ॥ ५० ॥

(व) श्लाघन्ते मन्दं मन्दं हसन्ति।

(श) सरोषावहित्थं रोषस्य क्रोधस्य, अवहित्था आकारगोपनं तत्सहितं क्रुद्धेऽपि तत्राकारगोपनं ज्ञेयमित्यर्थः, "अवहित्याऽऽकारगुप्तिः" इत्यमरः।

तदेतदारोपय चापमौर्व-
प्रकोष्ठभङ्गप्रतिरूपितज्यम्।
मौर्व्यौषधीभाजां भजतां मुखानि
खड्गाङ्कमौर्वीकिणकालिकेव ॥ ५१ ॥

औलूकः। (सक्रोधम्)। अरे रे प्रतानन्द! किमुद्भ्रान्तः (ङ) असि, यदेवमवज्ञदग्रे पौलस्त्यं महाराजमधिक्षिपसि? (च) अथमयं ते माणिक्यपरिहाणेन गैरिकपरिग्रहः (छ), यदेवं दशग्रीवमवमन्यमानश्च मनुष्यजातिं (ज) अनुरागः। यदिवा तत्रभवन्तं (झ) गौतममपहाय दुश्चिक्षुषि सहस्राक्षे भवतो मातुरहल्यायाः (ञ)।

तदिति।—द्वौ प्रकोष्ठौ, प्रकोष्ठः कफोणेरधो मणिबन्धपर्यन्तहस्तविभागः, "आत् कफोणिस्तु कूर्परः। तस्योपरि प्रगण्डः स्यात् प्रकोष्ठस्तस्य चाग्रभः॥" इत्यमरः; तस्य भङ्गेन प्रकोष्ठे क्षिप्तेन भञ्जनेनेत्यर्थः, तद्दीश्वरश्च भञ्जभूयत्वादिति भावः, प्रतिरूपिता रक्षिता, ज्या मौर्वी यस्य तादृशं, इदं धारणसमये आकर्षणसमये च ज्यावाः प्रकोष्ठेन संघर्षादिति भावः, तत् प्रसिद्धम्, एतत् चापं धनुः, आरोपय ज्यया संयोजय, खड्ग निलय, तवेति भावः, बाहौ भुजे, यो मौर्वीकिणः पुनःपुनः ज्याऽऽकर्षेण घर्षणजनितमांसग्रन्थिरित्यर्थः, तस्य खड्गाङ्कमौर्वीकिणकालिकेव श्यामिकेव, मौर्व्यौषधीभाजां पराजयेनैव हेतुना, यः कृता गर्वः, तं भजन्ते इति तथाभूतानां, नृपतीनामिति शेषः, इयं मूरत्वान्निर्लज्जानामिति भावः, मुखानि भजतां गच्छतु, तव मौर्व्यौषधीराजां मुखानि मलिनानि भवन्तीति भावः। उपजातिवृत्तम्॥ ५१॥

(ङ) उद्भ्रान्तः मोहं गतः, उन्मत्त इति यावत्।

(च) अधिक्षिपसि निन्दसि।

(छ) माणिक्यपरिहाणेन माणिक्यं महारत्नविशेषः, तस्य परिहाणेन परित्यागेन, गैरिकपरिग्रहः गैरिकं धातुगैरिकवर्णवस्त्रविशेषः, तस्य परिग्रहः स्वीकरणम्।

(ज) अवमन्यमानश्च अवजानतः। मनुष्यजातिं मानवश्रेणीं।

(झ) यदिवा अथवा। तत्रभवन्तं पूज्यम्।

(ञ) दुश्चिक्षुषि दुष्टचक्षुषि सहस्राक्षे इन्द्रे, यद्यपि तत्र तथाभूते, "सहस्रं

अक्षमालिन्दः। (सरोषम्-हासम्)। किमाह रे! किमाह अक्षमालिन्दे? इति।

विश्वामित्रः। (सप्रश्रय-रोषमिव)। वत्स गौतम! विरम विरम शुष्कतर्कग्रहात् (घ)। अतिथिरयमस्माकमुपाध्यायो दशरथस्य। (अवगमनौ राम-लक्ष्मणौ च दृष्ट्वा विहस्य)। वत्स रामभद्र! धनुर्गृहोपसर्पणम् (ङ) अभ्यनुजानाति ते जनकान्वयपुरोधाः (च)।

रामः। यदादिशन्ति गुरवः। (इति सविनय-लज्जा-कौतुकं परिकल्प्य लक्ष्मणेन सह निष्क्रान्तः)।

औक्षणः। राजर्षे सीरध्वज! धन्योऽसि। पुरा किल महेश्वरपरिचर्यावदाने निकृत्तेषु नवमूर्द्धसु (छ)—

वरं तादृक्कर्माद्भुतसदृशमप्रेक्ष्य किमपि
प्ररोहद्वैलक्ष्यं पुरविजयिनो येन ददृशे।

दुखि." इत्यमरः, जनठीना चक्षुः पिङ्गलं भवति, इन्द्रस्यापि तथा, तथा च श्रुतिः, "यक्षीणि ते इन्द्र। पिङ्गलानि" इति। अहल्यायाः, अनुराग इति शेषः; यद्वा गौतमं परित्यज्य तव माता सहस्राक्षं प्रति अनुरक्ता, तथा तत्पुत्रस्त्वं रावणमपहाय मनुष्यपोतं प्रति अनुरज्यसीति युक्तमेवेति भावः।

(घ) शुष्कतर्कग्रहात् विकल्पविवादादिति भावः।

(ङ) धनुः इति।—धनुषः गृहं यत्र गृह्यते धनुर्विद्यते तद्गृहं, तत्र उपसर्पणं प्रवेशनमनम्।

(च) अभ्यनुजानाति अनुमन्यते। जनकान्वयपुरोधाः जनकवंशपुरोहितः शतानन्दः।

(छ) महेश्वरेति।—महेश्वरस्य परिचर्या समाराधनं, सैव अवदानं दक्षं कर्म तस्मिन्, "अवदानं कर्म दक्षम्" इत्यमरः; निकृत्तेषु छिन्नेषु। नवमूर्द्धसु नवस्कन्धेषु शिरःसु।

वरमिति।—येन तादृक्, कर्माद्भुतसदृशं कर्मणः, नवस्कन्धशिरःकर्तनकर्मेति भावः, सदृशम् अनुरूपं, वरं किमपि विचित्रमपि, अप्रेक्ष्य अदृष्ट्वा, जितस्वेच्छाभ्रष्टैः, पुरविजयिनः त्रिपुरविध्वंसिनः हरस्य, प्ररोहत् जायमानं, वैलक्ष्यं लज्जाविषादः

तदुन्माष्टुं त्रिभुवनमपि प्रार्थितमिदं
तदेव त्वय्यर्थीभवति दशमं रावणसुखम् ॥ ५२ ॥

प्रतानन्दः। (उत्थाय नेपथ्यावलोकितकेन सहर्षाद्भुतम्)।

पश्यन्तु भवन्तः,—

यस्मिन्नेकधनुष्मतो भगवतः खट्वाङ्गपाणेरसा-
वाकृष्टो गुणतां गतोऽप्यहिपतिः कर्णावतंसायते।
उन्मुक्तः पुनरेव भूषणपदं याति प्रकोष्ठान्तरे
(जनक औत्सुक्यं नाटयति)।

प्रतानन्दः।

काकुत्स्थेन तदेव भार्गवगुरोः क्रोदण्डमाक्रुष्यते ॥ ५३ ॥

(नेपथ्ये)।

बन्धनष्ट विधेः श्रुतीर्मुखरयन्नष्टौ दिशः क्रोडयन्
मूर्त्तीरष्ट महेश्वरस्य दलयन्नष्टौ कुलक्ष्माभृतः।
तान्यक्षाः वधिराणि पन्नगकुलान्यष्टौ च सम्पादय
न्मौर्व्वीलत्यमार्य्यदोर्बलदलत्क्रोदण्डकोलाहलः ॥ ५४ ॥

कुण्ठितभावं, दृढयं दृष्ट, ततश्च तत् वेलक्ष्यम, उन्माष्टुं दूरीकर्तुमिति यावत्, इदं त्रिभुवनं त्रिलोकाधिपत्यमिति भावः, प्रार्थितं याचितं, तदेव दशमं रावणसुखं त्वयि अपि त्वत्सनोपेऽपि, अर्थीभवति याचकं भवति, किमतः परं ते भाग्यम्? इति भावः। शिखरिणी छन्दः ॥ ५२ ॥

यस्मिन्निति।—एकधनुष्मतः एकधनुर्धरस्य, भगवतः षडैश्वर्यसम्पन्नस्य, खट्वाङ्गपाणेः धरस्य, यस्मिन् धनुषि, गुणतां ज्यात्वं, गतः प्राप्तः, असौ परिदृश्यमानः, अहिपतिः शेषनागः, वासुकिर्वा, आकृष्टः सन् कर्णावतंसायते कर्णालङ्कार इव आचरति, या-कर्णकर्षणादिति भावः, उन्मुक्तः त्यक्तः सन्, आकर्षणादिति शेषः, पुनरेव भूयोऽपि, प्रकोष्ठान्तरे मणिबन्धोपरिभागमध्ये, भूषणपदं अलङ्कारस्थानं, अलङ्कारवत् स्थितिमिति यावत्, याति प्राप्नोति, काकुत्स्थेन रामेण, भार्गवगुरोः जामदग्न्याचार्यस्य धरस्य, तदेव क्रोदण्डं धनुः, आक्रुष्यते। आकृष्टविक्रोशितं छन्दः ॥ ५३ ॥

बन्धनिति।—आर्यस्य रामस्य, दोर्बलेन बाहुवीर्येण, दलतः भज्यमानस्य, क्रोदण्डस्य धनुषः, यः यूयमाद्य इत्यर्थः, कोलाहलः खलरवः, मौर्वीशब्द इति

जनकः । (सहर्ष-विषादाद्भुतम् (ज))। कथं भग्नमपि !! (झ)।

ब्रह्मानन्दः ।—

वैदेहीकरबन्धमङ्गलयजुःसूत्रं द्विजानां मुखे
नारीणां च कपोलकन्दलतले श्रेयानुलूलुध्वनिः ।
पेष्टुञ्च द्विषतामुपप्लुतिशतं मध्येनभो जृम्भते
रामस्तुष्टमहोत्सवाच्छलधनुर्दण्डोल्लिजम्भा रवः ॥ ५५ ॥

औष्कलः । (सविषादाद्भुतमात्मगतम्)। अहो !! दुरात्मनः क्षत्रिय-स्फुलिङ्गस्य सर्वकर्मणिसूचायितम् (ञ)।

शासत, विधेः ब्रह्मणः, अद्य अष्टलक्षाब्दाः, श्रुतेः सर्वेन्द्रियाणि, चतुर्मुखादिति भावः, दध्वन् धारयन्, अष्टौ दिशः प्राच्यादीरित्यर्थः, मुखरयन् ध्वनयन्, महेश्वरस्य अष्ट मूर्त्तीः रुपाणि, वाय्वादीरिति यावत्, "वायुरग्निर्धरा वायुराकाशं चन्द्रमा अपि । यजमानो रविश्चेति मूर्तयोऽष्टौ मता हरेः ॥" इति पुराणम् ; क्रीडयन् कुर्वन्, आपुवन् इति यावत्, अष्टौ कुलशैलान् महेन्द्रादीन् कुलपर्वतान्, दलयन् विदारयन्, तानि प्रसिद्धानि, अष्टौ पन्नगकुलानि सर्पवंशमूलान्, सप्तसाधारणानां च दलयं:, अच्छा चतुरा, वधिरादि श्रवणप्रतिरोधितानि, तेषां चक्षुःश्रवणादिति भावः, उल्लासयन् कुर्वन्, उल्लोलति प्रसरति । मार्दूलविक्रीडितं छन्दः ॥ ५४ ॥

(ज) सहर्षेति ।—हर्षः प्रतिज्ञायाः साफल्यात्, विषादः चिरलक्षितस्य साहसस्य प्रथमतया विपाकदर्शनात्, अद्भुतम् आश्चर्यं, लोकोत्तरकार्यदर्शनादिति भावः, त्रैः कथितम् ।

(झ) भग्नमपीति न केवलमारोपणं कृतविघ्नविघ्नार्थः ।

वैदेहीति ।—द्विजानां ब्राह्मणानां, मुखे, उच्चरितमिति शेषः, वैदेह्याः सीतायाः, करबन्धाय विवाहाय, यद्वा—दक्षे कौतुकसूत्रबन्धनाय, यत् मङ्गलं माङ्गल्यानुकूलं, अत्यर्थं बलुः सूत्रं यजुर्वेदीयो मन्त्रविशेषः, नारीणां स्त्रीणां, कपोलकन्दलतले गण्डस्थलमूल-प्रदेशे, श्रेयान् माङ्गल्यः, उलूलुध्वनिः उलु उलु इति मन्त्रविशेषः, यानेव चूर्णं स्खलितं, यत् गद्गदोच्चाक्षरत्वं प्रथमभणनं, तुरगखेलार्थः, उलुः लट्टेव इत्यौत्पत्तिकं, लक्षणम् अस्य इत्युलुः यज्ञ एवाभूत्, दक्षस्य यज्ञिय, द्विषतां सटूनाम्, उपप्लुतिशतं श्रोत्रेन्द्रियप्रतिरोधशतं, निश्चिद्रप्रसूता सर्वेन्द्रियप्रसृतिनिरोधः, पेष्टुं दलितुं, मध्येनभः आकाशमध्ये, जृम्भते प्रसरति । मार्दूलविक्रीडितं छन्दः ॥ ५५ ॥

(ञ) क्षत्रियस्फुलिङ्गस्य क्षत्रियकुलाग्निकणस्य, अग्निकणवत् तेजःपूर्णस्य

जनकः। (सहर्षं पादयोर्निपत्य)। भगवन् कुशिकनन्दन!—

इयमात्मगुणेनैव क्रीता रामेण मैथिली।
स्वगृहव्यवहारस्तु लक्ष्मणायोर्मिजाऽस्तु नः॥ ५६॥

विश्वामित्रः। (सस्मितम्)। सखे सीरध्वज! यदभिरुचितं भवते।

शतानन्दः। (जनकवाक्यं एवमेवं कथयित्वा)। भगवन् विश्वामित्र! ममापि चन्द्रशेखरशरासनारोपणप्रथमप्रियवादिनः पारितोषिकं धारयसि (ट)।

विश्वामित्रः। (विहस्य)। वत्स! दीयते। किमभिप्रेषि? (ठ)

शतानन्दः। कुशध्वजदुहितृभ्यां माण्डवी-श्रुतकीर्त्तिभ्यां भरत-शत्रुघ्नावभ्यर्थये।

विश्वामित्रः। एवमस्तु। (शतानन्दं हस्ते गृहीत्वा सस्मितम्)। वत्स! सर्वमस्माभिर्विधातव्यम्। आगमयस्व (ड) तावदयोध्यम्।

अभिप्रायसिद्धिरित्यर्थः। सर्वकर्मसु सर्वेषु कर्मसु कुशलं, सर्वकर्मकुशलमर्थमिति यावत्। कथाविदं तेजस्वलक्षणम्।

इयमिति।—इयं मैथिली सीता, रामेण आत्मगुणेनैव निजसामर्थ्येनैव, क्रीता आयत्तीकृतेति यावत्, न तु मया दत्तेति भावः; स्वगृहस्य निजगृहस्य, गार्हस्थ्यस्येति भावः, व्यवहारः कन्यादानरूप इति भावः, तु किन्तु, अयं भवत्विति शेषः, यद्वा नः अस्माकम्, ऊर्मिला लक्ष्मणाय लक्ष्मणार्थम्, अस्तु भवतु, लक्ष्मणाय दीयते इति भावः। अनुष्टुप् छन्दः॥ ५६॥

(ट) चन्द्रशेखरेति।—चन्द्रशेखरस्य शिवस्य, शरासनं धनुः, तस्य आरोपणं रामेण मौर्व्यां सयोजनं, तदेव प्रथमं प्रियं वदतीति तथोक्तस्य, शतानन्दस्य हरशरासनारोपणरूपप्रियसंवादप्रदस्य इत्यर्थः। पारितोषिकं पुरस्कारार्थं धनमिति यावत्। धारयसि दातुमर्हसीति भावः।

(ठ) अभिप्रेषि इच्छसि।

(ड) आगमयस्व आगच्छ।

जनकः। तर्हि प्रहीयतामेष एव भगवानाङ्गिरसः प्रियसुहृदमुत्तरकोशलेश्वरमानेतुम्।

विश्वामित्रः। एवमस्तु।

शतानन्दः। (उत्थाय)। भगवन्! किमन्यदधिकमस्ति वाचिकम्? (ढ)।

विश्वामित्रः। वत्स! निसृष्टार्थः (ण)असि। गम्यताम्।

(इति शतानन्दो निष्क्रान्तः)।

विश्वामित्रः। (हर्षं नाट्यान्तमगतम)—

दोर्लीलादलितेन्दुगेश्वरधनुर्विख्यातविक्रान्तिना
काकुत्स्थेन कृतो विदेहनृपतेः पूर्णप्रतिज्ञाभरः।
पश्यामश्च सुहृद्गृहान्नवनवोन्मीलद्विवाहोत्सवा-
नेच्ष्वाकेषु च मैथिलेषु च फलन्त्यस्माकमद्याशिषः॥५७॥

औष्कल। (वैलक्ष्य रोषाभ्यां त्रयमाणः (त))। भोः सौरध्वज!

(ढ) वाचिक सन्देशवाक्, "सन्देशवाक् वाचिक स्यात्" इत्यमरः।

(ण) निसृष्टार्थः स्वयमुद्वाहोऽसमर्थः दूतविशेषः, तथा चोक्त दर्पणे—"उभयोर्भाषमुक्तोऽत्र स्वयं वदति चोत्तरम्। सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः॥" इति।

दोर्लीलेति।—दोर्लीलया भुजविलासेन, यथा—दोर्भ्यां बाहुभ्यां, लीलया क्रीडाच्छलेन, अवहेलयेत्यर्थः, दलितं भग्नं, यत् इन्दुगेश्वरस्य हरस्य, धनुः तेन विख्याता विशेषेण प्रकटिता, विक्रान्तिः पराक्रमः यस्य तथाभूतेन, काकुत्स्थेन रामेण, विदेहनृपतिर्जनकः, पूर्णः सफल इत्यर्थः, प्रतिज्ञाभरः यस्य तादृशः सफलप्रतिज्ञाभार इत्यर्थः, कृतः विहितः, च किञ्च, अद्य इदानीं, सुहृदां मित्राणाम्, ऐक्ष्वाकाणां मैथिलानामपीति भावः, गृहान् नवं नवं प्रत्यहं नूतनं यथा तथा, उन्मीलन् प्रस्फुरन्, विवाहोत्सवः येषु तथाभूतान्, पश्यामः, ऐक्ष्वाकेषु इक्ष्वाकुवंशीयेषु च, मैथिलेषु निमिजनकवंशीयेषु च, अस्माकम् आशिषः आशीर्वादाः, फलन्ति सफला भवन्ति। शार्दूलविक्रीडितं वृत्तम्॥५७॥

(त) वैलक्ष्य-रोषाभ्यां वैलक्ष्य रावणसपक्षाय रामे सीताप्रदानक्लीबत्वेन प्रभोरवमानजात् लज्जितभावः, रोषः तीव्रबन्धनः क्रोधश्च ताभ्याम्। त्रयमाणः भ्रष्टं वदन्।

पुरुषप्रकर्षाधाने हि विद्याव्रतसंयोगाद्बहिरङ्गानि वयांसि ; (थ) यदनया प्रहीणलज्जकन्यया योनिसम्बन्धोपस्थितं (द) पुलस्त्यकुलमुपेक्षमाणो वर्षीयानपि कौमलप्रज्ञः (ध) असि। (मुनिं प्रति)। कौशिक! नाद्यापि किञ्चिदतिक्रामति (न)। तवापि लङ्कापतौ ताडकावधापराधमपमार्ष्टुमयमेवावसरः (प)। (कौशिकलज्जावशात् नाटयति)।

जनकः। भगवन्! एहि ; स्वयमुपेत्य रामभद्रवदनचन्द्र-चन्द्रिकाप्रवाहेण निर्वापयामि (फ) तावदलोकधनुर्धरसहस्र-प्रार्थ्यमानमैथिलीकदर्थितम् (ब) आत्मानम्। न हि मिहिर-

(थ) पुरुषेति।—पुरुषस्य प्रकर्षः उत्कर्षः, श्रेष्ठता इत्यर्थः, तस्य आधाने सम्पादने, प्रतिपादने इत्यर्थः। हि-शब्दोऽवधारणार्थः। विद्याव्रतेति।—विद्यया ज्ञानेन, व्रतं प्रवीणः, तत्संयोगात् तत्सम्बन्धात्, अर्थे षष्ठ्यौ ; विद्याव्रतसम्बन्ध-मपेक्ष्येत्यर्थः, वयांसि वयोवाचकानीत्यादि, बाह्यकानीति यावत्, बहिरङ्गानि बाह्यानि, पृथग्भूतानीत्यर्थः, दुर्बलानीति भावः, वयोवृद्धत्वेऽपि तव विद्याव्रतत्वाभावात् पुरुष-प्रकर्षज्ञानं नास्तीति भावः।

(द) प्रहीणलज्जकन्यया प्रहीणं हतपतृकेति तव, यद्वा—प्रहीणेन हीनोपायेन, बाहुबलकर्षणरूपनिन्द्योपायेनेत्यर्थः, लज्जया कन्यया अयोनिजयेति यावत्, यद्वा—प्रहीणा भूमौ लज्जत्वेन माता-पितृविहीना, लज्जा कन्या तया, पितृपरिचयविहीनत्वात् निन्द्नीयया इति भावः। योनिसम्बन्धेन विवाहार्थितया, उपस्थितं स्वयमागतमित्यर्थः।

(ध) उपेक्षमाणः अनादियमाणः। वर्षीयानपि अतिवृद्धोऽपि। कौमलप्रज्ञः [बुद्धिः, अल्पज्ञ इति यावत्, निर्बोध इति भावः।

(न) न अतिक्रामति न अतिवर्तते, समयो न अतिक्रान्त इत्यर्थः, इदानीमपि परिचयो न सम्पन्न इति भावः।

(प) अपमार्ष्टुं क्षालयितुम्। अवसरः समयः, अस्तीति शेषः, रामाय सीता-मदत्त्वा रावणाय एनां दातुं यत्नः क्रियतां, तथा सति रावणस्य ताडकावधापराधं क्षमिष्यते इति भावः।

(फ) रामभद्रेति।—रामभद्रस्य वदनमेव चन्द्रः तस्य चन्द्रिकाप्रवाहेण ज्योत्स्ना-धारया। निर्वापयामि शीतलयामि।

(ब) अलोकेति।—अलोकधनुर्धराणां हरधनुषाम्, अहं धनुर्विशारद इति

मरीचिनिचयपचेलिमश्च (भ) तुहिनकरबिम्बसंवादादपरो-
ऽपि खण्डितगदङ्कारः कैरवाकरश्च (म)।

(इत्युत्थाय परिक्रामतः)।

सीता:। (सवीडमाकाशे)। हा तपस्विनि (य) सीते!
क्वासि। शीलस्यप्रार्थिताऽपि विचार्यसे—

त्रिभुवनविजयश्रियः सपत्नीं
जनयतु को भवतीमनात्मतन्त्राम्?।
अजनमपि न ते निरूपयामः
क्षममपि विपाट्य भुवं विनिर्गताऽसि॥ ५८॥

(सरोषं जनकं प्रति)। सौरध्वज!—

पौराणीभिरनेकविक्रमकथागाथाभिरर्थापिता-
स्ते वीरस्य जयन्ति राक्षसपतेर्दोःस्तम्भदम्भोलयः।

ऽथाऽस्मिन्नवतानित्यर्थः, खदर्शेच आर्ष्यनानया याच्यमानया, मैथिल्या सीतया हेतुभूतया, खदार्थत विरक्तीकृतम्।

(भ) तिहिरेति।—तिहिरस्य सूर्यस्य, मरीचीनां मयूखानां, निचयः समूहः, तेन पचेलिमश्च पच्यमानश्च, सन्तप्यमानश्चेत्यर्थः।

(म) तुहिनेति।—तुहिनकरचन्द्रः, तस्य बिम्बं मण्डलं, किरणानिति भावः, तस्य संवादात् सम्बन्धात्, संस्पर्शादिति यावत्। अगदङ्कारः चिकित्सकः, "रोगहार्यगदङ्कारो भिषग्वैद्यौ चिकित्सके" इत्यमरः। कैरवाकरश्च कुमुदसङ्घातश्च।

(य) तपस्विनि! वराकि! अनुकम्पनीये! इति यावत्।

त्रिभुवनेति।—कः जनः, अनात्मतन्त्रां परायत्तां, भवतीं त्रिभुवनविजयश्रियः त्रिलोकीविजयलक्ष्म्याः, सपत्नीं जनयतु? करोतु? ते तव, क्षममपि क्षन्तव्यमपि अनुचितमपि, न निरूपयामः न पश्यामः, यतः हितं चिन्तयेदिति भावः, यतः भुवं विपाट्य विदार्य, विनिर्गता असि प्रादुर्भूताऽसीत्यर्थः, अतस्ते माता पितादीनामभावात् स्वजनसम्बन्धो नास्ति, येन यानापानविवेकः क्रियते इति भावः। पुष्पिताग्रा वृत्तम्॥ ५८॥

पौराणीभिरिति।—पौराणीभिः पुरातनीभिः, अनेकाभिः विक्रमकथानां गाथाभिः पुरावृत्तश्लोकपरम्पराभिः, अर्थापिताः ज्ञापिताः प्रकाशिता इति यावत्, ते

यानुत्प्रेक्ष्य विशोषयन्मदमयं मैरेयमैरावणी
भूषाखञ्जिरभूदमात्यमधुपस्त्रैणेषु साधारणः॥ ५८॥

तेषु च सत्सु—

इत्था सज्जनसम्बन्ध-सत्कारेणासि वञ्चितः।
पौलस्त्यहस्तवर्त्तिन्या सीतया तु भविष्यते॥ ६०॥

(सार्द्धं (ख) च नेपथ्याभिमुखमवलोक्य)।

समन्तादुत्तालैः सुरसहचरीचामरमरु-
त्तरङ्गैरुन्मीलद्भुजपरिघसौरभ्यशुचिना।
स्वयं पौलस्त्येन त्रिभुवनभुजा चेतसि कृता-
मरे राम! त्वं मा जनकपतिपुत्रीमुपयथाः॥ ६१॥

प्रविष्टाः, वीरश्च शूरश्च, राघवपतेः रावणस्य, दोःसम्भोगजाः सम्यक्सहस्रसहजबाहु-स्थाभि, जवलिताः सर्वोत्कर्षेण वर्त्तन्ते, ऐरावणः इन्द्रस्य ऐरावतः, यान् दोःसम्भोगान्, उत्प्रेक्ष्य दृष्ट्वा, मदमयं गर्वमयं, मैरेयं मदवारि, विशोषयन् मृषाखञ्जिः असद्भारभूतपुष्पमालाभिः, अमात्यजनपदस्त्रैणेषु सुरसहचरसमरसमृद्धिषु साधारणः सामान्यः, सहजीवत्वात् अवरमजहत्स्व इति यावत्, अभूत्, इत्थमपि सीतां रावणो बाहुबलेन हरिष्यतीति भावः। शार्दूलविक्रीडितं छन्दः॥ ५९॥

इत्थेति।—इत्था निरपवादेनेति यावत्, सज्जनैः साधुजनैः, सम्बन्धः संयोगः, तेन सत्कारः पूजा, जनकः सत्यप्रतिज्ञ इत्येवंरूपा प्रशंसा इति भावः तेन, यद्वा—सज्जनेन भुवनश्लाघनीयेन रावणेन, यः सम्बन्धः सम्पर्कः, तेनः यः सत्कारः समादरः, त्रिभुवनैकवीरराक्षसपुरो जनक इति सम्भावना इति भावः तेन, इत्था वञ्चितः प्रतारितः, असि, तु किन्तु, सीतया, अस्मत्को दत्तयाऽपीति भावः, पौलस्त्यस्य रावणस्य, हस्तवर्त्तिन्या हस्तगतया, भविष्यते, रावण एनां हरिष्यतीति भावः। अनुष्टुप् छन्दः॥ ६०॥

(ख) सार्द्धं परिक्रम्य।

समन्तादिति।—भरे राम! उत्तालैः महद्भिः, चलितप्रहरिभिः, सुरसहचरीणां देवाङ्गनानां, रावणकृतानामिति भावः, चामरलक्षणा वाजव्यजनपवनानां, तरङ्गैः प्रवाहैरिति यावत्, समन्तात् सर्वतः, उन्मीलत् प्रसरत्, यत् भुजपरिघाणां बाहुपरार्गलानां, सौरभ्यं सौगन्ध्यं, तेन शुचिः सौरभवासितैः तेन, त्रिभुवनभुजा

(सविनयमात्मगतम्)। अहो! गम्भीरम् (क) इदमुपस्थितं वस्तु; तन्मिथिलेशं माल्यवन्तमेव पुरस्कृत्य लङ्केश्वरस्य निवेदयामि।

(इति निष्क्रान्ताः सर्वे)।

इति विनायकभट्टो नाम द्वितीयोऽङ्कः।

चतुर्थोऽङ्कः।

(ततः प्रविशति माल्यवान्)।

माल्यवान्। (भृत्यमाश्रित्य परिक्रम्य)। अये! विभातेव विभावरी। तथा हि—

स्तोकोद्विद्दनिदाघदीधितिमहस्तन्द्रालुचन्द्रातपा-
स्तायन्ते ककुभो रथाङ्गगृहिणीगार्हस्थ्यगर्हाभिदः।
अद्यापि स्वकुलायशायिशिरसि स्थित्वा रुवन्तो मुहु-
स्तूष्णीं प्रत्यभिजानते बलिभुजो भीताः स्वयूथ्यस्वरान्॥ १॥

त्रिलोकीश्वरेण, पौलस्त्येन रावणेन, स्वयम् आत्मना, चेतसि मनसि, कृतां भाव्यांशेन सङ्कल्पितामित्यर्थः, जनकपतिपुरीं मैथिलीं, त्वं मा उपयच्छ; न परिणय, तथा कृते सति विपत्तिरनिवार्येति भावः। "उपयमो विवाहे" इत्यात्मनेपदम्। त्रिलोकीशो इत्यत्र॥ ६१॥

(क) गम्भीरम् अतिमहदित्यर्थः।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्येण कृता
अनर्घराघवतृतीयाङ्कव्याख्या समाप्ता॥ ३॥

स्तोकेति।—स्तोकेन अल्पम्, उद्विद्रं प्रवृद्धं, प्रस्फुटमित्यर्थः, यत् निदाघदीधितिमहः निदाघदीधितेः उष्णरश्मेः, सूर्यस्येत्यर्थः, महः तेजः, तेन तन्द्रालवः निद्रालसाः, निद्रुमा इति यावत्, चन्द्रातपाश्चन्द्ररश्मयः यासु तथोक्ताः, "आतपो रश्मिमात्रे च सूर्यरश्मौ च दृश्यते" इति धरणिः; रथाङ्गगृहिणीनां चक्रवाकीणां, गार्हस्थ्ये संसारे, या गर्हा निन्दा, रात्रिविरहजनितेति भावः, तस्या भिदः अप-

अपि च—

प्राचीं वासकसज्जिकामुपगते भानौ दिशां वल्लभे
पश्येता रुचयः पतङ्गहृषदामाग्नेयनाड़िन्धमाः।
लोकस्य क्षणदानिरङ्कुशरसौ सम्भोग-निद्रागमौ
कोकस्तोम-कुमुदतीविपिनयोर्निक्षेपमातन्वते ॥ २ ॥

(सर्वतो निरूप्य)। हन्त! समन्तादामोदमानपौरसम्भोगमयी (क) खल्वियं दशग्रीवभुजागेलापरिपालिता (ख) राजधानी—

लोकिता:, सूर्योदये पुनः सङ्गमादिति भावः, ककुभः दिश., "दिशस्तु ककुभः काष्ठाः" इत्यमरः; तायन्ते विस्तृता भवन्ति, क्रमशः प्रकाशन्ते इति यावत्, अद्यापि इदानीमपि, बलिभुजः काकाः, "काके तु करटारिष्ट....। बलिभुग्वायसा अपि" इत्यमरः; स्वकुलायः निजनीडम्, आत्मनो वासस्थानमित्यर्थः, "कुलायो नीडमस्त्रियाम्" इत्यमरः; व आस्थो दधः, तच्च शिरसि अग्रशाखायां, स्थित्वा मुहुः पुनः पुनः, कलन्तः शब्दं कुर्वन्तः, पुनश्च मौनाः सन्तः तूष्णीं मौनं, श्लिष्यन्तीति शेषः, मूकीभूयत्यर्थः, स्वभूयस्वरान् स्वकर्णेश्वरवान्, प्रत्यभिजानते पूर्वानुभूतान् स्मरन्ति, श्रोतुं सावहिताः प्रतीक्षन्ते इति भावः। प्रदोषविकीडितं इत्तम् ॥ १ ॥

प्राचीमिति।—दिशां वल्लभे प्रिये, भर्तरि इति यावत्, भानौ सूर्ये, वासकसज्जिकां "कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि। सा तु वासकसज्जा स्यात् विदितप्रियसङ्गमा॥" इत्युक्तलक्षणां, प्राचीं पूर्वां दिशम, उपगते प्राप्ते सति, "वासकसज्जिकाम्" इत्यत्र "वासवदीचितम्" इति पाठे—वासवेन इन्द्रेण, दीक्षितां खीकृतां, पालितामिति यावत्, "दीक्षा खीकार आदेशे" इति विश्वः; पतङ्गहृषदां सूर्यकान्तीपलानाम्, आग्नेयनाड़ीध्मभाः आग्नेयनाड़ीं सूर्यांशुप्रतिफलनोपायभूतमार्गावयवमित्यर्थः, धमन्ति अग्निमयूखा कुर्वन्तीति तथोक्ताः, एताः निःसरन्त्यः, रुचयः मयूखाः, लोकस्य जगतः, जगदाश्रिनो जनस्य इत्यर्थः, क्षणदायाः रजन्याः, निरङ्कुशः निरर्गल., रसः स्वादः यथोः तथाभूतौ, सम्भोग-निद्रागमौ रमण-स्वापौ, लोकाना चक्रवाकाद्यां, लोकः समूहः, कुमुदतीविपिनं कैरववनं तयोः, निक्षेपं न्यास, लोकस्तोमं सम्भोग मिथुनभावं, कुमुदतीविपिने निद्रागमं सङ्कोचमिति यावत्, आतन्वते विस्तारयन्ति, पश्य वाक्यार्थः कर्मेति शेषः। मार्दूलविक्रीडितं इत्तम् ॥ २ ॥

(क) आमोदेति।—आमोदमानानां हृष्यतामित्यर्थः, पौराणां पुरवासिनां, सम्भोगमयी सुखभोगात्मिका।

इतः पौरस्त्यायां ककुभि विडुपोति क्रमदल-
त्तमिस्रास्तम्भाभं किरणवलिभासम्भरमणिः ।
इतो निष्क्रामन्ती नवरतिगुरोः प्रोञ्छति वधूः
स्वकस्तूरीपत्राङ्कुरमकरिकामुद्रितमुरः ॥ २ ॥

अपि च—

अयं मृदुस्निग्धालिनीवनविलासव्यैहासिक-
स्त्विषां वितपते पतिः सपदि दृश्यमाना निशाः ।
स्तनौ पुलकयन्ति चोत्पलदृशां प्रियोरःस्थले
विपर्य्ययितवृत्तयो घुसृणपङ्कपत्राङ्कुराः ॥ ४ ॥

(ख) दशग्रीवेति ।—दशग्रीवस्य रावणस्य, भुजा एव अर्गलाः परिघाः, तासां: परिघाञ्चिता सुरक्षिता ।

इत इति ।—इतः अस्यां, पौरस्त्यायां प्राच्यां, ककुभि दिशि, अम्बरमणिः सूर्यः, क्रमेण क्रमैः क्रमैरित्यर्थः, दलत् विदीर्यमाणं, तमिस्रास्तम्भाभं तमस्या रजन्याः, "तमिस्रा तामसी रात्रिः" इत्यमरः; मर्म जीवस्थानम, अलिनखचयमिति भावः यथा तथाभूता, किरणवलिभां मयूखाङ्कुरम, अभिनवमिः सुतकिरणमित्यर्थः, विडुपोति प्रकटयति; इतः अस्मिन् प्रदेशे, अस्मात् प्रदेशात् वा, निष्क्रामन्ती निर्गच्छन्ती, अनवरतं इतीति भावः, वधूः नवोढा भार्या, नवरतिगुरोः नवस्य नवीनस्य, रतिगुरोः सुरताचार्यस्य, मन्मथस्येत्यर्थः, स्वकस्तूरीपत्राङ्कुरमकरिकया निजनवमदरचितपत्राङ्कुररूप-मकराक्रान्या, स्तनदेशे विरचितमकराक्रान्ततिलकविशेषेण इत्यर्थः, मुद्रितं चिह्नितं, अङ्कितमिति यावत्, उरः वक्षःस्थलं, प्रोञ्छति मार्जयति, तद्विरहित करोतीत्यर्थः, तस्य गुर्वादिस्तनोपे वक्षोमचिह्नप्रदर्शनेन लज्जा मा भूदिति हेतोरिति भावः; यदा—नवरतिगुरोरिति पञ्चम्यन्तं पदं, ततश्च नवरतिगुरोः आरात्, तत्सकाशादिति यावत्, निष्क्रामन्ती तादृशम उरः, स्वकस्तूरीमिति शेषः, प्रोञ्छति, उरसि तद्विरुद्ध आरक्तत-त्वेन स्वनखक्षतादीनां तल्लक्षणं मा भूदित्याशयेनेति भावः। शिखरिणी वृत्तम् ॥ ३ ॥

अयमिति ।—मृदु कोमल, स्निग्ध स्वच्छालिनीवनं पद्मिनीवनं, तस्य विलासः विलासः, तस्य वैहासिकः कैलिकरः, विदूषक इति यावत्, "वैहासिकः कैलिकरः प्रहासो च विदूषकः" इति अमरः; अयं लिखां पतिः सूर्यः, वितपते प्रकाशनप्रीतीति यावत्, सपदि दृश्यतीति यावत्, उत्पलदृशां कमलाक्षीणां,प्रियोरःस्थले प्रियवक्षसि,दृश्यमानाः

इतश्च—

प्रियवसतेरपयान्त्यो मिथः करम्बितकराम्बुजन्मानः ।
करजव्रणविरलस्तनपुलकममूः किमपि विवदन्ते ॥ ५ ॥

(अन्यतश्च दृष्ट्वा)। इतो रम्यतरं वर्त्तते—

प्रभाते पृच्छन्तीरनुरहसवृत्तं सहचरी-
र्नवोढा न व्रीडामुकुलितमुखीयं सुखयति ।
लिखन्तीनां पत्राङ्कुरमनिशमभ्यास्तु कुचयो-
स्समत्कारो गूढं करजपदमासां कथयति ॥ ६ ॥

विपर्ययिता विपर्ययं प्राप्ता, वृत्तिः स्थितिर्यासां ताद्दृशाः, पुरुषाधिते हि स्त्रीणामधोमुखतया प्रियतमवक्षसि वाम-दक्षिणस्तनयोर्वैपरीत्येन पत्रावल्लीनां सङ्क्रमणादिति, नायिकावक्षोदेशात् नायकवक्षसि मृदाचरत (मोहर) प्रतिलोमभावेन सङ्क्रमिता इति वा भावः, निजाः स्वकीयाः, घुसृणपङ्कपत्राङ्कुराः कृष्टकुङ्कुमविरचितपत्रावल्यः, स्तनौ पुलकयन्ति रोमाञ्चितौ कुर्वन्ति, सम्भोगस्मरणादिति भावः । पृथ्वीवृत्तं—"ज-सौ ज-स य-ला वसुयतिर्यत्र पृथ्वी गुरुः" इति तल्लक्षणात् ॥ ४ ॥

प्रियवसतेरिति ।—प्रियवसते कान्तवेश्मनः, भर्तुः सारस्य वा गृहादित्यर्थः, "वसतौ रात्रिवेश्मनी." इत्यमरः, अपयान्त्यः निर्गच्छन्त्यः, अमू नार्यः, करम्बितानि मिलितानि, करा इत्था एव, अम्बुजन्मानि पद्मानि यासां तथाभूताः, परस्परं गृहीतपाणिकमलाः सत्यः इत्यर्थः, करजव्रणेन नखक्षतेन हेतुना, "करजं स्यात् व्याघ्रनखे करञ्ज नखरो. पुमान्" इति मेदिनी, विरलम् अल्पान्तरम्, अल्पतया दृश्यमानमित्यर्थः, स्तनयोः पुलकं रोमाञ्चः यत्र तत् यथा तथा, मिथः परस्पर, विवदन्ते कलहायन्ते, किंचित् वदति तव स्तनयोरेतावत् नखक्षतं यत् सम्भोगस्मरणं पुलकमपि अल्पं दृश्यते, अन्या वदति नैव सुभ, तवैवेताद्दृक् दृश्यते इत्येवं कलहं कुर्वन्तीत्यर्थः । सामान्यनायिकावर्णनमिदम् । आर्यां वृत्तं—"यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि । अष्टादश द्वितीये पञ्चदश चतुर्थके साऽऽर्या ॥" इति तल्लक्षणात् ॥ ५ ॥

प्रभाते इति ।—व्रीड्या लज्जया, मुकुलितं मुद्रितम्, अविकसितमित्यर्थः, मुखं यस्याः ताद्दृशी, इयं नवोढा नवपरिणीता, वधूरिति शेषः, प्रभाते प्रातःकाले, अनुरहसवृत्तं रहोवृत्तं रात्रिसम्भोगगोपनीयविषयम्, अनु सख्योक्तमित्यर्थः,

(मुहूर्तमनुध्याय)। अहो! यतः प्रभृति वैदेहीवरणाय प्रहितेन पुरोधसा कथ्यमानं ककुत्स्थकुलकुमारस्य मानुष्यकातिशयम् (ग) अशृणवं, ततः प्रभृति कष्टां दशामनुभवामि। तथा हि—

तत्तादृशं कथमुदेति मनुष्यलोके
तेजोऽद्भुतम्? निरभिसन्धि न तावदेतत्।
तान्येव चास्य चरितानि दशाननस्य
धिक्! चिन्तया रजनिरात्रिषु नः प्रभाति॥ ७॥

अपि च—

श्रुत्वा दुःश्रवमद्भुतञ्च मिथिलावृत्तान्तमन्तःपत-
च्चिन्ताऽपङ्क्तवसावाहृत्यवदनत्वग्विप्रकीर्णस्मितः।

सुरतादिव्यापारं विषयीकृत्येति यावत्, पृच्छन्तीः जिज्ञासमानाः, सहचरीः वयस्याः, न सुखयति न प्रीणयति, रहस्याख्यानविरहिणीति भावः, तु किन्तु, अम्बाः, बध्वाः, कृपणीः स्तनयोः, चमत्कारं वैचित्र्यम्, अनिशं सततं, पुनः पुनरिति यावत्, पत्राङ्कुरं चूतपल्लवलेखां, लिखन्तीना रचयन्तीना, कुर्वतीनामित्यर्थः, आसां सहचरीणां, गूढं अप्रकटमित्यर्थं, क्षरजपदं नखक्षिद्रं, नखक्षतमित्यर्थं, कथयति ज्ञापयतीत्यर्थः, रहोवृत्तमिति शेषः, खञ्जाषभात् अकथितेऽपि रहोवृत्ते स्तनयोः पत्रावलीरचनसमये तासां गूढनखक्षत-दर्शनात् तज्ज्ञानमभूदिति भावः। शिखरिणी वृत्तम्॥ ६॥

(ग) मानुष्यकातिशयम् अमानुषचारित्रप्रकर्षमिति यावत्।

तदिति।—मनुष्यलोके नरलोके, तत् सर्वत्र विश्रुतं, तादृशं तादृक्चरित्रादिरूपम्, अद्भुतम् आश्चर्यं, तेजः ज्योतिः, ज्योतिर्मयं रामरूप वस्तु इति भावः, कथम् उदेति? उदयं प्राप्नोति? एतत् तावत् न निरभिसन्धि न निरभिप्रायम्, अस्य कोऽपि अभिसन्धि-रस्तीति भावः, अस्य दशाननस्य तानि लोकविख्यातानि, चरितानि वृत्तानि, त्रिभुवन-विजयादीनि इति भावः, धिक् एव निन्दास्येव, "धिङ्निर्भर्त्सन निन्दयोः" इत्यमरः; वैदेह्या इक्ष्वाकुरजनितावमाननाऽहरणादिति भावः, चिन्तया एतद्विषयकरणेन, नः अस्माकम्, अहिषु नेत्रेषु, रजनिः रात्रिः, प्रभाति प्रकर्षेण भीयते, सततमन्धकारं पश्यामीति भावः। वसन्ततिलकं वृत्तम्॥ ७॥

हेलाऽऽकृष्टसुरावरोधरमणीसीमन्तसन्तानक-
स्रग्वासोज्ज्वलपाणिरप्यवति मां वत्सो न लङ्केश्वरः ॥ ८ ॥

(विमृश्य आकाशे)। अहह! दारुणेयम् (घ) अस्माकं चिर-जीविता—

प्रीते विधातरि पुरा परिभूय मर्त्यान्
वव्रेऽन्यतो यदभयं स भवानहंयुः।
तन्मर्मणि स्पृशति मामतिमात्रमद्य
हा वत्स! शान्तमथवा दशकन्धरोऽसि ॥ ९ ॥

श्रुत्वेति।—दुःश्रवं श्रोतुमशक्य, श्रवणपीडाकरमित्यर्थः, अहृतं विस्मयजनकं, निखिलाङ्गनानां श्रुत्वा आकर्ण्य, अन्त पतन्ती अन्तर्गच्छन्ति, पतन्ती आविर्भवन्ती, या क्रिया तस्या, अपङ्गवेन गोपनेन, सावहित्थानि आकारगुप्तिसहितानि, यानि वदनानि मुखानि, दशसङ्ख्यकानीति भावः, तेषां त्वचि चर्मणि, उपरिभागे इति भावः, विप्रकीर्णं विस्तृतं, स्मितं मन्दहासः यस्य तथाभूतः, लोकेषु निश्चिन्तभावप्रदर्शनार्थं सट्टाहासवदनः इत्यर्थः, वत्सः स्नेहास्पदः, लङ्केश्वरः रावणः, हेलया अनायासेन, आकृष्टानां आलोतानां, हृतानामिति यावत्, सुरावरोधरमणीनां देवान्तःपुरिकाणां, सीमन्तेषु विन्यस्तकेशेषु, याः सन्तानकस्रजः, दैवतकविशेषपुष्पमालाः, तासां वासेन सौरभेण, उज्ज्वलः सुरभीकृत इति यावत्, पाणिर्यस्य तथाभूतोऽपि, पाणिना तासां केशाकर्षणादिति भावः, मां न अवति प्रीणाति, तर्पयतीत्यर्थः, डुवप्-अवधातोः रूपमिदम्, यद्वा—अवति पालयति, न निर्भयं करोतीत्यर्थः। मार्दूलविक्रीडितं वृत्तम् ॥ ८ ॥

(घ) दारुणा अनिष्टजनकेति यावत्, स्वस्यजीवने एतादृशं दुःखं न आदिति भावः।

प्रीते इति।—स पुरा तपश्चरन्, सबान् अहंयुः अहङ्कारवान् सन्, पुरा प्राक्, विधातरि ब्रह्मणि, प्रीते सन्तुष्टे सति, तपसेति शेषः, मर्त्यान् मानवान्, परिभूय अनादृत्य, तुच्छीकृत्येति यावत्, अन्यतः मनुष्यव्यतिरिक्तेभ्य इत्यर्थः, यत् अभयं भयाभावं, वव्रे वृतवान्, प्रार्थितवानित्यर्थः, अद्य तत् वरत्वं, माम् अतिमात्रम् अतिशयेन, मर्मणि मर्मस्थाने, स्पृशति मम मर्म पीडयतीति यावत्, हा वत्स! अथवा शान्तम् अमङ्गलं दूरीभवत्विति भावः, त्वं दशकन्धरः दशग्रीवः, असि भवसि, एकदशधरो रामः त्वया दशकन्धरेत्यावश्यं हनिष्यते इति ब्रह्मैव नास्तीति भावः। वसन्ततिलकं वृत्तम् ॥ ९ ॥

(सविमर्शम् (ङ))। अहो ! मैथिलनृपतेरकार्य्यैज्ञता (च)—

विश्वामित्रवशोक्षते हृदि वयं मा भूम सम्बन्धिन-
स्ते दृष्टा न कथं पुराणमुनयो मान्याः पुलस्त्यादयः ?।
जामाताऽपि महेन्द्रमौलिवलभीपर्य्यङ्करत्नाङ्कुर-
ज्योत्स्नापुष्टनखेन्दुदीधितिरय नापेक्षितो रावणः !! ॥१०॥

(पुरोऽवलोक्य)। कथं मिथिलाचरितानि चरितुम् (छ) अनुप्रहिता चिरयति वत्सा शूर्पणखा ?

(प्रविश्य शूर्पणखा)।

शूर्पणखा। (सहर्षम्)। अम्महे ! सोम्मसुंदरविआरुणेवच्छ-

(ङ) सविमर्शे सवितर्कम् ।

(च) अकार्य्यज्ञता काय्यानभिज्ञता, अविवेकिता इत्यर्थः।

विश्वामित्रेति।—विश्वामित्रेण वशीकृते आयत्तीकृते, हृदि चित्ते, तवेति शेषः, वयं सम्बन्धिनः सम्पर्काहाः, यौनसम्बन्धयोग्या इत्यर्थः, मा भूम न भवामः, किन्तु ते प्रसिद्धाः, मान्याः पूजार्हाः, पुराणमुनयः प्राचीन-ऋषयः, ब्रह्मणो मनसः प्राक् उत्पन्नत्वादिति भावः, पुलस्त्यादयः पुलस्त्यप्रभृतयः, रावणपूर्वपुरुषा इति भावः, कथं न दृष्टाः ? न गणिताः ? विश्वामित्रादपि श्रेष्ठाना पुलस्त्यादीनां कुलजो रावणस्त्वया अवश्यमेव वरणीय इति भावः, अयं रावणः महेन्द्रस्य देवराजस्य, मौलिरेव शिर एव, किरीटमेव वा, "चूडा किरीटं कैशाग्र्य संयता: मौलयस्त्रयः" इत्यमरः; वलभी प्रासादोपरिगृहं, "शुद्धान्ते वलभी चन्द्र-शाले सौधोर्द्धवेश्मनि" इति रभसः; तदेव पर्य्यङ्कः खट्वा, यद्वा—मौलिरेव वलभीपर्य्यङ्कः वलभीरूपखट्वा इत्यर्थः, तत्र ये रत्नाङ्कुराः मणिप्ररोहाः, शुद्धाकृतिमणिसमूहा इत्यर्थः, तेषां ज्योत्स्नाभिः किरणैरित्यर्थः, पुष्टाः वृद्धिं नीताः, नखेन्दवो नखचन्द्राश्चा, दीधितयः किरणाः यस्य तादृशः, देवेन्द्रमस्तकचर्चितचरण इति यावत्, जामाता अपि न अपेक्षितः ? न प्रतीक्षितः ? स्वकीयजामातृत्वेन न गणितः ? इति यावत्। मार्दूलविक्रीडितं वृत्तम् ॥ १० ॥

(छ) चरितुं पर्य्यवेक्षितुमिति यावत्।

लच्छीविच्छरिदकांतिपब्भाराइं (ज) रहुउलकुमाराणं मुहपुंडरीआइं पेक्खंतो जुउच्छिदेणावि मायामाणुसीभावेण (झ) किदत्थीकिदम्हि। अम्मो! सा तारिसी गुणाणं पकिदी, (ञ) जा विपक्खहत्थपडिदावि (ट) सुहावेदि। *

माल्यवान्। (दृष्ट्वा सस्नेहम्)। कथं वत्सा शूर्पणखा? वत्से! अयमहम्। इत इतो भवती।

सूर्पणखा। कधं इह ज्जेव्व अट्टालअसिहरपग्गीवे (ठ) मादामहो। अम्मो! दुस्सिलिट्ठता (ड) दुक्कज्जाणं, जं दाणिं पज्जागरकिलिट्ठंतलोअणा पडिक्खणजिंभिआपसारिदमुहकुहरदिट्ठिअट्ठिदकाठिण्णकज्जभारो (ढ) अम्मो विअ

* अम्महे! सौम्यसुन्दरविवाहनेपथ्यलक्ष्मीविच्छर्दितकान्तिप्राग्भाराणि रघुकुलकुमाराणां मुखपुण्डरीकाणि प्रेक्षमाणा जुगुप्सितेनापि मायामानुषीभावेन कृतार्थीकृताऽस्मि। अम्मो! सा तादृशी गुणानां प्रकृतिः, या विपक्षहस्तपतिताऽपि सुखयति।

(ज) अम्महे! आश्चर्यम्, "अम्मो अम्महे इति पदं कुर्यात् स्त्रीबालसु विस्मये" इति भरतः। सौम्यति।—सौम्या प्रियदर्शना, सुन्दरी शोभना च, या विवाहनेपथ्यलक्ष्मीः वैवाहिकपरिच्छदशोभा, तया विच्छर्दितः विस्फुरितः, कान्तिप्राग्भारः लावण्यातिशयः यैषां तथाभूतानि।

(झ) जुगुप्सितेनापि निन्दितेनापि, क्षुद्रराक्षसानुषरूपधारणात् घृणितेनापि इति यावत्, मायामानुषीभावेन मायया कपटेन गृहीत इत्यर्थः, मानुषीभावः मानुषदेह तेन।

(ञ) प्रकृतिः स्वभावः।

(ट) विपक्षेति।—विपक्षस्य शत्रोः, हस्ते पतिताऽपि विपक्षगामिनी अपीत्यर्थः, अन्यार्थं शत्रोः सम्बन्धिनी अपीति भावः।

(ठ) अट्टालकशिखरप्रग्रीवे अट्टालकस्य प्रासादस्य, शिखरम् उपरिभागः, तस्य ग्रीवे प्रान्तभागे इति यावत्।

(ड) दुःश्लिष्टता दुःखसंयोगिता, दुःखदायकता इत्यर्थः, दुरवगाहता इत्यर्थो वा।

(ढ) प्रज्ञागरेति।—प्रज्ञागरेण प्रकृष्टेन जागरणेन, दुश्चिन्तालनितया अनिद्रयेति यावत्, क्लान्ते श्रान्ते, कातरे इत्यर्थः, कलुषिते इत्यर्थो वा, लोचने यस्य तथोक्तः।

को वि दोसदि। अहवा सामण्णा वि गुरुओ (ण) मंतिभावो, विसेसेण साहसेक्करसव्ववसायस्स चंडचरिदस्स (त) अम्हसामिणो रावणस्स। जाणामि, (थ) मं ज्जेव्व पडिपालअंतो (द) चिट्ठदि। जाव णं उवसप्पामि। (सविषादमुपसृत्य)। अज्ज! वंदे। *

माल्यवान्। वत्से! कल्याणिनी भूयाः। इहास्यताम्। अपि भरत-शत्रुघ्नाभ्यां मिथिलामुपस्थितो दशरथः?

सूर्पणखा। (उपविश्य)। अज्ज! दसरहे आअदे कुमाराणं गोदाणमंगले (ध) अ संवुत्ते दाव मए पत्तं मिहिलाणअरं। †

---

* कथमिहैवाट्टालकशिखरप्रदेशे मातामहः। धन्यो। दुःश्लिष्टता दग्धकाष्ठोपा, ब्रह्मदानौ प्रणामरक्षालालोचनः प्रतिक्षणलुम्पाप्रसारितमुखकुहरदृष्टहृदयस्थितकठिनकार्यभारोऽस्य इव क्वाऽपि दृश्यते। अथवा सामान्योऽपि गुरुको माल्यवान्, विशेषेण साहसैकरसव्यवसायस्य चण्डचरितस्यास्माक स्वामिनो रावणस्य। जानामि, मामेव प्रतिपालयन्तिष्ठति। यावदेनमुपसर्पामि। आर्य। वन्दे।

† आर्ये। दशरथे आगत कुमाराणा गोदानमङ्गले च संवृत्ते तावन्मया प्राप्त मिथिलानगरम्।

प्रतिक्षणमिति।—प्रतिक्षणं क्षणे क्षणे, या लुम्पा लम्पट, मुखव्यादानपूर्वकवायुग्रहणानन्तरनि.सारणमत्यर्थः, "हाइ" इति प्रसिद्धा, तया प्रसारित विवृतीभूत, यत् मुखकुहरं वदनविवर, तेन दृष्टः हृदयस्थितः कठिनः कठोरः, दुर्वहः इति यावत्, कार्यभारः कर्मवाहुल्य यस्य तादृशः।

(ण) गुरुकः गुरुरेव गुरुकः महानित्यर्थः। स्वार्थे कन् प्रत्ययः।

(त) साहसैकरसेति।—साहसे सहसा बलेन क्रियमाणे कर्मणि, एकरसः एकान्तानुरागसम्पन्न इत्यर्थः, एकमात्र इत्यर्थो वा, व्यवसायः उद्योगः यस्य तथाभूतस्य। चण्डचरितस्य उग्रस्वभावस्य, तीक्ष्णपराक्रमस्य इति भावः।

(थ) जानामि मन्ये।

(द) प्रतिपालयन् प्रतीक्षमाणः।

(ध) गोदानमङ्गले गोदानरूपं मङ्गल सामुद्रिकशास्त्रोक्तं, चक्रियाणां समाप्त-ार

माल्यवान्। (निःश्वस्य)। अतिप्रकाशोऽयमर्थो (न) यथा निर्वृत्तस्वीकरणा (प) जानकीति।

सूर्पणखा। अधइं। *

माल्यवान्। (विमृश्य)। अहो! दुरात्मनः क्षत्रियब्राह्मणस्य कुशिकजन्मनो दुर्नाटकम् (फ)—

यज्ञोपप्लवशान्तये परिणतो राजा सुतं याचित-
स्तं चानीय विनीय चायुधविधौ ते जघ्निरे राक्षसाः।
त्रैयत्तं विदलय्य कार्मुकमथ स्वीकार्य्य सीतामितो
नो विद्मः कुहनाविटेन वटुना किं तेन कारिष्यते? ॥११॥

* अथ किम्।

सिद्धमिति भावे तस्मिन्। केचित्तु गवा लोक्ता, कैश्यानामित्यर्थः, "गोनाऽऽदित्वे वलीवर्दे ··। रश्मिदृग्वाणलोमसु॥" इति केशवः, दान कृदनरूपं संस्कारकर्म, तदेव मङ्गलं तस्मिन्। "दो य च्छदे" इत्यात् भावे अनट्-प्रत्ययः।

(न) अर्थः विषयः।

(प) निर्वृत्तस्वीकरणा निर्वृत्त समाप्त, स्वीकरणम् आत्मीकरणं, पत्नीत्वेन परिग्रहणमित्यर्थः यस्याः सा तादृशी, समाप्तपरिणयेत्यर्थः। "निर्वृत्तस्वीकरणा" इत्यत्र "निर्वृत्तस्वीकरणा" इति पाठे साधु, निर्वृत्त सिद्ध, निष्पन्नमित्यर्थः, "सिद्धे निर्वृत्त-निष्पन्नौ" इत्यमरः, अन्यत् समानम्।

(फ) दुर्नाटक दुष्टाभिनयः, दुश्चेष्टेति यावत्।

यज्ञेति।—यज्ञस्य उपप्लव विघ्नः, तस्य शान्तये निवारणाय, परिणतः प्रवृत्तः, राजा दशरथः, सुतं पुत्रं, रामामित्यर्थः, याचितः प्रार्थितः, विश्वामित्रेणेति शेषः, तत्र सुतं रामम्, आनीय, स्वाश्रममिति शेषः, आयुधविधौ अस्त्रविधाने, विनीय शिक्षयित्वा च, ते महावीरत्वेन प्रसिद्धाः, राक्षसाः सुबाहुप्रभृतय इति यावत्, जघ्निरे निहताः; अत्रापि विश्वामित्रेणेति शेषः, अथानन्तरं, त्रैयत्तं शाम्भवं, कार्मुकं धनुः, विदलय्य भञ्जयित्वा, सीतां स्वीकार्य्य परिणाय्य, कुहनाविटेन कुहनाया छलकर्मणि, विटः धूर्त्तः, तथाविधेन, वञ्चनाचतुरेणेत्यर्थः, तेन वटुना ब्राह्मणेन, कौशिकेनेत्यर्थः, इतः अस्मात् सङ्कटात्, किं कारिष्यते, रामेणेति शेषः, तत् नो विद्मः न जानीमः। शार्दूलविक्रीडितं वृत्तम्॥ ११॥

सूर्पणखा । अज्ज ! एव्वं णेदम् । सो मए तत्थ बम्हणो वसिट्ठमहेसिणो वि फुरंतो (ब) दिट्ठो । *

नाट्यवान् । (विहस्य) । वत्से ! तपोभिरस्य ब्राह्मणादेशोऽपि स्थानिवद्भावेन क्षत्रकार्य्यं न जहाति (भ) । किञ्च, स्वभावमधुरोऽपि काकुत्स्थवटुरौत्पत्तिकेन क्षात्रेण ब्राह्मण्येन च जन्मना त्रिजातकादस्मान्मुनेरधीयानोऽधरोष्ठं परिणस्यते (म) । तथा हि—

---

* आर्य्ये ! एवमेतत् । स मया तत्र ब्राह्मणो वसिष्ठमहर्षेरपि स्फुरन् दृष्टः ।

(ब) स ब्राह्मणः कौशिक इति यावत् । वसिष्ठमहर्षेरपि वसिष्ठ महर्षिमपेक्ष्यापीत्यर्थः, यवर्थे पञ्चमी । स्फुरन् दीप्यमानः ।

(भ) ब्राह्मणादेशः क्षत्रियस्यापि ब्राह्मणत्वेनातिदेशः, ब्रह्मणि स्थितिरिति भावः, स्थानिवद्भावेन स्थानं स्थितिः, प्राकृतधर्मः इत्यर्थः अस्यास्तीति स्थानी, स चात्र क्षत्रजातिः, तेन तुल्यं स्थानिवत्, तस्य भावस्तेन, उक्तञ्च मुग्धबोधे बोपदेवगोस्वामिना "स्थानिवदादेशः" इति । क्षत्रकार्य्यं क्षत्रियोचितसारथ्यादिरूपं, न जहाति न त्यजति ।

(म) स्वभावमधुरः निसर्गसुन्दरः । काकुत्स्थवटुः काकुत्स्थवंशीयब्रह्मचारी, राम इत्यर्थः । औत्पत्तिकेन उत्पत्तिर्जन्म तत्सम्बन्धिना, क्षात्रेण क्षत्रतेजसेत्यर्थः, ब्राह्मण्येन ब्रह्मतेजसा च, ततश्च ब्राह्मणेन जन्मना तपोजनितेन ब्राह्मण्यलाभेनेति भावः, त्रिजातकात् जन्मत्रययोगिनः, अथ च त्रिभिर्जातादिति वाक्पारुष्यमिति बोध्यं, मुनेर्विश्वामित्रात्, अधीयानः अध्ययनं कुर्वन्, अधरोष्ठं धिक्कृतं निन्दितं यथा तथा इत्यर्थः, "अधरोष्ठो धिक्कृतः" इति रभसः ; "अधरोष्ठः" इति पाठान्तरम् ; परिणंस्यते निन्दितरूपेण परिणतो भविष्यति, अयमस्माद्दण्डादेव जायते इति भावः । पुरा श्वशुरस्य गाधिनृपतेः क्षत्रं च पुरार्थं जमदग्निर्महर्षिर्यज्ञं क्रतवान् । ततश्च यज्ञीयधेनोरेकमंशं ब्रह्मतेजसा अपरमंशं क्षत्रतेजसा अभिमन्त्रितमाक्षीत् । तयोश्च ब्रह्मतेजोऽभिमन्त्रितं चरुभागं गाधिमहिषी अनवधानात् भक्षितवती । अपरं क्षत्रतेजोऽभिमन्त्रितं तत्कन्या रेणुका भक्षितवती । ततश्च गाधिसुतो विश्वामित्रः ब्राह्मतेजोऽभिमन्त्रितचरोरुत्पन्नत्वात् क्षत्रं ब्राह्मण्यञ्च जन्मत एव लब्धवान्, पुनश्च तपसा ब्राह्मण्यलमित्यञ्च त्रिजातकत्वमिति पुराणवार्त्ताऽनुसन्धेया ।

अविनयभुवामज्ञानानां शमाय भवन्नपि
प्रकृतिकुटिलाद्विद्याऽभ्यासः खलत्वविवृद्धये।
फणिभयभृतामस्तूच्छेदक्षमस्तमसामसौ
विषधरफणारत्नालोको भयं तु भृशायते ॥ १२ ॥

भवतु, किमतिक्रान्तोपवर्णनेन (य)। कथं त्विदानीं स्वयं ग्रहीतुमुत्तिष्ठमानो (र) राक्षसपतिः प्रतिकर्त्तव्यः (ल) स्यात् ?

सूर्पणखा। अज्ज! ण क्खु मोट्टिमं परिहरंतो (व) अम्हो उवाओ लक्खीअदि। *

माल्यवान्। वत्से! मा मैवम; महादोषो हि तादृशेन धर्मविजयिना वीरप्रबालेन परिगृहीताया वैदेह्याः प्रसह्यापहारः (श)। पश्य—

---

* आर्ये। न खलु मोट्टिमं परिहरतोऽन्य उपायो लक्ष्यते।

अविनयभुवामिति।—अविनयभुवा दुर्जनजनानाम्, औद्धत्यसम्पादकानामित्यर्थः, अज्ञानानां शमाय शान्तये, भवन्नपि प्रभवन्नपि, शक्नुवन्नपीत्यर्थः, प्रकृतिकुटिलात् स्वभावक्रूरात्, जनादिति शेषः, विद्याऽभ्यासः विद्याशिक्षा, खलत्वस्य दौर्जन्यस्य, विवृद्धये विशेषेण वर्द्धनाय, भवतीति शेषः, तथा हि, असौ विषधरस्य भुजङ्गस्य, फणारत्नालोकः फणास्थितमणिप्रभा, फणिभयभृतां सर्पभीतिजनकानां, तमसाम् अन्धकाराणाम्, उच्छेदक्षमः विनाशसमर्थः, अस्तु भवतु, तु किन्तु, भयं भृशायते भृशम् अत्यर्थं भवतीत्यर्थः, प्रकृतिसुन्दरस्यापि दुर्जनसङ्गात् दौर्जन्यं जायते इति भावः। हरिणी वृत्तम् ॥ १२ ॥

(य) अतिक्रान्तोपवर्णनेन अतिक्रान्तस्य अतीतस्य, उपवर्णनेन आलोचनया।

(र) स्वयमात्मना, ग्रहीतुम् आदातुं, बलान्नेतुमित्यर्थः, कर्तुमिति भावः, सीतामिति शेषः। उत्तिष्ठमानः यतमानः।

(ल) प्रतिकर्त्तव्यः प्रतिविधेयः, निवारणीय इति यावत्।

(व) मोट्टिमं बलात्कारम्। परिहरतः त्यजतः, रावणस्येति शेषः। "परिहरंतो" इत्यस्य "परिहरन्" इति संस्कृतं साधु, बलात्कारं त्यजन्, बलात्कारं विनेत्यर्थः।

(श) वीरप्रबालेन वीराङ्कुरेण, बालकवीरेणेति यावत्। प्रसह्यापहारः बलात् अपहरणं, महान् दोषो यत्र तादृशः।

दोःस्तम्भद्वयदर्पडम्बरमिति स्पष्टं न विस्पन्दते
वैदेहीकरबन्धसूचनमिति प्रस्तौति न व्रीड्या।
इत्यालोच्य कृतस्मितैर्मुनिभिरादिष्टेन येन क्षणा-
दाप्तं वन्दितमाश्रितं च सहसा भग्नं च तादृग्धनुः॥ १३॥

तत् कथञ्च तस्मिन्नियाचरनाथमाततायिनम् (ष) अनुजानीमः?

सूर्पणखा। (निःश्वस्य)। जधा णिरूविदं मादामहेण। अम्मो! कालस्स माहप्पं, जं दाणिं तिहुअणजअलच्छीलीलाबंदिआरे (स) महाराअराअणे वि एअस्स मंतीअदि। *

* यथा निरूपितं मातामहेन। अम्बो! कालस्य माहात्म्यं, यदिदानीं त्रिभुवनजयलक्ष्मीलीलाबन्दीकारे महाराजराजवणेऽप्येवं मन्त्र्यते।

दोःस्तम्भेति।—दो.स्तम्भयोः बाहुरूपस्तम्भयोः, द्वयस्य यो दर्पः अहङ्कारः, तस्मात् डम्बरम् आडम्बरं, स्पर्द्धेति यावत्, प्रकटितं स्यादिति शेषः, इति, मत्वेति शेषः, स्पष्टं स्फुटं यथा तथा, न विस्पन्दते न विकम्पते, न चञ्चलो भवतीत्यर्थः, न विक्रियते इति यावत्, तथा वैदेह्याः सीतायाः, करबन्धः पाणिपीडनं, परिणय इत्यर्थः, तस्य सूचनं ज्ञापनं, धनुरारोपणे व्यापोरणं कर्तुमिच्छामीति कथने सीतापाणिग्रहणेच्छा प्रकटीभविष्यतीति भावः, इति व्रीड्या लज्जया, न प्रस्तौति न प्रस्ताव करोतीत्यर्थः, व्यापोपश्च इति भावः, उभयत्र राम इति कर्तृपदमूह्यम्; इति इत्थम्, आलोच्य विचिन्त्य, रामस्य विनयादिगुणवत्तामिति भावः, कृतस्मितैः, अन्तरीषत् हसद्भिः, मुनिभिः शतानन्दादिभिः, आदिष्टेन आज्ञप्तेन, येन रामेण, क्षणात् अत्यल्पकालेनैव, तादृक् विशालम् अपराजेयं वा, धनुः आप्तं गृहीतं, वन्दितं नमस्कृतम्, आश्रितं नामितञ्च, सहसा अकस्मात्, बलात् वा, भग्नञ्च खण्डितञ्च। नात्र "मुनिभिरा" इत्यत्र हादशीश्वरे यतिभङ्गदोषः, स्वरविहितसन्धेरसद्भाव एव तस्य दोषत्वेनाभिधानात्, यदुक्तं छन्दोमञ्जर्यां—"क्वचिच्छन्दश्चान्ते यतिरभिहिता पूर्वकृतिभिः पदान्ते सा शोभां प्रजति पदमध्ये व्यजति च। पुनस्तत्रैवासौ स्वरविहित सन्धिः श्रयति तां यथा क्षुण्णः पुष्पावचयनविधिमां कृतवया॥" इति। शार्दूलविक्रीडितं वृत्तम्॥ १३॥

(ष) आततायिन दारापहारिणम्। तथा च स्मृतिः,—"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्र दारापहारी च षडेते आततायिनः॥" इति।

(स) त्रिभुवनेति।—त्रिभुवनस्य लोकत्रयस्य, जयलक्ष्म्याः विजयसम्पदः, लीलया क्रीडया, अवहित्थेत्यर्थः, बन्दीकारे, बलात् बन्धनकर्त्तरि ताडने।

माल्यवान्। वत्से!—

मुनिरपि गुरुर्दिव्यास्त्राणां बभूव दिवौकसा-
मजगवधनुर्भङ्गे तावानहो! स महोत्सवः।
रघुपतिगुणक्रीतामेतामवेहि जगत्त्रयीं
विपरिणमते दौर्जन्यं तु प्रभुत्वमदेन नः॥ १४॥

शूर्पणखा। को संदेहो, तस्सिं विआहमहूसवे सव्वं मए पच्चक्खीकिदं। *

माल्यवान्। तदेवमेकलोष्टवधः स्यात् (ङ)। तथा हि, मिथिला प्रविश्य बलादाक्रम्यमाणे कलत्रे कथं तितिक्षेत (क) रघुराजपुत्रः? तं चोत्तिष्ठमानं पौरजानपदप्रकृतयोऽप्यनु-

* क॰ सन्देह, तास्मिन् विवाहमहोत्सवे सर्वं मया प्रत्यक्षीकृतम्।

मुनिरिति।—मुनिः विश्वामित्रः, दिव्यानाम् अलौकिकानाम्, अस्त्राणां दृग्मत्रादीनां, गुरुः आचार्यः, बभूव, राम दिव्यास्त्रसम्प्रदाये सुशिक्षितमकरोदिति भावः, अम्बी! आश्चर्यम्, अजगवधनुः पिनाकः, "पिनाकोऽजगवं धनुः" इत्यमरः, तस्य भङ्गे दिवौकसामपि देवानामपि, तावान् अत्यधिक इति यावत्, स अस्माभिर्दृष्ट इत्यर्थः, महोत्सव महान् आनन्दः, अभूदिति शेषः, देवधनुर्भङ्गे देवानां क्रोधो दूरास्तु, प्रत्युत महोत्सव इति देवा अपि रामपक्षपातिन इति भावः, अतः एतां जगत्त्रयीं त्रिलोकीं, रघुपतेः रामस्य, गुणैः शौर्यादिभिः, क्रीतां आयत्तीकृताम्, अवेहि जानीहि, 'तु परन्तु, केवलमिति भावः, नः अस्माकं, दौर्जन्यं खलत्वं, प्रभुत्वमदेन वयमेव जगत्प्रभव इति गर्वेण, विपरिणमते विपर्यस्यति, वयमेव रामविद्वेषिण इति भावः। हरिणी वृत्तम्॥ १४॥

(ङ) तत् तस्मात्, एव रावणेन बलात् तत्कलत्रहरणं, कृते सतीति शेषः, एकलोष्टेति।—एकस्य एकाकिनः, रावणस्येति भावः, लोष्टेः मृत्खण्डेः, बहुभिर्जनैः प्रक्षिप्तैरिति भावः, वधः विनाशः, स्यात्।

(क) कथं तितिक्षेत क्षमेत, नैव क्षमेतेत्यर्थः।

तिष्ठेरन्, किमङ्ग! सम्बन्धिबान्धवाः? (ख) यथोक्तम्—"आरण्यः (ग) अग्निरिव दुःसहदुःखामर्षजं तेजो विक्रमयति, मण्डलस्य चानुयाज्यो (घ) भवति" इति।

शूर्पणखा। (दीर्घमुष्णं च निःश्वस्य)। अज्ज! किं दाणिं जुत्तं? *

माल्यवान्। शृणु वत्से! कार्य्यज्ञोऽसि। अस्ति वनौकसां (ङ) मन्त्री जाम्बवान्। स मतङ्गाश्रमवास्तव्यामुपसृत्य (च) श्रमणां नाम सिद्धव्रतीमभ्यर्थितवान्, यथा अस्य बालिनो हैराज्येन क्षीणा लुब्धापवारिताः प्रकृतयः (छ) किष्किन्धायां

* आर्य्ये। किमिदानीं युक्तम्?

(ख) तच्च रामम्, उत्तिष्ठमानं युद्धाय उद्यच्छन्तं, रावणेन युध्यमानमिति यावत्। पौरेति।—पौराः पुरवासिनः, जानपदाः देशवासिनः, प्रकृतयः प्रधानपुरुषाः राज्ञामात्यादयः। अनुतिष्ठेरन् राममनुसरेयुरित्यर्थः। किं, वक्तव्यमिति शेषः। अङ्ग! सम्बोधने। सम्बन्धिबान्धवाः सम्बन्धनः वैवाहिकसम्बन्धात् सम्पर्कविशिष्टा, बान्धवाः स्वजनाः, एते यत् राममनुतिष्ठेरन् तत्र किं वक्तव्यम्? इति भावः।

(ग) आरण्यः वन्यः।

(घ) दुःसहेति।—दुःसहेन सोढुमशक्येन, दुःखेन भवत्पीडया हेतुना, यः अमर्षः क्रोधः, तज्जं तदुत्पन्नं, तेजः प्रतापः, सामर्थ्यविशेष इति यावत्, विक्रमयति प्रचण्डपराक्रमं प्रदर्शयति, मण्डलविक्रमेण वीर्यवतीति यावत्। मण्डलस्य राजचक्रस्य, राजसमूहस्येत्यर्थः। अनुयाज्यः अनुसन्धनीयः, अनुसरणीय इति भावः, दुःखभाक् जन इति शेषः।

(ङ) वनौकसां वानराणाम्।

(च) मतङ्गेति।—मतङ्गस्य मुनेः आश्रमे वास्तव्यं वासो यस्याः ताम्। उपसृत्य उपेत्य।

(छ) हैराज्येन राजकृत्येन, स्वस्य राज्ञ सुग्रीवस्य च राज्ञ तयोर्द्वयोः आत्म-

कुमारसुग्रीवमभिषेक्ष्यमाणाः सामवायिकं रामभद्रमपेक्षन्ते (ज)।

शूर्पणखा। (सातङ्कम्)। कधं खत्तिअपोदओ (झ) वालिणिग्गहे वि सहाओ समीहीअदि। तदो तदो? *

माल्यवान्। ततस्तायोध्यातः (ञ) कैकेय्या भरतवार्त्ताहरणाय (ट) प्रेषिता मन्थरा नाम स्थविरदासी (ठ) कठोरतरतरणितापवज्रानलज्वालाऽवलीढजीविता मिथिलाप्रान्तरे (ड) तिष्ठतीति निदाघकिरणान्तेवासी सतीर्थम् (ढ) ऋषिं याज्ञ-

* कथं क्षत्रियपोतको वालिनिग्रहेऽपि सहायः समीह्यते। ततस्ततः?

साक्करणेनेति भावः। क्षीणाः दुर्बलाः, राज्यापहरणादिति भावः, लुब्धाः लोभपरायणाः, राज्याकाङ्क्षिण इत्यर्थः, अत एव अपवारिताः निवारिताः, राज्यात् बहिष्कृता इत्यर्थः प्रकृतयः प्रधानपुरुषाः, सुग्रीवामात्या इति यावत्।

(ज) अभिषेक्ष्यमाणाः राजपदाभिषिक्तं करिष्यन्त इति यावत्। सामवायिकं समवायान् सङ्घान् सङ्गच्छतीति तथोक्तं, सङ्घायकमिति यावत्। अपेक्षन्ते प्रतीक्षन्ते, रामं सहायं कृत्वा वालिनिग्रहाय यतन्ते इति भावः।

(झ) क्षत्रियपोतकः क्षत्रियशिशुः।

(ञ) अयोध्यातः अयोध्यानगरात्।

(ट) भरतेति।—भरतस्य विवाहार्थं मिथिलां गतस्येति भावः, वार्ताहरणाय संवादानयनार्थम्।

(ठ) स्थविरदासी वृद्धा किङ्करी।

(ड) कठोरेति।—कठोरतरः अतिदुःसहः, तरणितापः सूर्यसन्ताप एव, वज्रानलः अग्निनि सतोग्निः, तस्य ज्वालाभिः शिखाभिः, सन्तापैरिति यावत्, अवलीढम् आक्रान्तं, जीवितं यस्याः तथाविधा। मिथिलाप्रान्तरे मिथिलायाः दूरवर्त्ति क्षायाजलादिविरहिते अध्वनि, "प्रान्तं दूरवर्त्योऽध्वा" इत्यमरः।

(ढ) निदाघेति।—निदाघकिरणस्य उष्णरश्मेः, सूर्यस्येत्यर्थः, अन्तेवासी शिष्यः। सतीर्थं सहाध्यायिनम्, एकगुरुकमिति यावत्, याज्ञवल्क्य इनूमसीरुभयोरेव सूर्यशिष्यत्वात् सतीर्थत्वम्। "सतीर्थ्यस्त्वेकगुरवः" इत्यमरः।

वल्कामुपस्थाय (ण) सम्प्रत्येव निमेषमात्रान्निवृत्तो हनूमान् कथयति। अतस्त्वमप्यस्मदनुरोधेन हनूमत्प्रत्यवेक्षितस्वशरीरा परपुरप्रवेशविद्यया (त) मत्परागशरीरमधितिष्ठन्ती (थ) मिथिलामुपेत्य प्रत्ययिता संविधानकमिदं दशरथगोचरीकरिष्यसि (द)। इत्थम्भाविना (ध) गुरुनिदेशचर्याप्रसङ्गेन (न) पङ्क-पाषाण-विषम-कण्टक-व्यालकुल-बहुलामरण्यानीम् (प) अनुप्रविष्टः सर्वथा वैदेशिको राजपुत्रः (फ) कार्यगौरवान्नियतमेव (ब) बालिवधपूर्वकेण प्रतीकारसन्धिना सम्बन्धेन सुग्रीवमुपगच्छेयादिति (भ)।

(ण) उपस्थाय आराध्य, वन्दित्वेत्यर्थः।

(त) हनूमदिति।—हनूमता प्रत्यवेक्षितम् अवधानेन रक्षितं, यद्वा—प्रत्यवेक्षितं प्रतिकूलदृष्टं, द्रष्टुमशक्यमिति भावः, स्वशरीरं निजदेहः यस्याः तथाभूता। परपुरेति।—परस्य पुरं शरीरं, तस्मिन् प्रवेशविद्यया प्रवेशसाधन्या विद्यया।

(थ) अधितिष्ठन्ती आश्रयन्ती।

(द) प्रत्ययिता जनितविश्वासा। संविधानकं कर्म भवत्यमाणं रामवनवास-भरतराज्यदानरूपं कैकेय्या अभिप्रेतमिति भावः। दशरथगोचरीकरिष्यसि दशरथाय निवेदयिष्यसीत्यर्थः।

(ध) इत्थम् अनेन प्रकारेण, एवंविधकौशलेनेति यावत्, भाविना भविष्यता।

(न) गुरुनिदेशेति।—गुरोः पितुः, निदेशः आज्ञा, तस्य चर्या प्रतिपालनं, तत्प्रसङ्गेन तदनुरोधेनेत्यर्थः।

(प) पङ्केति।—पङ्कैः कर्दमैः, पाषाणैः प्रस्तरैश्च, विषमा अवनतोन्नता, तथा कण्टकैः व्यालकुलैः हिंस्रजन्तुभिश्च, बहुला पूर्णा ताम्। अरण्यानीं महारण्यं, "महारण्यमरण्यानी" इत्यमरः।

(फ) वैदेशिकः भिन्नदेशभवः, तत्तदरण्यप्रदेशस्थमार्गानभिज्ञ इति भावः। राजपुत्रः रामः।

(ब) नियतमेव निश्चितमेव।

(भ) प्रतीकारसन्धिना प्रतीकारे साहाय्यकरणे, सुग्रीवकर्तृके इति भावः, सन्धिः आश्रयः यस्य तथाभूतेन, यद्वा—प्रतीकाराय वालिकर्तृकराज्यहरणस्य प्रतिविधानाय,

शूर्पणखा। (सकौतुकम्)। अज्ज! किं तं संविहाणअं? *

माल्यवान्। (कर्णौ)। एवमेवम्। (इति कथयति)।

शूर्पणखा। (इसन्ती)। अहो! बुड्ढरिच्छस्स (म) कुडिलदा। तदो तदो? †

माल्यवान्। ततश्च साऽपि शबरयोगिनी (य) सुग्रीवगुणानुरोधेन सर्वमोमित्यरसिक्कृत्य (र) तदेव विदेहाभिमुखी (ल) प्रस्थितेति मे जनस्थानविहारिभिः (व) निशाचरैरागत्य निवेदितम्। तदमुना च जाम्बवत्प्रयोगेण फलता (श) विराधप्रभृतिभिरधिष्ठितेषु विन्ध्यगिरिगह्वरेषु विहरतो रामस्य सुकरं कलत्रापहरणम्। अस्मदीयास्तु मायाः (ष) सुरासुरप्रथमरेखयोधस्य (स) युद्धमुदितविबुधपतिना

* अयि। किं तत् संविधानकम्?

† अहो। बृद्धऋक्षस्य कुटिलता। ततस्ततः?

सन्धिमेलनं यत्र तेन, यद्वा—प्रतीकारसन्धिः परस्परोपकारकरणार्थं सम्मेलनं तथाभूतेन, उक्तञ्च चाणक्येन—"मयाऽयोपकृत पूर्वमयं मामुपकरिष्यति। इति यः क्रियते सन्धिः प्रतीकारः स उच्यते॥ उपकारं करोम्यस्य ममाप्येष करिष्यति। अयं वाऽपि प्रतीकारो राम सुग्रीवयोरिव॥" इति, सख्येन संवेदेन। उपगच्छीयात् सहाय कुर्यादित्यर्थः।

(म) बृद्धऋक्षस्य स्थविरभल्लूकस्य।

(य) शबरयोगिनी सिद्धशबरी।

(र) ओम् इति अनुमतार्थकमव्ययम्; "ओमेवं परमं मतम्" इत्यमरः। सुरसिक्कृत्य हृदये कृत्वेत्यर्थः। "उररीकृत्य" इति पाठे—स्वीकृत्येत्यर्थः।

(ल) विदेहाभिमुखी मिथिलाभिमुखी।

(व) जनस्थानविहारिभिः दण्डकारण्यान्तर्गतस्थानविशेषसञ्चारिभिः।

(श) जाम्बवत्प्रयोगेण जाम्बवतः औशनसेन। फलता सिद्धिं गच्छता।

(ष) मायाः कपटाचरणानि, आसुरीविद्या वा, अदृश्यीभवनादिरूपा इति भावः, "स्यान्माया आसुरी" इत्यमरः।

वितीर्णमायाहरणमन्त्रधारिणो (ङ) दशरथस्य सन्निधौ न प्रभवन्ति (क)।

शूर्पणखा। (सविचिकित्सम् (ख))। अज्ज! उवणदस्स एव्वं (ग) करीअदि। *

माल्यवान्। (विहस्य)। वत्से! साधु, वृद्धसंवादिनी (घ) ते दृष्टिः (ङ)। यदाहुः,—"यो ह्युपनतस्य पुत्रदारानतिमन्यते, तस्योद्विग्नं मण्डलमभावायोपतिष्ठते" इति। किं पुनरस्मासु नैष निसर्गतेजस्वी संश्रयप्रवृत्तिमातिष्ठते? (च)

* आर्ये। उपनतस्यैवं क्रियते।

(स) सुरासुरेति।—सुरासुरयोः दैव-दानवयोर्मध्ये, प्रथमा श्रेष्ठा, रेखा सङ्ख्याङ्कं यस्य तथाभूतो यो योधः वीरः तस्य, अग्रवीरस्येति यावत्।

(ङ) युद्धेति।—युद्धेन देवासुरसङ्ग्रामे दैवपक्षबलस्य युद्धकरणेन, युद्धे दैत्यविताडनेनेति भावः, मुदितः प्रीतः, विबुधानां देवानां, पतिरिन्द्रः तेन। वितीर्णेति।—वितीर्णः दत्तः, यः मायाहरणमन्त्र, मायारौद्रास्त्रप्रभावविनाशनमन्त्रः, न धारयति वहति, जानातीत्यर्थः तद्धीतस्य।

(क) न प्रभवन्ति न प्रभाव प्रदर्शयितुं शक्नुवन्ति, न सिद्धिं व्रजन्तीति भावः।

(ख) सविचिकित्सं सशङ्कयम्।

(ग) उपनतस्य समीपागतस्य, रामस्येति शेषः, एवं कबन्धापहरणमिति यावत्।

(घ) वृद्धसंवादिनी वृद्धानां प्रवयसां, विज्ञानामिति यावत्, संवादिनी अनुमोदिनी अनुसारिणी वा।

(ङ) दृष्टिः ज्ञानम्।

(च) उपनतस्य समीपागतस्य, शरणागतस्येति यावत्। अतिमन्यते इत्यस्यार्थः। मण्डलं राष्ट्रम्, उद्विग्नं शङ्कितं, कदाचिदस्मासमपि एव करिष्यतीति शङ्कयेति भावः। अभावाय विनाशाय। उपतिष्ठते पारणमति। किं पुनः किन्तु, निसर्गतेजस्वी स्वभावेन तेजस्वलः, एष राम इति यावत्। संश्रयप्रवृत्तिं समाश्रयेण वर्त्तन, न नैवेत्यर्थः, अतिष्ठते अङ्गीकरोति।

शूर्पणखा। हूं, (छ) अण्णं भणामि, अहवा एव्वं (ज) करिस्सदि रामभद्दो? *

माल्यवान्। कः संशयः (झ)। लोकोत्तरं हि किमपि उन्मीलयन्तो (ञ) जगति राज्योपभोगेभ्योऽपि बीभत्सन्ते महानुभावाः (ट)।

शूर्पणखा। अण्णं वि किं वि अणत्थंतरं (ठ) अत्थ पडिदमिति तक्केमि। †

माल्यवान्। (सहर्षम्)। किं तत्?

शूर्पणखा। मए जणअणअरादो (ड) णिक्कंतीए सुदं, यथा—धणुडिदसिरिकंठसरासणस्स (ढ) दासरहिणो मच्छरेण (ण) सअलखत्तिअकिदंतो परसुरामो परागदो (त) त्ति। ‡

* इदम्, अन्यत् भणामि। अथवैवं करिष्यति रामभद्रः?

† अन्यदपि किमप्यनर्थान्तरमत्र पतितमिति तर्कयामि।

‡ मया जनकनगरान्निष्क्रान्तया श्रुतं, यथा—चूर्णयीकण्ठशरासनस्य दाशरथेर्मात्सर्येण सकलक्षत्रियकृतान्तः परशुरामः परागत इति।

(छ) हूं प्रश्ने, "हूं प्रश्नाङ्गीकारयोः रोषे" इति विश्वः।

(ज) अथवा प्रश्ने। एवं पितृनियोगेन दण्डकारण्यप्रवेशमिति भावः।

(झ) कः संशयः संशयो नास्तीत्यर्थः।

(ञ) लोकोत्तरम् अलौकिकं, किमपि अनिर्वचनीयमित्यर्थः, वस्तु इति शेषः। उन्मीलयन्तः प्रकटयन्तः।

(ट) बीभत्सन्ते जुगुप्सन्ते, राज्यभोगादीन् तुच्छीकृत्य निन्दन्तीत्यर्थः। महानुभावाः महाप्रभावाः।

(ठ) अनर्थान्तरम् अनिष्टविशेषः।

(ड) जनकनगरात् निर्विलातः।

(ढ) चूर्णेति।—चूर्णं दलितं, शीकण्ठस्य हरस्य, शरासनं धनुः येन तथाभूतस्य।

(ण) मात्सर्येण विद्वेषेण, "मत्सरोऽन्यसुखद्वेषः" इत्यमरः।

माल्यवान्। (सहर्षम्)। सर्वमुपपद्यते (थ)—

भुजार्गलितनर्मदामकरचक्रदंष्ट्राङ्कुर-
व्रणप्रकरकर्कशं किमपि बिभ्रदुग्रं वपुः।
स येन परशौ हुतो नृपतिरर्जुनः कौतुका-
दसौ कथमुपेक्षते गुरुधनुर्व्यलीकं मुनिः? ॥ १५ ॥

परन्तु (द) अनेनापि सकलमूर्धाभिषिक्तकण्ठकाक्ष-
रुधिरावसेकपङ्किलकुठारेण दुरभिभवो (ध) दाशरथिः।

(क) उपपद्यते युज्यते, तस्यागमनं युक्तमेवेत्यर्थः।

भुजेति।—भुजाभिर्बाहुभिः, सहस्रैरिति भावः, अर्गलितायाः प्रतिरुद्धायाः, नर्मदायाः सोमोद्भवाख्य-नदीभेदस्य, यानि मकरचक्राणि जलजन्तुविशेषाः, तेषां दंष्ट्राङ्कुरैः सूक्ष्मावदशनैः, यः व्रणप्रकरः क्षतसमूहः, तेन कर्कशं परुषं, पुनः पुनः दन्ता-घातेन सञ्जातक्षिणत्वात् कठिनमिति यावत्, किमपि अन्यवाहदपूर्वम्, उग्रं भीषणम्, उद्भटं वा, वपुः शरीरं, बिभ्रत् दधान., सः प्रसिद्धः, नृपतिरर्जुनः कार्तवीर्यार्जुनः, येन कौतुकात् अवलीलयेत्यर्थः, परशौ कुठारे, हुतः दग्धः, विनाशित इति यावत्, असौ मुनिः परशुरामः, गुरोः शिवस्य, धनुर्व्यलीकं चापविषयकाप्रियानुष्ठानं, धनुर्भङ्गापराधमित्यर्थः, "व्यलीकमप्रियाकार्ये-वैलक्ष्येऽपि पीडने" इति विश्वः; कथम् उपेक्षते? सहते? नैव सहते इत्यर्थः। पुरा बाहुभिर्नर्मदायां जलक्रीडां कृत्वा जलक्रीडां कुर्वतः कार्तवीर्यस्यागतानि जलजन्तुभिः क्षतानीति प्रसिद्धिः। पृथ्वीवृत्तम्—"ज-सौ ज स-य-सा वसुग्रहयतिश्च पृथ्वी गुरुः" इति तल्लक्षणात्॥ १५॥

(द) परन्तु किन्तु।

(ध) सकलेति।—सकलानां मूर्धाभिषिक्तानां क्षत्रियाणां, "मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्" इत्यमरः; कण्ठाः मस्तदेशाः एव, काण्डाः दृढत्वं मूलाच्छाखावधि स्थूलभागाः, तेभ्यः रुधिरावसेकेन रक्तस्रावेण, पङ्किलः कर्दमितः,

गुणंजहा। (साभ्यसूयम् (ग))। अहो! दुद्धमुहे (ध) तस्सिं खत्तियवटुए (फ) एव्व संभावेदि मादामहो। *

माल्यवान्। वत्से! नैतज्जानासि?—

सर्वराजकदुर्धर्षं सर्वदेवमयं धनुः।
भञ्जता रामभद्रेण विजिग्ये भुवनत्रयम्॥ १६॥

इदानीं तु—

राजन्यरुधिराम्भोधि-क्रतक्षिषवणो मुनिः।
प्रायः परशुरामोऽयं न विद्मः किं करिष्यति॥ १७॥

तदेहि राजकुलमेव गच्छावः। (इति निष्क्रान्तौ)।

विष्कम्भकः।

(नेपथ्ये)। भो भो जनकाग्निहोत्रपरिचारकाः! पाद्यं पाद्यम्। अर्घोऽर्घः (ब)।

---

* अहो! दग्धमुखे तस्मिन् क्षत्रियवटुके एवं सम्भावयति मातामहः।

(ग) साभ्यसूयं गुणेषु दोषारोपणमभ्यसूया, तत्सहितं रामगुणप्रकटनासहनपरः-सरमित्यर्थः।

(ध) दुग्धमुखे दुग्धपोष्ये, अतिग्रिग्धावित्यर्थः।

(फ) क्षत्रियवटुके क्षत्रियबालके।

सर्वेति।—सर्वैः राजकैः राजन्यैः, दुर्धर्षं धर्षितुमशक्यम्, अनमनीयमिति यावत्, धर्तुमशक्यमित्यर्थो वा, सर्वदेवमयं सर्वदेवतात्मकं, सर्वेषां देवानां तेजोभिर्निर्मितत्वादिति भावः, धनुः भञ्जता रामभद्रेण भुवनत्रयं विजिग्ये जितमित्यर्थः। सर्वजनदुष्करकर्मकारी सर्वविजयी स्वत एव भवतीति भावः। अनुष्टुप् छन्दः॥ १६॥

राजन्येति।—राजन्यानां क्षत्रियाणां, स्वेन क्षत्रत्वेनेति भावः, रुधिराम्भोधौ शोणितसागरे, क्रतं विषवणं विसर्ज्यस्नानं येन तादृशः, मुनिः परशुरामः, प्रायः सम्भावितः, अयं किं करिष्यति किमनुष्ठास्यति, न विद्मः न जानीमः, अत्र वाक्यार्थः कर्म। अनुष्टुप् छन्दः॥ १७॥

(ब) जनकेति।—जनकस्य विदेहाधिपतेः, यत् अग्निहोत्रं तदाख्ययागविशेषः, अग्नौ होमविधारित्यर्थः, तस्य परिचारकाः भृत्याः। पाद्यं पादप्रक्षालनार्थं जलम्।

आजन्मब्रह्मचारी पृथुलभुजशिलास्तम्भविभ्राजमान-
ज्याऽऽघातश्रेणिसङ्गाऽन्तरितवसुमतीचक्रजैत्रप्रशस्तिः।
वक्षःपीठे घनास्त्रव्रणकिणकठिने संक्षुवानः पृषत्कान्
प्राप्तो राजन्यगोष्ठीवनगजमृगयाकौतुको जामदग्न्यः॥ १८॥

अपि च—

एष स्वेणकपोलकुङ्कुमलिप्तस्तेयातिभीरो भुजे
बिभ्राणश्चतुरन्तराजविजयि ज्यानादरौद्रं धनुः।
तूणावेव पुनस्तरां दृढयति स्वादन्तरस्मात्पटा-
दाकृष्टैः कुशचीरतन्तुभिरभिक्रुद्धो मुनिर्भार्गवः॥ १९॥

क्रियतामिति शेषः, "अर्घोऽघः" इत्यत्र "अर्घ्यम् अर्घ्यम्" इति पाठे—अर्घार्थं पूजार्थं, देयं जलम्, "अर्घ्यमर्घार्थं पाद्य पादाय वारिणि" इत्यमरः, त्वरया आदरेण वा हिडन्तिः।

आजन्मेति।—आजन्म जन्मन आरभ्य, ब्रह्मचारी अनुष्ठितब्रह्मचर्यः, सांसारिक-सुखभोगविमुख इति भावः, पृथुला, सडाली, भुजावेव शिलास्तम्भौ पाषाणानर्भतस्तम्भौ, तत्स्वरूपौ भुजौ इत्यर्थः, तयोः विभ्राजमाना विशेषेण राजमाना, सुस्पष्टं लक्ष्यमाणा इति यावत्, या ज्याऽऽघातश्रेणिः मौर्व्याकर्षणजनितकिणराजिः, तया सङ्गया लग्ना, तदुपदेशेनेत्यर्थः, अन्तरिता आच्छादिता, वसुमतीचक्रस्य भूमण्डलस्य, जैत्रप्रशस्तिः जय-प्रशंसा यस्य तथोक्तः, ज्याऽऽघातपङ्क्तिव्याजेन सङ्गृहीता जयप्रशस्तौ लिखितेति भावः, घनानां कठिनानाम्, अस्त्राणां शरादीनां, व्रणेन क्षतेन, ये किणाः मांसवल्ययः, ते कठिने कर्कशे, वक्षःपीठे वक्षोऽपशिखाफलके इति यावत्, पृषत्कान् बाणान्, संक्षुवानः तेजयन्, आघर्षणेन तीक्ष्णीकुर्वन् इत्यर्थः, राजन्यगोष्ठी क्षत्रियसमूह एव, वनगजा, आरण्य-द्विपाः, तेषां मृगयायां कौतुकी मृदयालुरित्यर्थः, जामदग्न्य परशुरामः, प्राप्तः उपस्थितः। स्वधरा इत्तं—"सभेयाना वयेष विमुनियतियुता स्वधरा कीर्त्तितेयम्" इति तल्लक्षणात्॥ १८॥

एष इति।—एष मुनिः भार्गवः परशुरामः, अभिक्रुद्धः अत्यर्थं कुपितः, ऐश्वर-धनुर्भङ्गादिति भावः, अत एव स्वेणाः स्त्रीसम्बन्धिनः, क्षत्रियाणामिति शेषः, कपोलाः गण्डभागाः, तेषु ये कुङ्कुमलिप्तिः काश्मीरजविरचितपत्रलेखा, तस्याः स्तेयेन चौर्येण, वैधर्म्यसम्पादनात् दूरीकरणेनेति यावत्, अतिभीरौ अतिशङ्किते, भुजे बाहौ, चौरस्य सततं शङ्कितभावेनावस्थानस्य स्वाभाविकत्वादिति भावः, चतुरन्तराजविजयि चतुर्षु अन्तेषु दिगन्तेषु, दिक्षु इति यावत्, ये राजानः क्षत्रियाः, तेषां विजयि चतुर्दिक्मण्डलस्य;

(ततः प्रविशति शरचापहस्तः क्रोधोद्धतो जामदग्न्यः)।

जामदग्न्यः। (सखेदम्)। अहह !! यथा मृष्टभोजिना कृतान्तेन (भ) प्रत्यवसितास्ते सांयुगीनाः (म)। वर्त्तमाने तु (य)—

शस्त्राशस्त्रिकथैव का ? नवभवद्दोर्वाणपाणिन्धमाः
पत्त्यानो दिवि सङ्कुचन्ति वसुधा बन्ध्या न सूते भटान्।
लक्ष्मीरप्यरविन्दमौधवलभोनिर्य्यूहपर्य्यङ्किका-
विश्रान्तेरनिभिर्न कुञ्जरघटागण्डोद्गतैर्मोटते ॥ २० ॥

त्रियजेत्र, ज्यानादन मौर्व्यभ्यन्तेन, रौद्रं भीषणं, धनुः विषाणः दधानः सन्, खात् निर्जात, अन्तरस्मात् अन्तरीयात् परिधानादित्यर्थः, "अन्तरमवकाशाविधिपरिधानान्तर्द्धि-भेदतादर्थ्ये" इत्यमरः; पटात वस्त्रात, आकृष्टैः कुशचीरतन्तुभिः सूक्ष्मवल्कलसूत्रैः, कुशनिर्मितवल्कलवल्कलरज्जुभिरिति वा, तूणावेव बाणपूर्णतुणीरावेव, पुनस्तराम् अतिशयेन, दृढयति दृढीकरोति। "चतुरन्तरीपविजयी" इति पाठे—चतुरन्तरीपस्य चतुर्द्वीपस्य विजयीत्यर्थः। आर्य्यूलविक्रीडितं वृत्तम् ॥ १९ ॥

(भ) मृष्टभोजिना मृष्टं खादु, यद्वा—मृष्ट भोजितं, विगुडनित्यर्थः, भुङ्क्ते इति तच्छीलेन, "निर्णिक्त शोधितं मृष्टम" इत्यमरः, कृतान्तेन यमेन।

(म) प्रत्यवसिताः खादिताः, "प्रत्यवसितगिलितखादितसातम" इत्यमरः, ते सङ्ग्रामार्जुनादय इत्यर्थः। सांयुगीनाः रथपस्थिताः, "सांयुगीनो रथी साधुः" इत्यमरः। जगति वीरोत्तमा भटानीं न विद्यन्ते, यैः सह रणव्यापारेण आत्मनो युद्धकण्डूतिं निवारयामि इति परशुरामस्य खेदकारणम् "अहह" इत्यनेन प्रकटीभवति इति भावः।

(य) वर्त्तमाने तु सम्प्रति तु।

शस्त्राशस्त्रिकथेति।—शस्त्रेश्च शस्त्रैश्च प्रहृत्य यत् युद्धं तत् शस्त्राशस्त्रि, तस्य कथैव वार्त्तैव, का ? नास्तीत्यर्थः, सम्मुखसमरं नास्त्येव इति भावः, नवाः नूतनाः, भवन्तः सम्पद्यमानाः, ये वीर्य्याणाः दैत्याः, सङ्ग्रामहताना क्षत्रियाणां सद्यो देवत्वलाभादिति भावः, तेषां पाणीन् धमन्ति पीडयन्तीति तथोक्ताः, सङ्ग्रामहतानामसङ्ग्रामतया सङ्कटगमनादिति भावः, पत्त्यानः स्वर्गमनमार्गाः, दिवि अन्तरीक्षे, सङ्कुचन्ति स्खलीभवन्ति, गमनागमनाभावात् न स्फुरन्तीति यावत्, सङ्ग्रामहतवीराभावादिति भावः, वसुधा पृथ्वी, बन्ध्या जननशक्तिरहिता, यतः भटान् वीरान्, न सूते न जनयति, लक्ष्मीरपि जयश्रीरपि, कुञ्जरघटानां साङ्ग्रामिकगजाना, गण्डेभ्यः कपोलेभ्यः, मदवारिसिक्तेभ्य इति भावः, भट्टैः निर्गतैः, अरविन्दमेव पद्ममेव, सौध इव, तस्य या धवलो श्रीरोगृह, सैव निर्य्यूहपर्य्यङ्किका नागदन्तनिर्मितपर्य्यङ्क, "निर्य्यूह'

(सविमर्शाश्चर्यम् (र))—

शम्भुर्यद्गुणवल्लरीमुपनयत्याकृष्य कर्णान्तिकं
भ्रश्यन्ति त्रिपुरावरोधसुदृशां कर्णोत्पलप्रत्यय: ।
स्वं चास्फालयति प्रकोष्ठकमिमामुन्मुच्य तासामहो !
भिद्यन्ते वलयानि दाशरथिना तद्भग्नमेतं धनु: ॥ २१ ॥

(सरोष-विकटं परिक्रामन्) । भो भो विदेहा: ! (ल) क्व रामो दाशरथि: ?—

यस्मिन्नर्जुनदो:सहस्रनलकप्रोद्गच्छदस्रच्छटा-
जिह्वाले जुहवाम्बभूविम रुषा राजन्यसत्तामपि ।

श्रेखरे हारे निर्यासे नागदन्तके" इति विश्व ; तत्र विश्वाले: अलिभि: भ्रमरै:, न भीदते न भीतिमनुभवतीत्यर्थ:, वीराभावेन युद्धाभावात्, युद्धाभावेन च साङ्गामिक-प्रजाभावादिति भाव: । शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

(र) सविमर्शं सवितर्कम् ।

शम्भुरिति ।—शम्भु शिव:, यस्य धनुष, गुणवल्लरीं मौर्वीलताम्, आकृष्य कर्णान्तिकं कर्णसान्निध्यम्, उपनयति प्रापयति, किन्तु त्रिपुरावरोधसुदृशां त्रिपुरासुराला:-पुरस्त्रीणां, कर्णोत्पलप्रत्यय: कर्णोत्पलानां सन्निवेशानानि, भ्रश्यन्ति प्रच्यवन्ति, तथा हस्तं यद्गुणवल्लरीम्, उन्मुच्य विमुच्य, स्वं निजं, प्रकोष्ठकं कफोणेरधोभागम्, आस्फालयति सन्ताडयति च, अन्यदिति पूर्वेणान्वय:, किन्तु तासां त्रिपुरावरोधसुदृशां, वलयानि कङ्कणानि, भिद्यन्ते भज्यन्ते, येन धनुषा त्रिपुरयोषितां पतिवधात् कर्णोत्पलादीनां विलासभूषणानां भंग इति भाव:, दाशरथिना रामेण, तत् पूर्वोक्तं रूपम्, ऐशं शाम्भवं, धनु: भग्नम्, अहो ! एतदाश्चर्यम् । अत्रैकस्य कर्णोत्पलभंगे अपरासां कर्णोत्पलभंग इति, तथा एकस्य प्रकोष्ठकास्फालने अपरासां वलयभङ्ग इति च कार्य्य कारणयोर्भिन्नदेशतायामसङ्गतिरलङ्कार, तदुक्तं दर्पणे—"कार्य्य-कारणयोर्भिन्नदेशतायामसङ्गति:" इति । शार्दूल-विक्रीडितं वृत्तम् ॥ २१ ॥

(ल) विदेहा: मैथिला:, मिथिलावासिन इत्यर्थ:, ।

यस्मिन्निति ।—अर्जुनस्य कार्त्तवीर्यस्य,दोष्णा भुजानां, सहस्रमेव नलकं "नल" इति प्रसिद्धवच्छिद्रपदार्थविशेष:, यद्वा—दो:सहस्राणां नलकं दलपादयोरस्थिविशेष:, तस्मात् प्रोद्गच्छन्ती नि:सरन्ती, या असृच्छटा रुधिरधारा, तया जिह्वाले रसनाशालिनीत्यर्थ, रुधिरास्वादत्वात् रुधिरपानाच्च इति भाव:, यस्मिन् परशौ, रुषा क्रोधेन, राजन्यानां

सोऽय प्राक्कवलयहस्य विघसीभूतेष्वपि क्षत्रिय-
क्षुद्रेषु क्षुधितश्चिरेण परशुस्तेनायमन्विष्यते ॥ २२ ॥

(ततः प्रविशति सर्वेष्य-प्रमोदो दाशरथी रामः।)।

रामः।—

साकं शक्तिधरेण तत्रभवतो देवाद्वानीपते-
र्यैः सम्यक्समवाप चापनिगमं सम्यक्षि सामानि च।
शूराणाञ्च तपस्विनाञ्च परमां काष्ठामधिष्ठास्नुभि-
स्तेजोभिर्भगवानसौ भृगुपतिर्दिष्ट्याद्य दर्शिष्यते ॥ २३ ॥

जामदग्न्यः। (सर्वेतोवालक्ष्यमात्मानं प्रति)—

भस्माङ्गुरेति खुरलीकलहे कुमार-
मप्याक्षिपन् परुषरोषरभास्यचेताः।
दृष्टोऽस्मि यः क्षतमिथोहसितं शिवाभ्यां
तच्चापभङ्गमपि हा! मघृणः शृणोमि ॥ २४ ॥

क्षत्रियाणां सतामपि आस्तवमपि, क्षुद्रवाक्यभूतेषु इतरेषु, वयमिति शेषः, तेन परशुना क्षत्रियान् उन्मूलयामासिमेत्यर्थः, सोऽय परशु कुठारः, प्राक्कवलयहस्य प्राग्निरूपितस्य कवलयहणस्य, विघसीभूतेषु भोजनशेषरूपेषु, पुरा यत् ग्रासयहणं कृतं तस्य शेषभूतेषु इत्यर्थः, "अमृतं विघसो यज्ञशेष-भोजनशेषयोः" इत्यमरः, क्षत्रियक्षुद्रेषु अपि राजधाधमेषु सत्स्वित्यर्थः, चिरेण क्षुधितः क्षुधापीडितः, भोज्याभावादिति भावः, वर्तते इति शेषः, तेन परशुना हेतुना, यद्वा—परशोः क्षुधितत्वेन हेतुना, अयं रामः अन्विष्यते अनुसन्धीयत, मयेति शेषः। यद्वा—तेन परशुना इति कर्तृपदम्। शार्दूलविक्रीडितं वृत्तम् ॥ २२ ॥

साकमिति।—यः परशुरामः, शक्तिधरेण स्कन्देन, साकं सह, तत्रभवतः पूज्यात्, देवात् भवानीपतेः हरात्, सम्यक्च सम्यग्रूपं, चापनिगमं धनुर्वेदं, सम्यक्षि सम्यग्रूपाणि, सामानि सामवेदाख्य, अवाप प्राप्तवान्, श्रुचितवानित्यर्थः, शूराणाञ्च वीराणाञ्च, तपस्विनाञ्च मुनीनाञ्च, परमा काष्ठाम उत्कर्षम्, अधिष्ठास्नुभिः आश्रयद्भिः, तेजोभिः प्रभावैः, उपलक्षित इति शेषः, विशेषणे हृतीया, महावीरस्य महामुनिरेति भावः, असौ अयं, भगवान् भृगुपतिः परशुरामः, दिष्ट्या भाग्येन, अद्य दर्शिष्यते प्रेक्षिष्यते, मयेति शेषः। शार्दूलविक्रीडितं वृत्तम् ॥ २३ ॥

भस्मेति।—योऽहं, परुषं निष्ठुरम्, अत एव रोषरभेण कोपावेशेन, अन्धं

(विमृश्य च)। अहो । मामरण्यनिवासिनमुपश्रुत्य दुरात्मन रघुकुटुम्बकेन दूरमुच्छ्वसितम् (व)। (निर्विदृश्य)—

रे काकुत्स्थाः ! कथं वः श्रुतिविषयमयं नागमद्भार्गवीयो
दुःसामन्तापचारप्रचितपितृवधामर्षनिस्तारबन्धुः ।
वारानासन्नविंशान् विंशसितविषमक्षत्रजातिप्ररोहः
क्रोधादुत्कृत्तगर्भामिषरुधिरवसाविस्रगन्धिः कुठारः ? ॥ २५ ॥

विमूढमिति यावत, खेदः खिन्नं यस्य तथाभूतः सन्, खुरलीकलहे अश्वाभ्यां विवादे अश्वयोग्यान्नरक्षविवादे वा, अरनिक्षेपाभ्यामकाले इति यावत, "अश्वान् खुरली योग्या" इति हारावली ; भक्षाडुर तुच्छतापसुत, इति इति हेतोः, कुमार मा भक्षाडुर उक्तवान इति हेतोरित्यर्थः, कुमार स्कन्दनपि, क्षा कषाऽन्यवारणेऽपि अस्यर्थः, आत्तिघ्न निर्भर्त्सयन्, शिवाया पार्वती परमेश्वराया, क्रतं मिश्र अन्योऽन्य इतिहासं यस्मिन् तत् यथा तथा, दृष्टोऽस्मि अवलोकितोऽस्मि. हा। खेदे, सोऽहं सतृष्ण तृष्णा जुगुप्सा, आत्मावमाननाविशेषः वा, तत्सहित निन्दित सन् इत्यर्थः, धिङ्मा यं गुरोर्धनुर्भङ्गापमानं सहे इत्यात्मान विनिन्दन्निति भावः, तस्य गुरोः, चापभङ्गमपि धनुर्भङ्गमपि, शृणोमि । वसन्ततिलक वृत्तम ॥ २४ ॥

(व) रघुकुटुम्बकेन रघुपरिजनेन, रामेणेति यावत् । दूरम् अत्यर्थम, उच्छ्वसित प्रहृष्टमिति यावत ।

रे काकुत्स्था इति ।—रे इति नीचसामन्त्रणम् ; रे काकुत्स्थाः । तुच्छककुत्स्थ कुलजाः क्षत्रियाः । दुःसामन्तस्य दुष्टनृपतेः, कार्त्तवीर्यस्येति भावः, अपचारेण अत्याचारेण, पितृवधरूपेण क्रूरकर्मणा इत्यर्थः, प्रचितः प्रवृद्धि गतः, यः पितृवधामर्षः पितृविनाशजनितक्रोधः, शत्रुनियंतनेच्छा इति भावः, तस्मात् निस्तारे उद्धारे, शत्रु निधनद्वारा अमर्षशमनार्थमपने इति भावः, बन्धुः मित्रम्, आसन्नविंशान् विंशसनीयान्, एकविंशतिसङ्ख्यकान् इत्यर्थः, वारान् विंशसितः निहतः, विषमक्षत्रजातेः दुष्टक्षत्रियजातेः, प्ररोहः अङ्कुरः, क्षुद्रशत्रुरपि इति यावत् येन तथोक्तः, क्षत्रियशत्रोरपि विनाशकारीत्यर्थः, तथा क्रोधात् उत्कृत्ताः खण्डिताः, ये गर्भाः भ्रूणाः, अवस्त्रीजातिति भावः, तेषाम आमिषं मांस, रुधिरं शोणितं, वसा प्रसिद्धं, ताभिः विस्रगन्धिः आमगन्धिः, "मांसं क्रव्यमामिषम्" इति हारावली ; "विस्रं स्यादामगन्धि यत्" इत्यमरः ; भार्गवीयः भार्गवसम्बन्धी, अयं दृश्यमानः,

रामः। (दृष्ट्वा सहर्ष-बहुमानम्)—

जेतारं दशकन्धरस्य रभसाद्दोःश्रेणिनिःश्रेणिका-
तुल्यारूढसमस्तलोकविजयश्रीपूर्ण्यमाणोरसम्।
यः सङ्ख्ये निजघान हैहयपतिं ग्रत्नोर्मुखं दृष्टवान्
यः पृष्ठं ददतोऽपि षण्मुखजये सोऽयं क्रतौ भार्गवः॥ २६॥

(पुनः सविस्मयम्)। अहो! सङ्कीर्ण्यमाणानेकरसानुभावगम्भीरमधुरोऽयमस्याभोगः (ग)। तथा हि।—

कुठारः कथं वः युष्माकं, श्रुतिपथं कर्णगोचरं, न अगमत्? न प्राप्नोत्? कथं श्रवणविषयता न मतः? इत्यर्थः। स्रग्धरा वृत्तम्॥ २५॥

जेतारमिति।—यः परशुरामः रभसात् वेगात्, बलपूर्वकमित्यर्थः, हर्षात् वा, अवलीलयेति यावत्, "रभसो वेग-हर्षयोः" इत्यमरः; दोष्णां भुजानां, विंशतिसङ्ख्यानामिति भावः, श्रेणिः पङ्क्तिरेव, निःश्रेणिका अधिरोहणी, सोपानपङ्क्तिरिति यावत्, "निःश्रेणिस्त्वधिरोहणी" इत्यमरः; तया तुल्यं समकालमेवेत्यर्थः, आरूढया ऊर्ध्वमुत्थितया, समस्तलोकानां सर्वजगतां, विजयश्रिया विजयलक्ष्म्या, पूर्ण्यमाणम् अधिक्रीयमाणम्, उरः वक्षःस्थलं यस्य तथाभूतस्य, त्रिभुवनविजयिन इति यावत्, दशकन्धरस्य रावणस्य, जेतारं जयकारिणं, हैहयपतिं कार्त्तवीर्यार्जुनं, सङ्ख्ये युद्धे, निजघान निहतवान्; "दोःश्रेणिनिःश्रेणिकातुल्यारूढसमस्तलोकविजयश्रीपूर्ण्यमाणोरसम्" इति पाठे—दोःश्रेणिः भुजसङ्घसमेव, निःश्रेणिका अधिरोहणी, तया तुल्यं युगपदित्यर्थः, आरूढया समस्तलोकविजयश्रिया पूर्ण्यमाणम् उरः यस्य तथोक्तमिति हैहयपतिनित्यस्य विशेषणम्; यश्च षण्मुखस्य कार्त्तिकेयस्य, जये पराजये इत्यर्थः, पृष्ठं ददतोऽपि पराङ्मुखस्यापि, पलायमानस्यापीत्यर्थः, ग्रत्नोः रिपोः, षण्मुखस्येति भावः, मुखं दृष्टवान्, कार्त्तिकेयस्य षण्मुखत्वेन पश्चादपि मुखस्थितेरिति भावः, सोऽयं क्रतौ कुशलौ, कार्य्यदक्ष इत्यर्थः, भार्गवः परशुरामः, मया दृश्यते इति शेषः। मार्दूलविक्रीडितं वृत्तम्॥ २६॥

(ग) सङ्कीर्ण्यमाणेति।—सङ्कीर्ण्यमाणानां स्वयं विनिश्चीयमानानां, विरुद्धानामपि एकत्र मिलितानामिति यावत्, कर्मकर्तरि प्रयोगः, अनेकरसानां विविधभावविशेषाणाम्, अनुभावेन आस्वादनेन, गम्भीरः दुरवगाहः, मधुरश्च। अस्य भार्गवस्य। आभोगः पूर्णता, अवयवसंस्थानमिति यावत्, "आभोगः परिपूर्णता" इत्यमरः।

जटां धत्ते मूर्ध्ना परशु-धनुषी बाहुशिखरं
प्रकोष्ठो रौद्राक्षं वलयमिषुदण्डानपि करः।
प्ररूढप्रौढास्त्रव्रणविकटरौद्राङ्कितमिदं
प्रशान्तामेणेर्यो त्वमपि च वक्षः कलयति ॥ २७ ॥

(इत्युपसर्पति)।

जामदग्न्यः। (विलोक्य)। कथमयमसौ अयमाणगुणानुकल्पिताकारसंवादी दाशरथिः (ष)। साधु रे राजन्यपोत! (स) साधु।—

सविधमुपसरन् समूलक्षयं
क्षितिनृपान्वयमद्य मां धिनोषि।
हरिमिव करिकुम्भकूटकोटि-
प्रकटकठोरनखाङ्कुर कुरङ्गः ॥ २८ ॥

जटामिति।—मूर्ध्ना शिरः, जटा, बाहुशिखरं स्कन्धदेशः, परशु धनुषी कुठारं धनुश्चेत्यर्थं, प्रकोष्ठः कफोणेरधोभागः, रौद्राक्षं वलय वलयाकारेण धृतरुद्राक्षमालामित्यर्थः, करः हस्तः, इषुदण्डानपि शरानपीत्यर्थं, धत्ते धारयति, प्ररूढेन सञ्जातेन, प्रौढेन विशालेन, पुरातनेन वा, अस्त्रव्रणेन अस्त्राघातजनितक्षतेन, विकट प्रस्फुट यथा तथा, यद्वा—विकटौ विषमौ, परस्परावरूढौ इत्यर्थः, रौद्र. अद्भुतश्च रसो यत्र तथाभूतम्, इदं वक्षश्च प्रः। सीम्या, शान्तरसलक्षणामिति यावत्, ऐणेर्यौ मृगसम्बन्धिनौ, त्वं अमपि, कलयति धारयति। शिखरिणी वृत्तम् ॥ २७ ॥

(ष) अयमाणेति।—अयमाणैः आकर्ण्यमानैः, श्रुतिविषयता गतैरित्यर्थः, गुणैः शौर्यादिभिः, अनुकल्पितः अनुमितः, य आकारः मूर्त्तिः, तत्संवादी तदनुकारी, अदृष्टपूर्वोऽपि अयमाणगुणानुकल्पिताकारसंवादेन सोऽयमिति प्रतीयमान इति यावत्। दाशरथिः रामः।

(स) राजन्यपोत! क्षत्रियशिशो!।

सविधमिति।—सविध समीपम, उपसरन् समागच्छन्, त्वमिति शेषः, कुरङ्गः मृगः, करिणा इभेन, ये कुम्भाः शिरःप्रदेशाः, तेषां कूटानि शिखराणि, "कूटोऽस्त्री शिखरं शृङ्गम्" इत्यमरः, तेषां कोटिः तदाख्यसङ्घा, तत्र प्रकटः सुव्यक्तः, कठोरः तीक्ष्णः, नखाङ्कुरः नखाग्रं, नखचिह्नमिति यावत् यस्य तथाविधं, हरिमिव

राम. । (साक्षेपम्)। भगवन् भार्गव! गुरु-गर्भरूपयो-
रेतावदेवान्तरम् (इ)। किञ्च—

आदेष्टा भगवान् भृगुर्जननयोरौत्पत्तिकब्राह्मयो-
र्देवो धूर्जटिरस्त्रकर्मणि गुरुर्वीर्य्यं च दूरे गिराम्।
सप्तद्वीपवतीं ददद्भवमभिप्रेषि द्विजान् कश्यप-
प्रायानप्रतिमानुभाव! भवते कस्मैचिदस्मै नमः॥ २८॥

सिंहमिव, समूलकाषं समूलघातं यथा तथा, कर्षितः निहतः इति यावत्, भृगवान्वयः भार्गवकुलं येन तथाभूत, मां अद्य विनीषि प्रेषयसि, सिंहस्य गजेन्द्रघातिनः कुरङ्गदर्शने यथा अनायासेनैवास्थ अधो मया विषेय इति बुद्धा प्रीतिः, तथा महावीर्यक्षत्रियोच्छेदिनामिनो मम त्वद्दर्शने अनायासेनैव सुकोमलाकारस्य तव निधनं मया साधितव्यमिति प्रीतिरिति निष्कर्षः। यद्वा—गजघातिनः कठोर-प्रकृतेः सिंहस्य यथा अनायासवश्यस्यापि मृगस्य कोमलमनोहराकारदर्शनेन न हन्तव्योऽयं क्षुद्र इति सदयप्रीतिरसेन चित्तमार्द्रीभवति, तथा सर्वक्षत्रियान्तकस्य मम क्षत्रियस्यापि तव विनीतरमणीयमूर्त्तिदर्शनेन शिशुरयं न हन्तव्य इति चित्तं सदयप्रीतिरसेनार्द्रीभवतीति भावः। उपमालङ्कारः। पृथ्वीछन्दसो वृत्तम्॥ २८॥

(इ) गुर्विति।—गुरु पिता, गर्भरूपः बालकपुत्रस्य तयोः, यद्वा—गुरुर्महान्, गर्भरूपः क्षुद्रः तयोः, अत्र प्रभेदः, भवान् महान् अहं बालकः, तस्मात् अनायासेनैव भवान् हन्तुं क्षमते इति भावः। यद्वा—पुत्रादिदर्शनेन पित्रादीनामानन्दादयः स्वाभाविक एवेति भावः।

आदेष्टेति।—अप्रतिमानुभाव! हे अतुलनीयप्रभाव! भगवान् भृगु औत्पत्तिक-ब्राह्मयोः जननयोः जन्मनोः, उत्पत्तेरेकं जन्म, ततश्च सावित्र्यादिवेददानं द्वितीयं जन्म तयोरिति यावत्, आदेष्टा सम्पादकः, देवः धूर्जटिः शम्भुः अस्त्रकर्मणि धनुर्वेद-दीक्षायां, गुरुः आचार्यः, वीर्य्यं पराक्रमः, गिरां वाचां, दूरे अविषये इति यावत्, तिष्ठतीति शेषः, वर्णनातीतमिति यावत्, तवेति सर्वत्र सम्बध्यते, सप्तद्वीपवतीं "जम्बू प्लक्ष-कुश क्रौञ्च-शाक शाल्मलि पुष्कराः। द्वीपाः सप्त—॥" इत्युक्तप्रकारकसप्तद्वीप-समन्विता, भुवं पृथ्वीं, ददत् कश्यपप्रायान् कश्यपादीन्, द्विजान् ब्राह्मणान्, अभिप्रेषि सम्प्रदानत्वेन सङ्कल्पयसि, अत एव अस्मै इदानीं, कस्मैचित् अनिर्वचनीय-स्वरूपाय, भवते तुभ्यं, नमः, अस्त्विति शेषः। शार्दूलविक्रीडितं वृत्तम्॥२८॥

जामदग्न्य। अरे क्षत्रियडिम्भ। (क) तवानेन सत्त्व-सौजन्यपौरुषोत्कर्षेण किमप्यन्तराप्यायितोऽस्मि (ख)। किन्तु—

नाराचेः क्षतवीर्य्यनन्दनवधूबाष्पप्रियश्मश्रुकै-
रुत्पाद्य क्षतजोदमर्घमथ न्युप्तं पितृभ्यां पयः।
सम्प्रत्यस्य समस्तबाहुजभुजः क्रोधस्य निर्वाप्यतः
क्षुन्दानो धनुरैन्दुशेखरमहो! जातो भवानिन्धनम् ॥२०॥

राम:। (स्मित्वा)। भगवन्!—

बालस्वभावसुलभेन कुतूहलेन
क्षुण्णं धनुर्भगवतो वृषभध्वजस्य।
तत्रानुषङ्गिकममङ्गलमीदृशं तु
संवृत्तमत्र न मया गणितस्त्वमामीः ॥ २१ ॥

(क) क्षत्रियाडिम्भ। राजन्यशिशौ। "पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः" इत्यमरः।

(ख) सत्त्वेति।—सत्त्वं साहसं, महानुभावतेत्यर्थः, सौजन्यं साधुत्वं, विनीतत्वव्यवहार इत्यर्थः, तथा पौरुषं पराक्रमश्च, तेषां उत्कर्षेण अतिशयेन। अन्तः मनसि। आप्यायितोऽस्मि परितुष्टो भवामि।

नाराचैरिति।—क्षतवीर्य्यनन्दनस्य कार्त्तवीर्य्यार्जुनस्य, वधूनां नारीणां, बाष्पस्य अश्रुणः, प्रियश्मश्रुकैः प्रियकारिभिरित्यर्थः, तासां वैधव्यादिति, सर्वदा नेत्रान्तरवस्कन्दाना बाष्पाणां बहिर्निःसरणसाध्यत्वरणादिति वा भावः, नाराचैः अस्त्रविशेषैः, क्षतजोदं रक्तोदकं, "रक्त-क्षतज-शोणितम्" इत्यमरः; अर्घं सागरं, लक्ष्मणीयरक्तपूर्णसमुद्रमित्यर्थः, उत्पाद्य निर्माय, अथानन्तरं, पितृभ्यां मातापितृभ्यां, पयः शोणितरूपपानमित्यर्थः, न्युप्तं तर्पणार्थं दत्तमित्यर्थः, "पितृदानं निवापः स्यात्" इत्यमरः; सम्प्रति निर्वाप्यतः निर्वाणं गमिष्यतः, समस्तान् निखिलान्, बाहुजान् क्षत्रियान्, "बाहुजः क्षत्रियो विराट्" इत्यमरः; भुङ्क्ते यस्तेति तथोक्तस्य, अस्य क्रोधस्य कोपस्य, अग्निभूतस्येति भावः, ऐन्दुशेखरम् ऐशं, धनुः क्षुन्दानः खण्डयन्, भवान् इत्थं आर्द्रं, दाक्षिण्यमिति भावः, जातः, अहो! इति खेदसूचकमव्ययम्। आर्द्रलक्षिक्रोडितं वृत्तम् ॥ २० ॥

बालेति।—बालस्य शिशोः, स्वभावः प्रकृतिः, तेन सुलभं सुप्राप्यं, स्वतः सम्भवमित्यर्थः, तादृशेन, कुतूहलेन कौतुकेन, भगवतः वृषभध्वजस्य वृषवाहनस्य हरस्य,

जामदग्न्य.। (सरोषम्)। आः!! क्षुद्रक्षत्रियाडिम्भ! कथं प्रमथनाथप्रथमान्तेवासिनं (ग) परशुराममपि भवान्राजोगणत्!!—

महासेनो यस्य प्रमद! यमदंष्ट्रामहचरैः
शरैर्मुक्तो जीवन् हरिरिव शरजन्मा समभवत्।
इमाश्च क्षत्राणां भुजवनमहादुर्गविषमा-
मयं वीरो वारानजयदुपविंशान् वसुमतीम्॥ ३२॥

राजः। शान्तं शान्तम् (घ)। प्रसीद भगवन्। अविमृश्यकारितया (ङ) न गणितोऽसि, न पुनरवलेपात् (च)—

धनुः कृष्टम् आनमितं, मथेति शेषः, तु किन्तु, तव कर्षणे, आनुषङ्गिकं प्रसङ्गादागतम्, अनभिप्रायिकमित्यर्थः, अनुद्दिष्टमिति यावत्, ईदृशं तद्वत्कृष्टमिति भावः, अनल्पम् अयुग्म, सङ्गत सङ्गातम्, अत्र विषये, मया त्व गणितः आलोचितः, अन्तरायत्वेन चिन्तित इति यावत्, न आसीः, कर्मेदं तवाप्रियमिति मया न चिन्तितमिति भावः। वसुमतिसङ्गं दत्तम्॥ ३१॥

(ग) प्रमथेति।—प्रमथनाथस्य शिवस्य, "पिनाकी प्रमथाधिपः" इति शिवपर्य्याये अमरः; प्रथमः श्रेष्ठः, अन्तेवासी शिष्यः, तम्।

महासेन इति।—प्रमद! रे प्रकृष्टगर्व! ममागमनादिति भावः, महासेनः कार्त्तिकेयः, "कार्त्तिकेया महासेनः शरजन्मा षडानन." इत्यमरः, यस्य मम, यमदंष्ट्रामहचरैः कृतान्तदमनसदृशैः, शरैः बाणैः, मुक्तः परित्यक्तः सन्, परशुमुद्वहता मया साक्षात्हरत्वादिति भावः, जीवन् जीवितावशेषन्, हरिरिव द्वितीयवारमिव, शरजन्मा शरभूः, एकत्र शर शरवने, जन्म यस्य तथोक्तः, अन्यत्र शरात् शरसदृशबाणेभ्यः विमुक्ततया, जन्म पुनर्जीवनप्राप्तिः यस्य तथाभूतः, समभवत्, अयं वीरः सोऽहमिति भावः, उपविंशान् उपगता निकटस्था, विंशतिर्येषां तान् एकाधिकविंशतिसङ्ख्यकान्, वारान् क्षत्राणां क्षत्रियाणां, भुजवनानि एव महान्ति उत्कटानि इत्यर्थः, दुर्गाणि दुर्गमदेशाः, तैः विषमा दारुणा ता, क्षत्रियाणामत्याचारेण सज्जनवासायोग्यानीति भावः, इमा वसुमतीञ्च अजयत् जितवान्; रे मूर्ख! एतावतो ते स्पर्द्धा बत, एवम्भूतोऽहं तव गणनाया योग्यः? इति भावः। शिखरिणी वृत्तम्॥ ३२॥

(घ) शान्तं शान्तं निवृत्तं निवृत्तं, भगवान् मया न गणित इति कृत्वा नैव कर्त्तव्या नैव कर्त्तव्या इति भावः।

(ङ) अविमृश्यकारितया अविवेचितया, अज्ञानतयेत्यर्थः।

(च) अवलेपात् गर्वात्।

स्त्रीषु प्रवीरजननी जननी तवैव
देवी स्वयं भगवती गिरिजाऽपि यस्यै ।
त्वद्दोर्वशोक्तविशाखमुखावलोक-
व्रीडाविदीर्णहृदया स्पृहयाम्बभूव ॥ २३ ॥

जामदग्न्यः । (विहस्य) । रे राजन्यपोत !—

अनुभवपुनरुक्तां मुञ्च नः स्तोत्रचर्या-
मुपनमय तदेतत्कौशिकोपज्ञमस्त्रम् ।
क्षिपति न खलु कालं वीरगोष्ठीविनोद-
प्रियपरशुरयं मे बाहुरुद्यच्छमानः ॥ २४ ॥

स्त्रीष्विति ।—तवैव जननी माता, स्त्रीषु नारीजातिषु मध्ये, प्रवीरजननी प्रकृष्ट-वीरप्रसविनी, स्वयं भगवती देवी गिरिजाऽपि गौरी अपि, तव दोष्णा भुजेन, यद्वीरोक्तस्य निर्जितस्य, विशाखस्य कार्त्तिकेयस्य, "विशाखः शिरखवाहनः" इति कार्त्तिकेयपर्य्याये अमरः, मुखावलोकेन वदनदर्शनेन, पराभवज्ञानतमलिनमुखदर्शनेनेति भावः, या व्रीडा लज्जा, तया विदीर्णं प्रस्फुटितं, दुःखितमिति यावत्, हृदयं यस्याः: तथाभूता सती, यस्यै तव भावे, स्पृहयाम्बभूव स्पृहां चकार, यस्याः पुत्रः मम मन्दनमपि निर्जितवानिति स्वतोऽपि यस्याः: गौरवम् अङ्गीचकार, धन्या सा भार्गवमाता इति भावः । वसन्ततिलकं वृत्तम् ॥ २३ ॥

अनुभवेति ।—अनुभवेन अनुभूत्या, पुनरुक्तां पुनःकथिता, नः अस्माकं, स्तोत्रचर्य्यां स्तुतिप्रक्रियां, मुञ्च त्यज, अद्य वीरो न वेति स्वयमनुभूय एव मम स्तुतिं कुरु, किं पुनः पुरावृत्तालोचनेन ? इति भावः, तत् तस्मात्, कौशिकात् विश्वामित्रात्, उपज्ञा आद्यं ज्ञानं यस्य तथोक्तम्, "उपज्ञा ज्ञानमाद्यं स्यात्" इत्यमरः, एतत् तव करधृतमित्यर्थः, अस्त्रं धनुरिति यावत्, उपनमय आरोपय, गुणयेति यावत्, वीरगोष्ठी वीराणां सभा, मद्गामभूमिरित्यर्थः, "गोष्ठी सभा सलापथोः स्त्रियाम्" इति मेदिनी ; तस्या विनोदे चित्तरञ्जने, प्रियः प्रीतिजनकः मदीयः इत्यर्थः, परशुः कुठारः यस्य तथाभूतः, उद्यच्छमानः उद्यतो भवन्, मे मम, अयं परिदृश्यमानः, बाहुः भुजः, कालं समयं, न खलु नैव, क्षिपति अतिक्रामति, भुजो मे इदा समयक्षपं न सहते, त्वरितमस्त्रं गृहाणेति भावः । साक्षिणीवृत्तं—"न नमयतेयं साक्षिणी नीगिणौ चेत्" इति तल्लक्षणात् ॥ २४ ॥

रामः। (स्वगतम्)। अये! भगवन्तं विश्वामित्रमपि स्मृणाति!!

(छ) भवत्वेवं (ज) तावत्। (प्रकाशं सघैर्यक्षितम्)।—

भूमात्रं क्रियदेतदर्णवमयं तत्साधितं हार्यते
यद्वीरेण भवादृशेन वदति त्रिःसप्तकृत्वो जयः।
डिम्भोऽयं नवबाहुरौद्धमिदं घोरञ्च वीरव्रतं
तत्कोपाद्विरम प्रसीद भगवन्! जात्येव पूज्योऽसि नः॥३५॥

(छ) स्मृणाति आक्रम्य आनयतीत्यर्थः, आक्षिपतीति यावत्, कौशिकोपक्रमस्तस्मिन्निति ध्वनिनेति भावः।

(ज) भवत्वेवमिति।—अतः परं वीरोचितं व्यवहर्त्तव्यमिति भावः।

भूमात्रमिति।—एतत् भूमात्रं भूमण्डलमेव, क्रियत् अत्यल्पमित्यर्थः, तदपि अर्णवमयं समुद्रव्याप्तं, भवादृशेन भवत्सदृशेन, वीरेण साधितं जितं, तत् भूमात्रमिति शेषः, यत् हार्य्यते भवादृशवीरात् आच्छिद्य अन्येनापाक्रियते इति भावः, त्रिःसप्तकृत्वो जयः एकविंशतिवारविजयः, तत् वदति कथयति, भवान् यथा त्रिःसप्तकृत्वः क्षत्रान् निहत्य एतद्भूमण्डलं तथा हृतवान्, एवमयं कौशिकोऽपि भवत्सकाशात् एतन्नेतुं शक्नोति, परन्तु यदि मध्ये तत् न हार्य्यते, तदा कथं पुनर्जयप्रयासः? एकोद्यमेनैव जयस्य सिद्धत्वादिति भावः, यद्वा—भवादृशेन वीरेण अर्णवमयं समुद्रवेष्टितं, क्रियदेतत् भूमात्रम् अल्पक्षेत्रकं पार्थिवराज्यमात्रमित्यर्थः, न तु अपार्थिवं मोक्षपदं, बहुजीवविनाशादिति भावः, यत् साधितम् आयत्तीकृतं, तत् त्रिःसप्तकृत्वो जयः तव विजयः, वदति, किन्तु हार्य्यते भवता साधितं तत् भूमात्रं केनापि कदाऽपि हर्त्तुं शक्यते, भवादृशवीरादपि आच्छिद्य अन्येन केनापि तदपहर्त्तुं शक्यते, अतः गर्वं त्यज इति भावः, नवबाहुः कोमलभुजः, अशिक्षितइत्यस्य इति यावत्, अयं माद्दृशः, जन इति शेषः, डिम्भः बालकः, बालत्वात् अद्यापि अस्त्रव्यवहारकौशलानभिज्ञ इति भावः, इदं वीरव्रतञ्च वीरचर्य्यानियमश्च, ईदृशम् एवविधं, घोरं भयानकं, कठोरमित्यर्थः, पूज्यापूज्यविचारविमुखमिति भावः, तत् तस्मात्, कोपात् क्रोधात्, विरम विरतो भव, क्रोधं परित्यजेत्यर्थः, हे भगवन्! प्रसीद प्रसन्नो भव, जात्येव ब्रह्मण्येनैव, न तु वीर्य्येणैवेत्यवधारणार्थं इति भावः, नः अस्माकं, पूज्यः आराधनीयः, असि भवसि, कोमलबाहुना बालकेन मया यदि भवतः पराजयः स्यात्, तदा भवतोऽतीवावमाननम्, अस्माकञ्च पूज्यपूजाव्यतिक्रमः, स्यादिति कोपात् विरत्या अस्मासु प्रसाद एव भवतः श्रेयानिति भावः। शार्दूलविक्रीडितं वृत्तम्॥३५॥

जामदग्न्यः । (सक्रोधं-सभयं स्वगतम्) । अहो! दुरात्मनोऽस्य राजन्यपोतस्य वीरप्रहतायाः पङ्क्तेरस्खलितमुक्ति-प्रत्युक्तिवैदग्ध्यम् !! (झ) । (प्रकाशम्)। आः !! पाप ! जात्यैव केवलया (ञ) पूज्यस्ते परशुरामः !! कथमद्यापि निरायुधोऽसि !! (ट)—

विनयनिचुलितैर्भवद्वचोभिः
किमपि नव विभुर्णाङ्गिरङ्गमन्तः ।
अयमजनि करः कृतान्त-
दंष्ट्राक्रकचकठोरकुठारदुर्निरीक्ष्यः ॥ ३६ ॥

(सचैत्र)। अहो ! नु खलु भोः !—

त्रैलोक्यत्राणशौण्डः सरसिजवसतेर्यः प्रसूतो भुजाभ्यां
स क्षत्रं नाम वर्णः कुलिशकठिनयोर्यस्य दोष्णोर्विलीनः ।

(झ) वीरप्रहतायाः वीरजनक्षुण्णायाः, वीरजनानुसृतायां इति यावत्, पङ्क्तेः आचारात्, अस्खलितम् अभ्रष्टम् । उक्ति-प्रत्युक्तिवैदग्ध्यं वचन-प्रतिवचनचातुर्यम् ।

(ञ) केवलया एकया, एकमात्रया इत्यर्थः, न तु कैवल्येनेति भावः । "एके मुख्यान्यकेवला" इत्यमरः ।

(ट) निरायुधोऽसि निरस्त्रः भवसि, शस्त्रमगृह्णन् तिष्ठसीत्यर्थः ।

विनयेति ।—विनयेन शिष्टाचारेण, निचुलितैः पिहितैः, विनयाभासयुक्तैरित्यर्थः, अलङ्कृतैरिति भावः, किमपि अवाच्यम्, अन्तः मनसि, स्थितमिति शेषः, नवम् अश्रुतपूर्वमिति यावत्, अङ्गं खलु, "तत्साधितं ज्ञाप्यते" इति पूर्वोक्तम् अपवादरूपमिति यावत्, विभुर्हि: प्रकटयाङ्गं, भवद्वचोभिः तव वचनैः, अयम् एषः, करः हस्तः, कृतान्तस्य यमस्य, दंष्ट्रा दन्त एव, क्रकचः करपत्रं, "करात" इति प्रसिद्धः, "क्रकचोऽस्त्री करपत्रम्" इत्यमरः ; तद्वत् कठोरः दारुणः, यः कुठारः तेन दुर्निरीक्ष्यः दुर्दर्शः, भीषण इति यावत्, अजनि जातः । पुष्पिताग्रा वृत्तम् ॥३६॥

त्रैलोक्येति ।—त्रैलोक्यस्य त्रिभुवनस्य, त्राणेन परिरक्षणेन, शौण्डः मत्तः ख्यातो वा, "शौण्डो मत्ते च विख्याते दर्पप्रागल्ययोरपि स्मृतः" इति विश्वः, यः सरसिजवसतेः कमलासनस्य, ब्रह्मण इत्यर्थः, भुजाभ्यां बाहुभ्यां, प्रसूतः उत्पन्नः, "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः" इति श्रुतेः ; अत एव "बाहुजः क्षत्रियो विराट्" इत्यमरः, सः प्रसिद्धः, क्षत्र नाम वर्णः क्षत्रियजातिः, यस्य परशुरामस्य, कुलिशकठिनयोः वज्रवत्

ज्वालाजिह्वालकालाननकवलभयभ्रान्तदेवासुराणि
व्यातन्वानो जगन्ति ज्वलति मुनिरयं पार्वतीधर्मपुत्रः ॥३७॥
(नेपथ्ये)।

भगवन् भार्गव!—

अप्रवृत्तिविषयं वितन्वतः
क्षत्रशब्दमियमेव मेदिनी।
दक्षिणा तव बभूव यज्वनो
मुञ्च सम्प्रति तु शुष्कमायुधम् ॥ ३८ ॥

जामदग्न्यः। अये! प्रशान्तगम्भीरः क एषः? तर्हि जनकेन भवितव्यम्। (तदभिमुखमवलोक्य)। राजर्षे सीरध्वज! भगवतः सूर्यस्यशिष्यात् पुराणवाजसनेयिनो (ठ) याज्ञवल्क्यादधीत-

---

ऋठीरथोः, दीप्तोः बाह्वोः, विलीनः लयं गतः, विलुप्त इत्यर्थः, पार्वतीधर्मपुत्रः गौर्या धर्मपुत्रः, सोऽयं मुनिः भार्गवः, जगन्ति ज्वालया शिखया, जिह्वाः जिह्वावान्, प्रशस्तजिह्वायुक्त इत्यर्थः, यः कालानलः प्रलयाग्निः, तस्य कवलात् ग्रासात्, तेन भक्षीभवनादिति यावत्, यत भयं तेन भ्रान्ताः चलिताः, इतस्ततः पलायिताः इत्यर्थः, देवासुरा येषु तथाभूतानि, व्यातन्वानः विस्तारयन्, कुर्वन्नित्यर्थः, ज्वलति दीप्यते, क्रोधप्रज्वलितः तिष्ठतीत्यर्थः। स्रग्धरा वृत्तम् ॥ ३७ ॥

अप्रवृत्तिविषयमिति।—क्षत्रशब्दः क्षतित्रायते अत्तरक्षणे, क्षतियेति संज्ञायामिति यावत्, अप्रवृत्तिविषयं प्रयोगागोचरताम्, उत्सारयन्नपि अनुपयुक्ततामित्यर्थः, शक्यता-वच्छेदकतायुक्तमिति यावत्, वितन्वतः विस्तारयतः, क्षतियशब्दस्यापि विलोपं साधयत इति भावः, यज्वनः याज्ञिकस्य, तव इयमेव एषैव, मेदिनी पृथिवी, दक्षिणा यज्ञादिसमाप्तौ देयधनस्वरूपिणीत्यर्थः, बभूव, सर्वान् क्षतियान् निहत्य यज्ञं कृत्वा त्वं पृथ्वीं दक्षिणात्वेन दत्तवानसीति निष्कर्षः, सम्प्रति तु इदानीन्तु, शुष्क सर्वजनविघनेन प्रतिहन्तिविरहात् अक्षिञ्चित्करत्वेन रसशून्य, विफलमिति भावः, आयुधम् अस्त्रं, मुञ्च त्यज। रथोद्धता वृत्तम्—"रात् परैर्नरलगै रथोद्धता" इति तल्लक्षणात्। जनकोक्तिरियम ॥ ३८ ॥

(ठ) पुराणवाजसनेयिनः पुराणमयजुर्वेदविदः।

ब्रह्मसिद्धान्तो गृहीतवाक्य (ङ) एवासि। किन्तु नायमवसरः शिष्टानुरोधस्य (ढ)—

अवनिमधिकविंशानभ्यवस्कन्य वारा-
नवभृथभृतकेभ्यः सम्प्रदाय द्विजेभ्यः।
विरमति रमणीयात् द्वन्द्वयुद्धात् कथं मे
निखिलनृपतिहत्यादृष्टसारः कुठारः? ॥ १९ ॥

(पुनर्नेपथ्ये)—

भृगुतिलक! नमस्ते मुञ्च वैमत्यमेतत्
कुरु करुणमिदानीं मानसं मानशौण्ड!।

(ङ) अधीतेति।—अधीतः पठितः, ब्रह्मसिद्धान्तः ब्रह्ममीमांसा, वेदसार इति यावत् येन तथाभूतः। गृहीतवाक्यः गृहीतं स्वीकृतमित्यर्थः, समाहृतमिति यावत्, वाक्यं वचनं यस्य तथाभूतः, पूर्वं तव वाक्यं मया प्रतिपालितमिति भावः।

(ढ) अवसरः समयः। शिष्टानुरोधस्य शिष्टस्य सज्जनस्य, तवेति भावः, अनुरोधः अनुवर्त्तनं, चित्ताराधनमित्यर्थः तस्य, इच्छापूरणेन तव प्रीतिसम्पादनस्येत्यर्थः, "अनुरोधोऽनुवर्त्तनम्" इत्यमरः।

अवनिमिति।—अधिकविंशान् विंशतेरधिकान्, वारान् एकविंशतिवारानित्यर्थः, अवनिं पृथ्वीम्, अवस्कन्य आक्रम्य, क्षत्रियेभ्यः आच्छिद्येत्यर्थः, अवभृथः दीक्षान्तः, यज्ञसमाप्तौ क्रियमाणयागविशेष इत्यर्थः, "दीक्षान्तोऽवभृथो यज्ञः" इत्यमरः, तत्र ये भृतकाः वैतनिकाः, ऋत्विज इत्यर्थः तादृशेभ्यः, द्विजेभ्यः ब्राह्मणेभ्यः, कश्यपादिभ्य इति भावः, अवनिं पृथिवीं, सम्प्रदाय दत्त्वा, दक्षिणात्वेनेति भावः, स्थितस्येत्यध्याहारः, मे मम, निखिलानां सकलानां, नृपतीनां राज्ञां, क्षत्रियाणां वा, हत्यया वधेन, दृष्टः अवलोकितः, लोकैरिति भावः, सारः बलं, सामर्थ्यमिति यावत् यस्य तथाभूतः, कुठारः रमणीयात् प्रमोदजननात्, द्वन्द्वयुद्धात् द्वन्द्वयोः द्वयोरेव वीरयोरन्योऽन्यं युद्धं तत् द्वन्द्वयुद्धं तस्मात् सम्मुखसमरात्, कथं केन प्रकारेण च, विरमति? निवर्त्तते? नैव विरन्तुं शक्नोतीत्यर्थः। मालिनी वृत्तम् ॥ १९ ॥

भृगुतिलकेति।—भृगुतिलक! हे भार्गवकुलललाटभूषण! ते तुभ्यं, नमः, अस्तु इति शेषः, एतत् वैमत्यं विरुद्धा मतिः, चित्तविकारमित्यर्थः, क्रोधमिति यावत्, मुञ्च त्यज, मानशौण्ड! हे मानगर्वित! यद्वा—हे मानोन्नत! इदानीं मानसं चित्तं,

वहति वत किमस्त्रं पुत्रभाण्डेऽपि रामे
त्रिजगदभयदानस्थूललक्ष्यो भुजस्ते ? ॥ ४० ॥

जामदग्न्यः। (रामं प्रति)। अये ! धीरकर्कशस्वरः (ण) क्व एषः।

रामः। (सप्रश्रयम् (त))। भगवन् ! अयं तस्तातो रघुपतिः।

जामदग्न्यः। (सत्रपम् (थ))। धिक् ! सर्वतः क्षत्रकलम्बो-ड्डीदः (द)। (नेपथ्याभिमुखमवलोक्य)। भो राजन् दशरथ ! अस्मन्नामधेयमात्रमित्रेण (ध) पुत्रेणानुना मानार्हो (न)

तवेति शेषः, करुणं सदय, कुरु, त्रिजगतां भुवनत्रयाणाम्, अभयदाने भयात् त्राणकरणे, स्थूललक्ष्यः महान्तः, अत्युदार इत्यर्थः, "स्थूलं दान्यस्थूललक्ष्यौ दानशौण्डौ महाप्रदे" इत्यमरः, ते तव, भुजः बाहुः, पुत्रभाण्डे पुत्र एव भाण्ड मूलधनं तस्मिन्, रामे अपि क्षुद्रशिशौ अपि इति भावः, किं कथम्, अस्त्रं वहति ? धारयति ? वत खेदे। मालिनी वृत्तम्। दशरथोक्तिरियम् ॥ ४० ॥

(ण) धीरेति।—धीरः अचञ्चलः, गम्भीरः इति यावत्, कर्कशः कठोरश्च, सुकुमारदेहं शिशुं पुत्रतुल्यं रामं प्रति कठोरव्यवहारादिति भावः, स्वरः यस्य तथाभूतः।

(त) सप्रश्रयं सविनयम्।

(थ) सत्रपं सलज्जम्।

(द) धिक् निन्दायाम्, आत्मानमिति भावः, "धिङ्निर्भर्त्सननिन्दयोः" इत्यमरः। सर्वतः समन्तात्, क्षत्रकलम्बानां क्षत्रियाङ्कुराणाम्, उड्डीदः प्रकाशः, मयि विद्यमाने इदानीमपि बहवः क्षत्राः मत्सकाशं समवेता इत्यात्मनो धिक्कार इति भावः। "क्षत्र-कलम्बोड्डीदः" इत्यत्र "क्षत्रकदम्बोड्डीदः" इति पाठकल्पनं समीचीनं, कलम्बशब्दस्य अङ्कुरार्थे कुत्रापि प्रयोगादर्शनात्, कदम्बशब्दस्य च समूहार्थकत्वादिति सुधीभि-र्विभाव्यम्।

(ध) अस्मन्नामधेयेति।—अस्माकं नामधेयमात्रं रामेति नाममात्रं, तेन मित्रं सखा तेन, मात्रपदेन वीर्यादिभाव इति सूचितम्।

(न) मानार्हः सम्माननीयः, सख्युः पितुः स्वपितृतुल्यत्वादिति भावः। श्लोकोक्तिरियम्।

भवान् । किं पुनः (प) अनभिज्ञोऽसि वीरव्यवहारस्य (फ) ।—

पुरमथनधनुर्विमर्दनोत्थं
प्रदहदहर्दिवमस्ति तीव्रमर्चिः ।
रघुजनककुटुम्बवाष्पपूरैः
परमिह शान्तिमुपयन्ति शस्त्रभाजः ॥ ४१ ॥

(नेपथ्ये) ।

आः !! (ब) जामदग्न्य ! किमेवमतिप्रसक्तः सज्यस्तशस्त्रान् (भ) अस्मानपि बलाद्धनुर्गाहयसि ?

जामदग्न्यः । (सरोषम्) । अरे विदेहप्रसवपांशुल ! (म)—

अयमधिपतिर्भासामेकान्तरो भवतो गुरु-
स्त्वमसि तपसा यद्वर्षीयानिति स्म तितिक्ष्यसे ।

(प) किं पुनः किन्तु ।

(फ) वीरव्यवहारस्य वीरचर्य्यायाः ।

पुरमथनेति ।—पुरमथनस्य त्रिपुरारेः, धनुषः चापस्य, विमर्दनोत्थं मज्जनसमुद्भूतं, तीव्रम् उग्रम्, अर्चिः शिखा, तेजः इति यावत्, कोधाग्नेरिति भावः, अहर्दिवम् अहरहः, प्रतिदिनमित्यर्थः, प्रदहत् सन्तापयदिति यावत्, आस्तिति शेषः, अस्ति वर्त्तते, इह अस्मिन् अर्चिषि, शस्त्रभाजः शस्त्रव्यवहारिणः, वयमिति शेषः, रघु जनकयोः रघुवंशीय-जनकवंशीययोः, कुटुम्बानां परिजनानां, बाष्पपूरैः अश्रुप्रवाहैः, शान्तिम् उपशमम्, उपयन्ति कामयन्ते, रामनिधने रघुवंश्या जनकवंश्याश्च पुत्रशोकेन, जामदग्न्यशोकेन च यदि रुदन्ति तदेव मे कोपशान्तिः स्यादिति भावः । तात्पर्येण, पाठक्रमम् ॥ ४१ ॥

(ब) आः !! इति कोपे, "आस्तु स्यात् कोप-पीडयोः" इत्यमरः ।

(भ) अतिप्रसक्तः अतिदर्पितः । सज्यस्तशस्त्रान् व्यस्तायुधान् । जनकोत्तिरियम् ।

(म) विदेहप्रसवपांशुल । जनकवंशीयाधम ।

अयमिति ।—भासा तेजसान्, अधिपतिः प्रभुः, अयं परिदृश्यमानः, सूर्यः इत्यर्थः, भवतः एकान्तरः एकेन व्यवहितः, गुरुः आचार्यः, याज्ञवल्क्यात् सूर्यादधीतं, त्वया तु याज्ञवल्क्यादिति सूर्यस्य तव गुरुत्वमेकान्तरमिति भावः, यत यतः, त्वं तपसा तपश्चरणेन, वर्षीयान् अतिवृद्धः, असि, "तपसे" इति पाठे—त्वं वर्षीयान् असि, तथापि त्वयि

कथमसि धनुर्नामग्राही ? तदेष समाप्यते
मम हि सकलक्षत्रालम्भक्रतोरमृतं भवान् ॥ ४२ ॥

(नेपथ्ये)।

भार्गव ! भार्गव ! अवनादिहृद्धवाक्यगौरवनिगृहीतसम्प्रहार-क्रियासमभिहारस्य तत्रभवतः (य) परमे ब्रह्मणि वर्त्तमानस्य (र) पुनरुत्पद्यन्ते (ल) बुद्धयः। तत् विरम, क्रियच्चिरम् (व) इतः परमपि नाटयिष्यति (श) भवन्तमायुधपिशाची ? (ष)।

जामदग्न्यः। (विहस्य)। अहो ! याज्यस्नेहः (स) शतानन्द-

पश्यसि, इति हेतोः, तितिक्षसे च यस्मात् च, त्वान्योऽसि इत्यर्थः, त्वां प्रति मया इमा गृहीतेति भावः, इदानीं कथं खिन्नमर्थं, धनुर्नामग्राही धनुषः नाम गृहीतवान्, असि ? भवसि ? तत् तस्मात्, धनुर्नामग्रहणादित्यर्थः, तपोविरुद्धक्षत्रियाचारावलम्बनस्य अभिप्रायप्रकटनादिति भावः, एषः, त्वमिति शेषः, समाप्यते शेषो क्रियते, त्वा त्वं सुमा'स हत्यं शोभसे इत्यर्थः, त्वा इत्योति भावः, भवान् मम सकलानां क्षत्रियाणां, क्षत्राचार आलम्भ एव वध एव, क्रतुर्यज्ञः, तस्य अमृतं हि शेषीभूतः, "अमृतं यज्ञशेषे स्यात्" इति विश्वः। इतिशब्दो हेतौ ॥ ४२ ॥

(य) अवनादीति।—अवनादीनां हृद्धानां त्वत्पूर्वपुरुषाणामिति यावत्, वाक्यस्य "परशुराम ! गृहीतं क्षत्रियसंहारात् विरम" इति वचनस्य, गौरवेण गुरुत्वेन, तेषां वाक्येषु मन्यानप्रदर्शनेन इत्यर्थः, निगृहीतः संवृतः, परित्यक्तः इत्यर्थः, सम्प्रहारस्य युद्धस्य, क्रियासमभिहारः पौनःपुन्येन समाचरणं येन तथाभूतस्य। तत्रभवतः पूज्यस्य।

(र) परमे ब्रह्मणि परमात्मनि, ब्रह्मचिन्तने इति यावत्, वर्त्तमानस्य निरतस्य।

(ल) उत्पद्यन्ते विपर्ययं प्राप्नुवन्ति।

(व) क्रियच्चिरं कियत्कालमित्यर्थः।

(श) नाटयिष्यति नर्त्तयिष्यति।

(ष) आयुधपिशाची शस्त्रधारणजातवाहपा पिशाचयोनिः। भार्गवेत्यादि पिशाचोक्त्या च क्रूरः शतानन्दस्येति बोध्यम्।

(स) याज्यस्नेहः याज्यस्य यजमानस्य, जनकस्येति भावः, स्नेहः प्रियता, जनकबुद्धिरिति यावत्।

माकुलयति (ङ)। भवतु, सान्त्वयामि तावदेनम्। (तदभिमुखम्)। आङ्गिरस!—

नृपस्ते पाल्योऽयं मम पशुपुरोडाशरसिकः
पृथिव्यामव्याजोद्भटभुजभृतः सन्ति रघवः।
अमीषामुत्सिक्तं किमपि कुलमुत्कृत्य लवशो
विधाता तत् सर्वं यदभिरुचितं ते भृगुपतिः॥ ४२॥

(नेपथ्ये)। आः पाप! क्षत्रियायाः पुत्र! क्षत्रियभ्रूणहत्या-पातकिन्! निसर्गनिष्ठ्राणां हि प्रहरणम् (क) इक्ष्वाकूणां ब्राह्मणेषु; तैर्यादृशस्तादृशो वा सोढव्योऽसि (ख)। कथमेव-मतिक्रामन्नस्माकमपि ब्रह्मवर्चसात् (ग) न बिभेषि?

(ङ) आकुलयति व्यतिरोधयति।

नृप इति।—पशुपुरोडाशे पशुरङ्गानो वपो वा, स एव पुरोडाशः इत्यभेदः, "पुरोडाशो हविर्भेद वपायां पिष्टजन्म च" इति विश्वः, तत्र रसिकः अनुरागी, सततं ब्रह्मानुष्ठानपर इति भावः, ते तव, अयम् एषः यजमानः, नृपः जनकः, मम नयेत्यर्थः, पाल्यः रक्षणीयः, तव पाल्यमेनं न हन्मीति भावः, किन्तु रघवः रघुवंश्याः, पृथिव्याम् अव्याजम् अकपटम्, उद्भटम् उद्धतं, सर्वंसहिष्णवः, भुजं बाहुं, बिभ्रति धारयन्तीति तथोक्ताः, सन्ति विद्यन्ते, रघुवंश्या: पृथिव्यामिदानीं सदाचारशालिनो भुजबलगर्वितास्य आत्मानमजेयं मन्यन्ते इति भावः, अमीषां रघूणां, किमपि वर्णना-तीतम्, उत्सिक्तं गर्वितं, कुलं वंशं, लवशः खण्डशः, उत्कृत्य छित्त्वा, विनाश्येति यावत्, भृगुपतिः परशुरामः, ते तव, यत् अभिरुचितम् इष्टम्, अस्मत्सामर्थ्यमिति भावः, तत् सर्वं विधाता विधास्यति, रघून् समूलं विनाश्य अस्मत्यागं करिष्यामीति निष्कर्षः। आङ्गिरसो गतम्। ४२॥

(ख) क्षत्रियायाः क्षत्रियस्य गर्भे: जन्या रेणुका तस्याः, पुत्र तत्सम्बुद्धौ। क्षत्रियेति।—क्षत्रियाणां क्षत्रियस्त्रीणां, भ्रूणाः गर्भस्थाः शिशवः, तेषां हत्या वधः, तया पातकी पापी तत्सम्बुद्धौ। क्षत्रियाणामेवंजातीयस्य तव क्षत्रियभ्रूणहत्या अतीव निर्घृणतायाः परिचायिका जमानाहं चेति भावः। निसर्गनिष्ठ्राणां स्वभावतो दुर्वृत्तं, स्वभावत एव ब्रह्महत्यादिमुखमिति भावः। प्रहरणम् अस्त्रम्।

(ग) तैः इक्ष्वाकुभिः, यादृशस्तादृशः यथा तथा, अत्रिदुराचारोऽपि ब्राह्मण इति ज्ञात्वा इति भावः, सोढव्योऽपि क्षन्तव्योऽसि।

आनन्दयाः। (सरोषं हासम्)। अरे ब्रह्मबन्धो! बान्धकिनेय! गौतमगोत्रपांसन! (घ)—

कुर्युः ब्रह्मकथाममी यदि मनोर्वंशे मनुष्याङ्कुराः
ज्ञास्येत् ब्रह्मगणोऽयमाकृतिगणस्तत्रेष्यते चेन्नवान्।
सम्राजां समिधां च साधकतमं धत्ते छिदाकारणं
धिङ्मौर्वीकुशकर्षणोल्बणकिणग्रन्थिर्ममायं करः॥ ४४॥

(ग) अतिक्रामन् उल्लङ्घयन्, अवज्ञानन् इति यावत्। ब्रह्मवर्चसात् ब्रह्मतेजसः, ब्रह्मतेजसा त्वां दग्धुं क्षमोऽस्मीति भावः। ब्राह्मणानुरागिणः दक्षाक्षयः दुष्टमपि त्वां ब्राह्मण इति कृत्वा क्षमामर्हन्ति, न पुनर्वयं ब्राह्मणा इति भावः। आः पापेत्यादि विमर्शोत्तरा उक्तिरपि प्रतानन्दस्येवेति बोध्यम।

(घ) ब्रह्मबन्धो! ब्राह्मणाधम! "ब्रह्मबन्धुरविशेषे निर्दोशे" इत्यमरः। बान्धकिनेय! बन्धकी कुट्टनी, तत्पुत्रः तत्सम्बुद्धौ बौधटेय! कुट्टनीपुत्र! इत्यर्थः। "अथ बान्धकिनेयः स्यात् बन्धुलायां तु बौधटेयः बौधटेरः" इत्यमरः; प्रतानन्दस्य मातुरुड्डायां देवेन्द्रसङ्गमात् बन्धकीत्वमिति भावः। गौतमगोत्रपांसन! गौतमवंशाधम!

कुर्युरिति।—यदि मनोः वंशे कुले, उत्पन्ना इति शेषः, अमी वानादिजनकुल्या निर्दिश्य एते, मनुष्याङ्कुराः मानवपोताः, अङ्कुरवत् अनायासमुत्पाट्योग्याः क्षुद्रमानवा इति भावः, ब्रह्मकथां ब्रह्मव्यवहारकथां, वयं ब्रह्मप्रयोगकुशला इत्येवम् आलापनिमित्तं, कुर्युः, आलत्वा अवधेर्वन, शिक्षा-सूत्र मौञ्जमेखलादिचिह्नमात्रेणेति यावत्, न तु ब्रह्मज्ञानादिनेति भावः, गण्यते ज्ञाप्यते इति आकृतिगणः ब्राह्मणत्वेनव्यवहारोति यावत्, अयं, जनक इतिःशेषः, चेत् यदि, ब्रह्मगणः ब्राह्मणत्वेन गणनीयः, स्यात् भवेत्, तदा तत्र ब्रह्मगणे, भवान् प्रतानन्दः इति यावत्, इष्यते गण्यते, ब्राह्मणत्वेनेति भावः, चेत्, तर्हि मौर्वी ग्रन्थिनी, तथा कुशाः दर्भाः, विशुद्धब्राह्मणचिह्नमिति भावः, तेषां कर्षणेन उल्बणः उत्कटः, किणग्रन्थिः गुच्छकठिनमांसग्रन्थिः यस्मिन् तथाभूतः, मम अयं करः हस्तः, सम्राजां राजाधिराजानां, समिधां क्षौणीयजमानानाञ्च, छिदाकारणं छेदनार्थे, साधकतमं करणं, कुठारमिति यावत्, "करणं साधकतमं चेन्द्रियेष्वपि" इत्यमरः, धिक् निष्फलं यथा तथा, धत्ते धारयति। अत्र धिक्शब्दस्य निष्फलार्थत्वात् तदर्थेन न द्वितीया, निन्दा-निर्भर्त्सनार्थयोरेव तद्विधानात्। "धिङ्

(नेपथ्ये)।

भगवन् भार्गव ! भार्गव—

त्वं वेदवानसि वशिष्ठगुरोः सनाभिः
स्वायम्भुवः स भगवान् प्रभवो गुरुस्ते।
तेनातिमात्रमसृणं हृदयं मदीय-
मद्यापि न त्रुटति शाम्यतु ते कुदृष्टिः॥ ४५॥

जामदग्न्यः। (श्रोत्रेहस्तं दत्त्वा)। किमात्थ रे दशरथ! किमात्थ? नाद्यापि हृदयं त्रुटतीति; कथं वा त्रुटतु यावदेव न व्यापियते (ङ) परशुः?

अर्थाने च निन्दायां निश्चले कुत्सितेऽपि च" इति विश्वः। मनुवंशाद्धेतोरेते चेत् वीराः स्युः, कुलटापुत्रः त्वत्तश्चेत् ब्रह्मवः स्यात्, तदा मम कुठारश्च एते मनुवंशाद्वत्तश्च औग्रं नारभेयाः इति भावः। आर्द्रज्वलिकोक्तं दत्तम॥ ४४॥

त्वमिति।—त्वं वेदवान् वेदवित्, तवापि वशिष्ठ एव गुरुः, तस्य सनाभिः सपिण्डः, एकगोत्रभवः इत्यर्थः, "सपिण्डास्तु सनाभयः" इत्यमरः; अस्ति भवसि, वशिष्ठसनाभित्वं प्रकटयन्नाह, स्वायम्भुवः ब्रह्मपुत्रः, सः नारायणस्यापि वक्षसि पदाघातकारी, अत एव त्रिलोकपूज्यः इत्यर्थः, भगवान् भृगुरिति भावः, ते तव, प्रभवः जन्महेतुः, उत्पत्तिकारणमित्यर्थः, "स्याज्जन्महेतुः प्रभवः स्थानस्थाधीपलब्धयें" इत्यमरः; गुरुः आदिपुरुष इति यावत्; "गुरुस्ते" इत्यत्र "गुरोस्ते" इति पाठकल्पनं सङ्गतं, तथात्वे स भगवान् स्वायम्भुवः ते तव, गुरोः पितुः जमदग्नेः, प्रभवः जन्महेतुः, जमदग्नेः भृगुपुत्रत्वात्, परशुरामस्य च जमदग्निपुत्रत्वादिति बोध्यम्; वशिष्ठस्य पूर्वजो भृगुः, उभयोरेव ब्रह्मपुत्रत्वात् त्वं वशिष्ठस्य सनाभिरिति भावः, तेन हेतुना, वशिष्ठगुरोः सनाभित्वेन हेतुना इत्यर्थः, अतिमात्रम् अत्यर्थं, मसृणं कोमलं, त्वयि अकठोरमिति भावः, मदीयं हृदयं चित्तम्, अद्यापि न त्रुटति न विक्लवं गच्छतीति भावः; यद्वा—त्रुटति छिनत्ति, मर्य्यादावन्धनमिति शेषः, तव मर्य्यादाबन्धनं न करोतीति भावः, अतः ते तव, कुदृष्टिः अयुक्तदर्शनं, रामभद्रे विपक्षभाव इति भावः, शाम्यतु शान्तिं गच्छतु निवर्त्ततामिति यावत्, गुरो. सपिण्ड इति त्वा क्षमे इति भावः। वसन्ततिलकं दत्तम॥ ४५॥

(ङ) आत्थ ब्रवीषि। त्रुटति विदीर्णं भवति। व्यापियते प्रवर्त्तते, अवश्यकृत्यं निजकर्मेति शेषः इति भावः।

(नेपथ्ये)।

आः !! जामदग्न्य ! गुरूनप्यधिक्षिपसि !! (च)—

पुरोजन्मा नाद्यप्रभृति मम रामः स्वयमहं
न पुत्रः पौत्रो वा रघुकुलभुवां च क्षितिभुजाम्।
अधीरं धीरं वा कलयतु जनो मामयमयं
मया बद्धो दुष्टद्विजदमनदौक्षापरिकरः॥ ४६॥

जामदग्न्यः। (सावज्ञं रामं प्रति)। अये ! किमयं लक्ष्मणो भवन्तं पुरोजन्मानमपदिशति ? (छ)।

रामः। (सविलक्ष-स्मितम्)। प्रसीद भगवन् ! स एवायं यौवनादेर्वाचि निरपराधमधुरे वयसि (ज) वर्त्तमानो यानि कानिचिदक्षराणि प्रलपति (झ)।

(च) आः इति क्षोपे, "आस्तु स्यात् क्षोप-पीडयोः" इत्यमरः। गुरून् पितॄन्, अधिक्षिपसि भर्त्सयसि।

पुरोजन्मेति।—अद्य प्रभृति अद्यारभ्य, रामः मम पुरोजन्मा अग्रजः, न, स्वयं स्वतन्त्रः, स्वेच्छाचारीत्यर्थः, अहं रघुकुलभुवां रघुवंशोत्पन्नानां, क्षितिभुजां राज्ञां, दशरथाजादीनामिति भावः पुत्रः पौत्रो वा न, तदादेरज्ञानवत्त्वादिति भावः, अयं समक्षं इति भावः, जनः लोकः, माम् अधीरम् उद्धतप्रकृतिकं, धीरम् अनुद्धतप्रकृतिकं वा, कलयतु विवेचयतु, तव न मम त्वादृशि अतिरिति भावः, मया अयम् एषः, दुष्टस्य दुर्विनीतस्य, द्विजस्य ब्राह्मणस्य, दमनदीक्षायां शासनरूपव्रते, परिकरः सन्नाहः, प्रगाढनाविकावस्थः इत्यर्थः, बद्धो वा, "भवेत् परिकरो व्राते पर्यङ्क-परिवारयोः। प्रगाढनाविकावस्थे विवेकारभयोरपि॥" इति विश्वः। "यत्नारम्भो परिकरो" इति त्रिकाण्डशेषः; बद्धः रचितः, दुष्टमेनं शासीति भावः। "मामयमयम्" इत्यत्र "मामघमयम्" इति पाठे—अघमयं पापमयं, पापिष्ठमित्यर्थः, मानिन्यनेनान्वयः। शिखरिणी वृत्तम्॥ ४६॥

(छ) सावज्ञं सावहेलं, लक्ष्मणोक्तिमवज्ञेन इति भावः। अपदिशति व्यक्तरोति, अक्षोकरोतीत्यर्थो वा।

(ज) अवाचि पूर्वस्मिन्, प्रेम्णेत्यर्थः, निरपराधमधुरे नास्ति अपराधो यत्र तादृशम्, अत एव मधुरं तस्मिन्, वयसि कौमारे इति यावत्, कुमारस्यापराधो न गण्यते इति भावः।

जानदग्न्यः। (सस्मितम्)। कथमेतावत्यपि मामसृण्यमाणमाशङ्कसे? (ञ) यतस्त्वदनुवर्त्ती खल्वयं (ट) त्वामेवास्तमयमानमन्वस्तमयिष्यते (ठ)। निर्वाणं हि सवितारं तरणिमणिरप्यनु-निर्वाति। (ड) (नेपथ्यं प्रति)। साधु रे लक्ष्मण! साधु, कनिष्ठतरोऽपि वरं (ढ) भवान्, न पुनरयं हतज्येष्ठो (ण) रामस्ते।—

प्रागुच्चैःशिरसं क्षुरप्रनखरैः क्रौञ्चाद्रिदन्तावलं
भित्त्वा हंसमयानि मौक्तिकफलान्याकौर्य्य पर्य्यापिताम्।

(झ) अश्लीलानि वचांसि। प्रलपति अनर्थकं वदति, बालस्वभावेन अश्लीलं यथा तथा वदतीत्यर्थः। "प्रलापोऽनर्थकं वचः" इत्यमरः।

(ञ) एतावत्यपि एतावदधिके निर्भर्त्सनेऽपि, "तृष्टहिजदमनदीक्षापरिकरः" इत्यनेन कृते अधिक्षेपेऽपि इति भावः, असृण्यमाणम् अचाम्यन्तम्, आशङ्कसे बुध्यसे, साधु कदाऽपि क्षमिष्ये इति भावः। यथा—असृण्यमाणम् अचाम्यन्तं, क्षमाशून्यमित्यर्थः, एतादृशाधिक्षेपात् परमेव मया सह एव यत् तस्य प्रतिविधानं न कृतं, तेन मम अक्षमालक्षणं त्वया कृत इदम्? मया तु क्षान्त एवायं, परं सा क्षमा तव जीवनकालव्याधिनी क्षयिष्यतीति निष्कर्षः।

(ट) त्वदनुवर्त्ती त्वदनुगामी। अयं लक्ष्मणः।

(ठ) अस्तमयमानम् अदर्शनं गच्छन्तं, मत्परशुप्रहारादिति भावः, त्वा भवन्तम्, अनु पश्चात्, अस्तमयिष्यते अदर्शनं गमिष्यति, त्वा निहन्तु पश्चादेनमपि हनिष्यामीति भावः।

(ड) निर्वाणम् अस्तं गतं, सवितारं सूर्य्यम्, अनु पश्चात्, तरणिमणिरपि सूर्य्यकान्तो मणिरपि, निर्वाति निर्वाणं गच्छति, निष्प्रभो भवतीत्यर्थः।

(ढ) वरं सनाङ्नियः, अव्ययमेतत्। "सनाभिष्टे वरं यत्तु कथिदाह तदव्ययम्" इति शाश्वतः।

(ण) हतज्येष्ठः निरर्थकोऽयमः, निर्वीर्यत्वादिति भावः।

प्रागिति।—प्राक् पूर्वं, क्षुरप्राणि अस्त्रविशेषा एव, नखराः तैः, उच्चैः उन्नतं, शिरः शिखरं यस्यास्य तथोक्तं, क्रौञ्चाद्रिरेव क्रौञ्चपर्वत एव, हतावयवः छिन्ने

सैंहीं वृत्तिमधिष्ठितेऽपि हि मयि व्याजेन कल्पेन ते
दिष्ट्या कौतुकमाभिरामिकमसि त्वं कोऽपि वीराङ्कुरः ॥ ४७ ॥

(नेपथ्ये)।

भार्गव ! भार्गव ! दुर्विज्ञानमिदमर्वाक् फलनिष्पत्तेराभिरामिकं साङ्ग्रामिकं वा (त)।

रामः। (सरोषं नेपथ्याभिमुखम्)। आः !! वत्स ! कोऽयमद्यतनः (थ) ते दुर्विनयप्ररोहो (द) यत् गुरूनपि चेलीकरोषि ? (ध)।

तं, भित्त्वा विदार्य्य, हंसमथानि हंसरूपाणि, गुरुत्वादिति भावः, मौक्तिकफलानि मुक्ताफलानि, आकोर्य्य आकृष्य, इतस्ततो विक्षिप्येति यावत्, पर्य्यापितम् आत्मानं सर्वथा प्रापिता, सिंहस्य इव सैंही ता सिंहसम्बन्धिनीं, वृत्तिं व्यवहारं, गजकुम्भं भित्त्वा मौक्तिकाकर्षणवत् व्यापारमित्यर्थः, अधिष्ठिते आश्रिते, सिंहवत् पराक्रान्ते इत्यर्थः, मयि परशुरामेऽपि, दिष्ट्या भाग्येन, ममेति शेषः, अन्येषां नौर्य्याभावात् त्वयि च तद्वीरत्वदर्शनादिति भावः, व्याजेन छद्मिनीत्यर्थः, कल्पेन निपुणेन, नौर्य्यप्रकटनरूपेणेति भावः, ते तव, अभिरामं प्रीतिः, तस्मै हितम् आभिरामिकं प्रीतिप्रदमित्यर्थः, कौतुकं कुतूहलम्, औत्सुक्यमिति यावत्, दृश्यते इति शेषः। यद्वा—व्याजेन कल्पेन ते, वचनमिति शेषः, आभिरामिकं कौतुकं कौतुकावहच्च इत्यर्थः, तस्मात् त्वं कोऽपि अद्भुतप्रकृतिकः, वीराङ्कुरः वीरप्ररोहः, असि ; पुरा परशुरामेण क्षोणार्द्रं शरेण विदार्य्य मानसवरीविहारिणा हंसानां दारं कृतमिति पुराणम्। शार्दूलविक्रीडितं वृत्तम् ॥ ४७ ॥

(त) दुर्विज्ञानं दुर्ज्ञेयम्। इदं मद्वचनं कौतुकं वा। अर्वाक् पूर्वम्। फलनिष्पत्तेः कार्य्यसिद्धेः, विनयलाभस्येति यावत्। साङ्ग्रामिकं सङ्ग्रामाय हितम्। यावत् न त्वया अहं निहतः, मया वा त्वं, तावत् मम कौतुकम् आभिरामिकं साङ्ग्रामिकं वा न भवतीति भावः।

(थ) अद्यतनः अद्यभवः, साम्प्रतिकः इत्यर्थः।

(द) दुर्विनयप्ररोहः औद्धत्याङ्कुरः, अभिष्टाचारप्रारम्भ इति यावत्।

(ध) गुरूनपि पूज्यानपि। चेलीकरोषि आत्मवीकरोषि, "पुरोऽग्न्या नाधत्ते" इत्यादिवचनेन तच्छ्रीकरोषीत भावः ; यद्वा—प्रतिवचसा विरुद्धयसीति भावः।

(नेपथ्ये) ।

आर्य्य ! तूष्णीम् (न) अयमस्मि । अमस्व जामदग्न्य ! नियन्त्रितः (प) अहमार्य्येण ।

जामदग्न्यः । (विहस्य) । अरे राम ! कथमद्यापि वाचमेव सूनृतामस्मदभियोगप्रशमनीं प्रथयसे ? (फ) । कवचहरोऽसि, अस्त्रैरेव प्रतिक्रियन्तां (ब) अस्त्राणि । किञ्च रे !—

राजन्येभ्यो जन्म वैवस्वतेभ्य-
श्चक्रे चापाचार्य्यकं कौशिकश्च ।
ज्ञात्रीं चर्य्यामेवमुन्मुच्चतस्ते
गोत्राच्छेपी वज्रलेपः कलङ्कः ॥ ४८ ॥

रामः । (सगर्व-स्मितम्) । भगवन् ! सत्यमेतत्—

जातः सोऽहं दिनकरकुले क्षत्रियश्रोत्रियेभ्यो
विश्वामित्रादपि भगवतो दृष्टदिव्यास्त्रपारः ।

(न) तूष्णीं मौनी ।

(प) नियन्त्रितः संयतः, निवर्त्तित इत्यर्थः ।

(फ) सूनृता सत्यमधुरां, "सूनृतं सङ्गरेऽपि स्यात् प्रियसत्ये वचस्यपि" इति विश्वः । अस्मदभियोगप्रशमनीं मम कोपशान्तिकरीम् । प्रथयसे विस्तारयसि, पुनः पुनर्वदसीत्यर्थः ।

(ब) कवचहरः वर्मधरः, सन्नद्ध इत्यर्थः । प्रतिक्रियन्तां प्रतिविधीयन्तां, निवार्य्यन्तामित्यर्थः ।

राजन्येभ्य इति ।—वैवस्वतेभ्यः सौरेभ्यः, राजन्येभ्यः नृपेभ्यः, सूर्य्यवंशीयनृपतिभ्यः इत्यर्थः, जन्म उत्पत्तिः, तवेति शेषः, कौशिकः विश्वामित्रः, चापाचार्य्यकं धनुर्वेदग्रिक्षायां गुरुत्वमित्यर्थः, ते इति शेषः, चक्रे कृतवान्, किन्तु एवम् इत्थं-प्रकारेण, ज्ञात्रीं क्षत्रियसम्बन्धिनीं, चर्य्यां आचारं, विप्रसम्यापारमिति यावत्, उन्मुच्चतस्त्यजतः, ते तव, गोत्रं कुलम्, आक्षिपति निन्दतीति तथोक्तः, कलङ्कः अपवादः, वज्रलेपः चिरस्थायीति भावः, भवतीति शेषः । साक्षिणो यथा—"साक्षी तु ज्ञेऽक्षदर्शिनी वेदज्ञे;" इति तत्रत्यात् ॥ ४८ ॥

अस्मिन् वंशे कथयतु जनो दुर्यशो वा यशो वा
विप्रे शस्त्रग्रहणगुरुणः साहसिक्यात् विभेमि ॥ ४९ ॥

जामदग्न्यः। (सक्रोधम्)। आः!! पाप दुर्मुख! वशिष्ठ इव विश्वामित्र इव स्वस्तिवाचनिको (भ) ब्राह्मणस्ते परशुरामः!! (सत्यम्)। धिक् कष्टम्!! एवमुच्चावचवाचः (म) क्षत्रियाः श्रूयन्ते। (क्रोधातिशयं नाटयन्)। अयमहं भोः!—

सद्यः दशरथमद्योत्कृत्य पुत्रैश्चतुर्भिः
जनककुलकबन्धस्कन्धनिर्गत्वरीभिः।
नवरुधिरलताभिः क्लृप्तलोलापताकां
रणभुवमतिरौद्रीं रुद्रशिष्यः करोमि ॥ ५० ॥

जात इति।—स. अहं भवदुक्तप्रकारवीरत्वव्यंग्यपरादुःखाऽऽद्, दिनकरकुले सूर्यवंशे, ऋषिश्रोत्रियेभ्यः ऋषिया एव श्रोत्रिया: वेदविदो ब्राह्मणविशेषाः तेभ्यः, ब्रह्मनिष्ठेभ्यः ऋषिभ्यः इति यावत्, जातः समुद्भूतः; भगवतः विश्वामित्रात् हृष्टः जात इति यावत्, दिव्यानाम अलौकिकानां, शस्त्रास्त्रादीनामिति यावत्, शस्त्राणां पारः अन्तः तेन तज्ज्ञातोऽपि, जात इति शेषः, जनः प्राकृतजनः, अस्मिन् वंशे सूर्यकुले, दुर्यशो वा अकीर्तिर्वा, यशो वा कीर्तिर्वा, कथयतु घोषयतु, मम पराङ्मुखतेजेति भावः, किन्तु विप्रे ब्राह्मणे, ब्राह्मणं प्रतीत्यर्थः, शस्त्रग्रहणेन आयुधप्रयोगेण, गुरु महत् तस्मात्, साहसिक्यात् अविमृश्यकरणात्, विभेमि भद्रे। मन्दाक्रान्ता वृत्तं—"मन्दाक्रान्ताऽम्बुधि-रस नगैर्मो भ-नौ-तौ गयुग्मम्" इति तल्लक्षणात् ॥ ४९ ॥

(भ) स्वस्तिवाचनिकः स्वस्तीति वचनं प्रयोजनमस्येति स्वस्तिवाचनिकः यत्किञ्चित् प्रतिग्रहवचनं कथ्। स्वस्तीति वचनप्रयोजनेति भावः। वशिष्ठादीनां प्रति लाक्षणिकोक्तिरियम्।

(म) उच्चावचवाचः विविधालापाः, "उच्चावचं नैकभेदम्" इत्यमरः। मत्समीपे क्षत्रियाणां नीचावलग्ननमेवोचितं, परन्तु दैवज्ञो तेषां स्वर्गा यत् मया सह एवं वाक्-चातुर्यमपि कर्तुमुद्यतो, दुःसहोऽयं व्यापार इति भावः।

सद्यइति।—रुद्रशिष्यः शङ्करालेवासी, अयमहमिति गद्यस्थवाक्येनान्वयः, परशु-रामः इति शेषः, अद्य चतुर्भिः पुत्रैः रामादिभिः, सह दशरथम् उत्कृत्य छित्त्वा, कुठारेण निहत्य इत्यर्थः, जनककुलस्य विदेहवंशस्य, कबन्धानां मस्तकरे, छिन्नशिरसां

रामः। (सरोषम्)। आः!! जामदग्न्य! केयं वाग्विभीषिका? (य) दूरमतिक्रामति प्रसङ्गे (र) कदाचिदिक्ष्वाकवोऽपि दुर्मनायन्ते (ल)।

जामदग्न्यः। (सभ्रुकुटीभङ्गम्)। ततः किम्?

रामः। (सावष्टम्भम् (व))। ततश्च—

तैस्त्रिःसप्तभिरेव राजविजयैर्यत्ते भुजस्तम्भयोः
कृत्वा तोरणमालिकां पुनरमुं द्वारिंशमारिप्सते।
द्रक्ष्यामि त्वयि वर्त्तमानमधुना तच्चापविद्याऽद्भुतं
यन्मोस्तस्य हि केवलेन धनुषा कृष्टेन तुष्टिर्न मे॥ ५१॥

जलेवराणां, "क्लवस्तु क्लियायुक्तमपमूर्द्धजलेवरम्" इत्यमरः, स्रुग्भ्यः निर्गलद्भिः, निर्गच्छद्भिः, नवरुधिरलताभिः सद्यःपतितशोणितधाराभिः, अभिनवरक्तानां सताम्बैः प्रवाहैरिति भावः, कृता रचिता, लोलया चपलेखया, पताका वैजयन्ती यस्यां तथाभूतम्, अत एव रक्षसुरं सङ्ग्रामभूमिम्, अतिरौद्रीम् अतिभयानकां, करोमि। मालिनीछन्दः—"न-न-म-य-य-युतेयं मालिनी भोगिलोकैः" इति तल्लक्षणात्॥ ५०॥

(य) वाग्विभीषिका वाचा विभीषिका भयप्रदर्शनम्, इयं विभीषिका अतितुच्छा इति भावः।

(र) दूरम् अत्यर्थम्, अतिक्रामति इदं नश्यति, सज्जनोचिताचारस्य सीमां खण्डयति सतीत्यर्थः। प्रसङ्गे कस्मिंचित् व्यापारस्य प्रस्तावे।

(ल) दुर्मनायन्ते दुर्मनस्क इव विक्लवचेतस्क इव आचरन्ति, विक्लवचित्तत्वेन शास्त्रव्याख्यानमपि सम्यक्तया रचितुं न शक्नुवन्तीति भावः।

(व) सावष्टम्भं सगर्वम्।

तैरिति।—यत् चापविद्याऽद्भुतं धनुर्वेदशिक्षाकौशलमद्भुतं वैचित्र्यमित्यर्थः, धनुर्विद्यानैपुण्यमिति यावत्, तैः सप्तभिरेव एकविंशतिसङ्ख्याकैरेव, राजविजयैः क्षत्रियनिधनैः, यौ तव, भुजावेव बाहुदण्डावेव, तम्भौ तयोः, तोरणमालिकां बहिर्द्वारविजयिमालाम्, कृत्वा विधाय, तोरणं यथा मालया अलङ्क्रियते तथा भुजस्तम्भौ अलङ्क्रियेते इति भावः, "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः; पुनः अमुं द्वाविंशं द्वाविंशतेः पूरणं, सप्तविंशतिमिति भावः, आरिप्सते आरब्धुमिच्छति, अधुना त्वयि वर्त्तमानं

आनदन्यः। (सरोषम्)। किमाह रे! किमाह? ("इत्यादि त्वयि वर्त्तमानमधुना—"इत्यादि श्लोकोत्तरार्द्धं पठित्वा सत्यम्)। अहो! सर्वतः समिध्यमानदारुणस्य रोषजातवेदसो (ग) विदेहहिमालीपयोः कुलं नाम कति भविष्यन्त्याहुतयः (घ)। (उच्चैः)। भो भोः सप्तद्वीपकुलपर्वतवर्त्तिनो राजानः! चेतयध्वं चेतयध्वम् (ङ)—

येन स्वां विनिहत्य मातरमपि क्षत्रासमध्वासव-
स्वादाभिन्नपरश्वधेन विदधे निःक्षत्रियां मेदिनीं।
यज्ञाणव्रणवर्त्मना गिरिरिवः क्रौञ्चस्य हंसच्छला-
दद्याप्यस्थिकणाः पतन्ति स पुनः क्रुद्धो मुनिर्भार्गवः॥५२॥

क्रियमाणं, तत्र चापविद्याऽऽहुतं, दत्त्यादि, हि यतः; केवलेन एकेन, एकमावेत्येवार्थः, "एके मुख्यान्यकेवलाः" इत्यमरः; तस्य तव गुरोरित्यर्थः, अम्बोः; इरम्, धनुषा कृष्टेन सङ्गेन, मे मनः, तुष्टेः परितोषः, न, अस्तीति शेषः, यावत् तव चापविद्याया: परीक्षा मया न क्रियते, यावच्च तव धनुर्मया न कृष्यते, तावत् न मे परितुष्टिरिति भावः। शार्दूलविक्रीडितं वृत्तम्॥ ५१॥

(ग) सर्वतः समन्तात्। समिध्यमानदारुणस्य समिध्यमानः सम्यक् दीप्यमानः, अत एव दारुणः भयङ्करः तस्य। रोषजातवेदसः क्रोधाग्नेः।

(घ) नाम सम्भावनायां. कति कियत्सङ्ख्याकाः, आहुतयः हवनीयद्रव्याणि।

(ङ) सप्तेति।—सप्तसु द्वीपेषु ये कुलपर्वताः महेन्द्रादयो गिरयः, तत्र वर्त्तन्ते तिष्ठन्ति इति तादृशाः। चेतयध्वं चेतयध्वं जाग्रत जाग्रत, अवहितो भवत अवहितां भवत इत्यर्थः, स्वार्थे णिजन्तोऽयं प्रयोगः।

येनेति।—येन परशुरामेण, स्वयोनिम्, अम्बायेव रक्षात्वेन, मध्वासवः मद्यानीत्यर्थः, "मध्वासवो माधवको मधु माध्वीकमित्यपि:" इत्यमरः, तेषां स्वादाभिन्नः आस्वादभिन्नपुष्टः, यः परश्वधः कुठारः तेन, स्वां निजां, मातरमपि जननीमपि, विनिहत्य विनाश्य, मेदिनीं पृथ्वीं, निःक्षत्रियां क्षत्रियशून्यां, विदधे कृता, अद्यापि यज्ञानीमपि, यज्ञं परशुरामस्य, वाणेन शरेण, व्रणः क्षतं, तस्मिन्नित यावत्, तदेव वर्त्म पन्थाः तेन, क्रौञ्चस्य तदाख्यस्य, गिरिरिव, पर्वतस्य, अस्थिकणाः अस्थिखण्डानि, हंसच्छलात् हंसव्याजेन, पतन्ति, स मुनिः भार्गवः परशुरामः, पुनः भूयः, क्रुद्धः सन्।

अत्र एव चेतयध्वं चेतयध्वमिति पूर्वमेव सत्यम्। पुरा जमदग्निः स्वां भार्यां रेणुकां

रामः। (सहर्षं स्वगतम्)—

नृपानप्रत्यक्षान् किमपवदसे ? नन्वयमहं
शिशुक्रीडाभग्नत्रिपुरहरधन्वा तव पुरः।
अहङ्कारक्रूरार्जुनभुजवनव्रश्चनकला-
निसृष्टार्थो बाहुः कथय कतरस्ते प्रहरतु ? ॥ ५२ ॥

जामदग्न्यः। (सक्रोपाटोपम् (ङ))। आः !! पाप विकर्त्तनकुलकलङ्क ! पुनस्त्वरां (क) तदेव पार्वतीदयितकोदण्डदलनं साहसमुद्भावयसि ? (ख)। अहह !! क्षत्रियोऽपि भार्गवस्य

लङ्काधिपाय नर्मदानदीं गतां तव कार्त्तवीर्य्यार्जुनश्च स्त्रीभिः सह जलक्रीडादर्शन-कुतूहलेन कृतविघ्नमाज्ञप्तो ध्यानेन विज्ञाय क्रोधात् "जहि एनम्" इति पुत्रान् प्रत्येकमादिदेश, तेषां कनिष्ठः परशुरामः पितृराज्ञां शिरसि निधाय परशुधारया मातरं विच्छेदेति पुराणम्। आर्षत्वविक्रीडितं क्षम्यम् ॥ ५२ ॥

नृपानिति।—अप्रत्यक्षान् अदृष्टिगोचरान्, स्थानान्तरस्थानिति यावत्, नृपान् राज्ञः, किं कथम्, अपवदसे निन्दसि ? यद्वा—अपवदसे ? आक्षिपसि ? स्थानान्तरावस्थितान् तान् उद्दिश्य क्रीत्कारोक्तीर्थः, ननु क्रीः। शिशुक्रीडया बालसुलभखेलया, क्रीडार्थं जनैरित्यर्थः, भग्नं खण्डं, त्रिपुरहरस्य धनुः, धनुः येन तथाभूतः, अयमेषः, अहं तव पुरः अग्रतः, तिष्ठामीति शेषः, अहङ्कारेण गर्वेण, क्रूरश्च निष्ठुरश्च, समुद्धतश्चेति भावः, तव पितृवधरूपदुष्कार्यकारणादिति भावः, अर्जुनश्च कार्त्तवीर्यश्च, भुजवनानां सहस्रबाहूनामिति यावत्, व्रश्चनश्च छेदनश्च, या कला सामर्थ्यं, तेन निसृष्टः प्रातः, अर्थः वस्तु, सार इति यावत् यश्च तथाभूतः, "अर्थोऽभिधेयेऽर्थवस्तु-प्रयोजननिवृत्तिषु" इत्यमरः; ते तव, कतरः बाम दक्षिणयोः कः, बामो वा दक्षिणो वा इति भावः, बाहुः भुजः, प्रहरतु, मारयतु इति शेषः, कथय ? वद ?। शिखरिणी छन्दः ॥ ५२ ॥

(ङ) सक्रोपाटोपं कोपेन क्रोधेन, आटोपः तर्जनं, तेन सह वर्त्तमानं यथा तथा।

(क) विकर्त्तनकुलकलङ्क ! सूर्य्यवंशाधम ! पुनस्त्वरां पुनरपि।

(ख) पार्वतीति।—पार्वतीदयितस्य हरस्य, कोदण्डं धनुः, तस्य दलनं भञ्जनमेव, साहसं, दलनेन यत् साहसत्वं अविचार्यकारित्वं तत् वा। उद्भावयसि प्रकटयसि, कुर्वे: धातवस्तीत्यर्थः।

कार्त्तवीर्यार्जयिनं भुजदण्डमन्विष्यति !! अहा ! गरीयान् (ग) कालः. यदश्रुतचरमपि (घ) श्रावयति, अदृष्टचरमपि (ङ) दर्शयति। अपि च, रे राजन्यकौट !—

जानास्येव यथा पितुः परिभवन् होमार्जुनोमर्जुनो
मत्कोदण्डमनेकराजकबधस्वाध्यायमध्यापिपत्।
तेनैवास्ति भवत्सु यद्यपि मम क्रोधोऽयमौत्सर्गिक-
स्तत् सम्प्रत्युपसर्जनं गुरुधनुर्भङ्गादयं हेतुमान् ॥ ५४ ॥

रामः। ऋषे जामदग्न्य ! पटच्चरीभूता (च) खल्वियं पुरातनी कीर्त्तिपताका ; नन्विदानीमेव द्रष्टव्यम्। (नेपथ्याभिमुखम्)। वत्स लक्ष्मण ! धनुर्धनुः।

(ग) गरीयान् अतिमहान्, कालः कालस्य प्रभावातिशय इत्यर्थः, कालमाहात्म्यं विचित्रमिति यावत्।

(घ) अश्रुतचरमपि पूर्वं कदाऽपि न श्रुतमपि।

(ङ) अदृष्टचरमपि पूर्वं कदाऽपि न दृष्टमपि।

जानासीति।—पितुः जमदग्नेः, होमार्जुनौ होमसाधनौम् अर्जुनौ धवलौ गानित्यर्थः, "धवलो धवलोऽर्जुनः" इत्यमरः ; यद्वा—अर्जुनौ सौरभेयौम्, "अर्जुनो सौरभेयो गौ." इत्यमरः ; परिभवन् तिरस्कुर्वन्, ताडयन्नित्यर्थः, बलपूर्वकं गृह्णन् इति यावत्, अर्जुनः कार्त्तवीर्यः, यथा मम कोदण्डं धनुः, अनेकेषां बहूना, राजकानां राजसमूहानां, वध एव विनाश एव, स्वाध्यायः वेदः तम्, अध्यापिपत् अध्यापितवान्, शिक्षयामासेत्यर्थः, कार्त्तवीर्यं प्रति क्रोधेनैव मया धनुषता सर्वे क्षत्रिया निहता इति भावः, तत् जानास्येव अवगच्छस्येव, तेनैव हेतुना, कार्त्तवीर्यं प्रति क्रोधेनैव हेतुनेत्यर्थः, यद्यपि भवत्सु क्षत्रियमात्रेषु इति भावः, अयं क्रोधः औत्सर्गिकः सामान्यः, साधारण इत्यर्थः, अस्ति वर्तते, सम्प्रति तत उपसर्जनम् अप्रधानम्, औत्सर्गिक इति भावः, अयं क्रोधः, गुरोः हरस्य, धनुर्भङ्गात् चाप-भञ्जनात्, हेतुमान् सञ्जातः, संवृत्त इति शेषः, सामान्यतो युष्मासु स्थितश्च क्रोधस्य अयमपरो हेतुर्गुरुधनुर्भङ्गरूपो जातः, तज्जादृक् न चमे इति तात्पर्यम्। शार्दूलविक्रीडितं वृत्तम् ॥ ५४ ॥

जामदग्न्यः। (साक्षेपम्)। अरे अनात्मज्ञ क्षत्रियबटो! (कु)—

तच्चापमौग्रभुजपीडनपीतसारं
प्रागप्यभज्यत भवांस्तु निमित्तमात्रम्।
राजन्यकप्रधनसाधनमस्मदीय-
माकर्ष कार्मुकमिदं गरुडध्वजस्य॥ ५५॥

आकृष्टेन पुनरमुनैव धनुषा किलास्मानभियोत्स्यसे (ज)। क्षत्रबन्धवे (झ) दौक्षितानां तु चिरस्य दीक्षा अयं परशुः, रक्षाकर्मण्येव। (ञ) (इति रामस्य हस्ते धनुरर्पयति)।

रामः। (गृहीत्वा)। भार्गव! समन्तादुद्धातिनी (ट)

(च) पटचरीभूता जीर्णवस्त्रखण्डवत्, जीर्णवस्त्रखण्डवत् दूरे निक्षेप्तव्या इति भावः, "पटचरं जीर्णवस्त्रम्" इत्यमरः।

(छ) अनात्मज्ञ। आत्मविस्मृत। क्षोऽहमिति स्वरूपानभिज्ञ। इति यावत्, निजसामर्थ्यं अयथावित्त्वाभिन्। इति भावः। क्षत्रियबटो। क्षत्रियब्रह्मचारिन्। क्षत्रियधिग्मा। इति वा।

तदिति।—दोर्दण्डस्य हरस्य, भुजेन बाहुना, यत् पीडनं दलनं, तेन पीतः अर्जितः, यस्य इति यावत्, सारो बलं, स्थिरांश इति यावत्, दार्ढ्यमिति भावः यस्य तथाभूतं, "सारो बले स्थिरांशे च" इत्यमरः, तत् चापं धनुः, प्रागपि पूर्वमेव, अपरिज्ञावधारणार्थः, अभज्यत स्वयमेव भग्नमित्यर्थः, कर्मणि कर्तरि प्रयोगः; भवांस्तु निमित्तमात्रम् उपलक्षणमात्रमेव, न तु प्रकृतस्य भञ्जने तव सामर्थ्यमिति भावः, राजन्यकैः राजसमूहैः सह, प्रधनं युद्धं, यद्वा—राजन्यकानां राजसमूहानां, प्रधनं दारणं, निधनमित्यर्थः, "प्रधनं युधि दारणे" इति हैमः, तस्य साधनं हेतुभूतम्, अस्मदीयं मदीयं, मम इक्ष्वाकुवंशस्थमिति यावत्, गरुडध्वजस्य नारायणस्य, इदं कार्मुकं धनुः, आकर्ष आरोपय। वसन्ततिलकं वृत्तम्॥ ५५॥

(ज) अभियोत्स्यसे योधयिष्यसि, अस्माभिः सह युद्धं करिष्यसीत्यर्थः।

(झ) क्षत्रबन्धवे क्षत्रियबधधर्मे। दौक्षितानां धृतव्रतानाम्।

(ञ) दीक्षा दीक्षणकर्त्री। अयं परशुरस्येव धनुषोऽभावेऽपि अनेन परशुनैव त्वां हनिष्यामीति भावः।

(ट) उद्धातिनी उन्नतानता।

भूमिरियम्; तदेहि, विमर्दक्षमं प्रदेशान्तरमवतरावः। (ठ)

जामदग्न्यः। (सरोषं परिक्रामन्)। भो भोः क्षात्रेण ब्राह्मेण च तेजसा विकत्थमानाः! (ड) तदत्र—

भवतु शरणदो वा सर्वशस्त्राभिसारः
प्रतिविदधतु वाऽस्मिन्नाशिषो वैजयिक्यः।
अदशरथमरामं निर्विदेहेन्द्रभूर्वी-
वलयमिह विधत्ते रोषणो रेणुकेयः॥ ५६॥

(इति निष्क्रान्तौ)।

(नेपथ्ये)। भो भोः पौर-जानपदाः! प्रवर्त्यतां माङ्गलिक-मातोद्यम् (ढ)। प्रसज्यताम्(ण) अयमपि वैदेहीविवाहमहोत्सवो जामदग्न्यविजयोत्सवेन—

(ठ) विमर्दक्षमं युद्धयोग्यं, समतलमिति यावत्। अवतरावः गच्छाव इत्यर्थः।

(ड) विकत्थमानाः आत्मश्लाघिनः।

भवत्विति।—सर्वैः अस्त्रोपस्थितैः समस्तैः, वीरैरिति शेषः, शस्त्रैश्च, सर्वैरिति शेषः, अभिसारः अभियोगः, यद्वा—सर्वाणि शस्त्राणि आयुधानि, अभिसाराणि अभिसरणानि, सहायाः इत्यर्थः, "अनुव्रजः सहायश्चानुचराऽभिसराः समाः" इत्यमरः, यद्वा—अभिसाराणि साधनानि, युद्धोपकरणानीत्यर्थः यस्य तादृशः, कोऽपि वीर इति शेषः, शरणदः आश्रयप्रदः, रक्षिता इत्यर्थः, रामस्येति शेषः, भवतु वा, भवद्भिः सर्वैर्वीरैः सर्वशस्त्रैश्च समवेतः सन् इत्यर्थः, सर्वशस्त्रधारिणा केनापि वीरेण समवेतः सन् इत्यर्थो वा, रामो युध्यतां वेति भावः, अस्मिन् रामे, वैजयिक्यः विजयसाधनाः, आशिषः युष्माशिषः, युष्माकमिति शेषः, प्रतिविदधतु वा प्रतीकारं कुर्वन्तु वा, रोषणः कोपनः, रेणुकेयः रेणुकानन्दनः, परशुराम इत्यर्थः, इह अस्मिन् संसारे, सर्वोर्विजयं भूमण्डलम्, अदशरथं दशरथशून्यम्, अरामं रामशून्यं, निर्विदेहेन्द्र विदेहराजरहितञ्च, विधत्ते करोति॥ मालिनी वृत्तम्॥ ५६॥

(ढ) प्रवर्त्यताम् आरभ्यताम्। मङ्गलाय हितं माङ्गलिकं मङ्गलसूचकम्॥ आतोद्यं वीणा-मुरज-वंश-वाद्यादयः, "ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्। वंशादिकन्तु सुषिरं कांस्यतालादिकं घनम्॥ चतुर्विधमिदं वाद्यं वादित्रातोद्य-नामकम्॥" इत्यमरः।

कन्या काचिदिहापि कर्मणि पणः स्यादित्यसूयावलत्-
सीतापाङ्गमयूखमांसलमुखज्योत्स्नाविलिप्तौ दिवम्।
कुर्वाणेन रघूद्वहेन चकृषे नारायणीयं धनुः
सन्धायाथ शरस्य भार्गवगतिच्छेदादमोघीकृतः॥ ५७॥

(ततः प्रविशतो रामजामदग्न्यौ)।

रामः। भगवन् भार्गव!—

परैराहूतानां विहितमपि शस्त्रं भवतु नः
प्रकृत्या विप्रेभ्यः पुनरकृतशिल्पा रघुभुवः।

(क) प्रसज्यतां प्रलूयतां, प्रवर्त्यतामित्यर्थः।

कन्येति।—इहापि अस्मिन्नपि, कर्मणि नारायणीयधनुराकर्षरूपे इति भावः, काचित् कन्या कुमारी, यद्वाऽहं स्त्रीस्वभावकन्यैव, एवमिति भावः, पणः शुल्कं, स्यात् भवेत्, इति एवं, मत्वेति शेषः, दिवम् आकाशम्, असूयया ईर्ष्यया, बलतोः, बलती, स्त्रीत्वाऽल्पत्वाय इतस्ततः सञ्चलतोः इत्यर्थः, सीताया अपाङ्गौ नेत्रान्तौ, नेत्रान्तावित्यर्थः, "अपाङ्गौ नेत्रयोरन्तौ" इत्यमरः, मयूखेन किरणेन, मांसला प्रभूता, परिपुष्टेति यावत्, या मुखस्य ज्योत्स्ना चन्द्रातपवत् स्निग्धः आतपः, मुखकान्तिरिति यावत्, तया विलिप्तौ विशेषेण लिप्तावित्यर्थः, कुर्वाणेन विदधता, रघूद्वहेन रघुवंशधरेण रामेण, नारायणीयं वैष्णवं, धनुः चापं, चकृषे आकृष्टम्; अथानन्तरं, धनुःस्पर्शात् परमित्यर्थः, शरः सन्धाय संयोज्य, भार्गवस्य परशुरामस्य, गतिः मार्गः, स्वर्गगमनपन्था इत्यर्थः, यद्वा—गतिः गमनं, स्वर्गगमनसामर्थ्यमिति भावः, "गतिः स्त्री मार्गदशयोः ज्ञाने यात्राऽभ्युपाययोः" इति मेदिनी; (यद्वा गमनं) तस्य छेदात् खण्डनात्, प्रतिरोधादिति यावत्, अमोघीकृतश्च अव्यर्थीकृतश्च, धनुषि सन्धीकृतः शरः सफलीकृत इत्यर्थः। नारायणीयं धनुराकृष्य तत्र शरं सन्धाय च तेन शरेण "छिन्ते छिनम्मि?" इति वदन् रामः भार्गवेण "अहं भोगनिमुक्तः, मम पुण्यतोयगतिं रुन्ध, स्वर्गपङ्क्तौ मम प्रयोजनं नास्तीति तद्गतिं रुन्धि" इत्युक्तः स्वर्गगमनमार्गं स्वर्गगमनसामर्थ्यं वा रुरोधेति निष्कर्षः। आदूलविक्रीडितं वृत्तम्॥ ५७॥

परैरिति।—परैः शत्रुभिः, आहूतानां आकारितानां, युद्धार्थमिति भावः, नः अस्माकं, शस्त्रं शस्त्रधारणमित्यर्थः, विहितं विधामकं, भवतु अपि, पुनः किन्तु, रघुभुवः रघुवंश्याः, प्रकृत्या स्वभावेनैव, विप्रेभ्यः ब्राह्मणेभ्यः, अकृतशिल्पाः अप्रयुक्त-

चिरादखण्डीरेण त्वयि तदपि रामे न गणितं
तपोविद्यावीरव्रतमथ मयि क्षाम्यतु भवान् ॥ ५८ ॥

जामदग्न्यः। (विहस्य)। कथमपराद्धमस्मासु वत्सेन ?—

यदर्थमस्माभिरिह प्रकोपित-
स्त्वदद्य दृष्ट्वा तव धाम वैष्णवम्।
विशीर्णसर्वामयमस्मदन्तरं
चिरस्य कच्चिल्लघिमानमश्नुते ॥ ५९ ॥

रामः। इत इतो भगवन्!

जामदग्न्यः। (रामस्य चिबुकमुन्नमय्य सस्मितम्)। वत्स! अप्रग्रस्तः खल्वारण्यकानां (त) जनपदेषु चिरप्रचारः (थ); तत् क्व पुनरस्मान् नेष्यसि ?

ग्रस्तप्रयोगकौशला इति यावत्, "अक्षतग्रिल्पाः" इत्यत्र "अक्षतग्रिचाः" इति पाठकल्पनं सङ्गतार्थकं, ग्रिल्पपाठे अर्थासङ्गतेरिति, अक्षतग्रिचाः अग्रिचिन्तनग्रस्तव्यवहारा इत्यर्थः, ब्राह्मणान् प्रति ग्रस्तव्यवहार न कुर्वन्तीति भावः, तदपि तथाऽपि, चिरात् आलम्बन इति भावः, अखण्डीरेण पुरुषेण, पौरुषाभिमानिना इत्यर्थः, दृप्तेनेति यावत्, "अखण्डीरः पुरुषे शक्ते" इति मेदिनी, मयेति शेषः, रामे त्वयि तपो-विद्या-वीर-व्रत तपश्चर्या-विद्वत्त्व-वीरत्व-व्रतित्वोत्कर्षः इत्यर्थः, न गणितं न विचारितम्, अद्य इदानीं, भवान् मयि मामित्यर्थः, क्षाम्यतु मर्षयतु, ममापराधं न गणयत्विति भावः। ग्रिखरिणी वृत्तम् ॥ ५८ ॥

यदर्थमिति।—अस्माभिः यदर्थं यद्विषयज्ञाननिमित्तम्, इह अस्मिन् विषये, प्रकोपितः क्रोधितः कृतः, त्वमिति शेषः, अद्य तव तत् वैष्णवं नारायणीयं, धाम तेजः, दृष्ट्वा अवलोक्य, अस्मदन्तरम् अस्माकम् अन्तःकरणं, विशीर्णः क्षीणः, सर्वः सकलः, आमयः रोगः, रजोगुणजनितरान इति यावत् यस्य तथाभूत सत्, चिरस्य चिरकालेन, लघिमानं लाघवम्, अश्नुते भजते, दिव्यज्ञानलाभादिति भावः। वंशस्थविलं वृत्तं—"वदन्ति वंशस्थविलं ज-तौ ज-रौ" इति तल्लक्षणात् ॥ ५९ ॥

(त) अग्रग्रस्तः अविच्छिन्नः, निबिड इति यावत्। आरण्यकानां वनवासिनाम्।

(थ) चिरप्रचारः दीर्घकालस्थितिरिति यावत्।

रामः। भगवन्! भगवतो याज्ञवल्क्यास्यावसथे (द) कृतातिथेयसंविधानौ (ध) तात-जनकौ भवन्तमनुपालयतः (न)।—

एहि विष्टरपादार्घ-मधुपर्कैरुपस्थितान्।
इक्ष्वाकूंश्च विदेहांश्च पुनीहि भगवन्नमून्॥ ६०॥

लक्ष्मणः। वत्स! अपरिहार्यमेव (प) ह्यातिथ्यं राजन्य-श्रोत्रियाणाम्। किं पुनरेवंविधवैखानसोचिताचारस्खलित-विलक्षो (फ) न शक्नोमि धर्माचार्यं (ब) याज्ञवल्क्यमुपेत्यावलोकितुम्। आचारस्तु दूरादपि श्रुतः कृतः स्यात् (भ)।—

(द) आवसथे भवने, आश्रमे इति यावत्।

(ध) कृतेति।—कृतम् अनुष्ठितम्, आतिथेयसंविधानम् अतिथिसमुचिताचारः ययोः यास्मा वा तथाभूतौ।

(न) अनुपालयतः प्रतीक्षेताम्।

एहीति।—हे भगवन्। विष्टरः आसनविशेषः, कुशासनमिति यावत्, "विष्टरः कुशमुष्टौ स्यादासने च मधोरहे" इति मेदिनी; पादार्घमधुपर्काः पाद्यार्घ्यमधुपर्काः त्वदर्चनार्थमाहृता इति भावः, तैः सह, "विष्टरपादार्घ" इत्यत्र "विष्टरपाद्यार्घ्यं" इति पाठः सङ्गतः, उपस्थितान् वर्त्तमानान्, अमून् इक्ष्वाकून् इक्ष्वाकुवंश्यांश्च, विदेहांश्च विदेहवंश्यांश्च, पुनीहि पवित्रीकुरु। अनुष्टुप् छन्दः॥ ६०॥

(प) अपरिहार्यमेव अपरित्याज्यमेव। राजन्य-श्रोत्रियाणां राजन्येषु क्षत्रियेषु, श्रोत्रियाः वेदविदः तेषां ब्रह्मनिष्ठक्षत्रियाणाम्।

(फ) किं पुनः किमु। एवंविधेति।—एवंविधम् इत्थं, वैखानसानां मुनि-विशेषाणाम्, उचितम् अभ्यस्तम्, योग्यम् इति वा, आचारम् व्यवहारम्, प्राप्तेति भावः, स्खलितेन भग्नेन, विलक्षः लज्जितः।

(ब) धर्माचार्यं धर्मशास्त्रप्रणेतारं मुनिम्।

(भ) आचारः शिष्टानुमोदितव्यवहारः। कृतः अनुष्ठितः, दूरे वा समीपे वा यत्र तत्र अवस्थाय श्रुतोऽपि कृत एव स्यात्, न तेन मर्यादालङ्घनं कृतं भवेदिति तिरस्कारः।

(किञ्चिदुच्चैर्नेपथ्याभिमुखम्)—

यस्य स्मृतौ: प्रतीच्छन्ते चतुर्वर्गं मनीषिणः।
नमो भगवते तस्मै याज्ञवल्क्याय योगिने ॥ ६१ ॥

(नेपथ्ये)—

गायत्री द्रुपदा देवी पाप्मानमपहन्तु ते।
पुनन्तु पावमान्यस्त्वामृभ्नोतु ब्रह्म ते परम् ॥ ६२ ॥

रामभद्रः। भगवन्! अपत्रपमाणो (म) न भवन्तं द्रष्टुमुत्सहे; तदनुमन्यस्व मामरण्याय (य)।

(नेपथ्ये)—

शिवास्ते पन्थानो व्रज निजगृहेभ्यो निजगृहान्
किमन्यत् सर्वेषां गुणमय! शिरोमाल्यमसि नः।
त्रिलोकीनिर्माणस्थितिनिधनबन्धोर्मधुभिदो
भवान् षष्ठी मूर्त्तिर्भृगुकुलमधिष्ठाय रमते ॥ ६३ ॥

यस्येति।—मनीषिणः विद्वांसः, चतुर्वर्गं धर्मार्थकाममोक्षे, धर्मादिविषयसन्देहे इत्यर्थः, "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इत्यमरः; यस्य स्मृतौ: संहितावचनानि, प्रतीच्छन्ते प्रमाणयन्तीत्यर्थः, तस्मै योगिने सर्वत्र समदर्शिने, भगवते याज्ञवल्क्याय नमः, अस्तु इति शेषः। अनुष्टुप् छन्दम् ॥ ६१ ॥

गायत्रीति।—गायत्री सावित्री देवी, तथा द्रुपदा देवी "द्रुपदादिव मुमुचानः" इत्यादिमन्त्रमयी देवीति यावत्, ते तव, पाप्मानं पापम्, अपहन्तु नाशयतु, पावमान्यः पवित्रताजनन्यः ऋचः, तथाविधमन्त्रविशेषाः इत्यर्थः, त्वां पुनन्तु शोधयन्तु; ते तव, परं ब्रह्म तत्त्वज्ञानं, ऋभ्नोतु वर्द्धताम्। याज्ञवल्क्यान्नोत्तिरियम्। अनुष्टुप् छन्दम् ॥ ६२ ॥

(म) अपत्रपमाणः लज्जमानः, रामभद्रे कठोरव्यवहारादिति भावः। "लज्जा ह्रीरपत्रपाऽस्त्रियाम्" इत्यमरः।

(य) अनुमन्यस्व अनुजानीहि, अनुज्ञां कुरु इत्यर्थः। अरण्याय अरण्यगमनाय।

शिवा इति।—ते तव, पन्थानः गमनमार्गाः, शिवाः निरापदः इत्यर्थः, भवन्त्विति शेषः, निजगृहेभ्यः स्वभावसदेभ्य इति भावः, यद्वा—स्वमेतत् गृहमपि तवापि निजगृहमेव मन्तव्यमिति भावः तेभ्यः, निजगृहान् निजस्य तव, गृहान् निकेतनं, व्रज गच्छ, एकेभ्यः गृहेभ्यः गृहान्तरं गच्छेति भावः; अन्यत् किं, वक्तव्यमिति शेषः, हे

जामदग्न्यः। वत्स रामभद्र!

रामः। आज्ञापय।

जामदग्न्यः। निवर्त्तस्व। नूनमिदानीं कृतकौतुकागार-मङ्गलोपचारः (१) श्वशुरकुललोकस्त्वां प्रतीक्षते। (इति परिष्वज्य निष्क्रान्तः)।

रामः। (सोद्वेगम्)। कथं गतो भगवान्; तदहमपि तात-समीपमेव गच्छामि। (इति परिक्रामन् पुरोऽवलोक्य)। कथं तातस्य जनकस्येत एवाभिवर्त्तते। (इत्युपसर्पति)।

(ततः प्रविशतो जनक-दशरथौ। राजानावन्योऽन्यं परिष्वज्य)।

जनकः।—

सुचरितमिदमैतिहासिकानां
हृदि न विरंस्यति यत् तवैष पुत्रः।
भृगुसुतपरशूदराद्विराजां
सहजविजित्वरमाचकर्ष तेजः॥ ६४॥

गुरुमय! नः अस्माकं, सर्वेषां शिरोमाल्य शिरोभूषणमिति यावत्, असि, त्रिलोक्याः त्रिभुवनस्य, निर्माण सृष्टेः, क्षिति: पालनं, निधनं नाशः, तेषां कर्त्तरिति भावः, मधुभिदः मधुसूदनस्य, नारायणस्येत्यर्थः, षष्ठी वस्या पूरयौ, मूर्त्तिः आकारः, अवतारविशेष इति यावत्, भवान् भृगुकुलम् अधिष्ठाय आश्रित्य इत्यर्थः, रमते क्रीडति। मिश्रस्त्रिणी वृत्तम्॥ ६३॥

(१) निवर्त्तस्व विरम, अस्मदनुगमनात् प्रतिनिवृत्तो भव इत्यर्थः। कृतेति।—कृतः अनुष्ठितः, कौतुकागारे वैवाहिकगृहे, मङ्गलोपचारः माङ्गलिकसमाधानं येन तथाविधः।

सुचरितमिति।—तव एषः अयं, पुत्रः तनयः, भृगुसुतस्य जामदग्न्यस्य, परशू-दरात् कुठाराभ्यन्तरात्, कुठारजन्यादिति यावत्, विराजां क्षत्रियाणां, "ब्राह्मणः क्षत्रियो विराट्" इत्यमरः; सहजविनित्वरं स्वभावेन जयशीलं, तेजः प्रभाव, यत् आचकर्ष आकृष्टवान्, परशुरामेण यद्यात् गृहीतं तेजः पुनर्ग्रहादेव आकृष्य आनीतवानित्यर्थः, इदं सुचरितं शोभनाचरणम्, हृदा मनसा न विरंस्यति न विस्मरिष्यति, ऐतिहासिकानां

दशरथः। (पुरोऽवलोक्य सहर्षम्)। कथमागत एव वत्सो रामभद्रः।

जनकः। सखे महाराज दशरथ! पश्य पश्य—

चिरात् क्षात्रं तेजस्त्रिजगदवजैत्रं जनयिता
विधाता सर्वेषामुपरि सवितारं कुलभृताम्।
विनेता वर्णानां भृगुपतिभुजादर्पनिकषो
महावीरः श्रीमानयमसृतमक्ष्णोर्विकिरति॥ ६५॥

दशरथः (निर्वर्ण्य सहर्षम्)। सखे सीरध्वज! रघुराजधर्माधिकारसर्वधुरीणः (ल) शिशुरपि वत्सोऽयम्; तदस्मिन् जरसा दुर्वहं वर्णाश्रमभारम् (व) आरोप्य वयमपि क्वापि तपोवने दिलीपकुलोचितेन विधिना शेषमायुरुपबृंहयामहे (श)।

दतिहासविदां, हृदि चित्ते, न विरंस्यति न विरतं भविष्यति, सर्वदा जागर्ति स्फाजतीति भावः। पुष्पितायां वृत्तम्॥ ६४॥

चिरादिति।—चिरात् बहुकालात्, बहुकालानन्तरमित्यर्थः, त्रिजगता भुवनत्रयस्य, अवजैत्रं विजेतृ, क्षात्रं तेजः प्रभावं, जनयिता उत्पादकः, उत्पादनश्चौत्र इत्यर्थः, बहुकालात् पूर्वं परशुरामेण निर्वापितस्य क्षात्रतेजसः पुनः प्रज्वालयिता इति भावः, णौ(ण्यर्थ-तृच्-योगे कर्मणि न षष्ठी, सवितारं सूर्यं, स्वकीयपुरुषमिति भावः, सर्वेषां निखिलानां, कुलभृतां वंशधराणां, नृपतीनां चन्द्रादीनामिति भावः, उपरि अग्रे, विधाता कर्ता, सूर्यवंशे जन्मग्रहणात् निजवीरत्वप्रकटनद्वारा सूर्यस्यैव प्राधान्यव्यापक इति भावः, वर्णानां ब्राह्मणादीनां, विनेता नियामकः, स्वधर्मप्रवर्तक इति यावत्, भृगुपतेः परशुरामस्य, भुजादर्पस्य बाहुबलगर्वस्य, निकषः कषप्रस्तरविशेषः, कषिलाक्षविलपरीक्षास्थानभूतः प्रस्तरविशेषः इत्यर्थः, "स्याच्छुद्धे निकषः कषः" इत्यमरः; महावीरः श्रीमान् अयं रामः, अक्ष्णोः नयनयोः, अमृतं सुधा, विकिरति विक्षिपति, चक्षुषोः दृष्टिं विदधातीत्यर्थः। शिखरिणी वृत्तम्॥ ६५॥

(ल) रघुराजेति।—रघुराजस्य रघुवंशीयराजगणस्य, यः धर्माधिकारः धर्माधिकरणं, यथाशास्त्रं न्यायेन प्रजापालनादिरूपं कर्मेत्यर्थः, तत्र सर्वधुरीणः सर्वधुरन्धरः, निखिलभारवहनसमर्थः इत्यर्थः, सर्वश्रेष्ठ इति यावत्।

(व) जरसा वार्द्धकेन, दुर्वहं वोढुमशक्यं, नयेति शेषः। वर्णाश्रमभारं वर्णानां

जनकः। सखे दशरथ! साधु ते हृदयमौद्यम्। क्षमा-देतदनुष्ठातव्यम्।

रामः। (उपसृत्य)। तातौ! अभिवादये।

जनकः। एह्येहि वत्स रामभद्र! (इति सहर्षमालिङ्गति)।

दशरथः। (राममालिङ्ग्य)। सखे जनक! रामभद्रमभिषेक्तुं जामदग्न्यविजयप्रीतिरेव श्रेयानवसरः, कालुष्येपे पुनः को हेतुः? (ष)

(प्रविश्य)।

लक्ष्मणः। इयमार्य्यया मन्थरयोपनीता मध्यमाम्बायाः (स) धात्री।

(राजानौ सवितर्कमन्योऽन्यं पश्यतः)।

रामः। (सहर्षम्)। वत्स लक्ष्मण! अपि सपरिवारायाः (ह) कुशलमम्बायाः कथयत्यार्य्या मन्थरा?

लक्ष्मणः। आर्य्ये। अथ किम्।

रामः। ननममात्प्रवासदौर्मनस्यमम्बां (क) पीडयिष्यति।

जनकः। (लक्ष्मणहस्तात् पत्रिकां गृहीत्वा वाचयति)। स्वस्ति, महाराजदशरथं कैकेयी विज्ञापयति। यथा—

ब्राह्मणादीनाम्, आश्रमाणां ब्रह्मचारिप्रभृतीनां, स्वस्ववर्णोचिताश्रमाचारानिति वा, भारः, स्वस्वभारः इत्यर्थः तम्।

(ग) उपबुभुक्षामहे उपभोक्तुमिच्छामः, तपस्यर्थेति भावः।

(घ) श्रेयान् श्रेष्ठः। कालक्षेपे समयातिवाहने, कालक्षेपञ्च किमपि प्रयोजनं जानीति भावः।

(ङ) मध्यमाम्बायाः मध्यमायाः मातुः कैकेय्या इत्यर्थः।

(च) अपि प्रश्ने। सपरिवारायाः सपरिजनायाः, आत्मीय भृत्यादिसहितायाः इत्यर्थः।

(छ) अम्बामिति।—अम्बाकं प्रवासेन दूरदेशावस्थानेन, दौर्मनस्यं विमनस्कता, जनयाञ्चक्रीत्यर्थः। अम्बां मातरं, कैकेयीमिति यावत्।

तन्मे वरद्वयमुरीकृतपूर्वमेव
याचे बिभर्तु भरतस्तव राज्यलक्ष्मीम् ।
वर्षाणि तिष्ठतु चतुर्दश दण्डकायां
सौमित्रि-मैथिलसुतासहितश्च रामः ॥ ६६ ॥

(इति राजानो मूर्च्छतः) ।

रामः । यदादिशत्यम्बा । (इति शिरसि पवित्रां कृत्वा) । वत्स लक्ष्मण ! निजाममदाराधनसङ्गाध्यायिनीं प्रजावतीम् (ख) आदाय पुरो (ग) भव ।

लक्ष्मणः । तथा । (इति निष्क्रान्तः) ।

रामः । तातौ ! समाश्वसितं समाश्वसितम् (घ) ।

जनकः । (आश्वस्य) । अहह !!—

पाणिर्गृहीतो रघुपुङ्गवेन
देवः पुराणः श्वशुरो विवस्वान् ।
पिता श्वयं केकयचक्रवर्त्ती
कर्मेदमेतादृशमाः !! किमेतत् ॥ ६७ ॥

(इति मूर्च्छति । रामः पटाञ्चलेन (ङ) वीजयति) ।

तदिति ।—मे मह्यम्, उरीकृतपूर्वमेव पूर्वमवाङ्गीकृतम्, एव-शब्दोऽवधारणार्थः, तत् पूर्वप्रार्थितमित्यर्थः, वरद्वयं याचे प्रार्थये, (तयोरेकेन) भरतः तव राज्यलक्ष्मीं राज्यसम्पदं, बिभर्तु पालयतु, (द्वितीयेन) रामः सौमित्रि-मैथिलसुताभ्यां लक्ष्मण-सीताभ्यां, सहितः चतुर्दश वर्षाणि व्याप्य, दण्डकायां दण्डकारण्ये, तिष्ठतु वसतु च । वसन्ततिलकं वृत्तम् ॥ ६६ ॥

(ख) यदाराधनेति ।—यदाराधनं आराधने उपासने, व्रतयज्ञविषये इति भावः, सङ्गाध्यायिनीं सतीर्थां, तुल्यव्रतधारिणीमित्यर्थः । प्रजावतीं भाग्यवतीं, सीतामित्यर्थः, "प्रजावती भाग्यवतीया" इत्यमरः ।

(ग) पुरः अग्रतः ।

(घ) समाश्वसितं समाश्वस्तौ भवतम् ।

पाणिरिति ।—रघुपुङ्गवेन रघुश्रेष्ठेन, दशरथेन इति यावत्, पाणिः गृहीतः विवाहः कृतः, देवः विवस्वान् सूर्यः, पुराणः प्राचीनः, आदित्यः, श्वशुरः, तवेति

दशरथः । (आत्मगतम्)—

क्रोऽप्येष वाङ्मनसयोरतिवृत्तवृत्ति-
र्भावो हुताशनमयश्च तमोमयश्च ।
भोक्तृत्वमात्रमिह मे पुनरीदृशं मां
हा वत्स राम ! कथमुत्सहसे विहातुम् ? ॥ ६८ ॥

(विलप्य)। हा वत्से जानकि ! निशाचराणामातिथेयीं भवितुं (च) दशरथगृहे प्रविष्टाऽसि । (इति मूर्च्छति)।

रामः । तातो ! समाश्वसितं समाश्वसितम् ।

जनकः । (आत्मगतम् आकाशे सत्यं वदन्)। साधु सखि कैकेयि ! साधु, यदस्या विश्वम्भरादुहितुः (छ) मे वत्सायाः पत्युरनुवृत्तिरेव (ज) प्रसादीकृता । (विलप्य सत्यम्)—

ग्रेषः, पिता जनकः, स्वयं साक्षात्, कैकयानां कैकयवंशीयानां, चक्रवर्त्ती सम्राट्, ईदृशम् एतादृशं कर्म दुराचरणमिति भावः, कैकेय्या इति ग्रेषः, आः ॥ पीडायां क्षोपे वा, "आस्तु स्यात् क्षोप पीडयोः" इत्यमरः; एतत् किम् ? अतीव विरुद्धमिति भावः। उपजातिवृत्तम् ॥ ६७ ॥

(छ) पटाञ्चलेन वसनप्रान्तेन ।

क इति।—वाङ्मनसयोः वाचा मनसश्च, अतिवृत्तवृत्तिः अविषयः, अगोचर इत्यर्थः, कदाऽपि वचसा वा मनसा वा न चिन्तित इति भावः, हुताशनमयः अग्निमयः, अत्यर्थं सन्तापजनकत्वादिति भावः, तमोमयश्च अन्धकारमयश्च, चैतन्यविरोधकत्वादिति भावः, क्रोऽपि अनिर्वचनीयस्वरूपः, एषः अयम्, अनुभूयमान इत्यर्थः, भावः अवस्थेति यावत्, मम वर्त्तते इति ग्रेषः, ईदृक् भावे, पुनः किन्तु, मे मम, भोक्तृत्वमात्रम् अनुभवितृत्वमेवेत्यर्थः, मात्रपदेन प्रतीक्षराजत्वं व्यज्यते, हा ! इति खेदे, हे वत्स राम ! ईदृशम् इत्थं गतम्, एवविधावस्थमित्यर्थः, मां विहातुं त्यक्तुं, कथं केन प्रकारेण, उत्सहसे ? शक्नोषीत्यर्थः । वसन्ततिलकं वृत्तम् ॥ ६८ ॥

(च) आतिथेयीभवितुम् आतिथ्यपरायणा भवितुम्, आतिथ्यं गृहीतुमित्यर्थः ।

(छ) विश्वम्भरादुहितुः पृथिवीनन्दिन्याः; दशरथस्नुषत्वात् इति भावः । विश्वम्भरादुहितुः पृथिवीनन्दिन्याः ।

धनुष्मन्तौ वत्सौ दशरथभुजैरुष्मलतमाः
प्रदेशास्ते वत्सा शिशुरशिवहृत्ता वनभुवः।
प्रिये राजा सुक्तैरसुभिरपमार्ष्टि स्वमयश-
श्चरित्रव्यत्यासः सखि! कथमयं केकयकुले?" ॥ ६९ ॥

कष्टं च, वयमपि कथमनेन जनपदेषु बहुलीभवता भरत-यौवराज्यलक्ष्मीकर्णपूरतमालपल्लवेन कैकेयीदुर्यशसा (भ) मूर्धानमुन्नमय्य लोकस्य मुखं द्रक्ष्यामः?

(अ) अनुक्तिरेव अनुमननमेव, नान्यत् किमपि यौतस्वादिकमित्येवमर्थः। प्रसादीकृता पुरस्कारत्वेन दत्ता इत्यर्थः।

धनुष्मन्तावितिः।—वत्सौ रामलक्ष्मणौ, धनुष्मन्तौ धनुर्धरौ, धनुर्वेदे सुशिक्षितावित्यर्थः यावत्, दशरथस्य भुजैर्बाहुभिः, ते प्रदेशाः, अयोध्याराज्यानीति यावत्, ऊष्मलतमाः अतितेजोयुक्ताः सुखकरा इत्यर्थः, आसन्निति शेषः, वत्सा स्नेहभाजनं सीता, शिशुः एकतः क्लेशासहेति भावः, अत एव वनभुवः अरण्यप्रदेशाः, अशिवहृत्ताः अशुभव्यवहाराः, विघ्नबहुला इति यावत्; "दशरथभुजैः" इत्यत्र "दशमुखभुजैः" "दशगलभुजैः" इति वा पाठः सङ्गततया प्रतिभाति, दशरथस्य भुजबहुत्वाभावात् रामादीना दण्डकारण्य-प्रेषणजनितखेदवर्णनावसरे दशरथभुजशब्दप्रयोगायोध्याप्रदेशस्य ऊष्मलतमत्वोल्लेखस्य अप्रासङ्गिकत्वाच्च, ततश्च वत्सौ धनुष्मन्तावपि, ते प्रदेशाः दण्डकारण्यप्रदेशाः, दशमुखभुजैः रावणबाहुबलैः, ऊष्मलतमाः अतिसन्तप्ताः, अत्यर्थं पीडिता इति यावत्, अत एव वत्सा सीता शिशुः, तत्रापि वनभुवः अशिवहृत्ताः इत्येवं व्याख्या सङ्गततया-ऽस्माकं प्रतिभातीति मन्तव्यमिति दिक्। राजा दशरथः, प्रिये इष्टे, असुभिः प्राणैः, सुक्तैः परित्यक्तैः, प्राणपरित्यागेनेत्यर्थः, स्वं निजम्, अयशः कलङ्कं, रामस्य वनप्रेषण-जनितमिति भावः, अपमार्ष्टि शोधयति, हे सखि! केकयकुले केकयस्य तव पितुः वंशे, अयम् एषः, चरित्रव्यत्यासः चरित्रविपर्ययः, कुलक्रमागतस्वभावव्यति-क्रम इति यावत्, दुराचारजनितः कलङ्क इति भावः, कथं केन प्रकारेण, अपमृज्यते त्वया? इति शेषः, दशरथः प्राणविसर्जनेन कलङ्कमुक्तो भवितुं शक्ष्यति, तव तु तस्मात् मुक्तेः कोऽप्युपायो न दृश्यते मयीति भावः। शिखरिणी वृत्तम् ॥ ६९ ॥

(भ) बहुलीभवता विस्तारं गच्छता, सर्वत्र प्रकटीभवता इत्यर्थः। भरतेति।—भरतस्य यौवराज्यं युवराजपदाभिषेकः, तस्य लक्ष्मीः शोभा, तस्याः कर्णपूरः कर्णभूषणं,

राम:। (उत्थाय)। तात जनक! यथा सुखं तातं शृणोमि तथा भवता विधातव्यम्। (अ) (इति निष्क्रान्त:)।

दशरथ:। (आश्लिष्योत्थाय च)। वत्स रामभद्र! परिपालय (ट) माम्। (इति जनकेन सार्धमन्ये निष्क्रान्ता:)।

(इति निष्क्रान्ता: सर्वे)।

इति दशरथविसर्जनो नाम चतुर्थोऽङ्क:।

पञ्चमोऽङ्क:।

(तत: प्रविशत: अनघा-लाघवश्च)।

लाघवात्। ततस्तत:?

अनघा। ततो मिथिलाया निष्क्रम्य मन्थराकलेवरमवकीर्य मारुतिप्रत्यवेक्षितं (क) स्वशरीरमधिष्ठाय गङ्गायां (ख) शृङ्गवेरपुरं नाम निषादपक्कणम् (ग) आगत्य शबरीभूता (घ) अस्मि।

च: तमालपल्लव: तमालश्यामलय: तेन तदूपेणेत्यर्थ:, तमालपल्लववत् अतिश्यामेन इति भाव:। कैकेयीदुर्यशसा कैकेयीकलङ्केन।

(अ) तातं पितरम्। विधातव्यं कर्त्तव्यम्।

(ट) परिपालय प्रतीक्षस्व, रक्ष इत्यर्थो वा।

इति श्रीलोकान्तविद्यासागरभट्टाचार्येण कृता
अनर्घराघवचतुर्थाङ्कव्याख्या समाप्ता।

(क) अवकीर्य विक्षिप्य, परित्यज्य इत्यर्थ:। मारुतिना हनूमता, प्रत्यवेक्षितम् अवधानेन दृष्टं, सुरक्षितमिति यावत्।

(ख) स्वशरीरं निजदेहं, मन्थराया: शरीरे प्रवेशकाले परित्यक्तं प्राक्तनं निजकलेवरमिति भाव:। अधिष्ठाय आश्रित्य। गङ्गाया गङ्गातीरे।

(ग) निषादपक्कणं निषादा: चण्डाला: धीवरा वा, "निषाद: स्वरभेदे स्यात्चण्डाले धीवरेऽपि च" इति मेदिनी; तेषां पक्कण: आलय:, वसतिरित्यर्थ:, ग्राम: इति भाव:, "पक्कण: शबरालय:" इत्यमरोक्ते: पक्कणशब्दस्य शबरालयार्थकत्वेऽपि व्याप्यत्व: चण्डालादीनां सर्वेषामेव अन्त्यजजातीनामालयार्थकत्वमवगन्तव्यम्।

(घ) शबरीभूता चाण्डालभेदस्त्रीजातिविशेषरूपिणी, "भेदा: किरातशबर

लाम्बवान्। ततस्ततः ?

अनघा। ततश्च ममानुपदमेव तस्मिन् (ङ) द्रुमौ राम-लक्ष्मणाविव सीतेति सर्वतः शब्दो महानभूत्।

लाम्बवान्। (सहर्षम्)। ततस्ततः ?

अनघा। ततश्च कावेतौ रामलक्ष्मणौ ? इति कर्णधाराधिपतिना (च) गुहेनाहमनुयुक्ता (छ) निवेदितवत्यस्मि।—

पुत्रीयता दशरथेन मुनिप्रसादात्
प्राप्ताः पुराणपुरुषस्य कलाश्चतस्रः।
तासामयं गुणमयः प्रथमः कुमारो
वीरोद्धतः पुनरसावपरस्तृतीयः॥ १॥

लाम्बवान्। अनघे! साधूक्तम्। ततस्ततः ?

अनघा। ततश्चोदकान्तनिवर्त्तितानुयात्रिकबन्धुवर्गः सम्भ्रमोपगतेन (ज) गुहेनोपनीतां नावम् (झ) अधिरुह्य—

पुत्रिच्छा स्त्रेच्छजातयः" इत्यमरोक्तेः, "किरातादयस्त्रयी म्लेच्छजातयश्चण्डालभेदाः" इति भानुजीदीक्षितवाक्याच्च।

(ङ) अनुपदमेव अन्वगेव, पश्चादेवेत्यर्थः, "अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम्" इत्यमरः। तस्मिन् निषादपक्षपे।

(च) कर्णधाराधिपतिना नाविकराजेन; "कर्णधारस्तु नाविकः" इत्यमरः। गुहेन गुहक इति नाम्ना प्रसिद्धेन।

(छ) अनुयुक्ता पृष्टा; "प्रश्नोऽनुयोगः पृच्छा च" इत्यमरः।

पुत्रीयतेति।—पुत्रीयता आत्मनः पुत्रमिच्छता, दशरथेन मुनेः ऋष्यशृङ्गस्य, प्रसादात् अनुग्रहात्, पुराणपुरुषस्य नारायणस्य, चतस्रः कलाः अंशाः, प्राप्ताः लब्धाः, पुत्रत्वेनेति शेषः, नारायणः स्वं चतुर्धा विभज्य अंशचतुष्टयेन दशरथस्य पुत्रतां गत इति निष्कर्षः; तासां कलानां मध्ये, गुणमयः सर्वगुणाधार इत्यर्थः, वीरोद्धतः वीररसेन उद्धतः उद्दृतः, नामकविशेषो वा, अयम् इति अङ्गुल्या निर्दिश्य एवः, प्रथमः ज्येष्ठः, कुमारः पुत्रः, राम इति शेषः; पुनश्च अपरः रामेतरः, असौ अयम्, लक्ष्मण इति शेषः, तृतीयः, कुमारः इति शेषः। वसन्ततिलकं वृत्तम्॥ १॥

(ज) उदकान्तेति।—उदकान्तात् जलघटनोपात्, निवर्त्तितः निवारितः,

तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनाऽसौ तृतीय-
स्तस्मै सौमित्रिमैत्रीमयमुपहृतवानातरं नाविकाय।
व्यामग्राह्यस्तनीभिः शबरयुवतिभिः कौतुकोदञ्चदक्षं
कृच्छ्रादन्वीयमानः क्षणमचलमथो चित्रकूटं प्रतस्थे ॥२॥

लाभवान्। हन्त! महत् करुणम् (अ)।

अनघा। आर्य्ये! करुणभयादेव तस्मिन्निङ्गुदीतरुमूले कुमारयोर्जटाग्रहणवृत्तान्तमन्तरितवती (ट) अस्मि।

अनवाप्तिकः अनुगामी, बन्धुवर्गः स्वजनसमूहः येन तथाभूतः, "आ उदमन्तं स्निग्धो ऽनुगम्यते" इति स्मृतिः, "मोदकान्तं प्रियं प्रीत्यमनुव्रजेत्" इति स्मृतिश्च। सः रामभद्रः सत्वरम्, उपगतः उपस्थितः तेन।

(ऋ) उपनीतां समीपं प्रापिताम्, उपस्थापितामित्यर्थः। नावं तरन्ति "स्त्रियां नौस्तरणिस्तरिः" इत्यमरः।

तीर्त्वेति।—आत्मना स्वेन, तृतीयः वयसां पूरणः, सीता-सौमित्रिसहित इति यावत्, असौ रामः, भूतेशस्य हरस्य, मौलिस्रजं शिरोभूषणमालां, तत्स्वरूपिणीमित्यर्थः अमरधुनीं सुरनदीं, गङ्गामित्यर्थः, "अथ नदी सरित्। तरङ्गिणी त्रैपथगा तटिनी ऽदितो धुनी" इत्यमरः; तीर्त्वा उत्तीर्य, तस्मै नाविकराजाय गुहाय, सौमित्रिणा लक्ष्मणेन सह, या मैत्री सख्यं, तन्मयं तदात्मकम्, आतरं तरपक्षम्, अपहरतीर इत्यर्थः, अमनाथं देयं मूल्यविशेषमित्यर्थः, "आतरस्तरपक्ष स्यात्" इत्यमरः; उपहृतवान् दत्तवान् सन्, अवातरत्, सखिलोपहारप्रदानानन्तरं पारगमनानन्तरं वा इत्यर्थः व्यामः सकरयोः प्रसारितयोः बाह्वोस्तिर्यगन्तरमानः, "व्यामो बाह्वोः सकरयोस्तिर्यगन्तरम्" इत्यमरः; तेन व्यामेन सकरयोः प्रसारितयोः बाह्वोरित्यर्थः ग्राह्यौ ग्रहणयोग्यौ, स्तनौ कुचौ यासां तादृशीभिः, अति पीवरस्तनीभिरिति भावः, शबरीणां युवतिभिः तरुणीभिः नारीभिः, कौतुकेन औत्सुक्येन, उदञ्चती उद्गच्छती, विद्यां प्रादुर्वतीत्यर्थः, अक्षिणी नेत्रे यस्मिन् कर्मणि तत् यथा तथा, कृच्छ्रात् दुःखात्, अक्षम् अन्वीयमानः अनुगम्यमानः, चित्रकूट चित्राणि रम्याणि, कूटानि शिखराणि यस्य तत्तं, तन्नामानम्, अचलं पर्वतं, प्रतस्थे जगाम। अत्रधरा वृत्तं—"मसौ यानां त्रयेण त्रिमुनियतियुता वत्सरा वोर्त्तितेयम्" इति लक्षणात्॥ २॥

(अ) हन्त! खेदे। करुणं शोकजननव्यापारः।

(ट) कुमारयोः रामलक्ष्मणयोः, जटाग्रहणवृत्तान्तं जटाधारणवृत्तान्तम्,

ज्ञात्ववान्। श्रमणे! सर्वमेतत् कल्याणोदर्कं (ठ) भविष्यति।

श्रमणा। अहं तु निषादपतिप्रीतये तत्रैवातिष्ठम्। (ड) अतीते च गणरात्रे सप्रकृतिजनपदः (ढ) पितुः स्वर्गारोहण-वार्त्ताभिधायी द्वितीयो दाशरथी रामभद्रमयोध्यामुपनेतुं तेनैव पथा (ण) चित्रकूटमुपगतः।

ज्ञात्ववान्। (सभयम्)। ततस्ततः?

श्रमणा। ततश्च तस्मिन् "आर्य्य! लोके कैकेयानामाकल्प-मनल्पमकीर्त्तिस्तम्भं निखनता (त) केनापि कुत्सितस्तातः; (थ) तत् सम्प्रति गृहाण रघूणामधिराज्यम्" इति पुनः पुनश्चिर-मनुबन्धो (द) रामेण सृष्टिकया प्रत्यादिष्टः (ध) कनजटापरि-

---

अलंकृतवती आच्छादितवती, गोपायितवतीत्यर्थः, तदुक्तान्तो मोक्ष इति भावः।

(ठ) कल्याणोदर्कं शुभोत्तरफलं, भाविशुभफलप्रदमित्यर्थः, "उदर्कः फलमुत्तरम्", इत्यमरः।

(ड) निषादपतुः चाण्डालराजस्य, गुहस्येत्यर्थः, प्रीतये सन्तोषाय। तत्रैव निषादप्रकृष्णे एव।

(ढ) गणरात्रे बहूषु निशासु, बहुषु दिनेषु इति भावः, "गणरात्रं निशा बहुः" इत्यमरः; अतीते अतिक्रान्ते, कतिपयनिशासु गतासिति यावत्, सप्रकृति-जनपदः प्रकृतिभिः अमात्यादिभिः, जनपदैः देशवासिभिश्च सहितः।

(ण) पितुः दशरथस्य। द्वितीयो दाशरथिर्भरत इत्यर्थः। तेनैव पथा येन पथा रामो गतः तेनैव मार्गेण।

(त) तस्मिन् चित्रकूटे। कैकेयानां कैकयवंश्यानाम्। आ-कल्पम् आ-प्रलयम्। अनल्पं महान्तम्। अकीर्त्तिस्तम्भं कलङ्करूपं स्तम्भम्। निखनता प्रोथयता इत्यर्थः।

(थ) कुत्सितः प्रतारितः। तातः पिता, दशरथ इत्यर्थः, "तातस्तु जनकः पिता" इत्यमरः; वस्तुतः कैकेय्या प्रेषिता निजदासी मन्थरा सा न, परन्तु भ्रमवशादधिष्ठिता, तत्प्रभावावशा च, यया पितुः समीपे कैकेयाः पतिकैकयनिलुब्धा कुत्सितेन तातेन आर्य्यः वनं प्रेषित इति भावः।

(द) रघूणां रघुवंशीयानाम्, चक्रवर्त्तिनिति भावः, अधिराज्यं साम्राज्यम्, आधिपत्यमिति यावत्, अनुबन्धो अनुबन्धः अनुयानं, मुख्यञ्च अनुगमनमित्यर्थः, तदात्

अहो भरतः शरभङ्गमुनिप्रेषिताम् (न) अस्य पादुकां भद्रासनम् (प) अधिरोप्य प्रजानामाभ्युदयिकमवेक्षमाणः (फ) तटैव नन्दिग्रामं गतवान् ।

लाघवात्। (सहर्षम्)। हन्त!! फलितमस्मद्व्यवसाय-श्रमयोः परिश्रमाभ्याम् (ब)। ततस्ततः ?

श्रमणा। ततश्च शावाशौचमास्थितस्य (भ) क्षत्रियस्य प्रतिश्रुतमस्मत्प्रहणमिति छिद्रान्वेषिभिर्जनस्थानवास्तव्यैः (म) खर-दूषणप्रभृतिभिस्तत्र विराधो नाम राक्षसस्तीक्ष्णैः प्रहितः। (य)

शिष्यवत् ज्येष्ठस्य पुनः पुनरनुगमनशीलः, नियतं पश्चादवस्थाय प्रार्थनापर इति यावत्, आयड्वान् इति भावः। "हीमोत्पादेऽनुकम्पे: स्यात् प्रकृत्यादिविनश्वरे। मुख्यानुयायिनि त्रिषौ प्रकृतस्यानुवर्त्तने ॥" इत्यमरः।

(घ) सृष्टिकया शपथेन, "सृष्टिश्च शपथेऽपि च" इति रत्नकोषः। प्रत्यादिष्टः निराकृतः, प्रत्याख्यात इत्यर्थः, "प्रत्यादिष्टो निराकृतः" इत्यमरः।

(न) शरभङ्गेति।—शरभङ्गो नाम मुनिः, तेन प्रेषिता प्रेरिता, याचित्वा दापितामिति यावत्, लाघवात् स्वयं प्रार्थनायामसामर्थ्यादिति भावः।

(प) अस्य रामभद्रस्य। भद्रासनं नृपासनं, रत्नादिनिर्मितराजासनमित्यर्थः, "नृपासनन्तु यत् भद्रासनम्" इत्यमरः।

(फ) आभ्युदयिकम् अभ्युदयाय हितम्, ऐहिक पारत्रिकश्रेयोलाभाय इत्यर्थः हितं, साङ्गतिक कार्य्यमित्यर्थः। अवेक्षमाणः अवलोकयन्।

(ब) फलितं सिद्धम्। अस्मदिति।—अस्माक व्यवसायः उद्योगः, श्रमणायाः परिश्रमस्य ताभ्याम्।

(भ) शावाशौचं मरणाशौचं, पितुरिति शेषः, आस्थितस्य आश्रितस्य, अनुष्ठायिनः इति यावत्।

(म) छिद्रान्वेषिभिः रन्ध्रानुसन्धायिभिः, अपकार्य्यस्य व्यसनापेक्षिभिरिति भावः, छलयाद्यभिरित्यर्थो वा। जनस्थानवास्तव्यैः दण्डकारण्यैकदेशः जनस्थानं, तस्मिन् आसन्ने कृतनिवासैः।

(य) तीक्ष्णः क्रूरः, तीक्ष्ण इति भागुरिः। प्रहितः प्रेरितः।

ज्ञास्यवान्। (विदूषकः)। धिक्मूर्खाः! आतिपातिके (र) हि कार्ये राज्ञां सद्यः शुद्धिः। ततस्ततः?

अनसूया। ततश्च विराधवधाक्षिप्तहृदये दुःसहशोकदीर्घाक्षौ-मौर्द्धदेहिकीं पितुः क्रियाम् (ल) अतिवाह्य (व) भगवता चतुः-समुद्रमुष्टिन्यग्रोधेन (श) विन्ध्याचलचापलारम्भविस्रब्धघातिना (ष)

(र) धिक् निष्फलाः, अप्रशस्ता इत्यर्थः, निन्दा भर्त्सनार्थयोरेव धिक्शब्दयोगे द्वितीयाविधानात् अत्र निष्फलार्थत्वेन न द्वितीया। मूर्खा इति आक्षेपोक्तिः खरं दूषणादीन् उद्दिश्य इति शेषम्। आतिपातिके आत्ययिके, अप्रतिरोद्धव्यविपत्ति-जनके इत्यर्थः, आतिपातिकमत्ययिकमिति यावत्, सद्यःशब्दोऽपि इति भावः। "पर्य्यायोऽतिक्रमस्त्वभिप्रेतिपात उपाय्यः। न राज्ञां राजवर्त्मनि" इति स्मृतिः।

(ल) विराधेति।—विराधस्य वधेन हननेन, आक्षिप्तम् आकृष्टं, व्याकुलमित्यर्थः, हृदयं यस्य तथोक्तः। दुःसहेति।—दुःसहेन सोढुमशक्येन, शोकेन दीर्घाणि दीर्घत्वेन प्रतीयमानानीत्यर्थः, अक्षीणि दिनानि यस्यां तादृशीम्। और्द्ध-दैहिकीं दैहात ऊर्द्धं दैहत्यागादनन्तरं भवा और्द्धदैहिकी तां, मरणदिनमारभ्य सपिण्डीकरणपर्य्यन्तं प्रेतमुद्दिश्य प्रत्यहं क्रियमाणपिण्डादिदानरूपामित्यर्थः, "मृताय तदहर्दानं विधु श्राद्धोर्द्धदेहिकम्" इत्यमरः। क्रियां श्राद्धादिव्यापारम्।

(व) अतिवाह्य समाप्य।

(श) चतुःसमुद्रेति।—चतुर्णां समुद्राणां समाहारः चतुःसमुद्रं सागरचतुष्टयं, तत् मुष्टिना मुष्टीकृत्य, धयति पिबतीति तथोक्तेन, गण्डूषेण चतुःसमुद्र पायिनेत्यर्थः। पुरा असुरैः सुरपरानिभैः पलाय्य समुद्रमध्ये आश्रय गृहीतं, पुनश्च दैवैः सह युधि सङ्गमयाय समुद्रे आश्रयः गृह्यते अ; इत्थं पुनः पुनः क्रियमाणे देवेन्द्रेण प्रार्थितोऽगस्त्यमुनिः समुद्र गण्डूषेणैकेन पीतवान्; ततश्चासुराः निःशरणतामापाद्य सुरैर्निहता इति पुराकल्पकथाऽनुसन्धेया।

(ष) विन्ध्याचलेति।—विन्ध्याचलश्च विन्ध्यगिरिः, चापलं चाञ्च्यं, सुमेरुपर्य्यन्तं सूर्य्यावरोधार्थमभ्युत्थानरूपमिति भावः, तस्य आरम्भे उपक्रमे, विस्रब्धस्य विश्वस्तस्य, अगस्त्ये कृतविश्वासमित्यर्थः, विन्ध्याचलमिति शेषः, "समौ विषम-विश्वासौ" इत्यमरः; उन्नीतं तथोक्तेन। पुरा सुमेरुपर्य्यन्तं वर्द्धमाने विन्ध्ये सूर्य्यावरोधात् जगति विनाश-मुपगच्छति दैवैरभ्यर्थितोऽगस्त्यमुनिः यावच्चला: समागत्य शिरो विन्ध्य प्रणमन्तं "यावदहं दक्षिणतो दिशः न परावर्तेयं तावत् त्वं न मूर्द्धानमुन्नीनथः, प्रत्युत एवमव-

वातापिदानवदीर्घयात्रामङ्गल्यकल्पेन (स) कलशयोनिना सनाथामरण्यश्रेणीं प्रतिष्ठमाने दाशरथौ पथि धाराधरो नाम वायसः सहसैव वैदेहीमुपाद्रवत्। (ह)

ज्ञात्वा। (स्वगतम्)। इदं तावदपशकुनं (क) नाम। (प्रकाशम्)। ततस्ततः?

शबरी। ततश्च—

रक्षोऽभिचारचरुभाण्डमिव स्तनं यो
देव्या विदेहदुहितुर्विददार काकः।
ऐषीकमस्त्रमधिकृत्य तदा तमक्ष्णा
काणीचकार चरमो रघुराजपुत्रः॥ १॥

नत एव तिष्ठ" इत्युक्त्वा दक्षिणां दिशं गतवान्, पुनश्च न परावर्तत। विन्ध्यश्च तादृग्रूपेण तथैव गुरुनियोगात् विनम्रशिरस्कतीति पुराकल्पवार्त्ता।

(स) वातापीति।—वातापेः तदाख्यस्य दानवस्य, दीर्घयात्रा चिराय गमनं, मरणमिति यावत्, तस्या मङ्गल्यकल्पः शुभशापकुम्भस्वरूपः तेन, यात्रायां मार्गक्षिप्त-कलशस्थापनस्य आचारसिद्धत्वादिति भावः। पुरा वातापिर्वातापिश्च द्वावसुरौ मायया विचेरतुः; तयोर्वातापिः यं कञ्चन भोजनाय निमन्त्र्य मध्याह्ने वातापिं मेषरूपं निहत्य तन्मांसेन निमन्त्रितं भोजयामास। ततश्च "वातापे। निष्क्रमस्व" इत्युच्चारणेन वातापिना स वातापिश्च उदरं विदार्य निःसृतः, ततश्च द्वावेतौ तन्मांसं सुखेन बुभुजाते। इत्थं बहवो भक्षिताः। एकदा अगस्त्यमुनिर्निमन्त्रितः, स तु वातापिं मेषरूपिणं तथा भक्षितवान् यथा स पुनर्न उदरात् निर्गन्तुमशक्नोत् इति पौराणिकी वार्त्ता।

(ह) कलशयोनिना कुम्भसम्भवेन, अगस्त्येन इत्यर्थः, "अगस्त्यः कुम्भसम्भवः" इत्यमरः, सनाथाम् अधिष्ठितां, समाश्रितामिति यावत्। अरण्यश्रेणीम् अरण्यश्रेणीम्, अगस्त्याश्रममिति यावत्। प्रतिष्ठमाने प्रस्थातुम् आरभमाणे, ष्ठसति सतीत्यर्थः। उपाद्रवत् अपीडयत्, नखेन व्यलिखदिति भावः।

(क) अपशकुनं दुर्निमित्तम्, अशुभसूचकनिमित्तमित्यर्थः, "शुभशंसिनिमित्ते च शकुनं साधुपुंसकम्" इति मेदिनी।

रक्षोऽभिचारेति।—यः काकः धाराधराख्यः वायसः, रक्षसाम् अभिचारे हिंसाप्रयोगे, मारणार्थयज्ञे इत्यर्थः, "हिंसायज्ञाभिचारः स्यात्" इत्यमरः; चरुभाण्डमिव

जाम्बवान्। ततस्ततः ?

अनघा। ततश्च—

क्रमेणैव सुतीक्ष्णादीनुपस्थाय महामुनीन्।
अगस्त्यशासनादास्ते पञ्चवट्यां रघूद्वहः॥ ४॥

जाम्बवान्। (सहर्षम्)। तर्हि हस्तगत एवास्माकम्। किय[त] दन्तरम् ऋष्यमूक-जनस्थानयोः। (ख)

अनघा। आर्य्य! न खल्वद्यापि श्रोतव्यं शृणोषि।

जाम्बवान्। अवहितोऽस्मि।

अनघा। तत्र च कामुको रामभद्रमनुप्रविश्य रसं (ग) दास्यामीति सङ्कल्पितपतिद्रोहपातकिनौ (घ) शूर्पणखा

दृश्यपाकपूर्णपात्रमिव, "दृश्यपाके चरुः पुमान्" इत्यमरः, दैव्याः विधेर्दुहितुः जानक्याः, खलं विददार विलिलेख, विदारितवान् इत्यर्थः, चरमः ज्येष्ठः, "चरमो ज्येष्ठ-कनिष्ठयोः" इति विश्वः, रघुराजपुत्रः रामभद्रः, तदा दृषीका वीरपत्नीजाया, तस्या विचारः ऐषीकं तत्, अस्त्रम् आयुधम्, दृषीकाटवनिर्मितं प्रहरणमित्यर्थः, अधिकृत्य आश्रित्य, निचिक्षेपेत्यर्थः, तं कामम्, अक्षा नेत्रेण, काणीचकार काणार्थं काणं कृतवान्, एकनेत्रं विनाशयामासेत्यर्थः। वसन्ततिलकं वृत्तम्॥ ३॥

क्रमेणेति।—रघूद्वहः रघुकुलधुरन्धरः, रामः इत्यर्थः, क्रमेण सुतीक्ष्णादीन् सुतीक्ष्णप्रभृतीन्, महामुनीन् महर्षीन्, उपस्थाय अभिवाद्येत्यर्थः, अगस्त्यस्य आज्ञातः आदेशात्, पञ्चवट्यां पञ्चवटीसंज्ञकवने, आस्ते अधिवसति। अनुष्टुप् वृत्तम्॥ ४॥

(ख) कियत् किञ्चिदित्यर्थः, अन्तरं व्यवधानम्, "अन्तरमवधावाविधिपरिधानान्तर्द्विभेदतादर्थ्ये" इत्यमरः। ऋष्यमूकः सुग्रीवादीनामावासभूतः पर्वतविशेषः। जनस्थानं दण्डकारण्यान्तर्गतप्रदेशविशेषः; ऋष्यमूक-जनस्थानयोर्मध्ये अल्पमेवान्तरमिति वक्तुरभिप्रायः।

(ग) रसं विषम्। "शृङ्गारादौ विषे वीर्य्ये गुडे रागे द्रवे रसः" इत्यमरः।

(घ) सङ्कल्पितेति।—सङ्कल्पितः मनसा स्थिरीकृतः, पतिः भर्त्ता, राम इति भावः, तस्य द्रोहे अनिष्टाचरणे, विषप्रयोगसङ्कल्पेऽपि इति भावत्, पातकिनौ पापीयसौ।

लक्ष्मणरोषहुतभुजि (ङ) कर्णनासौष्ठमयोभिस्तिसृभिराहुतिभिः प्रायश्चित्तयाञ्चक्रे । (च)

जाम्बवान्। (सासूयम्)। अहह !! महाननर्थकन्दः संवृत्तः । अथ भगिन्यास्तादृशं विडम्बनमवलोक्य खरादिभिः किं प्रतिपन्नम् ? (छ)

अमत्या। (विहस्य)। आर्य्य ! किं प्रतिपन्नं, यद्रामभद्रे धृतधनुषि प्रतिपद्यते । (ज)

जाम्बवान्। (सदर्षं-दासम्)। तत् किं तेऽपि बालिसाहाय्यकोपस्थायिनो (झ) विराधयात्राप्रहतमध्वानमनुप्रपन्नाः ? (ञ)

अमत्या। अथ किम् ।

जाम्बवान्। अमर्षे ! प्ररूढ़मिदानीं राम-रावणयोर्वैरम् । (ट)

(ङ) लक्ष्मणेति ।—लक्ष्मणस्य रोषहुतभुजि कोपानले ।

(च) कर्णनासौष्ठमयोभिः कर्णनासौष्ठात्मकाभिः, आहुतिभिः होमक्रियाभिः, प्रायश्चित्तयाञ्चक्रे प्रायश्चित्तमिव आचरितवतीत्यर्थः, लक्ष्मणेन तस्याः कर्णनासौष्ठानि निकृत्तानीति भावः, खानिर्द्रोहपातकप्रक्षमनार्थम् कृत्तिग्भूतलक्ष्मणप्रज्वालितास्त्रीं निजकर्णादिक्षमाहुतीकृत्य प्रायश्चित्तं कृतवतीवेति निष्कर्षः ।

(छ) अनर्थकन्दः अनिष्टमूलं, विपत्कारणमित्यर्थः, तादृशेन कर्मणा रावणस्य स्त्रीत्वोत्पादनादिति भावः । विडम्बनं तिरस्करणम्, अवमाननमिति यावत् । प्रतिपन्नम् अङ्गीकृतं, कर्त्तव्यत्वेन स्थिरीकृतमित्यर्थः, "प्रतिपन्नोऽभिरूपः स्यात् विज्ञातेऽङ्गीकृतेऽपि च" इति मेदिनी ।

(ज) प्रतिपद्यते अङ्गीक्रियते, कर्त्तुं समाप्यते इत्यर्थः, खस्त्रीजनदासमेव कर्त्तव्यतया स्थिरीकृतमिति भावः, रामभद्रश्चैव सर्वे एव पक्षत्वं गता इति निष्कर्षः ।

(झ) बालीति ।—बालिनः किष्किन्ध्याधिपतेः बालिराजस्य, साहाय्याय साहाय्यार्थम्, उपस्थायिनः उपस्थिताः ।

(ञ) विराधेति ।—विराधस्य पूर्वोक्तस्य रामभद्रराक्षसविशेषस्य, यात्रया प्रयाणेन, हतपूर्वं प्रथमभवनगमनेनेत्यर्थः, प्रहतं क्षुण्णं, पदन्यासेन कुट्टितमित्यर्थः, अध्वानं पन्थानं, गामिति भावः, अनुप्रपन्नाः अनुप्राप्ताः ।

(ट) प्ररूढं प्रवर्द्धमानं जातम् । वैरं आजन्मं, शत्रुता इत्यर्थः ।

अनसूया। (इसती)। आर्ये! मन्ये, खर-दूषणप्रभृतीनामभिभवाभिधाने केवलं क्लेशयिष्यति (ठ) वाचमात्मनः; पुनरनक्षरमपि शूर्पणखामुखमावेदयिष्यति (ड) दशकन्धरस्य।

लास्यवान्। (उद्भितम्)। श्रमणे! लघूत्थमनर्थमुत्प्रेक्ष्य प्रमुग्धोऽस्मि। (ढ)—

ऐल्ल केण पुराऽपि कौशिकमखादारभ्य लङ्केश्वरो
धत्ते शाश्वतिकं विरोधमधुना त्वेते हता बान्धवाः।
उत्साह-प्रभु मन्त्रशक्तिभिरलम्भूष्णुश्छलज्ञो बली
दृप्तः शूर्पणखानिकारमपरं दृष्ट्वा कथं मृष्यते? ॥ ५ ॥

(ठ) अभिभवाभिधाने पराजयवार्त्ताकथने। क्लेशयिष्यति पीडयिष्यति, वार्त्तावहः, शूर्पणखा वा इति शेषः।

(ड) अनक्षरम् अक्षरशून्यं, वाचा अनुक्तमपि इति यावत्। आवेदयिष्यति विज्ञापयिष्यति।

(ढ) लघूत्थं शीघ्रमुपस्थितम्। उत्प्रेक्ष्य वितर्क्य। प्रमुग्धोऽस्मि विमूढोऽस्मि, किं-कर्त्तव्यविचाराक्षमो भवामि इति यावत्।

ऐल्लकेणेति।—पुरा पूर्वम् अपि, लङ्केश्वरः रावणः, कौशिकमखात् विश्वामित्रयज्ञात्, आरभ्य उपक्रम्य, ऐल्लकेण रामेण सह, अद्यत् निरन्तर भव शाश्वतिकं नित्यं, विरोध वैरं, धत्ते बिभर्त्ति, अधुना तु इदानीञ्च, एते बान्धवाः खरादयः खलनाः, हताः विनाशिताः, रामेणेति शेषः, अतः उत्साह प्रभु मन्त्रशक्तिभिः उत्साहशक्तिभिः विक्रमबलैः, उक्तञ्च नीतिशास्त्रे—"विक्रमबलमुत्साहशक्तिः" इति, प्रभुशक्तिभिः कोशदण्डबलैः, उक्तञ्च नीतिशास्त्रे—"कोश-दण्डबलं प्रभुशक्तिः" इति, मन्त्रशक्तिभिश्च मन्त्र्यादीनां सामादीनाञ्च यथाबलप्रयोगैः, पञ्चाङ्गमन्त्रैर्वा, उक्तञ्च—"पञ्चाङ्गमन्त्रो मन्त्रशक्तिः" इति, एताभिस्तिसृभिः शक्तिभिः, "शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः" इत्यमरः; अलम्भूष्णुरतिसमर्थः, तथा छलज्ञः छिद्रविद्, छलमाप्नुयात् इत्यर्थो वा, बली बलवान्, दृप्तः अहङ्कृतः, रावणः इति शेषः, अपरम् अन्यं, पूर्वोक्तशाश्वतिकविरोधात् भिन्नमित्यर्थः, शूर्पणखायाः निकारं परिभवम्, अवमाननमित्यर्थः, "निकारः स्यात् परिभवे बान्धवोत्पीडणेऽपि च" इति धरणिः; नासाकर्णादिवैकृतमिति भावः, दृष्ट्वा विलोक्य, कथं केन प्रकारेण, मृष्यते? क्षम्यते? न क्षमणीयमित्यर्थः। आर्द्रवृत्तिश्छन्दः ॥ ५ ॥

शनैः शनैः अनयोः(ण)विरोधे सन्धुक्ष्यमाणे तुल्यव्यसनस्थो(त) दाशरथिरसहायः सूर्यसूनुना सन्धातुमीषत्करः (थ) स्यात्।

अनघः। आर्ये! किमिदानीमनुष्ठेयमस्ति? (द) मम हि निषादपुत्रो निषादचक्रवर्त्ती गुहो लक्ष्मणमित्रम्, अनेन सोपानेन सुखाधिरोहो (ध) रघुपतिरस्माकम्।

जाम्बवान्। (सहर्षं-स्मितम्)। अमणे! यत्रासि सुग्रीवपक्षः प्रातिनौ, तत् गच्छ, सत्वरमुपस्थापय (न) निषादराजम्।

(इति अनघा निष्क्रान्ता)।

(नेपथ्ये एकतः)।

भो भो लक्ष्मण! वैशेषिककटन्दीपण्डितो (प) जगद्विजयमानः पर्य्यटामि (फ)। क्वासौ रामः? तेन सह विवदिषामि (ब)।

(ध) शनैः शनैः मन्दं मन्दम्, उत्तरोत्तरमित्यर्थः। अनयोः रामरावणयोः।

(त) सन्धुक्ष्यमाणे सम्यक् दीप्यमाने, सम्यक् प्रज्वलति सतीत्यर्थः, वृद्धिं गच्छति सतीति यावत्। तुल्यव्यसनस्थः।—तुल्यं समानं, सुग्रीवेण सहेति भावः, यत् व्यसनं विपत्, राज्यभ्रंशरूपमिति भावः, तत्र तिष्ठति वर्त्तते इति तादृशः, राज्यात् बहिष्करणरूपतुल्यविपत्प्राप्त इत्यर्थः।

(थ) सूर्यसूनुना सूर्यपुत्रेण सुग्रीवेण। सन्धातुं सन्धेर्यितुं, सन्धिं कारयितुमित्यर्थः। ईषत्करः सुकरः इत्यर्थः, अनायाससाध्य इति यावत्।

(द) अनुष्ठेय करणीयम्।

(ध) अनेन लक्ष्मणमित्ररूपेण, सोपानेन उपायेनेत्यर्थः। सुखाधिरोहः सुखेनाधिगम्य इत्यर्थः।

(न) उपस्थापय समीपमानय इत्यर्थः, अस्मानिति शेषः।

(प) वैशेषिकेति।—वैशेषिकस्य कणादकृतदर्शनविशेषस्य, कटन्या व्याख्यायानिति भावः, पण्डितः विचक्षणः। "कन्दली" इति पाठे,—वैशेषिककन्दल्यां वैशेषिकदर्शनभाष्ये, निपुणतां इति भावः, पण्डितः, यद्वा—वैशेषिकी विशिष्टा, या कन्दली कदलः, तत्र पण्डितः विचक्षणः।

(अन्यतः)।

भो भोः परिव्राजक! कालसर्पखलीकारखर्जूलता (भ) न खलु सुखाकरी हृषिकमन्त्रतान्त्रिकस्य (म)।

लक्ष्मणः। कथं लक्ष्मण-परिव्राजकौ संलपतः, (य) शृणोमि तावत्। (इत्यवधत्ते) (र)।

(नेपथ्ये पुनरुक्तः)।

आः लक्ष्मण! सर्वविद्रावणः खल्वहम्। को मया जनित-मानभङ्गो न पराजीयते? (ल)

(फ) विजयमानः पराभवन्, वैशेषिकदर्शनविषयकविचारेण तद्दर्शनाध्यायिनः पराभूयेत्यर्थः। पर्यटामि भ्रमामि।

(ब) विवदिष्ये विविधज्ञानविषयकं तर्कं करिष्ये, विरोधं करिष्ये वा। रावणोक्तिरियम।

(भ) परिव्राजक। भिक्षो। "भिक्षुः परिव्राट् कर्मन्दी" इत्यमरः। काल-सर्पेति।—कालसर्पस्य क्षणसर्पस्य, अत्यल्पखलप्रकृतेरित्यर्थः, खलीकारः अवज्ञारः, अक्रुद्धस्यापि आघातादिना क्रोधोत्पादनमित्यर्थः, क्रीडाचरणमिति यावत्, स एव खर्जूः खण्डः, "खण्डः खर्जूश्च खण्डूश्च" इत्यमरः; स विद्यते यस्य सः कालसर्प-खलीकारखर्जूलः, तस्य भावः।

(म) सुखाकरी सुखसाधनी। हृषिकेति।—हृषिकः प्रसिद्धः कौटविशेषः, तस्य मन्त्रे विषनाशकाक्षरसमष्ट्यात्मकक्रियाविशेषे, तान्त्रिकः आगमसिद्धान्तः तस्य, "तान्त्रिकौ आगमसिद्धान्तः" इत्यमरः; कालसर्पे क्रोधितं कृत्वा तेन क्रीडाचरणं हृषिकविषाभिज्ञस्य सुखकारणं भवतीत्यर्थः; कालसर्पदंशने हृषिकमन्त्राभिज्ञस्य सामर्थ्यं न स्फुरतीति भावः।

(य) संलपतः अन्योऽन्यम् आलापं कुरुतः। "संलापो भाषणं मिथः" इत्यमरः।

(र) अवधत्ते अवहितो भवति, संलापश्रवणे मनो निदधातीत्यर्थः।

(ल) सर्वविद्रावणः सर्वक्षोभकारकः, सर्वविजयीत्यर्थः, अथवा सर्ववित् सर्वज्ञः, रावणः। जनितेति।—जनितः उत्पादितः, कृत इत्यर्थः, मानस्य गर्वस्य, भङ्गः खण्डनं येन तादृशः, कृतापमानः, मम अवमाननाकारीत्यर्थः। पराजीयते पराभूयते, आस्ते इत्यर्थः, अपि तु आस्ते एवेति भावः, मदवमाननाकारी अवश्यमेव दण्डनीय इति निष्कर्षः।

(नेपथ्ये पुनरुक्तः)।

किं भवान् रावणः ?

(जाम्बवान् सविशेषमवदधाति)।

(नेपथ्ये पुनरेवोक्तः)।

भो वाचोयुक्तिज्ञ ! (व) सर्वेषां विद्रावणः खल्वहमिति समस्य व्याहृतमन्यथाऽभिसन्धाय वाक्कुलेन प्रत्यवतिष्ठमानो निगृहीतोऽसि ; (श) तन्मुञ्च मां भिक्षायै (ष)।

(अग्रतः)।

किं त्वया ? किन्तरां च रावणेन ? (स)। अहमप्युत्सुकोऽस्मि, (ह) त्वरितं गच्छामि।

जाम्बवान्। कथमेतदस्फुटार्थमेव (क्ष) निर्वहणम् (ख)।

(व) वाचोयुक्तिज्ञ ! वाचोयुक्तिपटो ! वाग्मिन् ! इत्यर्थः, "वाचोयुक्तिपटुर्वाग्मी वाक्पटुश्च वक्तरि" इत्यमरः।

(श) समस्य संक्षिप्य, समासमाश्रित्येत्यर्थः। व्याहृतं उक्तम्। अथवा अन्येन प्रकारेण, "किं भवान् रावणः ?" इत्यर्थकथनेनेत्यर्थः, अभिसन्धाय सयोज्य, अन्यथेत्यर्थः, परिवर्त्य इत्यर्थो वा। वाक्कुलेन अन्यार्थे प्रयुक्तस्य वाक्यस्य अन्यार्थे संयोजनात्मकस्वरूपाच्छादनेनेत्यर्थः, वक्रोक्त्या इति यावत्, प्रत्यवतिष्ठमानः प्रतिपक्षतया वर्त्तमानः, विरुद्धपक्षम् अवलम्बमान इत्यर्थः। निगृहीतः पराजितः, प्रतारितो वा।

(ष) भिक्षायै भिक्षार्थं गमनायेत्यर्थः।

(स) किं त्वया ? किन्तरां च रावणेन ? त्वया रावणभिक्षेण किम् ? रावणेन च किन्तराम् ? त्वम् अरावणः रावणो वा भवतु तेन किम् ? न तेन मे किमपि प्रयोजनमित्यर्थः, अरावणो वा रामो वा न त्वया गम्यते इति भावः।

(ह) उत्सुकोऽस्मि दृष्टसाभार्थमुत्सुकोऽस्मि, आश्रमं गत्वा प्रियजनदर्शनाय व्याकुलो भवामीत्यर्थः, "दृष्टार्थोद्युक्त उत्सुकः" इत्यमरः।

(क्ष) अस्फुटार्थमेव अप्रकाशमेव, अप्रतीतिविषयमेवेत्यर्थः।

(ख) निर्वहणम् उपक्रान्तस्य उपसंहारः, प्रस्तुतस्वरूपसमापनमित्यर्थः, "उपक्रान्तस्य संहारो भवेन्निर्वहणं त्विदम्" इति भरतः।

मन्ये,, पुनरेष परिव्राजकच्छद्मेन (ग) रावण एव. कोपादुत्प-
त्यापलप्य स्वं नाम द्रागपक्रान्तः (घ)। (सर्वतो निरूप्य)।
आर्ये! पुराणप्रियसुहृत् (ङ) अस्माकं दक्षिणस्या दिशः परा-
पतन् जटायुरिव लक्ष्यते। (च) तदेनमनुपालयामि (छ)
तावत्। दूरदृशो हि गृध्राः, (ज) कदाचिदेष (झ) लङ्का-
द्वीपवृत्तान्तमप्युपलभेत (ञ)।
(प्रविश्य)।
जटायुः। प्राप्तैवेयमस्माभिः पञ्चवटी, यदसूर्गोदावरीतरङ्ग-
शीकरमेकसुकुमारमांसलपरिसरारण्यमालिन्यो जनस्थान-
सीमानः (ट)। अपि च—

दृश्यन्ते मधुमत्तकोकिलवधूनिर्धूतचूताङ्कुर-
प्राग्भारप्रसरत्परागमिकतादुर्गास्तटीभूमयः।

(ग) परिव्राजकच्छद्मेन भिक्षुव्याजेन।

(घ) उत्पत्य "अहं सर्ववित् रावणः" इति वाक्यम्, अपलप्य निह्नुय। स्वं नाम रावण इति नामधेयम्। द्राक् झटिति। अपक्रान्तः पलायितः, स्वरूपप्रकाशमिति भावः।

(ङ) पुराणप्रियसुहृत् प्राचीनप्रियबन्धुः।

(च) परापतन् समागच्छन्। लक्ष्यते दृश्यते।

(छ) अनुपालयामि प्रतीक्षे।

(ज) दूरदृशः दूरदेशदर्शिनः, बहुदूरपर्यन्तं दर्शनसमर्था इत्यर्थः। गृध्राः पक्षिविशेषाः।

(झ) एषः जटायुः।

(ञ) उपलभेत जानीयात।

(ट) गोदावरीति।—गोदावर्याः तदाख्यनद्याः, तरङ्गाणाम् ऊर्मीणां, शीकरसेकेन जलबिन्दुसम्पर्केणेत्यर्थः, सुकुमारा सुकोमला, नेत्रतृप्तिजनकेत्यर्थः, सुस्निग्धा इति यावत्, मांसला च परिपुष्टा च, निबिडा इति यावत्, परिसरे पर्यन्तभूमि, प्रान्तदेशे इत्यर्थः, "पर्यन्तभूः परिसरः" इत्यमरः; आरण्यमाला वनश्रेणी यासां तादृश्यः। जनस्थानसीमानः दण्डकारण्यस्यान्तर्भूभागस्य प्रान्तदेशाः।

दृश्यन्ते इति।—मधुमत्ताभिः मकरन्दपानविह्वलाभिः, मकरन्दपानेन प्रफुल्ला-

याः क्षुच्छ्वादतिलङ्घ्य लुब्धकभयात्तैरेव रेणूत्करै-
र्धारावाहिभिरस्ति लुप्तपदवीनिःशङ्कमेणीकुलम् ॥ ६ ॥

जाम्बवान् । (विचिदुपसृत्य) । कुतः पुनरियता वेगेन (ठ) वयस्यो जटायुः ?

जटायुः । (दृष्ट्वा) । कथं जाम्बवान् !! सखे ! लक्ष्मण, न सभाजयिष्यामि (ड) तावद्भवन्तम् । मया हि मलयाचल-कुलायादार्य्यसम्पातिपादानभिवाद्य निवर्त्तमानेन (ढ) मारीच-सहचरः सञ्चरन्निमामरण्यानीमभिलक्षितो (ण) राक्षस-

---

भिरिति वा, क्षोभितवधूभिः क्षोभिताभिः, निर्धूताः आकम्पिताः, विदलिताः इत्यर्थः, ये भूताङ्कुराः आम्रमुकुलाः, तेषां प्राग्भारात् अवभागात्, विदलितप्रदेशादित्यर्थः, प्रसरन्तीभिः निःसरन्तीभिः, पतन्तीभिरित्यर्थः, परागसिक्तताभिः क्षौमुनरजोऽप-कालुकाभिः, दुर्गाः दुर्गमाः, व्याप्ता इति यावत्, तटीभूमयः तीरप्रदेशाः, दृश्यन्ते अवलोक्यन्ते ; एतेन वसन्तकालो व्यज्यते ; एतौकुलं मृगोद्वन्धकं, लुब्धकेभ्यः व्याधेभ्यः, भयात् याः तटीभूमीरित्यर्थः, क्षुच्छात् क्षुधात्, अतिलङ्घ्य अतिक्रम्य, धारावाहिभिः सन्ततवर्त्तिभिः, निरन्तरं पतद्भिरित्यर्थं, तैरेव पूर्ववर्णितप्रकारैरेवेत्यर्थः, रेणूत्करैः परागसङ्घैः, लुप्ताभिः विनष्टाभिः, अविरतपतितपरागपुञ्जैरदर्शनं गताभिरित्यर्थः, पदवीभिः पादचिह्नैर्हेतुभिरित्यर्थः, निःशङ्कं निर्भयं यथा तथा, अस्ति वर्त्तते, लुप्ता हि मृगपदचिह्नदर्शनेन मृगानानुधावन्ति, अत्र तु पुष्परजोभिस्तच्चिह्नविलोपात् मृगाणां गन्तव्यस्थानज्ञानाभावात् लुब्धास्तदभिमुखीभवितुं न शक्नुवन्तीति तेषां भयराहित्य-मिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ६ ॥

(ठ) कुतः कस्मादेतो', इयता एतदधिकेन, वेगेन जवेन, गच्छतीति शेषः । यद्वा—कुतः कस्मात् स्थानात् ; अस्मिन् पक्षे—आगच्छतीति शेषः ।

(ड) सभाजयिष्यामि अभिनन्दयिष्यामि, सत्करिष्यामि इति यावत् । "आनन्दन-सभाजने । आप्रच्छनम्" इत्यमरः ।

(ढ) मलयाचलकुलायात् मलयाचल एव कुलायः नीडः, पक्षिवासस्थान-मित्यर्थः तस्मात्, यद्वा—मलयाचले यः कुलायः तस्मात्, "कुलायो नीडमस्त्रियाम्" इत्यमरः । आर्य्यमिति ।—आर्य्यञ्च ज्येष्ठञ्च, तस्मातेः तदाख्यपक्षिणः, पादान् चरणौ, अभिवाद्य नत्वा, निवर्त्तमानेन प्रत्यागच्छता ।

(ण) अभिलक्षितः दृष्टः ।

राजः; तदतिविषमम् आग्रहमानं मां वत्सरामभद्रस्नेह-स्त्वरयति। (त)

जानकी। (स्वगतम्)। वयमप्येतदेव प्रतिपित्सामहे (प्रकाशम्)। सखे! त्वरस्व। (इति)। (इति निष्क्रान्ताः)।

जटायुः। (परिक्रम्यावलोक्य च)। इयमग्रे पञ्चवटी। (सवितर्कम्)—

नीतो दूरं कनकहरिणस्यृच्छया रामभद्रः
पश्चादेनं द्रुतमुपसरत्येष वत्सः कनिष्ठः।
बिभ्यत् बिभ्यत् प्रविशति ततः पर्णशालां च भिक्षु-
र्धिक्कष्टं भोः! प्रथयति निजामाकृतिं रावणोऽयम् ॥७॥

अहह!!—

आर्य्यपुत्रार्य्यपुत्रेति क्रन्दन्तीं क्ररीमिव।
रथमारोप्य वैदेहीमेष पापः क्व यास्यति? ॥ ८ ॥

(त) अतिविषमम् अतिविषदृशं कामपि व्यापारम्। त्वरयति त्वरां ददाति, मन्तुमिति शेषः।

(थ) प्रतिपित्सामहे प्रभुमुत्सामहे, इमामेव वार्त्तां विज्ञातुमिच्छाम इत्यर्थः। "प्रतिपत्तिः प्रभौ च प्रागल्भ्ये नीरवेऽपि च। सम्प्राप्तौ च प्रबोधे च पदप्राप्तौ च योषिति॥" इति मेदिनी। त्वरस्व सत्वरं गच्छेत्यर्थः।

नीत इति।—कनकहरिणे काञ्चनमृगे, या यष्ठा समादरः, आकाङ्क्षा वा, लिप्सेत्यर्थः तया, "यष्ठाऽऽदरे च काङ्क्षायाम्" इति मेदिनी; रामभद्रः दूरं नीतः प्रापितः, चालित इत्यर्थः, आश्रमप्रदेशं इति शेषः, पश्चात् रामभद्रस्य पृष्ठतः, रामभद्रस्य गमनानन्तरमिति वा, एष कनिष्ठो वत्सः लक्ष्मण इत्यर्थः, एनं रामं, द्रुतं सत्वरम्, उपसरति अनुधावति; ततस्तस्मात्, तदनन्तरं वा, भिक्षुः परिव्राट्, परिव्राजकरूपधर इत्यर्थः, रावण इति शेषः, बिभ्यत् बिभ्यत् सशङ्कं सशङ्कं, भीतः भीतः इत्यर्थः, रामादिति शेषः, पर्णशालां पर्णकुटीरं, रामस्येति शेषः, प्रविशति च, भोः! धिक् कष्टं क्लेशपदः व्यापार उपलक्षित इत्यर्थः, अयम् भिक्षुरूप इति भावः, रावणः निजाम् आकृतिं स्वं रूपं, प्रथयति प्रकटयति, भिक्षुवेशं त्यक्त्वा निजरूपं धारयतीत्यर्थः। मन्दाक्रान्ता छन्दः॥ ७॥

आर्य्येति।—एष पापः पापाचारः, रावणः इति शेषः, क्ररीमिव उत्क्रोश-

(साटोपं (ट) परिक्रामन्)। अरेरे रावण!—

बधूटौमिच्छाकोर्निजकरतलस्पर्शमलिना-
मिमां कुर्वाणस्य स्फुरति हृदि शोभैव भवतः।
कुले येषां किन्तु त्वमसि गणितास्तेऽपि गुरवो
न मम ब्रह्माणः कथमिव पुलस्त्यप्रभृतयः? ॥ ९ ॥

(पुनराकाशे)। अलोकाट्टहासधूमधूमरितदशवक्त्रवल्लोक! किं-मात्थ रे राक्षसापसद! किमात्थ? (ध)—

जगद्विलोभि सीताख्यमामिषं हरतो मम।
अयं किल जरद्गृध्रः कराद्दाच्छिद्य नेष्यति ॥ १० ॥

पक्षिणीमिव, "उत्क्रोश-कुररौ समौ" इत्यमरः; आर्यपुत्र! आर्यपुत्र! इति क्रन्दन्तीं क्रन्दन्तीं, वेदेहीं सीतां, रथम् आरोप्य उत्क्षिप्य, क्व कुत्र, यास्यति? अनुष्टुप् छन्दः ॥ ८ ॥

(ट) साटोपं सतर्जनं सगर्वं वा।

बधूटौमिति।—इक्ष्वाकोः इक्ष्वाकुवंशीयस्य, रामस्येत्यर्थः, इमां क्रन्दन्तीमित्यर्थः, बधूटीम् अल्पवयस्कां वधूं नवीनां वधूमित्यर्थः, "अल्पा बधूर्बधूटी स्यात्" इत्यमरः; निजस्य करतलस्पर्शेन पाणितलपरामर्शेन, मलिना कलङ्किता, कुर्वाणस्य विदधतः, भवतः तव, हृदि चेतसि, शोभैव आनन्दजनितविकास एव, यद्वा—सौन्दर्यमेव, सीतायां इति शेषः, न तु लज्जेति भावः, स्फुरति प्रसरति, किन्तु त्वं येषां कुले गोत्रे, असि भवसि, जात इति शेषः, ते त्रिलोकप्रसिद्धाः महात्मान इत्यर्थः, गुरवः पूज्याः पितामहाः, मम ब्रह्माणोऽपि पुलस्त्यप्रभृतयः सप्तर्षयोऽपि इत्यर्थः, कथमिव केन हेतुना वा, न गणिताः? न आलोचिताः? त्वयेति शेषः, महात्मानस्तव पूर्वपुरुषाः त्वया कलङ्किता इति भावः। मिश्ररिपौ छन्दः ॥ ९ ॥

(ध) अलोकेति।—अलीकः वृथा, अकार्यकरणात् आत्मरिक्तताविधौ इति यावत्, भीत भीतत्वात् मौखिक इति भावः, यः अट्टहासः अलीकविकटहासः, केवलदम्भविकाशमयमिति भावः, स एव धूमः पापकालुष्यादिति भावः, तेन धूमरितानि पाण्डुलानि इत्यर्थः, दश वक्त्राणि दश मुखानि यस्य तादृशः, वल्लोकः क्रीडविशेषः, तत्सम्बुद्धौ। राक्षसापसद! राक्षसाधम! आत्थ ब्रवीषि।

जगदिति।—अयम् एषः, जरद्गृध्रः वृद्धपक्षिविशेषः, जगतां जगद्वासिनां, विलोभि लोभविषयं, सुदृश्यमित्यर्थः, सीताख्यं सीतानामकम्, आमिषं भोग्यवस्तु

इति। आः!! पाप! कथमेवमभिदधासि (न)। तिष्ठ तिष्ठ—

भुजविटपमदेन व्यर्थमन्यभ्रविष्णु-
र्धिगपसरसि चौरङ्कारमाकुश्यमानः।
त्वदुरसि विदधातु स्वामपस्कारकेलिं
कुटिलकरजकोटिक्रूरकर्मा जटायुः॥ ११॥

(इति निष्क्रान्तः)।

विष्कम्भकः।

(ततः प्रविशति लक्ष्मणः)।

लक्ष्मणः। अहो! दुर्निवारदारुणक्रोध-शोक-लज्जाग्रहनो विषमोऽयं दशाविवर्त्तः (प)। यस्मिन्निति कर्त्तव्यताऽभिधानम् (फ) अप्यस्माकमनौपयिकम् (ब)। तथा हि—

मांस वा, "उत्कृष्टे पलली (मांसे) भोगे भोग्यवस्तुनि चाभिधम्" इति विश्वः; इरतः बलाग्रयतः इत्यर्थः, मम करात् हस्तात्, आच्छिद्य आकृष्य, नेष्यति प्रापयिष्यति, रामं स्थानान्तरं वेति शेषः, किलेति सम्भावनायाम्, एतत् किं सम्भाव्यते? इत्यर्थः, नैव सम्भाव्यते इति भावः। रावणोक्त्यनुवादोऽयम्। अनुष्टुप् छन्दम्॥ १०॥

(न) अभिदधासि ब्रवीषि।

भुजेति।—भुजा एव विंशतिसङ्ख्यका बाहव एव, विटपाः शाखाः, यद्वा—भुजानां विटपाः विस्तारः, बाहुल्यमित्यर्थः, "शाखायां पल्लवे स्तम्बे विस्तारे विटपोऽस्त्रियाम्" इति रभसः, तेषां मदेन गर्वेण, व्यर्थं विफलम्, अन्यभ्रविष्णुः अन्यीभवन्, चौरङ्कारं चौर्यं कृत्वेत्यर्थः, आकुश्यमानः आघ्नायमानः सन्, यद्वा—आकुश्यमानः आक्षिप्यमाणः, भर्त्स्यमानः सन्, मयेति शेषः, अपसरसि पलायसे, अत एव धिक्, त्वामिति शेषः, कुटिलानां वक्राणां, दारुणानामिति भावः, करजानां नखराणां, कोटिभिः अग्रैः, क्रूरं भीषणं, कर्म यस्य तथोक्तः, जटायुः तव उरसि वक्षसि, स्वां निजाम्, अपस्कारकेलिं नखविदारणरूपक्रीडामिति यावत्, विदधातु करोतु। मालिनी छन्दम्॥ ११॥

(प) दुर्निवारेति।—दुर्निवारैः निवारयितुमशक्यैः, अत एव दारुणैः भीषणैः, अतिप्रबलैरित्यर्थः, क्रोधैः अन्यं प्रति कोपैः, शोकैः मन्युभिः, प्रियजनविच्छेदजनितैः दुःखैरित्यर्थः, लज्जया वपया, कुलवधूरेकाऽऽत्मानं रचितुं शक्ता, अतः कापुरुषा अयं स्त्रीके कथं मुखं दर्शयिष्यामि इति व्रीडया इति भावः, गहनः कलिलः, विषम इत्यर्थः, "गहनं कलिले विषु" इत्यमरः; विषमः उत्कटः, दशाविवर्त्तः अवस्थाविपर्ययः;

तप्ताङ्गदश्रवणकुण्डलबन्धनरुषा धूमायमानो गिरं
नार्द्रोक्षप्रविलोलनवर्णविधुरामार्यः समाप्नोति मे ।
चापे तातजटायुजीवितकथापर्य्यन्तधूमायित-
क्रोधोत्पीड़निपीतशोकजड़िमा दृष्टिस्तु विश्राम्यति ॥१२॥

(नेपथ्याभिमुखः)। इत इत आर्य्य मारीचमथन! (भ) दृश्य-

(फ) यस्मिन् दृश्याविषये। इतिकर्त्तव्यताऽभिधानं किमत्र कर्त्तव्यमिति कथनम्।

(ब) अनौपयिकम् अयुक्तं, "युक्तमौपयिकं तथ्यम्" इत्यमरः; वयमत्र लोकाः अस्मान् किं मंस्यन्ते इति भावः।

तदिति।—आर्य्यः ज्येष्ठः रामः, तत् प्रसिद्धितपूर्वं, तादृशं मायामृगेण दूराकर्षकरूपं, यत् दशकण्ठस्य रावणस्य, यद्वा—दशकण्ठेन रावणेन, कृतमिति शेषः, वचनं सीताहरणरूपं प्रतारणं, तेन या रुट् रोषः, तया धूमायमानः धूमसुहृदम्, प्रज्वलनात् पूर्वावस्थामापद्यमानः सन्निति यावत्, तदवस्थः अग्निरिवेति भावः, मे मम समीपे, आर्द्रोक्षः आर्द्रोक्षरित एव, प्रविलीनः प्रकर्षेण स्वयं गतः, अवरुद्ध इति यावत्, धूमोपरुद्धकण्ठतयेति भावः, यो वर्णः अक्षरं, तेन विधुरां विवशां, छिन्नां छिन्नानिति यावत्, "वैकल्येऽपि च विशेषे विधुरं विवशे विधु" इति विश्वलोचनशेषः, गिरं वाचं, न समाप्नोति न सम्यक् लभते, स्फुटमुच्चारयितुं न शक्नोतीत्यर्थः, किञ्चित् विवक्षुरपि क्रोधजन्याश्रुरुद्धकण्ठतया छिन्नां छिन्नामस्पष्टां वदन् विरमति वा भीतः आपद्यते वा इति भावः; तु किन्तु, दृष्टिः नेत्रम्, आर्य्यस्येति शेषः, तातस्य अनुजन्मनः, जनकस्य वा, पितृसदृशत्वात् जनकतुल्यस्य इत्यर्थः, "तातोऽनुजन्मे जनके" इति मेदिनी; जटायोः जीवितकथायाः, जीवनवार्त्तायाः, पर्य्यन्तः अवसानम्, एतेन रावणेन कृतो जटायुवधः सूचितः, तेन धूमायितः धूमोद्गारी, यः क्रोधः कोपानलः, तस्य उत्पीड़ेन पीडनेन, अतिशयेनेत्यर्थः, निपीतः नाशितः, शोकेन जड़िमा जाड्यं, सवाष्पत्वमिति यावत् यस्याः तादृशी, दृष्टिः नेत्रविशेषः, चापे धनुषि, विश्राम्यति स्थिरीभवति, नान्यत्र पततीत्यर्थः, अनुनयार्थं धनुर्ग्रहणाय दृष्ट्या करोतीति भावः। मार्दूलविक्रीडितं वृत्तम्॥ १२॥

(भ) इत इत अस्यां दिशि, आगच्छेति शेषः। मारीचमथन! मारीचविनाशन! एतेन मारीचवध उक्तः।

न्तामम्बूरवाचीं ककुभम् (म) अभिवर्द्धमाना विन्ध्यवनवीथि-भूमयः (य)।

(प्रविश्य)।

रामः। (आकाशे लक्ष्यं बद्ध्वा)—

कुले वा शौर्ये वा भुजसमुदये वा तपसि वा
बभूवुर्न प्राप्तास्त्वमिव भवितारो न चरमे ।
अहो ! दिग्मोहस्ते समजनि चिरादेष न खलु
प्रवीराणां पन्था दशवदन ! येनासि चलितः ॥ १३ ॥

(विलक्ष्य सखेदं-स्मितम्)। हंहो (र) पौलस्त्य !—

सिद्धश्रोत्रपरम्परापरिगतैरेभिः प्रपौत्रस्य ते
वृत्तैरद्य पुलस्त्यवर्जमभितः स्नेरेषु देवर्षिषु ।

(म) अम्बाचीं दक्षिणां, ककुभं दिशम् ।

(य) विन्ध्येति ।—विन्ध्यस्य तदाख्यगिरेः, वनवीथिभूमयः काननश्रेणीसमन्वित-प्रदेशाः इत्यर्थः ।

कुले इति ।—दशवदन ! रे रावण ! कुले वंशे वा, शौर्ये पराक्रमे वा, भुज-समुदये बाहुसमूहे वा, तपसि तपस्यायां वा, प्राप्ताः पूर्वतनाः, केऽपि पुरुषा इति शेषः, त्वमिव न बभूवुः त्वत्सदृशा नासन्, चरमे पश्चात्, परवर्त्तिकाले जनि-ष्यमाणाश्च, त्वमिव न भवितारः तव तुल्या न भविष्यन्ति ; अहो ! खेदे, ते तव, दिग्मोहः दिग्भ्रमः, बुद्धिविपर्य्यय इति भावः, समजनि सञ्जातः, येन, पन्था इति शेषः, चलितः गतः, असि भवसि, एवः पन्थाः मार्गः, शौर्य्यवृत्तिरूप इति भावः, चिरात् बहुकालादपीति भावः, प्रवीराणां प्रकृष्टानां वीराणां, न खलु नैव, प्रवीराः बहुकालेऽपि शौर्यमार्गेण न चलन्तीति भावः । "चिरात्" इति पदं "शेष" इत्यनेन सम्बध्यते वा, त्वं येन चिरात् दीर्घकालं व्याप्य, चलितोऽसि, एष न प्रवीराणां पन्थाः । शिखरिणी वृत्तम् ॥ १३ ॥

(र) हंहो ! भोः ।

सिद्धेति ।—सिद्धानां देवयोनिविशेषाणां, श्रोत्रपरम्परया कर्णपरम्परया, परिगतैः प्राप्तैः, श्रुतैरित्यर्थः, प्रपौत्रस्य पौत्रपुत्रस्य, ब्रह्मणः पुत्रः पुलस्त्यः, पौत्रः विश्रवसः, तत्पुत्रस्य इत्यर्थः, ते तव, एभिः वक्ष्यमाणैः, वृत्तैः चरितैः, परदारहरणरूपदुष्कर्मव्यवहारैरिति भावः, पुलस्त्यवर्जं पुलस्त्यं विहाय, तस्य सज्जनत्वेन श्लाघ्यमुखत्वादिति भावः, अभितः समन्तात्,

विष्वग्वृत्तिरसङ्गता नमयितुं दुर्वारलज्जाभर-
म्लानश्रीषु चतुर्मुखो भगवतो धातुः कथं वर्त्तते ? ॥ १४ ॥

(अधोमुखायं (ङ)। हा प्रिये विदेहराजपुत्रि! (इति संवरणं (च) नाटयति)।

लक्ष्मणः। (उपसृत्य)। आर्य्य! कोऽयमभिषङ्गो (ग) नाम भवादृशानप्यास्पदीकरोति ? (घ)।

पतिते व्यसने दैवाद्दारुणे दारुणात्मनि।
संवर्मयति वज्रेण धैर्य्यं हि महतां मनः ॥ १५ ॥

चतुर्दिक्षु अवस्थितेषु इत्यर्थः, देवर्षिषु मरीचिप्रभृतीषु, क्षीरेषु दुग्धद्वारास्थविकल्पितान्नेषु सत्सु, विवक् चतुर्दिक्षु, इतिः व्यापारः, स्थितिरिति यावत् यस्याः तथोक्ता, अत एव नमयितुं लज्जातिशयात् अवनतीकर्तुम्, असङ्गता अयुक्ता, असमर्था इत्यर्थः, चतुर्षु एव पार्श्वेषु मुखसद्भावेन योगादेशाभावादिति भावः, दुर्वारेण वारयितुमशक्येन, लज्जाभरेण लज्जातिशयेन, म्लाना विवर्णा, श्रीः कान्तिर्यस्याः तथाभूता, भगवतः धातुः ब्रह्मणः, चतुर्णां मुखानां समाहारश्चतुर्मुखो मुखचतुष्टयं तु, कथं केन प्रकारेण, वर्त्तते ? तिष्ठति ? लज्जया मुखं रुद्धीकृत्य स्थीयते नवैः इति हि नियमः, विधातुस्तु तदपि न घटते इति भावः। आर्यूवाविक्रीडितं वृत्तम् ॥ १४ ॥

(ङ) अधोमुखाय चिन्तयित्वा, ध्यात्वा इति यावत्।

(च) संवरणं गोपनं, तिरोधानमित्यर्थः, महापुरुषत्वव्याघातमजुगुप्सेति भावः।

(ग) अभिषङ्गः परिभवः, मोहपरतन्त्रता इति यावत्, "अभिषङ्गः पराभवे" इत्यमरः।

(घ) आस्पदीकरोति पात्रीकरोति, आश्रयतीत्यर्थः।

पतिते इति।—दैवात् भाग्यवशात्, दुरदृष्टवशादिति भावः, दारुणात्मनि दुर्वात्मके, गुरुरसरूपे इत्यर्थः, अतिमहतीति यावत्, दारुणे भीषणे, भयावहे इत्यर्थः, "दारुणो भीषणे गुरौ" इति शाश्वतः, "दारुणो रसभेदे ना त्रिषु स्यात्तु भयावहे" इति मेदिनी, व्यसने विपदि, पतिते उपस्थिते सति, धैर्य्यं हि धीरत्वमेव, महतां उत्तमानां, मनः चित्तं, वज्रेण अशनिना, संवर्मयति समाच्छादयति, आवृणोतीत्यर्थः, अचलधैर्य्यरूपवर्मणा चित्तं समाच्छादयन्ति महान्तः, येन मनसो न विचलनं स्यादिति भावः। अनुष्टुप् वृत्तम् ॥ १५ ॥

राम.। (दीर्घं निःश्वस्य) वत्स!—

सहजधैर्यवशंवदवृत्तयो
हृदि कृपस्य शुचश्च नियन्त्रिताः।
इह तु किं करवै यदपत्रपा
किमपि मामवमत्य विजृम्भते? ॥ १६ ॥

लक्ष्म.। (पुरोऽवलोक्य)। अये! अयमयं तातजटायुषो वीरलोकसाधनसिद्धक्षेत्रमरण्यानीसन्निवेशः (स)। पश्य—

भग्नोऽयं कथमास्त रावणरथस्तातेन वज्राङ्कुर-
क्रूरापस्करमाणभङ्गुरनखक्रोटिव्रटद्बन्धनः।

राम.। (सकरुणम्)—

हा वीरध्वजराजपुत्रि! स तदा दृष्टस्त्वया धन्यया
पक्षीन्द्रो दशकण्ठकुञ्जरशिरःसञ्चारिपञ्चाननः ॥ १७ ॥

(इति लक्ष्मणमवलम्ब्य ध्यानं नाटयति (ङ)।)

सहजेति।—सहजश्च स्वाभाविकश्च, धैर्यं च धीरतायाः, वशंवदा वशवर्तिनी, वृत्तिः व्यापारः यासां तथाभूताः, कृपस्य क्रोधस्य, शुचश्च शोकस्य, हृदि अन्तःकरणे एव, नियन्त्रिताः निरुद्धाः, सदेति शेषः, स्वाभाविकधैर्यप्रभावेणाहं शोक-क्रोधौ संवरीमीत्यर्थः, तु किन्तु, अवलया अपरावशीकलना लज्जा, निजभार्यामपि यो रक्षितुं न शक्नोति, कापुरुषः स कथं सस्त्रीको वनमागच्छेत् इत्येवंरूपा जनान्तरात् लक्ष्म्या लज्जा इत्यर्थः, "लज्जा साऽपत्रपाऽपत." इत्यमरः; माम् अवमत्य अवज्ञाय, उपहस्य इति यावत्, किमपि अनिर्वचनीयभावेनेति भावः, यत् विजृम्भते विस्फुरति, इह अस्मिन् विषये, तु पुनः, किं करवै? किं विदधानि? न किमपि कर्तुं शक्नुयामित्यर्थः। दुर्लक्षितं यथा—"दुर्लक्षितमाह न नौ मरौ" इति तल्लक्षणात् ॥ १६ ॥

(स) वीरलोकेति।—वीरस्य शूरस्य, सङ्ग्रामहतस्येति भावः, लोकः भुवः, स्वर्गः इति यावत्, तस्य साधनं हेतुः, तत्र प्राप्तायेत्यर्थः, अत एव सिद्धक्षेत्रं पवित्रस्थानमित्यर्थः, यद्वा—सिद्धानां देवयोनिविशेषाणां, देवत्वं गतानां वीराणामित्यर्थः, क्षेत्रं निवासस्थानमित्यर्थः, अरण्यानीसन्निवेशः, महारण्यभागः।

अयं इति।—तातेन पितृपक्षत्वात् पितृतुल्येन जटायुषेत्यर्थः, वज्राङ्कुरवत्

लक्ष्मणः। (स्वगतम्)। महादोषः खल्वयमतिप्रसज्यमानो मानसः शोकाख्यो विकारः; तदन्यतः प्रेरयामि। (क) (प्रकाशम्)। आर्ये! पश्य पश्य—

विन्ध्यगिरिराजकन्याऽन्तःपुरमेतास्तरङ्गमालिन्यः।
वेतसतीभिरङ्गिस्तौर्यत्रिकगुणनिकां दधते॥ १८॥

नखोल्लासमणिपरीक्षवत्, क्षुरधारा दारुणाभ्याम्, अपक्ष्मिरमाणाभ्यां विदारयन्तीभ्यां, भङ्गुराभ्यां कुटिलाभ्यां, नख-कोटिभ्यां नखर चक्षुभ्यां, "चक्षु-कोटिरभे स्त्रियौ" इत्यमरः; त्रुटत् स्खलत, छिन्दत् इत्यर्थः, वक्षसं सन्तोन सयोग-स्थानं यस्य तथाभूतः, अत एव भग्नः खण्डितः, अयं रावणरथः रावणस्य स्यन्दन, कथं कैन प्रकारेण, अस्ति पतितः तिष्ठतीति भावः। हा। इति खेदे, सौराष्ट्रराजपुत्रि! सौराष्ट्रराज्यजनकराजनन्दिनि! जानकि। इत्यर्थे, तदा हरणकाले इत्यर्थः, रहभञ्जन-काले इत्यर्थो वा; धन्यया श्लाघ्यया, पुण्यवत्या इत्यर्थः, त्वया दशकण्ठः दशग्रीव एव, कुञ्जरः हस्ती, तस्य शिरसि मूर्द्धि, सञ्चरति भ्रमतीति तथोक्त, पञ्चानन: सिंहः, तत्स्वरूप इत्यर्थः, "सिंहो मृगेन्द्रः पञ्चास्यः" इत्यमरः; स पक्षीन्द्रः विहगाधिपतिः, जटायुरित्यर्थ, दृष्टः अवलोकितः, वयमधन्याः न तं द्रष्टुं समर्था इति भावः। शार्दूल-विक्रीडितं वृत्तम्॥ १७॥

(ङ) अवहस्य आस्मित्य। ध्यानं चिन्तां, नाटयति अभिनयति, निपुण-भावेनावतिष्ठते इति भावः।

(क) महादोषः प्रबलानर्थोत्पादक इत्यर्थः। अतिप्रसज्यमानः अतिशयेन वर्द्धमानः, अत्यर्थं सामिनिवेशः कृत इत्यर्थः। अन्यतः अन्यत्र, विषयान्तरे इत्यर्थः, प्रेरयामि चालयामि, चित्तमिति शेषः।

विन्ध्येति।—विन्ध्यगिरिः विन्ध्याचल एव, राजा नृपतिः, तस्य कन्याऽन्तःपुरं कन्याऽवरोधः, तत्तुल्या इत्यर्थः, एताः परिदृश्यमानाः, तरङ्गमालिन्यः तरङ्गाकान् ऊर्मीन्वा, माला: श्रेण्यः आसा सन्तीति तथाविधाः सत्यः, वेतसतीभिः वानीर-वृक्षयुक्ताभिः, तरङ्गवेगेन प्रकम्प्यमानाभिः, अत एव नृत्यन्तीभिरिव परिदृश्यमाना-भिरिति भावः, अङ्गिः जलैः, तौर्यत्रिकगुणनिकां नृत्य गीत वाद्यात्मकं, "तौर्य-त्रिकं नृत्य-गीत वाद्य नाट्यमिदं त्रयम्" इत्यमरः, "अभ्यासे गुणतो योग्या" इति क्षीरः; दधते कुर्वन्ति; अत एव विन्ध्यगिरिराजस्य कन्यानाम् अन्तःपुरम् एतदिति प्रतिभातीति भावः। आर्या वृत्तम्॥ १८॥

रामः। (उन्मील्य चक्षुषी दीर्घमुष्णं च निःश्वस्य)। वत्स! दर्शनीयमेतत्—

कुमुदवनविशायजाग्रदभ्रो-
द्गृहकृततामिकविभ्रमा रमन्ते।
मदकलकरिकर्णतालनृत्य-
मुखरमयूरमनोरमास्तटिन्यः॥ १९॥

(इति परिक्रामतः)।

लक्ष्मणः। आर्य! अयमितो गिरिर्माल्यवान्—

इह महिषविषाणव्यस्तपाषाणपीठ-
स्खलनसुलभरोहिन्नभिणीभ्रूणहत्याः।
कुहरविहरमाणप्रौढभल्लूकहिक्का-
चयचकितकिरातस्रस्तशस्त्रा वनान्ताः॥ २०॥

कुमुदेति।—कुमुदवनेन कैरवकाननेन सह, विशायेन पश्चायेन, जायाङ्ग. प्रबुध्यमानैः, विबुधवद्भिरिति यावत, अभ्रीरुहैः पक्षैः, रात्रौ कुमुदवनानि दिवा अभ्रीरुहाणि पर्य्यायक्रमेण जायतीत्येवं रूपमिति भावः, कृतः आचरित इत्यर्थः, यामिकाना प्रहरिका, विभ्रमः विलासः, व्यापार इति यावत यासु तथाभूताः, तथा मदकलैः मदोद्धतैरिति यावत, अत एव जरिता क्लान्ता, यद्वा—मदकल इति करिविशेषणं, मदकलानां मदगर्वितानां, जरिता कर्णतालेन कर्णान्दोलनशब्देन इत्यर्थः नृत्यन्तः नृत्यं कुर्वाणाः, मुखरैः शब्दायमानैः, केकारव कुर्वाणैरिति भावः, मयूरैः शिखिभिः, मनोरमाः मनोहारिण्यः, तटिन्यः नद्यः, रमन्ते क्रीडन्ति, तरङ्गभङ्गरूपविलासहङ्कारेण प्रवहन्तीति यावत, दर्शनीयाः दर्शनयोग्याः इति जनयन्तीति भावः। पुष्पिताग्रा वृत्तम्॥ १९॥

इहेति।—इह अस्मिन् प्रदेशे, वनान्ताः अरण्यसीमानः, अरण्यप्रदेशा इत्यर्थः, महिषाणां विषाणैः शृङ्गैः, व्यस्तेषु विपर्य्यस्तेषु, उत्क्षिप्तेषु इति यावत, उत्खातेषु इति यावत वा, पाषाणपीठेषु प्रस्तरफलकेषु, स्खलनेन भ्रमणेन, पादप्रच्यवनेनेत्यर्थः, सुलभाः सहसा भवा इति यावत, रोहिन्नभिणीनां रोहित मृगी, तासु गर्भिणीनाम अन्तर्वत्नीनां, गर्भवतीना मृगीणामित्यर्थः, "रोहित मृग्या स्यात्सैरी स्त्री नाडके" इति मेदिनी, भ्रूणहत्या गर्भप्रच्युतिरिति यावत, गर्भस्थशिशुवधाशा वा येषु तथाभूताः, तथा कुहरेषु गह्वरेषु, विहरमाणाना सञ्चरता, तिष्ठतामित्यर्थः, प्रौढानां प्रबलाना,

रामः । (चिरं दृष्ट्वा सकरुणम्)—

प्रतिपरिसरं भूयानर्घः शिखण्डभृतां यथा-
मिलितमलिभिः सम्भुज्यन्ते कदम्बविभूतयः ।
अभिनवघनव्यूढोरस्कः प्रवर्षति माल्यवान्
विषधरवधूगर्भाधानप्रियङ्करणोरपः ॥ २१ ॥

वत्स लक्ष्मण ! धारय मां, न शक्नोमि स्तम्भयितुम् (ख) आत्मानम्—

दृयमविरलश्वासा शुष्यन्मुखो भिदुरस्वरा
तनुरवयवैः आत्मस्तैरुपैति विवर्णताम ।

हृदाकारावामित्यर्थः, प्रवयसामित्यर्थो वा, भल्लूकानाम ऋक्षाणां शिक्षाबलेन "शिक्षा" इति प्रसिद्धशब्दविशेषबलेन, चकितानां भीतानां, किरातानां व्याधानां, शस्त्राणि इत्यत्र खड्गितानि, अस्त्राणि प्रहरणानि येषु तथाविधाः, दृश्यन्ते इति शेषः । मालिनी वृत्तम ॥ २० ॥

प्रतिपरिसरमिति ।—प्रतिपरिसरं परिसरः पर्य्यन्तभूः तस्मिन्, प्रान्तभुवि इत्यर्थः, माल्यवत्प्रान्ते इति यावत्, विभक्त्यर्थे अव्ययीभावः, "पर्य्यन्तभूः परिसरः" इत्यमरः; शिखण्डभृता शिखण्डिना, मयूराणामित्यर्थः, भूयान् अत्यन्तः, अर्घः सत्कारः, महोत्सव इति यावत्, विद्यते इति शेषः, तथा माल्यवान् स्मरेः, यथामिलितं मिलितमलिति-क्रम्येति यथामिलितं यथोपस्थितं, यावन्तः एकत्र मिलिताः तावद्वित्यर्थः, यद्वा—यथा-मिलितमित्यस्य कदम्बविभूतय इत्यनेनान्वयः, यावन्ति कदम्बकुसुमानि प्रस्फुटितानि, तेषां विभूतयः कदम्बविभूतयः नीपसम्पदः, तत्कुसुमानीति भावः, सम्भुज्यन्ते सम्भोगविषयीक्रियन्ते, किञ्च, अभिनवेन नूतनेन, घनेन मेघेन, व्यूढं विशालम्, आश्रितं वा, उरः वक्षःस्थलं, मध्यभागो वा यस्य तथाभूतः, माल्यवान् तदाख्यपर्वतः, विषधरवधूना भुजङ्गीनां, गर्भाधानरूपं गर्भसङ्गरूपं, प्रियं सुखजननव्यापारः, क्रियत आधिरिति तथोक्ताः, अपः जलानि, नवोदकानीत्यर्थः, प्रवर्षति विसर्जयति, वर्षासु नवोदकसम्पर्कात् भुजङ्गीनां गर्भाधानमहोत्सवः सम्पद्यते इति प्रसिद्धिः । एतेन वर्षागमः उक्तः । हरिणी वृत्तम ॥ २१ ॥

(ख) स्तम्भयितुं स्थिरीकर्तुमित्यर्थः ।

दृयमिति ।—अविरला घनाः, श्वासा दीर्घा दीर्घनिश्वासा यस्याः सा यस्याः शोषं गच्छतः, मुखं यस्याः तथोक्ता, भिदुरः भिन्नः, स्वरः कण्ठध्वनिः यस्याः

स्फुरति जड़ता वाष्पायेते दृशौ गलति स्मृति-
र्मयि रसतया शोको भावस्थिरेण विपच्यते ॥ २२ ॥

(इति सक्रोधेन बाष्पमाणो निर्गन्तुमिच्छति एव)। हा प्रिये दण्डकारण्य-विहारसब्रह्मचारिणि! (ग)। (इति पुनः संज्ञामुपैति (घ)।

सत्यम्। (सखेदमात्मगतम्)। केन पुनरेष रसो रसान्तरेण तिरस्क्रियते? (ङ)।

तथाविधा, दृश्यं तनुः शरीरं, आत्मानि क्लान्तानि च, तानि सन्तानि विषयता गतानि तैः, अवयवैः अङ्गैः, विवर्णतां मलिनताम्, उपैति प्राप्नोति, जड़ता जाड्यम्, अचेतनभाव इति यावत्, स्फुरति प्रसरति, दृशौ नेत्रे, बाष्पायेते बाष्पमुत्सृजतः, स्मृतिः स्मरणशक्तिः, गलति नश्यति, शोको भावः प्रसिद्धशोकाख्यभावविशेषः, स्थिरेण दीर्घकालेन, मयि रसतया करुणाख्यरसरूपेण, विपच्यते विशेषेण परिपक्वो भवतीत्यर्थः, करुणरसश्च सर्वे यमां मयि सम्भवति वर्तन्ते इति भावः, उक्तञ्च दर्पणे—"इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्। धीरैः अपेतवर्णोऽयं कथितो यमदैवतः॥ शोकोऽत्र स्थायिभावः शापक्लेशप्रबन्धनवधादिसमुद्भवः शापक्लेशादिविभावा भवेदुद्दीपनं पुनः॥ अनुभावा देवनिन्दा-भूपात क्रन्दितादयः। वैवर्ण्याश्रुस्वरभेद-स्तम्भप्रलयवेपनानि च॥ निर्वेदमोहापस्मार-व्याधिग्लानिमृतिश्रमाः। विषादजडतोन्माद चिन्ताद्या व्यभिचारिणः॥" इति। वस्तुतस्तु करुणविप्रलम्भ एवायं रसः; उक्तञ्च तत्रैव—"दूरीभूते मयि सहचरे चेतसा गच्छतीं तामुत्कण्ठां विधुरहृदयां बन्धुसंपत्तिरेव। वित्तोपायो विनिमयविधेर्नास्ति यस्तस्य तस्मादन्यः करुणजनकः कोऽवकाशं लभेत॥" इति। लोकान्तरं निम्नलोकम्, अदर्शनविषयमिति यावत्, एतः यथासम्भवमवलम्बोऽस्यमिति भावः। अत्रापि करुणरसवत् सर्वे अनुभावा व्यभिचारिणश्च यथायथं सम्भवन्तीति बोध्यम्। धृतिरत्र स्तम्भः॥ २२॥

(ग) दण्डकारण्येति।—दण्डकारण्येषु दण्डकाख्यकाननेषु, यो विहारः विहरणं, भ्रमणमित्यर्थः, तत्र सब्रह्मचारिणि! सहाध्यायिनि! तुल्यव्रतधारिणि! इत्यर्थः, दण्डकारण्यवाससहचरि! इति भावः, "एकब्रह्मव्रताचारा निष्ठः सब्रह्मचारिणः" इत्यमरः।

(घ) संज्ञामुपैति संवरणं लाटयति, आत्मानं स्थिरीकरोतीत्यर्थः।

(ङ) एष रसः करुण इत्यर्थः, केन रसान्तरेण अन्येन केन रसेन, वीर रौद्रादीनात्मसमर्पणेनेत्यर्थः, तिरस्क्रियते? आच्छाद्यते? दूरीक्रियते? इति यावत्, नयेति शेषः॥

(नेपथ्ये)।

आः!! पाप कबन्धहतक! अयं न भवसि (च)।

रामः। (आकर्ण्य ससम्भ्रमम्)। वत्स लक्ष्मण! दुरात्मना दनु-कबन्धेन कलहायमानो (छ) वयस्यस्ते गुह इव भूयते (ज)। बहुच्छलानि (झ) रक्षांसि; तत् त्वरितमभ्युपपद्यस्व (ञ)।

लक्ष्मणः। तथा। (इति निष्क्रान्तः)।

रामः। (पार्श्वतोऽवलोक्य सकरुणम्)। देवि वामभ्रोले! (ट) सौरध्वजराजनन्दिनि! इयं ते विश्वविस्रम्भमर्मवेदिनो निचुल-निकुञ्जलेखा (ठ)। इह हि—

(घ) पाप! पापाचारिन्! कबन्धहतक! विनष्टप्रायकबन्ध! अयम् एषः, एवंविध इत्यर्थः, न भवसि न तिष्ठसीत्यर्थः, न जीवसीति भावः, अचिरमेव म्रियसे इति निष्कर्षः।

(ङ) दनुकबन्धेन दनुर्नाम कबन्ध इव कबन्धः क्रियायुक्तशिरोविहीनकलेवरं, वक्षःस्थसमस्तकचक्षुष्टया शिरःशून्य इव प्रतीयमान इति यावत् तेन। तथा च रामायणे—"अपश्यतां मुहूर्तांस्तु कबन्धं घोरदर्शनम्। मेघपर्वतसङ्काशं भास्यकन्धं महाभुजम्॥ उरोगतविशालाक्षं महोदरं महामुखम्॥" इति। "कबन्धस्तु क्रिया-युक्तशिरोमुण्डकलेवरम्" इत्यमरः। कलहायमानः कलहं कुर्वन्।

(ज) गुह इव गुहकस्य कण्ठस्वर इवेति भावः, भूयते आकर्ण्यते, श्रूयते इति शेषः, स्वरानुभवादिति भावः।

(झ) बहूनि छलानि विविधानि, छलानि कृत्यानि, माया इति यावत् येषां तादृशानि, अत्यर्थं कपटाचारा इत्यर्थः; "छलं कृत्ये स्खलितयोः" इति हैमः।

(ञ) अभ्युपपद्यस्व अनुगच्छ, साहाय्यदानेन मिलनमिति शेषः, "अभ्युपपत्ति-रनुग्रहः" इत्यमरः; यद्वा—अभ्युपपद्यस्व प्राप्नुहि, साहाय्यार्थं समीपं गच्छेत्यर्थः।

(ट) वामम् अतिसुन्दरं, भ्रूलं स्वभावो यस्याः सा भ्रूः, तत्सम्बुद्धौ वामभ्रोले! आदधरिते। "वाम सव्ये प्रतीपे च त्रिषु चातिसुन्दरे" इति "भ्रूलं स्वभावे सदृशे" इति चामरः।

(ठ) विश्वविस्रम्भमर्मवेदिनो समस्तविश्वासतत्त्वज्ञा, निचिलगोपनीयव्यापार-साक्षिणीति यावत्। निचुलनिकुञ्जलेखा निचुलनिकुञ्जश्च लतावेतसलतावेष्टित-विटपिवानश्च, लेखा पङ्क्तिः, सीमा वा।

स्वयपुषि नखलक्ष्म स्वेन कृत्वा भवत्या
कृतमिति चतुराणां दर्शयिष्ये सखीनाम्।
इति रहसि मया ते भीषितायाः स्मरामि
स्मरपरिमलमुद्राभङ्गसर्वंसहायाः॥ २३॥

(इति धनुरवष्टभ्य लक्ष्मणवृत्तान्तदत्तचेतास्तिष्ठति)।

(ततः प्रविशति लक्ष्मणो गुरुश्च)।

गुरुः। जयतु जयतु देवः,—

विनेता वर्णानामयमभयदुर्गं दिविषदां
कनिष्ठः काकुत्स्थो जयति जगदाश्चर्यचरितः।
यदस्त्रैः प्राप्तानं रजनिचरजन्मग्रहभुजं
विजित्य स्वर्लोकानविकलमुपातिष्ठत दनुः॥ २४॥

स्वयपुषीति।—स्वयपुषि निजशरीरे, स्वेन आत्मना, स्वयमित्यर्थः, नखलक्ष्म नखक्षतचिह्नं, कृत्वा विधाय, भवत्या त्वया, कृतं विहितम्, एतन्नखलक्ष्म इति शेषः, इति एवमुक्त्वा इत्यर्थः, चतुराणां परिहासप्रियाणामिति यावत्, सखीनां सहचरीणां, तवेति शेषः, दर्शयिष्ये तेन विषयीभूतं कारयिष्यामि, अहमिति शेषः, इतीत्थं, रहसि निर्जने, मया भीषितायाः भय गमिताया., अत एव अरेः कामः, उपभोगोपयोगी प्रसाधनविशेष इति भावः, तस्य परिमलः विमर्दोत्थ गन्धः, तस्य मुद्रा चिह्नं, तस्या भङ्गे विलोपे, शोधने इत्यर्थः, सर्वंसहायाः सर्वंसहनशीलायाः, कृतसमया इति भावः, ते तव, त्वामित्यर्थः, अरामि, कर्मणि षष्ठी। मालिनी वृत्तम्॥ २३॥

विनेतेति।—वर्णानां ब्राह्मणादीनां, विनेता रक्षकः, शास्त्रविहितमार्गेण चालयिता इत्यर्थः, दिविषदां देवानाम्, अभयदुर्गं भयनिवारणार्थं शत्रुदुर्गमिवेत्यर्थः, जगति लोके, आश्चर्यं विस्मयजनकं, चरितं आचरणं यस्य तथाभूतः, कनिष्ठः अवरजः, काकुत्स्थः लक्ष्मण इत्यर्थः, जयति सर्वोत्कर्षेण वर्त्तते, शत्रुविनाशादिति भावः, दनुः कबन्धीभूतदैत्यभेदः, यस्त्रैः लक्ष्मणस्य, अस्त्रे आयुधैः, रजनिचरजन्म राक्षसजननं, तस्य यद्वः यद्दत्त, सूचयति विदधातीति तथोक्तं, राक्षसयोनिप्राप्तिकारणमित्यर्थः, प्राप्तानं प्राप्तवन्तं, विजित्य पराभूय इत्यर्थः, चालयित्वेति भावः, अविकलं सम्यक्, निजस्वार्थ-खण्डं प्राप्येति भावः, स्वर्लोकान् सुरलोकान्, उपातिष्ठत प्राप। एष पूर्वं कश्चित् गन्धर्वः आसीत्, शापात् राक्षसयोनिं प्राप, तस्य लक्ष्मणास्त्रात् तस्य शापान्त इति [illegible]रिति पुराणवार्ता। शिखरिणी वृत्तम्॥ २४॥

रामः । साधु वृत्तम् । शिवाः (ङ) सन्तु तस्य देवयानाः (ढ) पन्थानः । वत्स गुह ! वियति विवर्त्तमानः (ण) कपिदयित इव लक्षितः, किमसौ तेनैव योजनबाहुना प्रहरणीकृतः ? (त) ।

गुहः । देव !—

दुन्दुभिं नाम दैत्येन्द्रं निष्पिपेष कपीश्वरः ।
तस्य कङ्कालकूटोऽयं कुमारेण विलोड़ितः ॥ २५ ॥

तन्निमित्तजन्मा (थ) सम्प्रति बालिनो महानभियोगः (द) सम्भाव्यते ।

लक्ष्मणः । ततः किम् ?

रामः । वत्स ! मा मैवं, माननीयः खल्वसौ पुराणवीरो महेन्द्रसूनुः (ध) । (गुहं प्रति) । कुतः पुनरागच्छतो वत्सस्य योजनबाहुरन्तरायः (न) संवृत्तः ?

(ङ) शिवाः शोभनाः, मङ्गल्या इति यावत् ।

(ढ) देवयानाः देवानां देवभूतानाञ्च यानं गमनं येः तादृशाः ।

(ण) वियति आकाशे । विवर्त्तमानः विपर्य्यासेन तिष्ठन्, यथास्थितादन्यथाभावेन वर्त्तमान इत्यर्थः ।

(त) तेन दनुजवत्तेनेत्यर्थः । योजनबाहुना योजनविस्तृतभुजेन । प्रहरणीकृतः युद्धविनाशार्थम् अस्त्रीकृतः ।

दुन्दुभिरिति ।—कपीश्वरो वानरराजः, वालीत्यर्थः, दुन्दुभिं नाम दैत्येन्द्रं दानवराजं, निष्पिपेष निहतवानित्यर्थः, अयम् एषः, भवता यथावत् परिलक्ष्यमाण इत्यर्थः, तस्य दुन्दुभेः, कङ्कालकूटः अस्थिराशिः, कुमारेण युद्धार्थेन, विलोड़ितः चालितः, धनुष्कोट्या विपर्य्यासित इत्यर्थः । अनुष्टुप् वृत्तम् ॥ २५ ॥

(थ) तन्निमित्तजन्मा तन्निबन्धनः, दुन्दुभेः कङ्कालकूटविलोड़नजनित इत्यर्थः ।

(द) अभियोगः अभियुक्तः, अस्त्रशस्त्रादिसन्नाहसन्नित्यर्थः, युष्मान् प्रति आक्रमणमिति यावत्, "अभियोगस्त्वभियुक्तः" इत्यमरः । सम्भाव्यते तर्क्यते, अनुमीयते इत्यर्थः ।

(ध) महेन्द्रसूनुः इन्द्रपुत्रः, वालीत्यर्थः ।

(न) कुतः कस्मात् स्थानात्, कस्माद्धेतोर्वा । योजनबाहुः दनुजवत्स इति भावः । अन्तरायः विघ्नः ।

गुहः। देव! व्योमयानेन सत्वरमपक्रामति (प) रावणे सीतादेव्याः—

रामः। (साश्रुनयनमात्मगतम्)। किं पुनरस्याः? (फ)

गुहः। यदुत्तरीयमुत्प्लुत्य हनूमानग्रहीत्, तदेतदेव! गुणानुरागिणा (ब) कुमारसुग्रीवेण सभाजयितुम् (भ) उपस्थितवतो मम हस्ते देवस्य प्राभृतीकृतम् (म)।

(इति रामस्य हस्ते सीताया उत्तरीयमर्पयति)।

रामः। (गृहीत्वा हृदये निधाय साश्रु)। हा देवि विदेहराजनन्दिनि! कथमुत्तरीयशेषा दृश्यसे। (य) (इति निर्वर्णितार्थो सज्ञमवलम्बते (र)।)

लक्ष्मणः। (निःश्वस्य)। सखे निषादराज! कुशलं सुग्रीवस्य?

गुहः। अद्य त्वयि वार्त्तामनुयुञ्जाने (ल)।

(प) व्योमयानेन विमानेन, आकाशगामिरथविशेषेणेत्यर्थः। अपक्रामति अपगच्छति, पलायमाने इति यावत्।

(फ) अस्याः सीतादेव्याः।

(ब) उत्तरीयम् उत्तरासङ्गम्। उत्प्लुत्य उल्लङ्घ्य। एतत् उत्तरीयम्। गुणानुरागिणा गुणपक्षपातिना, भवता इति शेषः।

(भ) सभाजयितुम् आनन्दयितुं, कुशलप्रश्नादिना आप्याययितुमित्यर्थः, सुग्रीवमिति भवन्तं वा इति शेषः। "अर्च ई आनन्दने। आप्रच्छनम्" इत्यमरः।

(म) उपस्थितवतः समागतवतः। देवस्य भवतः इत्यर्थः। प्राभृतीकृतम् उपायनीकृतं, निमित्तं भवते उपहारत्वेन दत्तमित्यर्थः, "उपायनमुपग्राह्यं प्राभृतं चौपदा स्त्रियाम्" इत्यमरलोकात्; सुग्रीवसभाजननानन्तरं भवत्समाजनार्थं वा आगच्छन्तं पथि योजनद्वादशेन आकाशोऽवोत्यनेन सूचितम्।

(य) उत्तरीयशेषा उत्तरीयं शेषः अवशेषः, दर्शनाय विकल्पः इति भावः, तस्याः तथाभूता। दृश्यसे अवलोक्यसे, त्वमिति शेषः।

(र) अवलम्बते अवलम्बते, दृढतया धृत्वा आत्मानं स्थिरीकरोतीत्यर्थः।

(ल) वार्त्तां प्रवृत्तिं, कुशलप्रश्नादिमित्यर्थः, "वार्त्ता प्रवृत्तिर्वार्ताभः उदन्तः स्यात्" इत्यमरः; अनुयुञ्जाने पृच्छति, सुग्रीवस्य इति शेषः, भवतः सानुजकुशलपृच्छा हृद्या तस्य कुशलतानुचिन्ता इति भावः; "प्रश्नोऽनुयोगः पृच्छा च" इत्यमरः।

रामः। (स्वगतम्)—

जानन्नेव दशाननोऽपहरते नः प्रेयसीमस्ति वा
चन्द्रापीड़मुपासितुं स हि शिरोदाम स्वयं कृत्तवान्।
तस्मासौ रजनीचरस्य न पुनः कण्ठाटवीकर्त्तनात्
धिग् बाणैर्मम चन्द्रहासहतकक्षुब्धोऽयमभ्वा हृतः॥ २६॥

लक्ष्मणः। आर्य्य! कथमस्मासु वनौकसोऽपि (व) सौजन्यमनुरुध्यन्ते। (श)

रामः। किमुच्यते, सुग्रीवः सनाभिः (ष) अयमस्माकम्, अस्य हि प्रभवो भगवान्त्र्यम्बकस्य प्रसविता (स) सहस्र-

---

जानन्निति।—दशाननः रावणः, जानन्नेव अवगच्छन्नेव, नः अस्माकं, प्रेयसीं प्रियतमां, सीतामिति शेषः, यद्वा—नः अस्मान्, राक्षसकुलध्वंसिन इति भावः, जानन्नपि प्रेयसीं सीताम्, अपहरते चोरयति, वा अथवा, अस्ति सम्यक् भवति, एतत् युज्यते इत्यर्थः, हि यतः, सः रावणः, चन्द्रापीड़ं शशिशेखरं शिवम्, उपासितुम् आराधयितुम्, आराधनया सन्तोषयितुमिति यावत्, स्वयं आत्मना, शिरोदाम निजमुण्डमालामित्यर्थः, कृत्तवान् विच्छेद, तत् तस्मात्, स्वयं स्वशिरश्छेदनादित्यर्थः, रजनीचरस्य राक्षसस्य रावणस्य, मम बाणैः शरैः, कण्ठाटवीकर्त्तनात् कण्ठकाननच्छेदनात्, त्रासः भयं, न पुनर्नैवेत्यर्थः, यतः चन्द्रहासहतकेन चन्द्रहासो रावणखड्गः, स एव हतकः हतप्रायः, दुष्टचन्द्रहास इत्यर्थः, तेन क्षुब्धः कुपितः, पुनः पुनर्विदलित इत्यर्थः, अभ्वः इति यावत्, अयम एषः, अभ्वा मार्गः, शिरश्छेदनरूपः इति भावः, हृतः प्रार्थितः, अवलम्बित इत्यर्थः, रावणेनेति शेषः, अत एव धिक्, एतादृशं कण्ठच्छेदनसम्बन्धेऽपि दुष्टाचरणात् अपराक्षुण्णं रावणमिति शेषः। "धिक् निर्भर्त्सननिन्द्ययोः" इत्यमरः; स्वयमेव स्वशिरसः पुनःपुनश्छेदनात् अभ्यस्तशिरश्छेददुःखस्य अस्य शिरश्छेदात् भयं नास्ति, अत एवायमेतादृशं सज्जनविगर्हितव्यापारं कृतवान् इति निष्कर्षः॥ २६॥

(व) वनौकसोऽपि वनवासिनोऽपि।

(श) सौजन्यं सुजनता, सद्व्यवहारमित्यर्थः, आर्य्यया उत्तरीयप्रेरणेन सङ्गावमिति भावः। अनुरुध्यन्ते अनुवर्त्तन्ते, अनुसरन्तीत्यर्थः, प्रदर्शयन्तीति भावः।

(ष) सनाभिः सपिण्डः, "सपिण्डास्तु सनाभयः" इत्यमरः।

(स) अस्य सुग्रीवस्य, प्रभवः जन्मकारणम्। "स्याज्जन्मधिषु प्रभव

दीधिति:। (हृदयमुत्तरीयं दत्त्वा)। वत्स गुह! सृष्टयामि सुग्रीव-हनूमतोर्दर्शनाय, तत् ऋष्यमूकगामिनं मार्गमावेदय। (ङ)

गुहः। (सहर्षमात्मगतम्)। कथमचिरादेव फलवती (क) जाम्बवतो मन्त्रशक्तिः! (प्रकाशम्)। इत इतो मतङ्गाश्रम-वर्त्मना (ख) देवः।

(इति सर्वे परिक्रामन्ति)।

गुहः। देव! पश्य पश्य—

विदधति मुदमक्ष्णोर्नूतनानूपनीप-
प्रहसनमहचर्य्यानित्यनृत्यन्मयूराः।
फलपुलकितजम्बूकुञ्जकूजत्कपोत-
प्रियशबरपरम्पीवन्धवो विन्ध्यलेखाः॥ २७॥

इत्यमरः। प्रसविता प्रसवकर्त्ता, उत्पत्तिहेतरित्यर्थः। सुग्रीवस्य अस्माकञ्च एकजा-देव सूर्य्यात् समुत्पत्तेः सुग्रीवोऽस्माकं सनाभिरिति निष्कर्षः।

(ङ) आवेदय विज्ञापय, प्रदर्शय इत्यर्थः।

(क) फलवती चरितार्थेत्यर्थः।

(ख) मतङ्गाश्रमवर्त्मना मतङ्गस्य तन्नामकस्य मुनेः, आश्रमस्य वर्त्म मार्गः तेन।

विदधतीति।—नूतनानां नवानाम्, अनूपनीपानां जलप्रायप्रदेशसम्भूतकदम्बानां, "जलप्रायमनूपं स्यात्" इति "नीपप्रियकदम्बास्तु हलिप्रिये" इति चामरः; प्रहसनं विकासः इत्यर्थः तस्य सहचर्य्या सङ्गेन, कदम्बविकाशदर्शनेन वर्षागमोपलब्धि-जनितहर्षादिति भावः, यद्वा—सहचर्य्या समानाचारत्वेन इत्यर्थः, वर्षासु कदम्ब-मयूरयोरुभयोरेव पुलकोदयादिति भावः, नित्यं सततं, नृत्यन्तः नृत्यं कुर्वन्तः, मयूराः शिखिनो यासु तथोक्ताः, तथा फलैः श्रव्यैः, फलद्वारा इत्यर्थः, पुलकिताः सञ्जातपुलका इव, पुलकिताः पुलकितत्वेन प्रतीयमानाः, ये जम्बुकुञ्जाः जम्बूवृक्ष-वेष्टितस्थानानि, तेषु कूजन्तः अव्यक्तशब्दं कुर्वन्तः, ये कपोताः पारावताः, तेषु प्रियाश्च प्रीतिमतीनाम्, अनुरागिणीनामिति यावत्, शबरपुरन्ध्रीणां शबराख्य-म्लेच्छजातिविशेषपत्नीनां, बन्धवः मित्राणि, आश्रयभूता इति भावः, विन्ध्यलेखाः विन्ध्यपर्वतश्रेण्यः, अक्ष्णोः नयनयोः, मुदं प्रीतिं, विदधति जनयन्ति। मालिनी वृत्तम्॥ २७॥

रामः। (सर्वतो निरूप्य सखेदम्)—

समन्तादुन्मीलद्दहलहरीलङ्घनकला-
लघुप्रेङ्खत्पम्पानिलविदलदेलासुरभयः।
अविद्यावैदेहीग्रथनलिपिकरीणां मम धिया-
ममी हस्तालम्बं विपिनविनिवेशा विदधते ॥ २८ ॥

लक्ष्मणः। आर्य! इतस्तावत्—

भयभ्रष्टप्रेयोविरहनिरहङ्कारहरिणी-
मुखालोकोन्मीलद्गुरुकरुणरुग्णां सहचरीम्।
विलोक्य म्लेच्छन्तीमलमलमिति प्राक्प्रणिहितं
शरव्यालुब्धानां हृदयमपराद्धं न तु शराः ॥ २९ ॥

समन्तादिति।—समन्तात् सर्वतः, उन्मीलन्तीना प्रसरन्तीनां, प्रवहन्तीनामिति यावत्, दहलाना वल्लीना, लहरीणा तरङ्गाणां, लङ्घनकलया अतिक्रमणशीलतया, तरङ्गाच्चासुरि मृदु-मन्दपवहत्वेनेति यावत्, लघु शीघ्रं यथा तथा, प्रेङ्खन् सञ्चरन्, यः पम्याऽभिधः पम्याख्यसरःशीकरस्पृष्टः वायुः, तेन तत्सङ्गेनेति भावः, विदलन्तीभिः विकस्यमानाभिः, विकसन्तीभिरिति वा, एलाभिः एलालताभिः, सुरभयः सुगन्धाः, अमी एते, विपिनविनिवेशाः काननसंस्थानानि, अविद्यावैदेहीग्रथनस्य अविद्यया मोहेन, वैदेहीग्रथनस्य बहुबहुमानस्य, मिथ्याकल्पितसीताग्रथनस्य इत्यर्थः, लिपिकरीणां लेखिकानां, चित्तपटे अङ्कयितीनामिति यावत्, सीतायां निविष्टचित्तत्वात् सर्वत्रैव सीता सीतेति भावयित्रीणामिति भावः, मम धिया बुद्धेना, हस्तालम्बं हस्तार्पयं, विदधते कुर्वन्ति, बुद्धिर्मम सीतानिविष्टाऽपि एतत्काननसन्निवेशदर्शनेन मोहिमनुभवतीति भावः। मिश्रहरिणी वृत्तम् ॥ २८ ॥

भयेति।—भयेन त्रासेन, भ्रष्टस्य च्युतस्य, पलायितस्येत्यर्थः, प्रेयसः कान्तस्य, विरहेण विच्छेदेन, अदर्शनेनेति यावत्, निरहङ्कारा गर्वरहिता, विधुरेति भावः, या हरिणी स्त्री, तस्याः मुखालोकेन वदनदर्शनेन, उन्मीलन् उद्भवन्, गुरुर्महान्, यः करुणः शोकः, दयेति यावत्, तेन रुग्णां व्यथिताम्, अत एव अलम् अलं मैवं मैवं, अरंनिषेध मा कुरु अरंनिषेधं मा कुरु इति भावः, इति म्लेच्छन्तीं स्फुटनमिदधतीं, चारुभाषया भाषमाणां वा, "म्लेच्छं चारुभाषायाम्" इति विश्वः; सहचरीं सखीं, कान्तामिति यावत्, विलोक्य दृष्ट्वा, लुब्धानां व्याधानां, प्राक् सहचरीनिवेशात् पूर्वं-

राम:। (सास्रम्)। हा देवि जानकि!—

मारीचमृगयाव्यग्रे मयि प्राप्ते च रावणे।
आसामिव कुरङ्गीणां तवोत्पश्यामि लोचने ॥ २० ॥

लक्ष्मण:। (जनान्तम्)। कः पुनरुपायो येन विनोद्यते (ग) हृदयमार्यस्य?

(नेपथ्ये)।

भो भो वनौकसः! (घ) कथयन्तु भवन्तः, केनास्मत्कौर्त्तिकामिनीकेलिचङ्क्रमणक्रीड़ापर्वतो विवर्त्तितः (ङ) अयं दनुराजकङ्कालकूटः? (च)

गुह:। (इदानीं सभयसम्भ्रमम्)। देव! पश्य पश्य, कनकमय-

स्थितमित्यर्थः, प्रविष्टितं समाहितम्, एकाग्रतया निवेशितमिति यावत्, अरव्ये इति शेषः, हृदयं चित्तं, अरव्यात् लक्ष्यात्, अपराद्धं च्युतं, तद्विनाशसङ्कल्पात् निहतमभूदिति भावः, तु किन्तु, अराः निशिता बाणाः, न, अपराद्धा इति शेषः, प्राक् प्रहितत्वेन तेषामनिवार्यत्वादिति भावः। शिखरिणी वृत्तम् ॥ २९ ॥

मारीचेति।—मयि मारीचमृगयायां कापटिकमृगरूपिमारीचवधे इत्यर्थः, व्यग्रे व्याक्षिप्तः तस्मिन् सति, तथा रावणे दशानने च, प्राप्ते उपस्थिते सति, आसां परिदृश्यमानानां, व्याधवञ्चितत्वेनेति भावः, कुरङ्गीणां मृगीणामिव, तव लोचने नेत्रे, कातरे इति भावः, सञ्जाते इति शेषः, इति उत्पश्यामि मन्ये इत्यर्थः। अनुष्टुप् वृत्तम् ॥ २० ॥

(ग) विनोद्यते सान्त्व्यते, सुखीक्रियते इत्यर्थः।

(घ) वनौकसः वनचारिणः।

(ङ) अस्मदिति।—अस्माकं कौर्त्तिरेव, कामिनी कान्ता, तस्याः केलिचङ्क्रमणं क्रीडार्थं भ्रमणं, चित्तविनोदनार्थमितस्ततः पर्य्यटनमित्यर्थः, तस्मै क्रीडापर्वतः विलासशैलः, कृत्रिमाचलस्वरूप इत्यर्थः, दिशि दिशि भ्रम्यमाणमत्कीर्त्तिरूपस्वरूप इति भावः। विवर्त्तितः विपर्य्यासितः, स्वस्थानात् भ्रंशितः इत्यर्थः, विपरीतभावेनावस्थापित इत्यर्थो वा।

(च) दनुरा॰इति।—दनुराजस्य दानवेन्द्रस्य, दुन्दुभिदैत्यस्येत्यर्थः, कङ्कालकूट अस्थिराशिः।

सहस्रपत्रपुण्डरीकवैकक्षकप्रभापटलेन दुन्दुभिकरङ्कव्यतिकर-जन्मना च रोषरागेण त्रिगुणपिङ्गलीं (छ) तनुमादधानः प्लवगराजः (ज) अयमित एवाभिवर्त्तते—

पौलस्त्यावयवीघसङ्कटभुजामूनक्षणोन्मूलित-
हेराज्याममरावतीं क्षतवते वीराय यस्मै हरिः ।
नित्यालोकनकौतुकव्यसनिनोः प्रङ्के सहस्रं दृगः
पिण्डीकृत्य दलच्छलेन कनकाम्भोजस्रजं दत्तवान् ॥११॥

(छ) कनकेति ।—कनकमयानां काञ्चनमयानां, स्वर्णनिर्मितानामित्यर्थः, सहस्रपत्रपुण्डरीकाणां सहस्रदलपद्मानां, वैकक्षकम् उरसि यज्ञोपवीतवत् तिर्यग्-भावेन विलम्बा माला, "वैकक्षकन्तु तत्। यत्तिर्यक् त्रिगुणं उरसि" इत्यमरः; तस्य प्रभापटलेन दीप्तिनिचयेन। दुन्दुभीति।—दुन्दुभेः तन्नामकदानवेन्द्रस्य, करङ्कः मस्तकास्थि, मस्तकास्थिसहितसर्वकङ्काल इत्यर्थः, "करङ्को मस्तकाग्रस्थ नारिकेल-फलास्थनि" इति मेदिनी ; तस्य व्यतिकरः विपर्य्यासः, वैपरीत्येनावस्थापनमित्यर्थः, तस्मात् जन्म उत्पत्तिः यस्य तथाभूतेन, रोषरागेण क्रोधजनितलौहित्येन, त्रिगुणपिङ्गलीं त्रिवारहरिद्रां, स्वतः पिङ्गलां, ततः काञ्चनवैकक्षकप्रभया पिङ्गलां, ततश्च क्रोधेन पिङ्गलेति त्रिगुणपिङ्गलीत्वं बोद्धव्यम ।

(ज) आदधानः धारयन्, कुर्वन् इत्यर्थो वा। प्लवगराजः कपीन्द्रः, वाली इत्यर्थः. "कपिः प्लवङ्गप्लवग-शाखामृगवलीमुखाः" इत्यमरः।

पौलस्त्येति।—हरिरिन्द्रः, अमरावतीं देवेन्द्रनगरीं, स्वराजधानीमिति यावत्, पौलस्त्यस्य रावणस्य, अवयवीघेन अङ्गसमूहेन, सङ्कटं व्याप्तं, यत भुजामूलं कक्षा, पृष्ठतः आक्रमणेविषं रावणं कक्षामूले स्थापनादिति भावः, तेन क्षणेन क्षणमात्रेणैवे-त्यर्थः, यद्वा—क्षणाय क्षणकाललिमित्तमित्यर्थः, उन्मूलितम् उत्पाटितं, विनाशितमित्यर्थः, हेराज्य राजद्वयाधिकृतत्वमिति यावत, रावणस्य इन्द्रस्य चाधिपत्यमिति भावः यस्माः तथाभूता, रावणं विजित्य इन्द्रेणैव एकराजवतीमित्यर्थः, क्षतवते विहितवते, यस्मै वीराय शूराय वालिने, नित्यं सततम्, आलोकनं दर्शनं, पुत्रस्य वालिन इति भावः, तस्मिन् यत कौतुकम औत्सुक्यं, तस्मिन् व्यसिनोः समासक्ता इत्यर्थः, सहस्रं दृगः नेत्राणि, ,दलच्छलेन दलव्याजेन, काञ्चनमयपद्मपत्रापदेशै-रित्यर्थः, पिण्डीकृत्य एकत्रीकृत्येत्यर्थः, यत्किमिति यावत्, कनकाम्भोजस्रजं काञ्चन-कनकमालिकां, दत्तवान् समर्पितवान्, इति अहं मन्ये। पुरा हिमा विलसाव

क्षणं च देवस्य महावीरसंवादगोष्ठी (झ) दृश्यमृष्यमूक-यात्रामन्तरयिष्यति (ञ); तदहमग्रतो गत्वा दिष्ट्या (ट) वर्धयामि सूर्यतनयम्। (ठ)

रामः। एवमस्तु।

गुहः। वाचिकं (ड) पुनरेतावत् कुमारसुग्रीवस्य यत्, "मित्रपर्यायान्तरितं देवस्य दास्यमिच्छामि" (ढ) इति।

रामः। (अपवार्य)। वत्स लक्ष्मण! एवमाह वयस्यस्ते गुहः। किञ्च, मन्त्रोत्साहसम्पन्नानामपि (ण) प्रभुशक्तिम् (त)

सहचरन्तं रावणं स्वस्य जयार्थमागतं वाली जलाया निक्षिप्य सप्तसु समुद्रेषु यथाक्रमं, सन्ध्यावन्दनं कृतवान् इति पुराणवार्ता। यदा च रावणः वालिनः जलायां निक्षिप्तः, तदा अमरावती केवलेन इन्द्रेण एकराजवती आसीत्, यत्तदा तस्याः रावणेन इन्द्रेण च देराज्यमिति भावः। अथ पुत्रेण अमरावत्यां सम्राजाधिपत्यं चार्थं स्थापितमिति प्रीत्या देवेन्द्रः तस्मै कनकाम्भोजमालां ददाविति निष्कर्षः। मार्दूल-विक्रीडितं वृत्तम्॥ ३१॥

(झ) देवस्य भवत इत्यर्थः। महावीरेति।—महावीरेण सुरश्रेष्ठेन वालिना, संवादः सम्भाषणं, स एव गोष्ठी सभा, यदा—तव गोष्ठी संलापः, परस्परभाषण-मित्यर्थः, "गोष्ठी सभा-संलापयोः स्त्रियाम्" इति मेदिनी।

(ञ) अन्तरयिष्यति व्याहनिष्यतीत्यर्थः, अवगणिष्यतीति यावत्।

(ट) दिष्ट्या दृष्ट्या, भवदागमनवार्ता विज्ञाप्य हर्षोत्पादनेनेत्यर्थः, दिष्ट्या सङ्कल्पेन वा, भवदागमनसङ्कल्पसूचवार्तापदानेनेत्यर्थः, "दिष्ट्या हर्षे सङ्कल्पे च" इति मेदिनी॥

(ठ) सूर्यतनयं सुग्रीवम्।

(ड) वाचिक सन्देशवाक्, वाचा ज्ञापनीयमित्यर्थः, न तु लिखितयोगेनेति भावः, "सन्देशवाक् वाचिकं स्यात्" इत्यमरः।

(ढ) मित्रपर्यायेण मित्रनाम्ना, अन्तरितं व्यवहितं, सुग्रीवः कस्मुग्रीवेण एवं भवन्तं विज्ञापयति यत् अहं भवतः मित्रापदेशो दास एवेत्यर्थः।

(ण) मन्त्रोत्साहेति।—मन्त्रेण मन्त्रशक्त्या, सन्ध्यादि-षाड्गुण्यप्रयोगेण साम-उपायचतुष्टयेन चेत्यर्थः, उत्साहेन उत्साहशक्त्या च, विक्रमबलेनेत्यर्थः, सम्पन्नानामपि युक्तानामपि।

(त) प्रभुशक्तिं कोषदण्डजं तेजः "स प्रभावः प्रतापश्च यत् तेजः कोष-दण्डजम्"

अपेक्षन्ते सिद्धय: ; तदहं बालिस्थाने सुग्रीवमभिषिच्य तत्कोष-दण्डाभ्यां समग्रशक्तिर्वैरपारं (थ) गन्तुमिच्छामि।

लक्ष्मण:। (सस्मितम्)। यद्येवम्, उपयुज्यमानमिन्द्रसूनुमुपेच्य (द) सुग्रीवेणोपयोच्यमाणेन सन्धिरिति वक्र: खल्वयं पन्था: (ध)।

राम:। (सस्मितम्)। वत्स! साध्वेव ब्रवीषि। किन्तु—

ह्रियत्पौलस्त्यकण्डूभिदुरभुजभरोत्सायमाण: कपीन्द्रो
नायं न: सन्दधीत क्वचिदपि हि विधौ नैव साहाय्यकाम:।
सोऽहं सुग्रीवमेतद्दमनदृढतरं मित्रमिच्छामि पश्चात्
पारक्लेशेयपुत्रव्ययशिथिलशुचं शक्रमाराधयामि ॥ ३२ ॥

दृत्यमर:। सिद्धय सफलता:, वैरप्रतीकारा इति भाव:। प्रभावसन्तोत्साहा निखिता एव सिद्धय प्रभवन्तीति निष्कर्ष:।

(थ) तत्कोष-दण्डाभ्यां तस्य सुग्रीवस्य, कोष धनं, दण्ड: सेना ताभ्याम्। समग्रशक्ति: समग्रा: सम्पूर्णा:, शक्तय: प्रभावोत्साहमन्त्रजा: तिस्र: जय-साधन्य: यस्य तथाभूत:, "शक्तयस्तिस्र: प्रभावोत्साहमन्त्रजा:" इत्यमर:। वैरपार वैरस्य शत्रुताया:, पारम् अन्तं, शेषमित्यर्थ:, वैरनिर्यातनमिति यावत्।

(द) यद्येवं समग्रशक्तिर्वैरपारं गन्तुमिच्छसि चेत्, उपयुज्यमानम् उपयुक्तं, सम्यक् शक्तमिति भाव:, यद्वा—उपयुज्यमानम् उपयोगं कुर्वन्तम्, अस्मानि: सह सखाय समागच्छन्तमित्यर्थ:; यद्वा—रावणेन सह कृतव्यवहारमित्यर्थ:। इन्द्रसूनुं वालिनम्। उपेक्ष्य अवज्ञाय, त्यक्त्वा इत्यर्थ:।

(ध) उपयोक्ष्यमाणेन उपयुक्तीकरिष्यमाणेनेत्यर्थ:, यद्वा—उपयोक्ष्यमाणेन उपयोगं करिष्यमाणेन, सखापादित्यवहारं करिष्यमाणेनेत्यर्थो वा। सन्धि: सम्मेलनम्। वक्र: अनृजु:, कुटिल इत्यर्थ:। पन्था मार्ग, उपाय इत्यर्थ:, उपयुक्तं परित्यज्य अपरम् उपयुक्तं सम्पाद्य कार्यसाधनात् प्रथमोपयुक्तेनैव कार्यसाधनं श्रेय इति भाव:।

ह्रियादति।—ह्रियत: अपहरत:, पौलस्त्यस्य रावणस्य, कण्डूतिर्कण्डूयनम्, तद्वद् भिदुर: भुजभर: बाहुबलातिशयमित्यर्थ:, तेन उत्साह्यमान: उ[illegible] न तेजस्वल इत्यर्थ:, अयं परिदृश्यमान:, कपीन्द्र: वानरश्रेष्ठ: वालीत्यर्थ: [illegible] दधीत न आश्रये-दित्यर्थ:, हि यत:, क्वचिदपि कस्मिन्नपि विधौ कार्ये साहाय्यार्थी,

अन्वयः। साधुदर्शिनी (न) बुद्धिरार्य्यस्य। किञ्च, विधूतशापेन तनुनाऽपि देवभूयमभिलम्भितेन (प) सन्दिष्टमार्य्यस्य, यथा—"अस्य निषादपतेः (फ) वचसि देवेनावधातव्यम्" (ब) इति।

रामः। तत् गुरोऽपि प्रतिदूत्यमर्हति (भ)।

अन्वयः। (गुरुं प्रति)। वयस्य! एवमस्मद्गिरा (म) सुग्रीवो विज्ञाप्यः,—

"पितायं रेतोधास्तव तरणिरस्मत्कुलगुरु-
र्मनुर्वैवस्वत्रेयस्तदपि सहजं मित्रमसि नः।

नैव, भविष्यतीति शेषः, बौद्धातिशयाभिमानित्वेन प्रयोजनविरुद्धादिति भावः; शीघ्रं साधयार्यौ यद्, सुग्रीवं तस्याद्याप्यपरिचितमिति भावः, एतस्य वालिनः, दमनेन आसनेन, विनाशेनेत्यर्थः, दृढतर बलवत्तर, मित्रं सखायम्, इच्छामि अभिलषामि, पश्चात् एतद्दमनानन्तरं, अग्रजम् इन्द्रं, पारस्त्रैणेयस्य परस्त्रीजातस्य, पुत्रस्य तनयस्य, वालिनः इत्यर्थः, व्यधीन वशेन, नाशेनेत्यर्थः, शिथिला अल्पा, पारस्त्रैणेयपुत्रत्वात न गुर्वीति भावः, शुक् शोकः मम तादृशम्, आराधयामि क्षणमपि प्रीणयामीत्यर्थः, पुत्रनाशजनितशोकोपशमनाय विहितविधानं करिष्यामीति यावत्। सग्धरा वृत्तम्॥ ३२॥

(न) साधुदर्शिनी सम्यक्-दर्शिनी, प्रतिपत्तिशालिनीत्यर्थः।

(प) विधूतशापेन निर्मुक्तशापेन। देवभूय देवत्वम्। अभिलम्भितेन प्रापितेन, त्वयेति शेषः। सन्दिष्टं वाचिकमुपदिष्टम्।

(फ) निषादपतेः गुहस्य।

(ब) अवधातव्यम् अवधार्यं कर्त्तव्यम्, अस्य वाक्यं प्रतिपालयितव्यमित्यर्थः।

(भ) प्रतिदूत्यं प्रतिदूतकर्मेत्यर्थः, यथा सुग्रीवस्यार्य दौत्यकर्मणि नियुक्त, तथाऽहमपि एनं सुग्रीवाय दूत प्रेषयामीति भावः। अर्हति युज्यते, प्रतिदूतकर्मणि नियोक्तुं योग्यो भवतीत्यर्थः।

(म) अस्मद्गिरा मावचोवचनानुसारेण।

पितेति।—अस्माकं कुलगुरुः वयसादिपिता, अयम् ऋक्षं परिदृश्यमानः, तरणिः सूर्यः, "द्युमणिस्तरणिर्मित्रविवस्वानुदिवाकरः" इति सूर्यपर्य्याये अमरः; तव रेतोधाः त्वदुत्पादनार्थं वीर्य्यनिषेककर्त्ता, पिता जनकः, न तु वेधः पितेति भावः, मनुः अस्मत्पूर्वपुरुषः सूर्यतनयः, तव वैमात्रेयः विमातृगर्भजातः भ्राता,

अथापि भ्रातेयं शिथिलयसि कापेयचपलः
प्ररास्तस्मै बालिप्रतजरसलीलाः प्रतिभुवः" ॥ ३३ ॥

रामः। (विहस्य)। वत्स गुह! एष खलु पौलस्त्यगतेनामर्षेण धूमायमानो (य) यया कयाचिद्दाचा सौमित्रिरभिदधातु नाम, (र) सततसमिध्यमानजानकीविरहवैश्वानरेण रामचेतसा पुनरग्निसात्क्रियमेव सुग्रीवो मित्रमभ्युपगतः। (ल)

गुहः। (सहर्षम्)। परमनुगृहीतोऽसौ देवेन विकर्त्तनतनयः (व)। (सपरिहासस्मितं च)—

सुग्रीवे यदि पक्षपातमधुरं देव। त्वदीयं मनः
किं नस्तेन? विदाङ्करोतु भगवानभ्योजिनीवल्लभः।

तत् तस्मात् अपि, त्वं नः अस्माकं, सहजं स्वाभाविकं, मित्रं सुहृत्, असि भवसि, अद्यापि यद्यपि, कापेयभावः वानरप्रकृतिः, तेन चपलः अधीरः, वानरस्वभावसुलभः अव्यवस्थितचित्तः सन् इति यावत्, भ्रातेय भ्रातिभावं, सहजनिवत्तनिति यावत्, "सगोत्रबान्धवभ्राति-बन्धुस्वस्वजनाः समाः। भ्रातेय बन्धुता तेषां क्रमात् भाव समूहयोः॥" इत्यमरः, शिथिलयसि शिथिलं करोषि, नाङ्गीकरोषीत्यर्थः, अवज्ञालोकीति यावत्, तत् तदा, बालिनः तव ज्येष्ठस्य, चतजरसेन क्रोधिताक्षादेव, लीलाः लुप्साः, मे मम, प्ररः वाचः, प्रतिभुवः स्वयंकाः, प्रतिनिधिभूताः (त्वयि) इत्यर्थः, शैथिल्यप्रतीकारार्थं प्ररानेव प्रतिभुव आश्रयामीति भावः, तव भ्रातित्वविपरीते वालिमार्गगतिः स्थिरेति निष्कर्षः। शिथिरिषो इत्यत्र ॥ ३३ ॥

(य) पौलस्त्यगतेन रावणगतेन, रावणसम्बन्धिनेत्यर्थः। अमर्षेण क्रोधेन। धूमायमानः धूमसुद्गमन्, सन्नध्यमान इति यावत्, सदसद्विवेकशून्य इति भावः।

(र) यया कयाचित् अवाच्यया इत्यर्थः, वक्तुमनर्हया इति यावत्। अभिदधातु ब्रवतु। नामेति कुत्सायां, तस्मात्च दुष्टम् वाक्यमनुचितं निन्दालीत्यर्थः, "नाम प्राकाश्यसम्भाव्य-क्रोधोपगमकुत्सने" इत्यमरः।

(ल) सततेति।—सततं निरन्तरं, समिध्यमानः प्रज्वलन्, जानकीविरहवैश्वानरः सीताविच्छेदाग्निः यस्मिन् तथाभूतेन। अग्निसात्क्रियमेव अनलं साक्षीकृत्य। अभ्युपगतः अङ्गीकृतः, स्वीकृत इत्यर्थः, "अङ्गीकाराभ्युपगम प्रतिश्रवसमाधयः" इत्यमरः।

(व) विकर्त्तनतनयः, सूर्यसुतः, सुग्रीव इत्यर्थः।

नव्येनात्मजराज्यलाभरभसोद्भूतेन यस्तेजसा
पूर्वस्मादधिकेन दुःसहतरो लोकेषु वर्त्तिष्यते ॥ २४ ॥

लक्ष्मणः। (विहस्य)। कथं तपनतनयस्य राज्यमङ्गीकारिता वयं वयस्येन ? (अ)

रामः। (सस्मितम्)। वत्स गुह! तावत् प्रकाशमेवं प्रतिशुश्रूषति (ब) मे हृदयम्।

गुहः। (सप्रणय-स्मितम् (स))। स्वामिन्! इयमेव महतां शैली (ह)।—

सुग्रीवे इति।—हे देव! त्वदीयं भवदीयं, मनः चित्तं, सुग्रीवे यदि पक्षपातेन स्नेहेन, व्यक्तिविशेष प्रति अनुरागविशेषेणेत्यर्थः, मधुर सरसमिति यावत्, अनुरक्तमिति भावः, यद्वा—मधुरं प्रियं, प्रीतिसम्पन्नमित्यर्थः, "स्वादु-प्रियौ च मधुरौ" इत्यमरः; भवतीति शेषः, तेन तव मनसः पक्षपातित्वेनेत्यर्थः, नः अस्माकं, किम् ? यद्वा—तत् तव मनसः पक्षपातित्वज्ञानेन, नः अस्माक, किम् ? फलमिति शेषः, अस्माभिरस्मिन् विषये ज्ञाते कस्यापि लोकेऽपि उपकारो न भविष्यतीति भावः; सुग्रीवं प्रति तवानुरागाधिक्येन अस्माकं लाभो वा अतिवा किमपि नास्तीति निष्कर्षः, परन्तु तत् तव मनसः पक्षपातमाधुर्य्यमित्यर्थः, भगवान् अञ्जनीवल्लभः, सूर्य्यः, विदाङ्करोतु जानातु, तस्य सर्वोत्तर्यामित्वादिति भावः, यः अञ्जनीवल्लभः, नव्येन अभिनवेन, आत्मजस्य पुत्रस्य, राज्यलाभेन राज्यप्राप्त्या, यो रभसः हर्षः, "रभसो वेग हर्षयोः" इत्यमरः, तस्मात् समुद्भूतेन समुत्पन्नेन, पूर्वस्मात् पुत्रराज्यप्राप्तेः पूर्वकालीनात्, तेजसः इति शेषः, अधिकेन तेजसा प्रतापेन, लोकेषु जगत्सु, दुःसहतरः अतिदुःसह इत्यर्थः, भवतीति शेषः, वर्त्तिष्यते भविष्यति, समधिकतेजसा अनुपीडनेन जगत् आह्लादयिष्यतीति भावः। आर्द्रलविक्रीडितं वृत्तम् ॥ २४ ॥

(अ) तपनतनयस्य सूर्य्यनन्दनस्य, सुग्रीवस्य इत्यर्थः। अङ्गीकारिताः प्रतिश्राविताः, प्रतिश्रुताः कारिता इत्यर्थः। वयस्येन तुल्यवयसा मित्रेणेति यावत्, भवतेति शेषः, बालिनं हत्वा सुग्रीवाय राज्यं ददतु भवन्तः इत्येवं किमस्मान् अङ्गीकारयसि त्वम् ? इत्यर्थः।

(ब) प्रतिशुश्रूषति अङ्गीकरोति। "अङ्गीकाराभ्युपगम-प्रतिश्रवसमाधयः" इत्यमरः।

(स) सप्रणय-स्मितं सविनय-स्मितम् ; सप्रणयं स्मितमिति वा, "प्रणय प्रणया स्नुषौ" इत्यमरः।

(ह) महतां महात्मनाम्, उदारसत्त्वानां वा। शैली रीतिः।

सन्तो मनसि-कृत्यैव प्रवृत्ताः कृत्यवस्तुनि ।
कस्य प्रतिशृणोति स्म कमलेभ्यः श्रियं रविः ? ॥ २५ ॥

(नेपथ्ये) ।

भो भो वनौकसः ! कथयन्तु भवन्तः, दुन्दुभिकरङ्क-विच्छेदप्रसाध्यमानगम्भीरावष्टम्भनिर्भरेण (क) केनाक्रान्तमियं चिरस्य भुजकाण्डकण्डूतिरपनेष्यते ? (ख)

पुनः । (सक्रोधम्) ।—

मन्ये दर्पामयाविभ्यां नित्यं दोर्भ्यामममर्षणः ।
जाम्बवत्प्रेरणादोषः प्राप्तोऽयं प्लवगेश्वरः ॥ २६ ॥

सन्त इति ।—सन्तः साधवः, मनसि कृत्यैव हृदये कर्त्तव्यमित्यैव, कृत्यवस्तुनि कर्त्तव्यविषये, प्रवृत्ताः, उद्युक्ताः, भवन्तीति शेषः, सन्तः "इदं मया कर्त्तव्यम्" इति न कस्मैचित् वाचा प्रकाशयन्ति, किन्तु मनस्येवैव तत्र प्रवर्त्तन्ते इति निष्कर्षः, तथा हि, रविः सूर्यः, कमलेभ्यः पद्मेभ्यः, श्रियं लक्ष्मीं, दास्यामीति शेषः, इति कस्य मनसः, अग्रे इति शेषः, प्रतिशृणोति स्म अङ्गीकृतवान् ? न कस्यापीत्यर्थः । अनुष्टुप् वृत्तम् ॥ २५ ॥

(क) दुन्दुभीति ।—दुन्दुभेः तन्नामकस्य नवेन्द्रस्य, करङ्कविच्छेदेन अस्थिविदण्डांशेन, खण्डनात् यस्यां भञ्जनेनेति यावत्, सम्भाव्यमानः अनुमीयमानः, गम्भीरः महान्, सुदृढमूल इति यावत्, अवष्टम्भनिर्भरः आश्रयातिशयः, सुदृढावलम्बनमिति भावः, यस्य तादृशेन ।

(ख) भुजेति ।—भुजौ बाहू, काण्डाविव तरुस्कन्धौ इव, तद्वत् विशालौ इति भावः, यद्वा—काण्डाविव दण्डाविव, दण्डवत् दीर्घौ सुदृढौ च इति भावः, "काण्डोऽस्त्री दण्डवाचाऽऽ-वर्गावसरकारिषु" इत्यमरः ; तयोः कण्डूतिः कण्डूः, अपनेष्यते निराकरिष्यते इत्यर्थः, निवारयिष्यते इत्यर्थः, येन एतत् कर्म कर्त्ता, तेनागन्तुना, तं विनाश्य अहं भुजकण्डूतिं निवारयिष्यामीति समुदायार्थः ।

मन्ये इति ।—दर्पामयाविभ्यां दर्पः हर्षः इत्यर्थः, "कण्डूभिदिता भावो द्रव्यवत् प्रकाशते" इति न्यायात्, आमयावी व्याधितः, कण्डूतिरोगाक्रान्त इत्यर्थः, ताभ्यां, "आमयावी विकृतौ व्याधितोऽपटु" इत्यमरः ; यद्वा—दर्प एव आमयः रोगः, दोऽनयोरस्तीति तादृशाभ्यां दर्प-ज्वरोपहताभ्यामित्यर्थः, दोर्भ्यां भुजाभ्यां, नित्यं सततम्, अमर्षणः, क्रोधनः, अयं प्लवगेश्वरः, वानरराजः, बालीत्यर्थः, जाम्बवतः सल्लिङ इति

तत् अहमपि वीरयात्रादर्शनसुखं (ग) मुहूर्त्तमनुभवामि।

(प्रविश्य)

वाली। (पुरोऽवलोक्य)। अये! प्रसन्नोज्ज्वलाकृतौ (घ) कावेतौ? नियतम् (ङ) आभ्यामेकेन दानवनाथकङ्कालोत्-क्षेपनिमित्तेन (च) भवितव्यम्। (स्मृतिमभिनीय सवितर्कम्)। आः!! सन्दिष्टम् (छ) अस्मासु प्रियसुहृदा लङ्केश्वरेण, यथा—

प्रक्लृप्तकान्तारकुमारभक्ति-
र्दौर्भागिनेयो जनकेन मुक्तः।
मनुष्यसामन्तसुतो निषङ्गी
सहानुजस्तिष्ठति दण्डकायाम् ॥ ३७ ॥

भाव, प्रेरणया प्रवर्त्तनया, दोषः ज्वलितः सन्, प्राणः उपक्षितः, इति मन्ये सम्भावयामि। अनुष्टुप् छन्दः ॥३६॥

(ग) वीरयात्रेति।—वीराणां शूराणां, यात्रा गमनं, युद्धार्थमभियोगः इति यावत्, "यात्रा तु यापनेऽपि स्यात् गमनोत्सवयोः स्त्रियाम्" इति मेदिनी; तस्य दर्शनेन अवलोकनेन, सुखम् आनन्दम्।

(घ) प्रसन्नेति।—प्रसन्ना सौम्या, उज्ज्वला दीप्तिमती च, आकृतिः मूर्त्तिर्ययोः तथाविधौ।

(ङ) नियतं निश्चितम्।

(च) दानवेति।—दानवनाथस्य दैत्येन्द्रस्य, दुन्दुभेरित्यर्थः, कङ्कालस्य अस्थेः, क्षेपः विपर्य्यासनं, क्षेपणात् वाहनमित्यर्थः, तस्य निमित्त हेतुभूतः तेन।

(छ) आः॥ इति अरुचार्थसमन्वयम्, "आः स्मरणेऽवधारणे क्रोध खलापकोरपि" इति मेदिनी। सन्दिष्टं वाचिकमुक्तं, कथितमित्यर्थः।

प्रक्लृप्तेति।—प्रक्लृप्तः प्रकर्षेण कृतः, कान्तारे वने, कुमारे सुयोधे इत्यर्थः, भक्तिः अनुरागः येन तथोक्तः, सुयोधानुरागीत्यर्थः, कुमारेण लक्ष्मणेन, भक्तिः अनुरागः अस्य इति वा, दुर्भगायाः पत्यरप्रियायाः भाग्यहीनायाः, सौभाग्यहीनाया इति भावः, अपत्यं पुमान् दौर्भागिनेयः दुर्भगापुत्र इत्यर्थः, अत एव जनकेन पित्रा, मुक्तः परित्यक्तः, निर्वासित इति यावत्, मनुष्यसामन्तस्य मानवराजस्य, दशरथस्येति भावः, सुतः पुत्रः, निषङ्गी धनुर्धरः, "धन्वी धनुष्मान् धानुष्को निषङ्गी धनुर्धरः" इत्यमरः, सहानुजः अनुजेन लक्ष्मणेन सहितः, दण्डकायां दण्डकारण्ये, तिष्ठति वसति। उपजाति छन्दः ॥३७॥

तौ चास्माकं तत्र विहारिषु (ज) निशाचरेषु पाटच्चरीं हृत्तिमातिष्ठमानौ (झ) भवद्भिः प्रतिकर्त्तव्यौ (ञ) इति। तत् किमयमयञ्च तौ स्याताम्?

रामः। वत्स लक्ष्मण! शृणु, किमयं ब्रवीति महावीरः।

लक्ष्मणः। (विचिंदुपसृत्य)। इत आवाम्। इत इतो (ट) भवान्।

बालौ। भोः! कावेतौ युवाम्?!

लक्ष्मणः। महाभाग! राघवौ (ठ) क्षत्रियावावाम्।

बालौ। आयुष्मन्! आकारविशेषा एव गमयन्ति जातिविशेषान्; तत् विशेषं (ड) ब्रूहि।

लक्ष्मणः। ननूक्तमेव राघवावावाम्।

बालौ। (साध्यसूयमिव)। (ढ) आः!!—

वपुरपि विहृणोति क्षत्रतां को विशेषो
रघुषु यदभिधत्से राघवावित्यभीक्ष्णम्?।

(ज) तौ मनुष्यसामन्तसुतौ। तत्र दण्डकायाम्। विहारिषु सञ्चारिषु, तिष्ठत्सु इत्यर्थः।

(झ) पाटच्चरीं दास्यवीं, "चोरैकागारिकस्तेन दस्युतस्करमोषकाः। प्रतिरोधिकराक्रन्द-पाटच्चरनलिम्लुचाः॥" इत्यमरः, वृत्तिं व्यवहारम्, आतिष्ठमानौ आचरन्तौ, निरपराधानां निशाचराणां हनन-ताडन-सर्वस्वापहरणरूपं दस्युजनोचितं व्यवहारं कुर्वन्ताविति यावत्।

(ञ) प्रतिकर्त्तव्यौ प्रतिविधेयौ, विनाशनीयाविति यावत्।

(ट) इतः अस्मात् दिशि, अस्मिन् स्थाने वा, आवाम् अहं लक्ष्मणश्च, वर्त्तावह इति शेषः। इत इतः, आगच्छतु इति शेषः।

(ठ) राघवौ रघुवंशभवौ।

(ड) आकारविशेषाः मूर्त्ति-परिच्छदादीनां वैशिष्ट्यम्। गमयन्ति बोधयन्ति। विशेषं विस्तृतं, स्पष्टमिति यावत्।

(ढ) साध्यसूयमिव साध्यसूयमिव, लक्ष्मणोक्तौ दोषारोपपूर्वकमिवेत्यर्थः, "असूया साध्यसूया च" इति शब्दार्णवः। "असूया तु दोषारोपो गुणेष्वपि" इत्यमरः।

परिकलयितुमिष्टं नाम सांस्कारिकं वा-
मङ्क !! कथमपत्यप्रत्ययान्निश्चिनोमि ? ॥ १८ ॥

लक्ष्मणः । (सधैर्यं संरम्भम् (च) । भोः ! आवां तौ राम-लक्ष्मणौ ।

वाली । (सविनयं (त) आत्मगतम्) । कथं "तौ" इति सर्व-नामपदेन प्रसिद्धावित्याह ? तत् किमनयोरेवान्यतरः पिनाक-धन्वनो दमयिता ? (थ) । सोऽपि रामभद्रो रामः स्यात् । भवतु, एवं तावत् । (प्रकाशं विहस्य)—

एको वेषपरिग्रहः परिकरः साधारणः कर्मणा-
माकृत्योर्मधुरत्वमेव सदृशं तुल्यैव गम्भीरता ।

वपुरिति ।—वपुरपि शरीरमेव, युवयोरिति शेषः, एवार्थोऽयमपि शब्दः, चलतां अस्थिरत्वं, चलत्वमनात्मत्वमित्यर्थः, विद्योतीति प्रकटयति, रघुषु रघुवंशीयेषु, युष्मास्विति शेषः, विशेषः प्रभेदः, कः ? यत् राघवौ रघुवंशीयौ, आवामिति शेषः, इति एवम्, अभीक्ष्णं पुनः पुनः, अभिधत्से ? ब्रवीषि ? यद्वा—अभीक्ष्णं यत् राघवौ इति अभिधत्से तत्र रघुषु रघुवंशीयेषु बहुषु मध्ये, को विशेषः ? युवयोः परिचायको भेदः कोऽत्र ? अङ्ग !! खेदे, अङ्गते वा, आश्चर्येऽमित्यर्थः, "अङ्गहेऽङ्गते खेदे" इत्यमरः ; वा युवयोः, इदम् अभिमतं, विज्ञातीनां सम्मतमित्यर्थः, सांस्कारिकं नामसंस्काराख्यसंस्कारसम्बद्धं, नाम अभिधानम्, अपत्यप्रत्ययात् रघोरपत्ये पुमांसावित्यर्थघटित-ण प्रत्ययात्, परि-कलयितुं ज्ञातुं, कथं केन प्रकारेण, निश्चिनोमि ? निर्णयामि ? यद्वा—वां सांस्कारिकं नाम परिकलयितुं ज्ञातयितुम्, इदम् अभिमतम्, उचितमित्यर्थः, यतः अपत्यप्रत्ययात् कथं निश्चिनोमि ? अङ्ग इत्यङ्गते, आश्चर्यमेतत् यत्, पुनः पुनः पृच्छ्य-मानोऽपि केवलमपत्यप्रत्ययेनैव परिचयं ददासि, न तु स्वकीयनामोल्लेखेनेति भावः । साक्षिणौ इतम् ॥ १८ ॥

(च) सधैर्यं संरम्भं सधैर्यं क्रोधम् ।

(त) सविनयं सचिन्तम् ।

(थ) पिनाकधन्वनः पिनाकनामकधनुषः, "धनुर्यष्टौ धन्वनरासनकोदण्डं कार्मुकम्" इत्यमरः ; दमयिता भङ्क्ता ; यद्वा—पिनाकं धनुश्च तत्र दण्ड, दमयिता पराजेता, क्षमस्वा इत्यर्थः, पिनाकक्षमत्वादिति भावः ।

तत दृष्टुं चिरमुत्सुकोऽस्मि कतरो वां रामभद्रः पुनः
सर्वक्षत्रवधव्रती भृगुपतिर्येनावकीर्णीकृतः ? ॥ ३९ ॥

लक्ष्म० । (सविनयमिव)। (द) आर्य साङ्कृत्यने ! (ध) लक्ष्मण-
स्तावदत्र ।

वाली। अयमप्यपरो दाशरथिः कौशिकाल्लेवासी रामः ?

लक्ष्म०। अथ किम् ।

वाली। (सदर्पोल्लासं सक्षिदुच्चैः)। भो रामभद्र !—

एष त्रैवर्ण्यमात्रव्यवसितजगतो भार्गवव्यास्तगर्भा-
दाक्षत्रक्षत्रजातिस्त्वमसि पथि गिरामद्य नः सुप्रभातम् ।

एक इति।—वैषम्य लटावल्लक्ष्मादे', परिवृढः प्रभुः, धारणमित्यर्थः, एक' तुल्य', ब्राह्मणा ब्रह्मधारणादीनां, परिवार. ज्ञातः, समूह इत्यर्थः धारणो वा, यज्ञो वा, "मवेत परिवारो ज्ञाते ·· विवेकारम्भयोरपि" इति मेदिनी, "यज्ञारम्भो परिवारो" इति विश्वप्रकाशश्च ; साधारण: समानः, ब्राह्मणो: उभयोरप्यवयवो:, मधुरत्वमेव ब्राह्मणोरत्वमपि, अनेन शब्दोऽप्यर्थः, अदृश्यं तुल्य, ब्राह्मणोरत्वं च ब्राह्मणोर्यत्व, दुरवगाह अतिशयत्वमित्यर्थः,तुल्यव समानेव, युवयोरिति सर्वत्र सम्बन्ध , पुन' किन्तु, येन सर्वेषा निक्षिप्तानां, क्षत्रियजातीनां, वधव्रती नाशदीक्षित:, भृगुपति: परशुराम:, अवकीर्णीकृत: क्षतत्राणीकृत:, भट्टक्षत्रवधव्रत: कृत: इत्यर्थः, क्षत्रवधरूपव्रतात् भ्रंशित इति यावत्, "अवकीर्णो क्षतत्राण:" इत्यमर:, वा युवयोर्मध्ये, स: रामभद्र: कतर: ? ब्र.? तत दृष्टुम अवलोकयितुं, चिरं दीर्घकालावधि, उत्सुक' उद्युक्त:, आस्ते इत्यर्थः, "दृष्टार्थोद्युक्त उत्सुक:" इत्यमर: , अस्मि भवामि, अहमिति शेष। "तत्" इत्यत्र "तम्" इति पाठे—तं रामभिमत्यर्थः। साङ्कृत्यविक्रीडितं क्षत्रम् ॥ ३९ ॥

(द) सविनयमिव इति इव शब्देन लक्षणो विनयाभाव: सूचित:, कृतक्षत्रिय-पूर्वकमित्यर्थः ।

(ध) साङ्कृत्यने। सङ्कृत्य ऋषि:, तस्यापत्य पुमान् साङ्कृत्यि: वाली तत्सम्बुद्धौ। "ऋषी मरुत्वान् मघवा विडौजा: पाकशासन:। सङ्कृत्यो दुश्यवनस्तुराषाण्मेघ-वाहन ॥" इत्यमर: ।

एष इति।—त्रयाणां विविधानां, वर्णानां सवर्व्यतिरिक्तानां ब्राह्मण-वैश्य-शूद्राणा-मित्यर्थः, समाहार: त्रिवर्ण, तस्य भाव: त्रैवर्ण्य, तदेव त्रैवर्ण्यमात्र केवलं वर्णत्रय, ब्राह्मण् व्यवसितं व्यापितं, जगत् येन तथाविधस्य, पृथ्वी नि.क्षत्रिया कृतवत इति भाव:, यद्वा—त्रैवर्ण्यमात्रं केवलं त्रिवर्णात्मकं, व्यवसित निश्चितं, वर्णत्रयमात्रं स्थापयितं

कक्षोपक्षेदसद्यःश्रमितदशमुखास्फोटकण्डूविकारो
वीरस्यास्यो भुजस्त्वा परिचरतु चिरं चक्षुषी नन्दतां च ॥ ४० ॥

रा.म.। (इति सदर्पम्)। स एष महाबाहुः सङ्क्रन्दनसूनुः !!—

येन वीरेण गुप्तायां किष्किन्धायामियं मही।
रावणाभिभवक्लान्ता श्वस्तदुच्छ्वासमश्नुते ॥ ४१ ॥

(इति परिक्रामति)।

लक्ष्मणः। महाभाग! अयमार्यः। इत इतो भवान्।

इति अवधारितमित्यर्थः, जगत् येन तथाविधस्य, सर्वसन्तापिनश्चेन कैवल्यवर्णनयः वर्णं जगत् कर्तुमिच्छत इत्यर्थः, भार्गवस्य परशुरामस्य, अल्पगर्भात् कुठाराभ्यन्तरात्, परशुजन्मनादित्यर्थः, आकृष्टा निःसारिता, निर्भीचिता इति यावत्, क्षत्रजातिः क्षत्रियवर्गः येन तादृशः, क्षत्रियदन्तुभार्गवस्य जेतेति भावः, एव अथ, त्व गिरां वचसा, पथि मार्गे, गोचरे इति यावत्, अस्मि भवामि, अन्योऽन्यमाभाषमाणयोग्यस्थाने समुपस्थितोऽस्मीत्यर्थः, प्रत्यक्षीभूतोऽस्मीति भावः, तस्मात् अद्य अस्मिन् अहनि, नः अस्माकं, सुप्रभातं शोभनं दिनमित्यर्थः, कच्चं भुजामूलं, तव च ऊरुखेदः सन्तापोद्भूतघर्मजलं, तेन सद्यः सपदि, शमितः शान्तिं नीतः, दशमुखस्य रावणस्य, आस्फोटकण्डूरेव बाह्वास्फोटनकण्डूतिरेव, सपरिकरं करेण भुजसन्ताडनपूर्वकं युद्धार्थमाह्वानरूपकण्डूतिरेवेति यावत्, युद्धकण्डूरेवेति वा, विकारः विक्रतिः, येन इति यावत् येन तथोक्तः, रावणदर्पक्षयकर इति भावः, वीरेषु शूरेषु, अग्रणीः अग्रे, अनुरागः इत्यर्थः यस्य तथाभूतः, भुजः बाहुः, असौ इति शेषः, त्वा भवन्तं, परिचरतु सेवताम्, त्वया सह युद्धमाचरतीति भावः, तथा चक्षुषी नयने, असौ इति शेषः, चिरं दीर्घकालं यावत्, नन्दतां च आनन्दमनुभवताञ्च। सग्धरा वृत्तम् ॥ ४० ॥

येनेति।—रावणस्य दशाननस्य, अभिभवेन आक्रमणेनेत्यर्थः, क्लान्ता म्लानता, पीडिता इत्यर्थः, इयम् अस्माकमाधारभूतेत्यर्थः, मही पृथ्वी, येन वीरेण शूरेण, गुप्तायां रक्षितायां, रावणाभिभवादिति शेषः, किष्किन्धायां तन्नाम्नानगर्याम्, अधिष्ठायेति शेषः, श्वस्तत् श्वततम्, उच्छ्वासं सुखनिश्वासमिति यावत्, लप्स्यतीति भावः, अश्नुते भजते, स एष महाबाहुः सङ्क्रन्दनसूनुरिति गर्भस्थवाक्येनान्वयः। अनुष्टुप् वृत्तम् ॥ ४१ ॥

बाली। (उपसृत्य)। रामभद्र!—

सुरासुराणामसुभिर्दीक्षितां सभिको मुनिः।
अद्य मे नारदस्तुष्टो येनासि भुजगेश्वरः॥ ४२॥

रामः। महावीर! किमुच्यते, मूर्धाभिषिक्तोऽसि समरशौण्डानाम् (न)। तथा हि—

देवः स त्वामसूत दिषदुपमृदितस्वर्वधूवेणिबन्ध-
प्रेक्षाधारालवैरप्रसृमरसमरोड्डामरीजा विडौजाः।
यो विद्धोत्खातबाणव्रणनिवहनिभं निर्भरोड्डङ्कुरभ्रू-
भीमः श्रीमद्भिरङ्कैरुदवहत रुषा रज्यदक्ष्णां सहस्रम्॥४३॥

सुरासुराणामिति।—असुभिः प्राणैः, दीक्षितां क्रीडितां, प्राणान् पणत्वेन निर्द्यूतक्रीडावत् युद्धं कुर्वतामिति भावः, सुरासुराणां देवदानवानां, सभिकः द्यूतकारकः, द्यूतक्रीडायां प्रवर्तक इत्यर्थः, द्यूताध्यक्ष इति यावत्, सभिकस्वरूप इति भावः, "सभिकाः द्यूतकारकाः" इत्यमरः; मुनिः नारदः, अद्य मे मम, तुष्टः प्रीतः, येन तोषेण, भुजगेश्वरः सदृक्षाद्रुपतिः, असि भवसि, त्वमिति शेषः, अनवद्यविक्रम नारदस्य प्रसादेनैव त्वं सदृक्षाद्रुमीश्वरोऽसि, अतः स त्वामयोः युद्धं दृष्ट्वा परितुष्यतीति भावः॥ ४२॥

(न) मूर्धाभिषिक्तः राजा। समरशौण्डानां संग्रामसक्तानां, संग्रामख्यातानां वा, "शौण्डो मत्तेऽपि विख्याते" इति मेदिनी।

देव इति।—दिषद्भिः असुभिः, असुरैरिति यावत्, उपमृदितस्य उत्पिष्टस्य, आकृष्टस्येत्यर्थः, स्वर्वधूनां सुरसुन्दरीणां, वेणिबन्धस्य कबरीरचनायाः, प्रेक्षया दर्शनेन, धारालं तीक्ष्णं, प्रसृमरमिति यावत्, यत् वैरं विद्वेषः, तेन प्रसृमरं प्रसारि, प्रसृमरमित्यर्थः, उड्डामरम् उत्कटम्, ओजः तेजः यस्य तथोक्तः, अत एव रुषा क्रोधेन, निर्भरम् अत्यर्थम्, उड्डुराभ्यां कुटिलाभ्यां, भ्रूभ्यां भ्रूदयेन, भीमः भीषणः, श्रीमद्भिः सुशोभने, अङ्कैः अवयवैः उपलक्षितः, यः, देव इति शेषः, आदौ विद्धा, पश्चात् उत्खाताः निष्कासिताः, ये बाणाः शराः, असुपर्युक्ता इति भावः, तेषां व्रणनिवहनिभं क्षतनिचयतुल्यं, रज्यत् रक्तीभवत्, अक्ष्णां नेत्राणां, सहस्रम् उदवहत दधार, स देवः विडौजाः इन्द्रः, "इन्द्रो मरुत्वान् मघवा विडौजाः पाकशासनः" इत्यमरः; त्वां अद्य हनुमानसि। अनघराघवम्॥ ४३॥

अपि च—

वन्दीकृत्य जगद्विजित्वरभुजस्तम्भावदुःसञ्चरं
रक्षोराजमपि त्वया विदधता सन्न्याममाधिव्रतम्।
प्रत्यक्षीकृतकार्त्तवीर्य्यचरितामुन्मुच्य रेवां समं
सर्वाभिर्महिषीभिरम्बुनिधयो विस्रेऽपि विस्मापिताः ॥४४॥

माली। (विहस्य)।—

चिराय रात्रिञ्चरवीरचक्र-
मारादवेक्षानिक! पश्यतस्त्वाम।

वन्दीकृत्येति।—त्वया जगता भुवनानां, भुवनत्रयस्येत्यर्थः, विजित्वरैः विजयिभिः, भुजस्तम्भैः स्तम्भसदृशसुदृढबाहुभिरित्यर्थः, दुःसञ्चरं सञ्चरत्वात्तं, ततो निःसर्तुमशक्तमिति यावत, यद्वा—स्तम्भसदृशसुदृढबाहुभिरेव, विग्रहिबाहुभिरिति यावत, दुःसञ्चरं दुर्ज्ञेयमित्यर्थः, विग्रहिबाहुभिरपि तव रक्षणदृष्ट्यात निर्गन्तुमशक्तमित्यर्थो वा, रक्षोराजमपि रावणमपि, का त्वया अनेकार्थत्वात्पि-शब्दार्थः, वन्दीकृत्य संयम्य, कारायाम् अवरुध्येति यावत, सन्न्यासमाधिव्रतं सान्ध्योपासनासमाधानलियमं, यद्वा—सन्न्यायां सान्ध्योपासनायां, यः समाधिः चित्तैकाग्र्यता, स एव व्रतः नियमः तं, विदधता आचरता सता, प्रत्यक्षीकृतम् अक्षिगोचरीकृतं, कार्त्तवीर्य्यस्य कार्त्तवीर्य्यार्जुनस्य, चरितम् आचरणं यया तथोक्ता, यथा तस्य सततं जलक्रीडनकारित्वात् तत्तीरे च तस्य राजधानीस्थितेरिति भावः, रेवा नर्मदा, "रेवा तु नर्मदा सोमोद्भवा मेखल(क)सुकन्यका" इत्यमरः; उन्मुच्य वेष्टयित्वा, रेवा विनेत्यर्थः, सर्वाभिः समस्ताभिः, महिषीभिः राज्ञीभिः, नदीभिरिति यावत, समुदाणां नदीपतित्वादिति भावः; समं सह, विस्रेऽपि सर्वेऽपि, चत्वारः सप्त वा इति भावः, अम्बुनिधयः समुद्राः, विस्मापिताः विस्मयं गमिताः, रेवां विहाय रावणस्य बन्धनं केनापि कदाऽपि न दृष्टं, चतुर्षु सप्तसु वा सागरेषु सन्ध्योपासनार्थमागतस्य बालिनः कक्षदेशे बन्दीभूतं रावणं दृष्ट्वा समहिषीकाः सर्वेऽपि समुद्राः विस्मयेन स्तब्धीभूता आसन्, केवलं रेवा तु पत्या समुद्रेण सहिताऽपि दुष्टकार्त्तवीर्य्यचरितत्वात न विस्मितेति भावः। पुरा जयाय समुपस्थितं रावणं कार्त्तवीर्य्यः सहस्रबाहुभिः निर्जित्य कारायां बबन्धेति पुराकथम्। मार्कण्डेयविक्रीडितं इतम॥ ४४॥

चिरायेति।—चिराय सततमिति यावत; "चिराय" इत्यस्य वक्ष्यमाण-पश्यतः

सुधासधर्माणमिमां च वाचं
न शृण्वतस्तृप्यति मानसं मे ॥ ४५ ॥

किन्तु—

येनाच्छिद्य ममस्तपार्थिवकुलप्राणान्तकं कार्मुकं
रामः सम्प्रति लम्भितो भृगुभुवामुत्सर्गसिद्धां सुचम्।
द्रष्टुं वीर! चिराय धाम भवतस्तद्भूर्भुवःस्वस्त्रयी-
हृन्मर्मव्रणरोपणौषधमिमौ बाहू बहूत्तास्यतः ॥ ४६ ॥

रामः। (सस्मितम्)—

नन्वेतदधिमौर्वीकं युद्धसर्वस्वदक्षिणम्।
सज्जमस्त्येव मे रक्षो लक्ष्मीमूलहरं धनुः ॥ ४७ ॥

इत्यनेनान्वयो वा, रात्रिञ्चरवीरचक्राणां राक्षसवीरसमूहानां, सारः सारणं, वध इत्यर्थः, अङ्ग चिह्नं यत्र तत्रोक्तौ, सङ्ग्रामे इत्यर्थः, वैशालिकः विशेषणपुण्यः तत्सम्बुद्धौ, यद्वा—रात्रिञ्चरवीरचक्राणां सारायाङ्गः आजिः, युद्धमित्यर्थः, "अङ्गो रूपकभेदागस्थिङ्गरेखाऽऽजिभूषणे" इति मेदिनी, तत्र वैशालिकः। राक्षसविनाशकयुद्धे विशेषाभिज्ञ। त्वा भवन्तं, चिराय दीर्घकालं व्याप्य इत्यर्थः, पश्यतः अवलोकयतः, अपीति शेषः, तथा सुधासधर्माणम् अमृतसदृशीम्, इमां त्वदभिधेयमालामित्यर्थः, वाचं वचनं, तवेति शेषः, शृण्वतः आकर्णयतः, अपीति अपीति शेषः, मे मम, मानसं मनः, न तृप्यति न सन्तुष्टं भवति, अतः पुनः पुनः तव दर्शनं तव वाक्यामृतस्यवचश्च कर्णमिच्छामीति भावः। उपजातिः वृत्तम् ॥ ४५ ॥

येनेति।—येन, द्वारा इति शेषः, समस्तस्य निखिलस्य, पार्थिवकुलस्य क्षत्रिय-वंशस्य, प्राणान्तकं जीवनापहारकं, कार्मुकं धनुः, भार्गवीयमिति भावः, आच्छिद्य आकृष्य, भार्गवत्वादिति शेषः, सम्प्रति अधुना रामः परशुरामः, भृगुभुवां भृगुवंश-समुत्पन्नानाम्, उत्सर्गसिद्धां स्वभावसिद्धां, सुचं यज्ञपात्रावशेषं, लम्भितः प्रापितः, तस्य लोप्त्रार्जनेति भावः, हे वीर! भवतः तव, तत् प्रसिद्धं, भूर्भुवःस्वस्त्रयाः भूर्भुवःस्व-र्लोक-त्रिलोक्या इत्यर्थः, हृन्मर्मणः हृदयरूपमर्मणः, यत् व्रणं क्षतं, तस्य रोपणौषधम् उपशमौषधस्वरूपं, त्रिलोकीव्याप्तिख्यापनमिति यावत्, धाम तेजः, द्रष्टुम् अवलोकयि-तुम्, इमौ प्रसारितौ एतौ, बाहू भुजौ, ममेति शेषः, चिराय बहु अत्यर्थं यथा तथा, उत्तास्यतः उत्सुकौ भवतः। शार्दूलविक्रीडितं वृत्तम् ॥ ४६ ॥

नन्विति।—नन्वयि भोः! अधिगता मया, आरोपिता इत्यर्थः, मौर्वी ज्या यत्र

तन्महाभागोऽपि शस्त्रमादत्ताम् (प)।

बाली। (विहस्य)। साधु भो महाक्षत्रिय! यथाधर्मम् (फ) अभिदधासि। किन्तु—

नयो हि साङ्ग्रामिक एष दोषतां
यदात्मजातिप्रतिबद्धमायुधम्।
अयःकृशीभिः कपयो न शस्त्रिणः
स्तलस्य मुष्टिस्य नखास्य सन्ति नः॥ ४८॥

खड्गः। आर्य! साधूक्तं महाभागेन, नित्योपनतस्वाङ्गशस्त्रैव तैरश्ची (ब) जातिः।

तथोक्तं, युद्धमेव सङ्ग्राम एव, सर्वस्वदक्षिणा यस्य तादृशं, रक्षसां निशाचराणां, लक्ष्म्याः श्रियाः, ऐश्वर्यस्येत्यर्थः, मूलं शिफाम, आदिकारणमित्यर्थः, हरति नाशयतीति तादृशं समूलराक्षसवंशविनाशनमित्यर्थः, मे मम, एतत् इदानीन्तनमित्यर्थः, धनुः चापं, सज्जं प्रस्तुतम, अस्त्येव विद्यते एव। अनुष्टुप् छन्दः॥ ४७॥

(प) महाभागः भाग्यवान्, भवानिति शेषः। आदत्तां गृह्णातु।

(फ) महाक्षत्रिय! क्षत्रियश्रेष्ठ! वीरधर्माभिज्ञ! इति यावत्। यथाधर्मं धर्मानुमोदितम्।

नय इति।—दोषतां बाहुलतां, भुजबलशालिनामित्यर्थः, "भुजबाहू प्रवेष्टो दोः स्यात्" इत्यमरः; एष हि अयमेव, वक्ष्यमाणप्रकार एवेत्यर्थः, साङ्ग्रामिकः सङ्ग्रामस्वत्वको, युद्धविषयक इत्यर्थः, नयः नीतिः, यत आयुधं अस्त्रम, आत्मजातिप्रतिबद्धम आत्मनः स्वस्य, जातिः जन्म, तेन प्रतिबद्धं सम्बद्धं, आत्मजन्मोपनिबद्धमित्यर्थः, स्वजातिप्रतिनियतमिति यावत्, यासां जातीनां यदस्त्रं परम्परागतं, तासामेव व्यवहरन्तीति निरुक्तेः, कपयः वानराः, अयःकृशीभिः लोहविकारैः, लोहमयफालैरित्यर्थः, "विकारस्त्वयसः 'कृशी" इत्यमरः, "कृशी फाले" इति मेदिनी च; न शस्त्रिणः न अस्त्रवन्तः, लोहमयं शस्त्रं लोहफालरूपं वा शस्त्रं न व्यवहरन्तीति भावः, नः अस्माकं, कपीनामिति यावत्, तलस्य चपेटस्य, "तलश्चपेटे तालश्च" इति रभसः, मुष्टिस्य बद्धपाणिस्य, सन्धोडिताङ्गुलिः पाणिरित्यर्थः, "मुष्टिर्बद्धौ करौ" इति मेदिनी, "सन्धोडिताङ्गुलिर्मुष्टिः" इति हलायुधश्च; नखास्य नखराश्च, सन्ति विद्यन्ते, लोहमयशस्त्रव्यवहारे अनभ्यस्ता वयं, तलमुष्ट्यादयः स्वाङ्गानि एव अस्माकम् अस्त्राणीति भावः॥ ४८॥

(ब) नित्येति।—नित्यं सततम, उपनतं समीपस्थं, सुखसत्वेनोपस्थितमित्यर्थः, स्वाङ्गमेव पाणितलाद्यवयव एव, शस्त्रम् आयुधं यस्याः तथाविधा। तैरश्ची पाशवी।

रामः। (विहस्य धनुरास्फालयन्)। अहह !!—

स्वर्विघ्नप्रसरेण रावणिरभो यत् दुर्यशोभागिनं
चक्रे गौतमशापयन्त्रितभुजस्थामानमाखण्डलम्।
कृत्वागर्त्तकुलीरतां गमयता वीर! त्वया रावणं
तत् सम्मृष्टमहो! विशल्यकरणी जागर्त्ति सत्पुत्रता ॥४९॥

सोऽपि त्वमस्माकमधुना दैवेन शरण्यीकृतो ऽसि। (भ)

बाली। (सरोषम्)। आः !! काकुत्स्थ!—

अस्माहोर्मूलकूलङ्कषविषमभुजग्रन्थिभङ्गप्रसङ्ग-
क्रोशल्लङ्केशदत्तत्रिभुवनविजयख्यातिसर्वस्वदायः।

स्वरिति।—अभो बुद्धिर्लोक्यत इति भावः, रावणिः रावणपुत्रो मेघनादः, स्वः स्वर्गे, विघ्नस्य प्रत्यूहस्य, पीडनात्मकस्येति यावत्, प्रसरेण विस्तारेण, स्वर्गे त्रिविष्टपीडीत्याहवेन, स्वर्गविजयेनेति यावत्, गौतमशापेन अहल्यासतीत्वनाशात् कृद्धगौतमाक्रोशेन, यन्त्रितं निरुद्धं, सञ्जनितं यावत्, भुजयोः बाह्वोः, स्थाम स्थैर्यं, बलमित्यर्थः यत् तथाभूतं, "द्रविणं तरःस्थैर्यबलौजांस्यपि स्थाम गुप्त च" इत्यमरः, पुरा अहल्याभिगतम् इन्द्रं गौतमः सङ्क्रामे तव बाहुबलं नक्षत्रतिति प्रशापेति पुराकृतम्; अ खण्डनम इन्द्रं यत दुर्यशोभागिनम अकीर्त्तिभाजं, निन्दाभाजनमित्यर्थः, पराजयकरणेनेति भावः, चक्रे कृतवान्, हे वीर। त्वया रावणं दशाननं, मेघनादजनकमिति यावत्, कृत्वा एव बाहुमूलमेव, गर्त्तः खड्गं, तव कुलीरता कर्कटता, बहुभुजत्वादिति भावः, गमयता प्रापयता सता, तत् दुर्यश., पितुरिति शेषः, सम्मृष्ट प्राञ्छितम्, अहो! आश्चर्यं, विशल्यं क्रियते अनयेति विशल्यकरणी दुःखहारिणीति यावत्, सत्पुत्रता सत्कृष्टपुत्रशालित्वमित्यर्थः, पितृभक्ततनयत्वता इति यावत्, जागर्त्ति प्रकाशते, त्वया पुत्रेण जगति सत्पुत्रताया दृष्टान्त उज्ज्वलीभवतीत्यर्थः, इन्द्रजिता पित्रा इन्द्रः जित इति दृष्ट्वा त्वं हर्षितं रावणं तथा कृत्वा जितवानिति तव सत्पुत्रत्वमिति भावः। आर्द्रूखविक्रीडितं वृत्तम् ॥ ४९ ॥

(भ) सोऽपि तथाभूतवीरप्रकाण्डः सत्पुत्रोऽपीत्यर्थः, दैवेन मम सौभाग्येन। शरण्यीकृतोऽसि अस्त्रीकृतोऽसि, शरैरेव प्रहर्त्तव्योऽसि इति यावत्।

अस्मादिति।—अस्माकं दोर्मूलं भुजामूलं, कक्षेत्यर्थः, तटमेव कूलं तटं, तत् कषति निर्गति, विदारयतीत्यर्थः तथोक्तः, यो विषमभुजग्रन्थः भीषणविग्रहबाहु-

यः कश्चिदिक्ष्वाकोर्यं म खलु करचुलिचत्रमाधारणत्वा-
दत्तमन्दायमानो विजितभृगुपतिं त्वामजित्वा दुनोति ॥ ५० ॥

तदेहि, विमर्दक्षमां भुवमवतरावः।

(इति निष्क्रान्तौ)।

गुहः। (जनतम)। दिष्ट्या फलितम् (म) अस्माकं मनोरथेन।

लक्ष्मणः। (नेपथ्याभिमुखमवलोक्य)। इदमन्यतो वानरहयमार्यस्य पार्ष्णिग्राहमिव सम्भ्रमादनुप्लवते; (य) तदहमपि धनुरारोपयामि।

रूपमुद्दृढबन्धनं, तस्य मङ्गप्रसङ्गेन भेदनव्यापारेण, कक्षमध्ये मोटयित्वा संयतीकृत्य व्यापनप्रयासेनेति यावत्, क्रोधता चौत्कार्यं कुर्वता, चण्डेशेन रावणेन, दत्तः समर्पितः, विभुवनविजयख्यातिरेव लोकत्रयवशीकरणरूपकीर्तिरेव, सर्वस्वं सर्वधनं, तस्य दायः दानं, देयं वस्तु इत्यर्थः यस्मै तथाविधः, "दायः सोद्गुढमाधवे। विभक्तव्यविभक्तव्ये तथा दत्त-दानयोः॥" इति मेदिनी, अयं चण्डेश्वरपराजयविषयक इति यावत्, यः कश्चित विक्रमः शौर्यं, मदीयः अस्तीति शेषः, स विक्रमः खलु नियमे, करचुलिचत्रमाधारणत्वात् करचुलिः कार्त्तवीर्यार्जुनबाहुविशेषः, स एव चत्रः चरित्रः करचुलिचत्रः, तद्वीर्यस्य कार्त्तवीर्यस्तदाख्यया प्रसिद्धः, तस्य साधारणत्वात् सामान्यात्, ममत्वात् इत्यर्थः, मया यथा रावणो जितः, तद्वत् कार्त्तवीर्योऽपि जित इति रावणावजये उभयोरेव साधारणत्वेन वैशिष्ट्याभावादिति भावः, अतः मनसि, मन्दायमानः मन्द मन्द आचरन्, तृच्छमिवात्मानं मन्यमान इति भावः, विजितभृगुपतिं भार्गवजेतारं, परशुरामविजयिनमित्यर्थः, त्वाम् भवन्तम्, अजित्वा अपराभूय, दुनोति तापयति, मामिति शेषः। शार्दूलविक्रीडितं वृत्तम् ॥ ५० ॥

(न) दिष्ट्या इति हर्षसूचकमव्ययं, "दिष्ट्या हर्षे मङ्गले च" इति मेदिनी। फलितं सिद्धम्।

(य) पार्ष्णिग्राहमिव जिगीषोः पश्चाद्देशस्थं विपक्षराजानमिव, अनुभावेन आर्यस्य पृष्ठानुधावीत्यर्थः, "पार्ष्णिग्राहस्तु पृष्ठतः" इत्यमरः। सम्भ्रमात् त्वरातिशयात्। अनुप्लवते अनुधावति, अनुप्लव अनुप्लव गच्छतीत्यर्थः।

गुहः। (दृष्ट्वा सहर्षम्)। कुमार! कुमार! अत्यावेगेन (र), नन्वयं सुग्रीवो रामभद्रगुणानुरागेण वालिमत्सरेण च द्विगुणितोत्साहः समरसीमानम् (ल) आपतति।

लक्ष्मणः। दिष्ट्या स एष वैकर्त्तनिः!! (व)। अथापरः कः?

गुहः। अयमपि किष्किन्धेश्वरस्कन्धावारैकवीरो (श) भगवतः प्रभञ्जनस्य पारक्लेणेयः (ष) पुत्रो हनूमान्।

लक्ष्मणः। (सहर्षम्)। कथमयममावाञ्जनेयः!! (स) अयं हि—

ब्रह्मशापपरिक्लिष्ट-स्ववीर्य्यज्ञानयन्त्रितः।
अन्यैरपि भुवं वीरैः कौर्य्यमाणामुपेक्षते॥ ५१॥

(र) आवेगेन सम्भ्रमेण, त्वरया वा, अत्र निष्प्रयोजनम्, अधिकत्वरायां न किमपि प्रयोजनमस्तीत्यर्थः, "आवेगस्तु त्वरा त्वरः" इति वाचस्पतिः।

(ल) वालिमत्सरेण वालिन प्रति विद्वेषेण, क्रोधेन वा, "मत्सरोऽन्यगुणद्वेषे" इत्यमरः, "मत्सरा मक्षिकायां स्यान्मात्सर्य्ये-क्रोधयोः पुमान्" इति मेदिनी च। द्विगुणितोत्साहः प्रबलाध्यवसायमयः सन् इत्यर्थः, वालिविनाशाय इति भावः। समरसीमानं युद्धवेलं, "सीमाऽऽघाटस्थितिवेलेष्वण्डकोषेऽपि च स्त्रियाम्" इति मेदिनी।

(व) वैकर्त्तनिः विकर्त्तनः सूर्य्यः, तस्य अपत्यं पुमान् वैकर्त्तनिः सुग्रीव इत्यर्थः।

(श) किष्किन्धेति।—किष्किन्धेश्वरस्य किष्किन्ध्याधिपतेः वालिनः, स्कन्धावारः सैन्यनिवेशः, राजधानी वा, तस्य एकवीरः मुख्यवीरः अद्वितीयवीरः, इत्यर्थः, "एके मुख्यान्यकेवलाः" इत्यमरः।

(ष) प्रभञ्जनस्य वायोः। पारक्लेणेयः परक्लो केसरिणः भार्य्यां अञ्जना, तस्यां जातः।

(स) आञ्जनेयः अञ्जनातनयः, हनूमान् इत्यर्थः।

ब्रह्मशापेति।—ब्रह्मणः विधातुः, शापेन, पुरा हनूमतः बाल्यातिशयं दृष्ट्वा समुद्विग्नो ब्रह्मा अनेन बाल्येनायं सृष्टं संहरेदित्याशङ्कमानः तं "स्वतस्ते पराक्रमज्ञान न भवेत्" इति शशापेति पुराणम्; परिक्लिष्टं दुर्बलं, व्याहतमित्यर्थः यावत्, यत् स्ववीर्य्य-ज्ञानं निजशक्तिबोधः, तेन यन्त्रितः अवरुद्धः सन्, अन्यैरपि अपरैरपि, शापेनेत्यर्थः

नियतमनेन सख्या हृदयशल्यम्(ह)अस्माकमुद्धरिष्यते। इदं तु वर्त्तमानमेकतुलायुद्धम् (क) आर्य्यस्य ; जयलक्ष्मीपरिग्रहयौतके यशसि वयमयं वा सुग्रीवो वा न केचिदग्राधिकारिणः। (ख)

गुहः। (सक्रोधम्)। कुमार! पश्य पश्य—

सप्त तालानयं भित्त्वा बालिप्रहरणीकृतान्।
हत्वा च बालिनं बाणो रामतूणीरमागतः॥ ५२॥

अहह!! (ग)—

प्राणैः समं कनकपुष्करकण्ठमाला-
सूत्रेण दाशरथये विहितातिथेयः।

हीनेरयोति भाव., वीरैः शूरैः., क्रीयमाणा घूर्यमाणाम्, आकुलीक्रियमाणामित्यर्थः, भुवं पृथिवीम्, उपेक्षते दृष्टाऽपि न पश्यतीत्यर्थः। अनुष्टुप् छन्दम्॥ ५१॥

(ह) नियतं निश्चितम। सख्या मित्रेण, हनूमतेति शेषः, यद्वा—सख्युः सहायेन,"सखा मित्र सहाययोः" इति विश्वः। हृदयशल्यम् अन्तःकरणे शल्यवेधजपीडेव पीडा।

(क) एकतुलायुद्धम् एका अभिन्ना, तुलाः तोलनदण्डः, तुलदण्डवत् परस्पर-समानमित्यर्थः, तया युद्धं सङ्ग्रामः, तुल्यबोधी वा. द्वयोरेवान्योऽन्य धर्मयुद्धमित्यर्थः, नाव कस्यचित् साहाय्यावसर इति भावः।

(ख) जयेति।—जयलक्ष्म्याः विजयश्रियाः, परिग्रहः ग्रहणं, पाणिग्रहणमित्यर्थः, तत्र यत् यौतकं कन्यादानकाले श्वशुरादिभिः, भौतैः लाभार्थं दीयमानं धनं, परिग्रह-स्तस्य धनमिति यावत् तस्मिन्, तत्स्वरूपे इत्यर्थः, यशसि कीर्त्तौ, यश एवात्र विजय-लक्ष्मीपरिग्रहे यौतकमिति भावः। अग्राधिकारिणः अग्रभागिनः, "विद्याप्राप्तं श्रोत्र्यधनं यच्च सौदायिकं भवेत्। मैत्रमौद्वाहिकञ्चैव दायादानां न तत् भवेत्॥" इति वचनेन परिग्रहलक्ष्म्यभाविभाव्यत्वप्रतिपादनादिति भावः।

सप्तेति।—अयम् एषः, पुरतः यस्य कार्य्ये परिदृश्यते स इत्यर्थः, बाणः शरः, रामप्रहित इति शेषः, बालिना प्रहरणीकृतान् अस्त्रीकृतान्, अस्त्ररूपेण व्यवहृता-नित्यर्थः, युगपत् रामं प्रति प्रहरणार्थं प्रक्षिप्तानिति यावत्, सप्त सप्तसङ्ख्यकान्, तालान् तालवृक्षान्, भित्त्वा विदार्य्य, बालिनं हत्वा विनाश्य च, रामस्य तूणीरं बाणाधारम्, आगतः प्रविष्ट इत्यर्थः। अनुष्टुप् छन्दम्॥ ५२॥

(ग) अहह!! खेदे।

दिक्कूलमुद्दहयशःसरिदादिशैलः
श्वेते स वीरशयने क्वचिदक्षवर्त्ती ॥ ५३ ॥

लक्ष्मणः। (सखेदम्)। हा देव सङ्क्रन्दन! क्व पुनरीदृशं महावीरप्रकाण्डम् (घ) आत्मजं सहस्रेणापि लोचनैरालोकयिष्यसि?

(नेपथ्ये दुन्दुभिध्वनिर्मङ्गलगीतिश्च)।

गुहः। (सहर्षम्)। कथमयमार्य्यजाम्बवदभिमन्त्रितैः शातकुम्भकलशैर्नीलः (ङ) कुमारसुग्रीवमभिषिञ्चति। स्वयं चास्य देवो दाशरथिः कार्त्तस्वरपुण्डरीकमालया (च) कण्ठमालङ्करोति।

लक्ष्मणः। प्रियतरं नः।

(नेपथ्ये)।

भो भो वानराच्छभल्लगोलाङ्गूलयूथपतयः! (छ) सर्वानेष

प्राचेरिति।—दिशेव कूलं तीरं दिक्कूलं, तत् उद्दहति धारयतीति दिक्कूलमुद्दहा, यद्वा—दिशां कूलं तट, प्रान्तमित्यर्थः, उद्दहति प्रवहति, तत्र प्रसरतीति यावत् तादृशी दिगन्तव्यापिनी, या यशः कीर्त्तिरेव, सरित् नदी, तस्याः आदिशैलः प्रभवपर्वतः, यद्वा पर्वतः नद्याः प्रभवः, तद्वा दिग्व्यापिनः यशसः प्रभवस्वरूपमिति भावः, स वीरशयने प्रसिद्धः, क्वचिदक्षवर्त्ती वानरराजः, वाल्मीयर्थः, प्राचेः अगस्तेः, प्राचवायुभिरित्यर्थः, सम्यं सद्यः, कनकपुष्करकण्ठनालास्त्रेण काञ्चनकमलनालकण्ठभूषणदाक्षा, दाशरथये दशरथापत्याय रामाय, विहितं कृतम्, आतिथेयम् आतिथिसत्कारो येन तथाभूतः सन्, वीरशयने वीरशय्यायां, रणभूमौ इति भावः, श्वेते शयानस्थिष्यति, रामेण निहतः इति भावः। वसन्ततिलकं वृत्तम् ॥ ५३ ॥

(घ) सङ्क्रन्दन! इन्द्र! महावीरप्रकाण्डं महावीरेषु शूरोत्तमेषु, प्रकाण्डं प्रथमं, श्रेष्ठमित्यर्थः, वीरश्रेष्ठेष्वपि श्रेष्ठतममिति यावत्, "मतल्लिका मचर्चिका प्रकाण्डमुद्दतल्लजौ। प्रशस्यवाचकाश्चमूनि" इत्यमरः।

(ङ) अभिमन्त्रितैः मन्त्रपूतैः। शातकुम्भकलशैः काञ्चनकुम्भैः। नीलः खनामप्रसिद्धः वानरराजानार्थविशेषः।

(च) कार्त्तस्वरपुण्डरीकमालया काञ्चनमयपद्ममालया।

(छ) वानरः प्रसिद्धः, भल्लभल्लः भल्लुकः, "पद भल्लुके" इत्यमरः। गोलाङ्गूल-

वो महाराजः सुग्रीवः ममाज्ञापयति—"मज्जन्तु भवन्तः सर्वाणि यौवराज्योपकरणानि । अयमहं सीतादेव्याः प्रवृत्तिम् (ज) अन्वेष्टुं प्रहित्य (झ) हनूमन्तमूर्ध्वमौहूर्त्तिके लग्ने कुमारमङ्गदमभिषेक्ष्यामि" (ञ) इति ।

लक्ष्मणः ।—

उत्सवः सोऽयमस्माकं सर्वथा हृदयङ्गमः ।
किन्तु बालो विलीनोऽयं व्यथयिष्यति वासवम् ॥ ५४ ॥

(अनन्तरं पुष्पाञ्जलिं क्षिपति) । जय जय जगत्पते रामभद्र !—

लक्ष्म्या बालिनिवर्हणप्रशमितद्वैराज्यवैराग्यया
किष्किन्ध्यायतनैकदैवतमयं तारापतिर्दीप्यते ।

भालूकाः ॥" इत्यमरः ; नीलाङ्गूलः लाङ्गूलविशिष्टवानरविशेषः, तेषां यूथपतयः । सजातीयप्रधानानि । अधिपतय इत्यर्थः । सज्जन्तु सज्जीकुर्वन्तु इत्यर्थः ।

(ज) प्रज्ञप्तं वार्त्तां ।

(झ) प्रहित्य प्रेष्य ।

(ञ) ऊर्ध्वमौहूर्त्तिके मुहूर्तात् दक्षरयात्, (४८ मिः) ऊर्ध्वं ऊर्ध्वमौहूर्त्तिकं तस्मिन्, लग्ने राशिविशेषे उदये, शुभसमये इति भावः, "राशीनामुदयो लग्नम्" इत्यमरः । अभिषेक्ष्यामि अभिषिक्तं करिष्यामि, यौवराज्ये इति शेषः ।

उत्सव इति ।—अयम् आहूताख्यानः, यः परिकल्पितः, उत्सवः, हर्षजनकव्यापारः, अङ्गदयौवराज्याभिषेक इति भावः, अस्माकं सर्वथा सर्वैः प्रकारैः हृदयङ्गमः मनोरमः, किन्तु विलीनः विलयं गतः, विनष्ट इत्यर्थः, अयं बाली वानराधिपतिः, वासवम् इन्द्रं, व्यथयिष्यति सन्तापयिष्यति, स्वसरजनितशोकेनेति भावः । अनुष्टुप् छन्दः ॥ ५४ ॥

लक्ष्म्येति ।—बालिनः निवर्हणेन वधेन, विनाशेनेत्यर्थः, "प्रमापणं निवर्हणं निधनं विनाशनम् । आखण्डलविष्णुविधु-बालोन्मादवधा अपि ॥" इत्यमरः ; प्रशमितम् अपनीतं, वैराज्येन राजहत्यजनेन, बालि-सुग्रीवयोरिति भावः, वैराग्यं विरागः, एकस्मिन् सुग्रीवेतरस्मादिति भावः, यया तथाभूतया, लक्ष्म्या राजश्रिया, किष्किन्धा वानरराजधानी एव आयतनं स्थानं, तस्य एकम् आद्यं च, दैवतम् अधिष्ठातृदेवः, अधिपतिरित्यर्थः, अयं भवतो निवहेन परिवर्धित एवः, तारापतिः तारानामिकायाः

नप्तारं युवराजमङ्कदमपि श्रुत्वाऽतिहर्षादभू-
दस्राभ्रःपृषतौघमौक्तिकमयो गुम्फः सहस्रेक्षणः ॥ ५५ ॥

सख्यः। प्रियात् प्रियतरं नः। वयस्य गुह! तदेहि, आवामपि महोत्सवसंविभागिनौ (ट) भवावः।

(इति निष्क्रान्तौ)।

इति सुग्रीवाभिषेको नाम पञ्चमोऽङ्कः।

षष्ठोऽङ्कः।

(ततः प्रविशति माल्यवान्)।

माल्यवान्। (सर्वतोऽवलोक्य सखेदम्)। अहह कष्टम्!—

दग्धाः प्रदीप्तपावकपरिचयपिशुनस्य हेमवेश्मानः।
क्षणमुत्पुच्छ्यमाने हनुमति लङ्कापुरोद्देशाः ॥ १ ॥

बालिपत्न्याः हितोयो भर्ता इत्यर्थः, सुग्रीव इति यावत्, दीप्यते राजते, सहस्राक्षः इन्द्रः अपि, नप्तारं पौत्रम्, अङ्गदं बालिपुत्रं, युवराजं यौवराज्ये अभिषिक्तं, श्रुत्वा आकर्ण्य, अतिहर्षात् आनन्दाधिक्यात्, अस्राभ्राणि अश्रुजलानि, तेषां पृषतौघाः बिन्दुसमूहाः एव, "पृषत्ति बिन्दु-पृषताः" इत्यमरः; मौक्तिकानि मुक्ताफलानि, तन्मयः तदात्मकः, गुम्फः यत्नतनम्, आनन्दाश्रुरूपमुक्ताखचितशरीर इति भावः, अभूत्। शार्दूल-विक्रीडितं वृत्तम् ॥ ५५ ॥

(ट) महोत्सवसंविभागिनौ महोत्सवस्य आनन्दजनकानुष्ठानस्य, संविभागिनौ अंशहारिणौ।

इति श्रीगोविन्दविद्यासागर-भट्टाचार्येण कृता
अनर्घराघवपञ्चमाङ्कव्याख्या समाप्ता।

दग्धा इति।—हनुमति पवनकुमारे, क्षणं क्षणकालमात्रम्, उत्पुच्छ्यमाने पुच्छं आकृष्य ऊर्ध्वं क्रियमाणे सति, आकृष्टोर्ध्वीकृते सतीत्यर्थः, लङ्कापुरोद्देशाः लङ्कानगरीस्थ-प्रदेशाः, प्रदीप्तस्य प्रज्वलितस्य, पावकस्य अग्नेः, परिचयेन सङ्गेनेत यावत्, पिशु-

अपि च—

निजकिरणौघप्रमुषितनिस्त्रोत्रतरूपकर्मभेदेषु।
मणिभवनेषु क्षणानुज्ज्वालाः फलतोऽनुमीयन्ते ॥ २ ॥

(विमृश्य)। अहो! दुर्निवारता भवितव्यतायाः,—

दोःसन्दोहवशंवदत्रिभुवनश्रीगर्वसर्वङ्कषः
कैलासोद्धरणप्रचण्डचरितो वीरः कुबेरानुजः।
यत्रायं स्वयमस्ति सेयममरावत्याऽपि वन्द्या पुरी
नीता मर्कटकेन कामपि दशां धिग्दैवमावश्यकम् ॥ ३ ॥

क्षाणि प्रक्षोभूतानि, इमवेश्मानि काञ्चनगृहाणि येषु तथाभूताः सन्तः, अग्निसन्तापेन स्वर्णानां द्रवीभावादिति भावः, दग्धाः भस्मीभूताः, बभूवुरिति शेषः। आर्या छन्दसम् ॥ १ ॥

निजेति।—निजकिरणौघेन स्वमयूखनिचयेन, प्रकर्षेण मुषिता अत्यर्थम् अपहृताः, एकाकारता प्रापिता इति भावः, निस्त्रोत्रतरूपाः अपकृष्टोत्कृष्टरूपाः, कर्मभेदाः शिल्पविशेषाः येषां तथाविधेषु, मणिभवनेषु रत्नमयगृहेषु, क्षणानुज्ज्वालाः, आग्नेयिकाः, फलतः फलेन, दाहादिकार्यादिति भावः, अनुमीयन्ते लक्ष्यन्ते, मणिप्रभया अभिभवात् शिल्पोत्कर्षापकर्षाः न लक्ष्यन्ते, परम् अग्निदाहस्तत्कार्यध्वंसेन अनुमीयते इति भावः। आर्या छन्दसम् ॥ २ ॥

दोःसन्दोहेति।—दोषां भुजानां, विंशतिसङ्ख्यकानामिति यावत्, सन्दोहेन समूहेन, वशंवदायाः, वशं गतायाः, वशीभूतायाः इत्यर्थः, त्रिभुवनश्रियाः जगत्त्रयस्य लक्ष्म्याः, गर्वस्य अहङ्कारस्य, सर्वं समस्तं, कषति निकषति तथोक्तः, बाहुबलेन भुवनत्रयस्थान् सर्वान् राज्ञो विजित्य तत्तद्वैभवलक्ष्म्याः अपहरणेन गर्वपूर्णकारीत्यर्थः, कैलासस्य तदाख्यपर्वतस्य, उद्धरणे उत्पाटने, प्रचण्डं दुर्धर्षं, एतावान्विक्रमोऽस्यार्थः, चरितम् आचरणं यस्य तथाभूतः, कैलासोद्धरणेन प्रकटितदुर्धर्षत्वेन इत्यर्थः, कुबेरस्य यक्षेश्वरस्य, अनुजः कनीयान्, अयं पूर्वोक्तरूपप्रतापसम्पन्न इत्यर्थः, वीरः विक्रमी, रावणः इति शेषः, यत्र यस्यां पुर्यां, स्वयम् आत्मना, अस्ति अधिवसति, अमरावत्या अपि इन्द्रपुर्याः (अप्सरसः) अपि, वन्द्या स्तोतव्या, शोभाधिक्यात् प्रशंसनीया इति यावत्, सा सुप्रसिद्धा, इयम् एषा, पुरी लङ्कानगरी, मर्कटकेन चुटेन वानरेण क्षुद्रेण इति यावत्, कामपि अवाच्यां, भाषणीयामिति भावः, दशाम् अवस्थां, नीता प्रापिता,

न किञ्चिदेतद्धा रावणदुर्णयेन (क)। (सखेदमाकाशे)। आः पौलस्त्य !—

विधाश्चतुर्दश चतुषु निजाननेषु
सम्बाधदुःस्थितवतोरवलोक्य वेधाः ।
ताभ्योऽपराणि नियतं दश ते मुखानि
स्वस्य प्रणेतुरकरोत् स कथं जड़ोऽसि !! ॥ ४ ॥

(सखं च ज्ञात्वा सव्यथम्)। कथमेवं विग्रोष्यतीव (ख) नः कुलमिदम् !!—

आवश्यकम् अवश्यमाश्रयम्, अवश्यमावि इत्यर्थः, वद्धा—न वध्यं वधीकरणार्हम् अवध्यम् अवध्यवधीकरणम्, अवश्यमेव इति आवश्यकम् अनायासनिश्चयः, अप्रतिविधेयमिति यावत्, दैवं भाग्यं, प्रतिकूलमिति शेषः, धिक् निन्दामीत्यर्थः, एतादृशरभसोद्यस्य वस्तुनोऽकाण्डे वैपरीत्यकरणादिति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ ३ ॥

(क) रावणेति।—रावणस्य दशाननस्य, दुर्णयेन दुराचारेण, नीतिविगर्हितावरणेनेत्यर्थः, एतत् लङ्कानगरं, तत्स्थं वस्तुजातं वा इत्यर्थः, किञ्चित् किमपि, न, क्षास्यतीति शेषः, एषा पुरी यथा विनष्टा, तथा सर्वमेव विनङ्क्ष्यतीति भावः।

विधा इति।—वेधाः ब्रह्मा, चतुर्षु चतुःसङ्ख्यकेषु, निजाननेषु निजमुखेषु, चतुर्दश विद्याः "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ॥" "शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा। छन्दसा विचितिश्चैव षड़ङ्गो वेद उच्यते ॥" इति पुराणोक्ताः चतुर्दशविधा विद्याः, सम्बाधेन सङ्कटावस्थानेन, दुःस्थितवतीः क्लेशेन स्थिताः, अवलोक्य दृष्ट्वा, चतुर्षु मुखेषु चतुर्दशविद्याया अवस्थानस्य अतीव क्लेशावहत्वं विविच्येत्यर्थः, ताभ्यः विद्याभ्यः, विद्यासमुत्पादनेनावस्थानार्थमित्यर्थः, तादर्थ्ये चतुर्थी, स्वस्य प्रभोः प्रणेतुश्च, ते तव, अपराणि चतुर्भ्यः अतिरिक्तानि, दश दशसङ्ख्याकानि मुखानि वदनानि, नियतं निश्चितं, निर्द्धारितमित्यर्थः, अकरोत् कृतवान्, सः चतुर्दशविद्याऽभिज्ञः, त्वमिति शेषः, कथं केन प्रकारेण, जड़ः अज्ञः, मूर्ख इत्यर्थः, सदसद्विवेकविमूढ इति यावत्, "जड़ोऽज्ञे" इत्यमरः; असि ? भवसि ? चतुर्दशविद्याऽभिज्ञस्य सुपण्डितस्य ते एतादृशी दुर्नीतिपरायणता न युज्यते इति भावः। वसन्ततिलकं वृत्तम् ॥ ४ ॥

(ख) विग्रोष्यतीव नष्टप्रायमेव। नः अस्माकम्। कुलं वंशः।

खरादीनबधीत् रामो वत्समत्तं च मारुतिः।
स्वयं निष्क्रामयामास दशास्यश्च विभीषणम् ॥ ५ ॥

अलं वा दुर्विहितमतीतमुपालभ्य, (ग) सम्प्रति सिन्धोः उदीचि (घ) तीरे निवेशितस्कन्धावारो (ङ) दाशरथिः किमारभ्य (च) इति कथं प्रतीमः? (छ) (पुरो दृश्य)। कथं राघवचरितानि चरितुं प्रहितयोः शुक-सारणयोः (ज) सारणः।

(प्रविश्य)।

सारणः। जयतु जयतु कनिष्ठमातामहः। (झ)

माल्यवान्। (अभिनन्द्य समीपमुपवेश्य च)। वत्स सारण! कच्चिदमुनैव पथेन सुग्रीवकटकात् (ञ) आगतोऽसि?

खरादीनिति।—रामः दाशरथिः, खरादीन् खरदूषणप्रभृतीन् राक्षसान्, मारुतिश्च पवनात्मजः हनूमान्, वत्सं शिशुं, क्षेत्रमालवमित्यर्थः, पुत्रकल्पमिति यावत्, अक्षं तदाख्यं रावणकुमारम्, अवधीत् विनाशयामास; दशास्यश्च दशमुखो रावणश्च, स्वयम् आत्मनैव, यद्वा—स्वयं साक्षात् दशास्यश्च, विभीषणं कनीयांसं भ्रातरं, निष्क्रामयामास दूरीचकार, खड्गानगरीत इति शेषः। अनुष्टुप् छन्दसम् ॥ ५ ॥

(ग) दुर्विहितम् अनौचित्येन आचरितं, दुष्टाचरणमित्यर्थः। अतीतं गतम्। उपालभ्य तिरस्कृत्य। अलं व्यर्थम्, उपालम्भेन इदानीं न किमपि फलं सेत्स्यतीत्यर्थः।

(घ) सिन्धोः समुद्रस्य, उदीचि उत्तरे।

(ङ) निवेशितेति।—निवेशितः स्थापितः, स्कन्धावारः सेना, सेनानिवासो वा, शिविर इति यावत्, येन तथोक्तः।

(च) किमारभ्य किमाचारः, कीदृशीदृशीयोगः इत्यर्थः, किं कर्तुं प्रवृत्त इति भावः।

(छ) प्रतीमः जानीमः।

(ज) चरितुं विज्ञातुमित्यर्थः। प्रहितयोः प्रेरितयोः। शुक-सारणयोः तदाख्ययोः रावणचरयोः दूतयोः राक्षसयोः।

(झ) कनिष्ठमातामहः रावणजनन्याः कैकस्याः पितृव्यत्वात् माल्यवतः कनिष्ठमातामहत्वं बोद्धव्यम्।

(ञ) कच्चिदिति प्रश्नार्थकमव्ययं, "कच्चित् स्यात्प्रश्नहर्षयोः। प्रश्ने हर्षे मङ्गले

सारथः। अथ किम्।

माल्यवान्। तत् यथाऽनुभवमभिधीयतां तावत्। (ट)

सारथः। सार-सङ्ख्यं वनौकसाम् (ठ) अस्मन्मुखेनैव शतशः प्रतीते मातामहेन अवमुक्ता। (ड) अधुना तु सेतुग्रथनाय (ढ) मिलितेषु वानरसैनिकेषु वानरमूर्त्तिधरोऽप्यहं महाराज-विभीषणेन—(ण) (इत्यर्द्धोक्ते सभयम्)। आर्य्ये! चिरसंवासेन रामराजधानीप्रवादो (त) मामनुबध्नाति (थ)।

माल्यवान्। (साकूतम्)। किमभिषिक्तः कनिष्ठवत्सो (द) राघवेण?

ण" इति मेदिनी। अमुनैव पदेन कुत्रचित् विमानमक्तलेव इति भावः। सुवेल-घटकात् सुवेलस्य शिबिरात्, सुवेलस्य सेनासन्निवेशस्थानादित्यर्थो वा।

(ट) यथाऽनुभवम् अनुभवमनतिक्रम्य, यत् यत् अनुभूतं दृष्टं विदितञ्च, तत् सर्वमित्यर्थः।

(ठ) सार-सङ्ख्यं सारः बलं, "सारो बले स्थिरांशे च" इत्यमरः; सङ्ख्या एकत्वादिगणना ते। वनौकसां वानराणाम्।

(ड) शतशः शतं शतं वारानित्यर्थः। प्रतीते ज्ञाते। पूर्वमस्माभिः बहून् वारान् युद्धे, मातामहेन च ज्ञातमिति भावः। अवमुक्ता अत एव बहुशः पूर्व-मुक्तस्य पुनरावृत्तेः किमपि प्रयोजनं नास्तीत्यर्थः।

(ढ) सेतुग्रथनाय सेतुबन्धनाय।

(ण) महाराजविभीषणेनेति।—रावणे वर्त्तमाने, विशेषतः अनुभिः ज्ञात-सत्त्वानं विभीषणं प्रति महाराजशब्दप्रयोगात् मयमिति भावः।

(त) चिरसंवासेन दीर्घकालसहवासेन, वानरसैनिकेषु भेदप्रयोगार्थमिति भावः। रामेति।—रामस्य राजधानी घटकः, समुद्रतीरस्थसेनासन्निवेशप्रदेश इति यावत्, "घटकोऽस्त्री नितम्बोऽद्रेर्दलिनां दलमण्डने। सामुद्रलवणे राजधानी-बलयोरपि॥" इति मेदिनी; तस्य प्रवादः प्रसिद्धिः; तत्र सर्वेऽपि विभीषणं महाराजेति व्यपदिशन्ति, मयाऽपि तदभ्युपगमिति भावः।

(थ) अनुबध्नाति अनुसरति।

(द) कनिष्ठवत्सः कनिष्ठसहोदरः, विभीषण इत्यर्थः।

सारथः। अथ किम्।

माल्यवान्। (क्षणमिव स्तब्धं (ध) स्थित्वा निःश्वस्य)। वत्स! निःशङ्कमभिधेहि।

सारथः। कुमारविभीषणेन ज्ञात्वा संयम्य (न) चाहं रामस्य दर्शितः।

माल्यवान्। (साम्रहम्)। ततस्ततः?

सारथः। ततश्च राघवेण निजसचिवनिर्विशेषमुपगूह्य (प) पुरस्कृत्य च प्रहितोऽस्मि।

माल्यवान्। (सहर्षम्)। किमुच्यते, यावद्द्रव्यभावी गुणो हि विजिगीषूणामुदात्तता; (फ) विशेषेण पुनरयं रामभद्रः। यतः,—

अभेदेनोपास्ते कुमुदमुदरे वा स्थितवतो
विपच्चादभ्योजादुपगतवतो वा मधुलिहः।

(ध) क्षणमिव इत्यत्र इव शब्दश्च स्तब्ध-शब्देनान्वयः, स्तब्धमिव निश्चलवत् जड़वत् वा, किं-कर्त्तव्यविमूढ़ इवेति भावः।

(न) संयम्य बद्धा।

(प) निर्जेति।—निजसचिवेभ्यः आत्मनः अमात्येभ्यः, सुग्रीवादिभ्य इति यावत, नास्ति विशेषः पार्थक्यं यत्र तत् यथा तथा, उपगूह्य स्वसमीपं नीत्वा, निजसचिववत् समादरेण गृहीत्वा इत्यर्थः।

(फ) यावदिति।—विजिगीषूणां जयेच्छूनां, महावीराणामिति यावत्, उदात्तता दया-त्यागादिमत्ता, दयालुता दानशीलता वेत्यर्थः, "उदात्तस्तु स्वरान्तरे। दया-त्यागादिसम्पन्ने" इति मेदिनी; यद्वा—उदात्तता महत्त्वम्, "उदात्तो दातृ-महतोः" इति हैमः; गुणः यावद्द्रव्यभावी यावत् यत्काखपर्य्यन्तं, द्रव्यं गुणस्य आश्रयः, भवति वर्त्तते इति तथाभूतः, आश्रयश्च आ-जन्मभावीत्यर्थः, यावदेव द्रव्यं गुणस्य तत्परिमित इति भावः, "द्रव्यं भव्ये गुणाश्रये" इत्यमरः।

अभेदेनेति।—कुमुदं कैरवम्, उदरे खाभ्यन्तरे, स्थितवतः स्थितान् वा, विपच्चात् अम्भोः, अम्भोजात् पद्मात्, उपगतवतो वा उपगतान् वा, मधुलिहः भ्रमरान्, अभेदेन अविशेषेण, समभावेनेत्यर्थः, उपास्ते परिचरति, आश्रयं ददातीत्यर्थः,

अपर्य्याप्तः कोऽपि स्व-परपरिचर्य्यापरिचय-
प्रबन्धः साधूनामयमनभिसन्धानमधुरः ॥ ६ ॥

अथ शुकः किमासीत् ? (ब)

सारणः। अहमपि न जानामि।

माल्यवान्। (विमृश्य)। वत्सविभीषणस्य रामोपश्लेषेण स्वकुल्यं व्यसनमिति प्रमुग्धोऽस्मि। (भ)

सारणः। आर्य्य! तथा धर्मवृत्तिरार्य्यसन्तानश्च कुमारः (म) कथं ज्यायांसं भ्रातरमवधूय प्रतिपक्षवर्त्ती (य) संवृत्तः ?

माल्यवान्। वत्स! दशग्रीवं पृच्छ। (निःश्वस्य)। अथवा दैवम्। (र)

साधूना सदृताम्, अनभिसन्धानमधुरः अनभिसन्धानेन कपटताविरहितेन, उद्देश्यशून्येन वा, उपकारानुपकारपर्य्यालोचनविरहेण इति यावत्, अकृत्रिमेण हेतुनेति भावः, मधुरः मनोहरः, कोऽपि वचनातीत इत्यर्थः, अयम् एषः, रामभद्रे परिदृश्यमान इति भावः, स्व-परपरिचर्य्यापरिचयप्रबन्धः आत्म-परभेदपरिचयानुसरणमित्यर्थः, अपर्य्याप्तः समधिक इत्यर्थः, यद्वा—अपर्य्याप्तः पर्य्याप्तः न, अधिको नेत्यर्थः, यतः साधूनामयं प्रबन्धः स्वाभाविक एवेति भावः, यद्वा—साधूनामनभिसन्धानमधुरः अत एव अपर्य्याप्तः नास्ति पर्य्याप्तः यस्मात् तथाभूतः अतीव पर्य्याप्तः, अपरिमित इत्यर्थः, अयं स्व परपरिचर्य्यापरिचयप्रबन्धः कोऽपि वर्णनातीत इत्यर्थः, वाचा प्रकाशायोग्य इति यावत्, भवतीति शेषः, अयं रामभद्रः पुनः विशेषेण एवं-गुणसम्पन्न इति गद्यस्थवाक्यमाकृत्य अन्वयः कार्य्यः। शिखरिणी वृत्तम् ॥ ६ ॥

(ब) शुकः सारणेन सह प्रेरितः अपरश्वरः। किं कृतवान्, आसीत् ? अवर्त्तत ? इत्यर्थः, यद्वा—किम् आसीत् ? अकरोदित्यर्थः ; यद्वा—आसीत् इत्यत्र तत्र इति शेषः, तत्रैव किमासीत् ? इत्यर्थः।

(भ) रामोपश्लेषेण रामाश्रयेण हेतुना। स्वकुल्यं निजकुलसम्बन्धीत्यर्थः। व्यसनं विपत्। प्रमुग्धोऽस्मि विमूढोऽस्मि, कर्त्तव्याकर्त्तव्यविचारणाच्चभोऽस्मीत्यर्थः।

(म) धर्मवृत्तिः धर्मनिष्ठः। आर्य्यसन्तानः सदाकुलीनश्च, "सदाकुलकुलीनार्य्य-साध्वसज्जनसाधवः" इत्यमरः। कुमारः विभीषणः।

(य) ज्यायांसं ज्यष्ठम्। अवधूय परित्यज्य। प्रतिपक्षवर्त्ती शत्रुपक्षाश्रयी।

(र) 'दशग्रीवं पृच्छ' इत्युक्त्या माल्यवत एवमभिप्रायो गम्यते यत्, रावणस्यैवावि-

सारथः। आर्य्य! यदि श्रवणार्होऽस्मि तदा निवेदय।

माल्यवान्। वत्स! केसरिकलत्रसम्भवेन प्रभञ्जनसूनुना (ख) विलुण्ठितामशोकवनिकामवलोक्य राजा तवायं (ग) विभीषणमवोचत्, यथा—"वत्स! पश्य, मनुष्यपोतद्वयावष्टम्भेन (घ) दुरात्मना कपिकोटेन कथं विजृम्भितम्" (ङ) इति।

सारथः। ततस्ततः?

माल्यवान्। ततो विभीषणः प्रणम्य व्यजिज्ञपत्, "देव!—

जातिं मानय मानुषीमभिमुखो दृष्टस्त्वया हैहयः
स्मृत्वा बालिभुजौ न साम्प्रतमवज्ञातुञ्च ते वानराः।
तत् पौलस्त्य! महाग्निहोत्रिणमहं त्वामेतदभ्यर्थये
सीतामर्पय मुञ्च च क्रतुभुजः क्रारकुटुम्बीकृताम्" ॥ ७ ॥

मन्त्रकारिता विभीषणस्य प्रतिपक्षवर्त्तित्वे हेतुः, विभीषणस्य न कोऽपि दोषः। देवमनुचितं पृच्छेति श्लेषः। निर्वेदसूचिकोक्तिरियम्।

(ख) केसरीति।—केसरिणः तन्नामकवानरभेदस्य, कलत्रं भार्य्या, अञ्जनेत्यर्थः, तस्मात् सम्भवः उत्पत्तिर्यस्य तादृशेन, अञ्जनागर्भजातेन। प्रभञ्जनसूनुना वायुपुत्रेण, हनूमता इत्यर्थः।

(ग) विलुण्ठितां भग्नाम्। अशोकवनिकां हनूमता भग्नत्वात् शोचनीयामवस्थां गतमशोकवनम्। राजा तवायमिति सोल्लण्ठोक्तिः, रावण इत्यर्थः।

(घ) मनुष्येति।—मनुष्यपोतयोः मानवार्भकयोः, राम-लक्ष्मणयोरिति यावत्, "पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः" इत्यमरः; इयं युग्मं, तस्य अवष्टम्भेन आश्रयेण, बलेनेति यावत्।

(ङ) कपिकोटेन कपिषु कोटवत् तुच्छेन, क्षुद्रवानराधमेनेत्यर्थः। विजृम्भितम् अनुष्ठितम्।

जातिमिति।—पौलस्त्य! हे पुलस्त्यनन्दन! मानुषीं मनुष्यसम्बन्धिनीं, जातिं जन्म, "जातिः स्त्री गोत्र-जन्मनी" इति मेदिनी; मानय आद्रियस्व, मानुष इति बुद्धा मा अवज्ञासीरिति भावः, यतः त्वया अभिमुखः सम्मुखवर्त्ती, सङ्ग्रामे इति श्लेषः, हैहयः हैहयदेशाधिपतिः, कार्त्तवीर्य्य इत्यर्थः, दृष्टः अवलोकितः, सम्मुखयुद्धे तस्य बोध्यं त्वया अनुभूतमिति भावः; तेन त्वं सङ्ग्रामे पराजित इति

सारथः। (सवहुमानमात्मगतम्)। अहह!! "बालिभुजौ" इति ब्रुवता मातामहेन किमपि (स) स्मारितोऽस्मि। आर्य!—

किमाचष्टे सेतुक्षितिधरशिरःश्रेणिकवणैः
प्रकोष्ठे नीरोमणः कपिभटभुजस्तम्भनिवहान्।
सुमेरोर्मात्सर्य्यादनतिचिरसंरूढ़मृदुभिः
शिरोभिर्विन्ध्यो यद्धरमपि न सोढ़ुं परिहृढ़ः॥ ८॥

(साश्रुदृग्)। ततस्ततः?

तात्पर्यम्; बालिनः तदाख्यस्य वानरराजस्य, भुजौ बाहू, श्रुत्वा स्मरणविषयीकृत्य, ते वानराः कपयः, अवज्ञातुम् अनादर्तुं, न साम्प्रतं न युक्तं, "युक्ते हे साम्प्रतं स्थाने" इत्यमरः; तत् तस्मात्, नर वानरयोरुभयोरपि प्रत्यक्षीकृतविक्रमत्वेन अवज्ञाप्रदर्शनस्य अयुक्तत्वादित्यर्थः, अहं महान् श्रेष्ठम्, अग्रिजोऽग्रिजम् अग्रिजोपरायणं, याज्ञिकमित्यर्थः, धर्मनिष्ठमिति भावः, त्वां भवन्तम्, एतत् अभयार्थं प्रार्थयै, सीतां रामप्रियां जानकीम्, अर्पय देहि, रामाय प्रतिदेयीत्यर्थः, कारासु बन्धनागारेषु, "कारा स्यात् बन्धनागारे" इत्यमरः; कुटुम्बीकृतान् पोष्यीकृतान्, पोष्यत्वेन परिगणितानित्यर्थः, अवरुद्धानिति भावः, "कुटुम्ब पोष्यवर्गे च" इत्यमरः-लक्षा; क्रतुभुजश्च देवाश्च, "अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः। बर्हिर्मुखाः क्रतुभुजः" इत्यमरः; मुक्त त्यज। आर्दूलविक्रीडितं वृत्तम्॥ ७॥

(स) अहह इत्यनुतौ, आश्चर्यमित्यर्थः। किमपि अनिर्वचनीयं, विस्मयकरं वस्तु इत्यर्थः।

किमिति।—सेतवे सेतुबन्धनार्थं, क्षितिधराणां पर्वतानां, शिरःश्रेणयः शृङ्गसमूहाः, तेषां कैः खड्ग इति वा कपयैः घर्षणैः, प्रकोष्ठे कूर्पर-मणिबन्धयोर्मध्यभागे, मणिबन्धदेशे इति भावः, तत्रैव विशेषेण कपयस्तम्भनात्, "प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेऽपि च" इति मेदिनी; नीरोमणः लोमरहितान्, कपिभटानां वानरवीराणां, भुजा बाहव एव, स्तम्भनिवहाः स्तम्भसमूहाः तान्, स्तम्भोपमसुदृढ़-विशालभुजसमूहान्, किम् आचष्टे? किं ब्रवीति? कपिभटानां विस्मयजनक-भुजबलप्रकटनार्थं किं दृष्टान्तं प्रदर्शयतीत्यर्थः, विन्ध्योऽपि विन्ध्यगिरिरपि सुमेरोः देवनिवासभूतस्य स्वर्णमयशिखरस्य पर्वतस्य, मात्सर्य्यात् विद्वेषात्, सुमेरोरुच्चता-दर्शनजनितादिति भावः, अनतिचिरं नातिदीर्घकालं, रूढ़ानि समुद्भूतानि, अत एव मृदूनि कोमलानि तैः, शिरोभिः शृङ्गैः, यद्धरं येषां वानरभटभुजस्तम्भ-

नाथवान्। ततश्च रोषान्धतामिस्रे मज्जता राक्षसराजेन तथा चेष्टितं, यथा विपक्षोऽप्याश्रितः। (घ)

सारथः। (सखेदमाकाशे)। हा देव पुलस्त्यनन्दन! कथं भवतैव वैधर्म्यदृष्टान्तेन मानतो (क) मूलोच्छेदनिमित्ता निवर्त्तिष्यते (ख) लोकः? (साभ्यर्थनञ्च (ग)।—

अरिषड्वर्ग एवायमस्यास्तात! पदानि षट्।
तेषामेकमपि च्छिन्दन् खड्गेन भ्रमरीं श्रियम्॥ ८॥

निवहानां, भरं भारम् अपि, सोढुं वोढुं, न परिछदः न प्रभुः, न शक्तः इत्यर्थः, "प्रभुः परिछदोऽधिपः" इत्यमरः। पुरा सुमेरुनिगीर्णया विन्ध्यो वर्द्धत इति कथा पूर्वमुक्ताऽनुसन्धेया। निखरिणी वृत्तम्॥ ८॥

(घ) रोषेति।—रोषः क्रोध एव, अन्धतामिस्रं गाढान्धकारं तस्मिन्। "रोषान्धतमसे" इति पाठेऽपि—स एवार्थः; तत्र "ध्वान्ते गाढेऽन्धतमसम्" इत्यमरः। तथा तादृक्, चेष्टितम् आचरितम्। यथा यादृशेन चेष्टितेन। आश्रित इत्यनन्तरं खलिष्टवत्तेन विभीषणेनेति शेषः।

(क) वैधर्म्येति।—विगतो धर्मः विधर्मः, तस्य भावः वैधर्म्यं विरुद्धधर्माचरणमित्यर्थः, अधर्माचरणम् इति यावत्, तेन दृष्टः परिछिन्नः, अतः नाम्नः यस्य तथाभूतेन; यद्वा—वैधर्म्यं विपरीतधर्माचरणं, तस्य दृष्टान्तेन निदर्शनेन, दृष्टान्तस्वरूपेणेत्यर्थः। मानतः अहङ्कारात्। "भवतैव" इत्यत्र "भवत एवम्" इति पाठकल्पनं सङ्गतार्थकं समीचीनञ्च।

(ख) मूलोच्छेदनिमित्तात् समूलविनाशहेतुभूतात्, मानत इत्यस्य विशेषणम्। निवर्त्तिष्यते अपयास्यति, त्यक्त इति शेषः, तव दुराचारेण खर्ग एव त्वां परित्यक्ष्यतीति भावः।

(ग) साभ्यर्थनं सप्रार्थनं, रक्षोराजस्योर्ध्वबाहुरचला तिष्ठति, वक्ष्यमाणश्लोकेन तथा प्रार्थयतीत्यर्थः।

अरीति।—तात! हे अनुकम्पार्ह! अल्पमतित्वात् अकृतापाय रावण! इत्यर्थः; यद्वा—तात! हे जनक! प्रतिपालकप्रभुत्वात् पितृतुल्य! इत्यर्थः, "तातोऽनुकम्प्ये जनके" इति मेदिनी; अस्याः वक्ष्यमाणायाः भ्रमरीरूपायाः श्रियाः इति भावः, अयं सुप्रसिद्धः, त्वयि परिदृश्यमानो वा, अरिषड्वर्ग एव अरीणां शत्रूणाम्, अन्तःशत्रूणां कामादीनामिति यावत्, षड्वर्गः एव षण्णां समुदायः एव, खान्-शीघ्र-

(मल्लिकं प्रति)। आर्य्य! यत् सत्यं, राघवेण व्यूढां वानर-वरूथिनीमुत्प्रेक्ष्य शङ्के, (घ) विभीषण एव यदस्माकं कुल-तन्तुरवशिष्यते। (ङ)

माल्यवान्। (निःश्वस्य)। वत्स! द्वयोरपि कटकयोः तत्त्वज्ञोऽसि, (च) तत् किमिदानीमुचितम्?

सारणः। आर्य्य! नन्वेवं ब्रवीमि, राजपुत्रोऽङ्गदोऽसौ बालो नवबुद्धिः आमपात्रमिव यद्यदाधीयते, तत्तदाचुचूषति (छ)।

माल्यवान्। ततः किम्?

सारणः। ततश्च "भवतः पितृवैरिणौ राम-सुग्रीवौ व्यापाद्य (ज) किष्किन्धायां भवन्तमभिषिच्य बालिसौहृदस्यात्मान-

---

लीभ-मोह-मद-मात्सर्य्यरूप एव इति यावत्, षट् षट्सङ्ख्याकानि, पदानि चरणाः, तेषां षण्णां पदानाम्, एकम् अन्यतमम्पि, पदमिति शेषः, छिन्दन् खण्डयन्, भमरीं भमरीरूपां, भमक्रीडां वा, चञ्चलामिति यावत्, श्रियं लक्ष्मीं, खञ्जयं खञ्जां कुर्व, येन सा चलितुं न समर्था भवेदिति भावः; षड्वर्गीयप्रथमस्य कामस्य छेदने सीतायां राघवे समर्पणं, तेन च लक्ष्मीः स्थिरा भविष्यतीत्याशयः। अनुष्टुप् वृत्तम्॥ ९॥

(घ) व्यूढां विन्यस्तां, चक्रव्यूहाद्याकारेण सज्जितामित्यर्थः, "व्यूढः संहतविन्यस्त-पृथुलेष्वभिधेयवत्" इति मेदिनी। वानरवरूथिनीं कपिसैन्यं, "वरूथिनी बलं सैन्यम्" इत्यमरः। उत्प्रेक्ष्य दृष्ट्वा। शङ्के सम्भावयामीत्यर्थः।

(ङ) कुलतन्तुः वंशसूत्रम्; यद्वा—तन्तुरपत्यं, तद्वा च, कुलधरसन्तान इति भावः। अवशिष्यते अवशिष्टः स्थास्यतीत्यर्थः।

(च) कटकयोः सैन्ययोः, "कटकस्त्रिदिनितम्बे बाहुभूषणे। सैन्यायां राज-धान्याञ्च" इति हैमः। तत्त्वज्ञोऽसि मर्मज्ञोऽसि, प्रकृतबलाबलाभिज्ञोऽसि इति यावत्।

(छ) नवबुद्धिः अपरिणतबुद्धिरित्यर्थः। आमपात्रमिव आमम् अपक्वं, पात्रं शरावादि भाजनं, तदिव। आधीयते आरोप्यते, स्थाप्यते इत्यर्थः, खस्य उपरीति भावः। आचुचूषति सम्यक्तया गृह्णति, अतिशयेन पिबतीत्यर्थः; यद्वा—यत् यत्, रेखादिकमिति शेषः, आधीयते स्थाप्यते, अङ्क्यते इति यावत्। आचुचूषति सर्वथा आधयति, शोषयेण अभ्यन्तरं नयतीति यावत्, कदाऽपि अनपनेयतया स्वाङ्के धारय-तीति भावः, तच्च यदुच्यते, अपरिणतमतित्वात् तत् सद्गमसद्गं वा न विविच्य गृह्णातीति निष्कर्षः। "मृण्मये भाजने क्षिप्तः संस्कारो नान्यथा भवेत्" इति कविवचनमत्र द्रष्टव्यम्।

मनृणमिच्छामः" इति गूढप्रणिधिमुखेन (झ) दशकन्धरादेश-मभिधाय सुग्रीवग्रिविरादपवाह्यते; तस्मिन्नपक्रान्ते (ञ) तु स्वगृहमहिभयोपजापजर्जरमवेक्षमाणो (ट) वानरपतिः ग्रिथिलितरामप्रयोजनः (ठ) स्यात्।

माल्यवान्। (सस्मितम्)। वत्स! साधु समर्थयसे (ड)। किं पुनः स्वयमङ्कटो गर्भरूपोऽभिनवोज्ज्वलयौवराज्यसुखोप-लालितो दुरपवाह (ढ) एव। ये चास्य माता-पितृ-बन्धवः, ते सुग्रीवस्यापि सम्बन्धिनः कथमेनमुत्तिष्ठमानमनु-जानीयुः? (ण)

(ज) व्यापाद्य विनाश्य।

(झ) बालिसोदरस्य बालिना सह मित्रतायाः। अनृणं विमुक्त ऋण, कृत-गुणमित्यर्थः। गूढप्रणिधिमुखेन गुप्तचरमुखेन, "प्रणिधिर्नाऽर्थने चरे" इति मेदिनी।

(ञ) दशकन्धरादेश दशकन्धरस्य दशग्रीवस्य, रावणस्येत्यर्थः, आदेशम् आज्ञाम्, अभिप्रायमिति यावत्। अपवाह्यते वहिष्क्रियते, अङ्गद इति शेषः। तस्मिन् अङ्गदे। अपक्रान्ते अपवाहिते सति, सुग्रीवपक्षं परित्यजिते सतीत्यर्थः।

(ट) अहिभयं स्वपक्षप्रभव भयं, "महीभृतामहिभयं स्वपक्षप्रभवं भयम्" इत्यमरः, तया उपजापः भेदः, अन्योऽन्यविच्छेदकरणमित्यर्थः, "समौ भेदोपजापौ" इत्यमरः; ताभ्या जर्जरम् आकुलम्। अवेक्षमाणः पश्यन्।

(ठ) वानरपतिः सुग्रीवः। ग्रिथिलितेति।—ग्रिथिलितम् अनाहृतं, परित्यक्त-मित्यर्थः, रामस्य प्रयोजनं कार्यं, सीतोद्धाररूपमिति भावः येन तथाभूतः।

(ड) साधु सम्यक्। समर्थयसे सम्पधारयसि, स्वोक्तिसमर्थनाय इदमेव कर्तव्य-मिति युक्तिं प्रदर्शयसीत्यर्थः, सन्तयमीति भावः, "सम्पधारणा तु समर्थनम्" इत्यमरः।

(ढ) किं पुनः किन्तु। गर्भरूपः बालकः। अभिनवेति।—अभिनवेन नूतनेन, नातिचिर लब्धेनेति यावत्, उज्ज्वलेन दीप्तिमता, सम्मानवतेति भावः, यौवराज्येन युवराजपदलाभेन, यत सुखम आनन्दः, तेन उपलालितः वर्द्धितः, अनुभूतयोवराज्याभि-षेकानन्द इत्यर्थः। दुरपवाहः दुःखेनापसारणीयः, सुग्रीवकटकात् तस्य वहिष्करणं दुष्करमिति भावः।

(ण) माता-पितृबन्धवः मातुः पितुश्च स्वजनाः। सम्बन्धिनः सम्पर्कीयाः,

सारथः। यथा दृष्टमार्य्येण ; किञ्च, कालापेक्षो दण्डनीति-प्रयोगः (त); तथा कथमपि (थ) महोत्साहैः कपिभिः सेतुकर्मणि प्रवृत्तं, यद्येतावता कालेन सन्तीर्णमहार्णवो रामः सुवेलशैलोपत्यकामध्यास्ते (द)।

माल्यवान्। (सविमर्शाद्भुतम्)। (ध) अहह!—

असौ मनुष्यमात्रेण लङ्घितो यदि सागरः।
प्रतापो दशकण्ठस्य भुवनैरपि लङ्घितः॥ १०॥

(सखेदं च)।—

जनना: इति यावत्। एनम् अङ्गदम्। उत्तिष्ठमानं सुग्रीवेण विरोधाय यतमानमित्यर्थः। अनुजानीयुः? अनुमन्येरन्? न कथमपि अनुजानीयुरिति भावः।

(त) यथा येन प्रकारेण, यादृक् इत्यर्थः, दृष्टम् आलोचितमित्यर्थः, तत् सत्यमिति शेषः। यद्वा—यथा-शब्दः प्रशंसायामव्ययम्; "यथा तुल्यार्थ-मानयोः। प्रशंसायाम्" इति मेदिनी; आर्य्येण यथा साधु, समीचीनमित्यर्थः, दृष्टम्। कालापेक्षो कालं समयम् अपेक्षते इति तथोक्तः। दण्डनीतिप्रयोगः दण्डार्थं विपक्षदमनार्थं, नीतिः षाड्गुण्यविधानं, तस्याः प्रयोगः यथायथं व्यवहारः।

(थ) कथमपि सम्भावयामीत्यर्थः, 'कथम्' इति अव्ययशब्दः सम्भावनार्थकः सम्भ्रमार्थको वा; "कथं हर्षे च गर्हायां प्रकारार्थे च सम्भ्रमे। प्रश्ने सम्भावनायाञ्च" इति मेदिनी।

(द) सन्तीर्णः समुत्तीर्णः, उल्लङ्घित इति यावत्, महार्णवः महासागरः येन सोऽयम्। सुवेलेति।—सुवेलस्य तदाख्यस्य, लङ्कायाःपर्वतिन इति भावः, शैलस्य पर्वतस्य, उपत्यकाम् आसन्नभूमिम्, "उपत्यकाऽऽसन्ना भूमिरधित्यका" इत्यमरः। अध्यास्ते अधितिष्ठति।

(ध) सविमर्शाद्भुतं विमर्शः वितर्कः, अद्भुतः विस्मयः, ताभ्यां सह वर्त्तमानं यथा तथा सवितर्कं सविस्मयञ्च।

असाविति।—मनुष्यमात्रेण सामान्येन मनुष्येणेत्यर्थः, रामेणेति शेषः, असौ दुर्लङ्घ्यत्वेन प्रसिद्धः अयं, सागरः समुद्रः, यदि लङ्घितः उत्तीर्णः, तदा दशकण्ठस्य दशग्रीवस्य रावणस्य, प्रतापोऽपि प्रभावोऽपि, भुवनैः लोकत्रयैः, त्रिलोकवासिभिः सर्वैरित्यर्थः, लङ्घितः अतिक्रान्तः, अवज्ञातः इति भावः, इदानीं रावणस्य प्रभुत्वं केरपि न स्वीक्रियेत इति निष्कर्षः। अनुष्टुप् छन्दः॥ १०॥

पौलस्त्यस्य सुरासुरेन्द्रशिरसां निर्माल्यमाल्यस्रजं
कुर्वाणेन रघूद्वहेन घटिते सेतौ निधावम्भसाम्।
अद्योन्मुद्रयति स्वहस्तविधृतं राजीवमिन्दो रविः
प्रत्याहृत्तरसस्य चामृतभुजामिन्दोः स्रवन्ते कलाः ॥११॥

(विमृश्य)। वत्स सारण! वालिवधविशुद्धपार्ष्णिः (न) अनेकवानरानीकनायकेन साक्षादुपकृतेन (प) सख्या सुग्रीवेण

पौलस्त्येति।—पौलस्त्यस्य रावणस्य, अङ्घ्रिद्वयं चरणयुगल, सुरासुरेन्द्राणां देवदानवाधिपतीनां, शिरांसि मस्तकानि, तेषां, निर्माल्य निर्माल्यस्वरूपं, देवानामुच्छिष्टवत् त्याज्यमिति यावत्, निर्माल्य यथा देवैस्त्यज्यते तद्वत् त्याज्यम् इति भावः, यद्वा—निर्माल्यं शिवनिर्माल्यम्, "अथाङ्गं शिवनिर्माल्यम्" इति वचनात् शिवनिर्माल्यं यथा लोकानामग्राह्यं, तद्वदग्राह्यमित्यर्थः, कुर्वाणेन करिष्यतेति भावः, भविष्यत्सामीप्ये प्रयोगोऽयम्; देवा वा असुरा वा कोऽपि अतःपरं रावणचरणयोः मूर्द्धानं न न्यविष्यन्नीति निष्कर्षः, रघूद्वहेन रघुश्रेष्ठेन, रामेणेत्यर्थः, अम्भसां निधौ सागरे, सेतौ बान्धे, घटिते बद्धे सति, अद्य अस्माद्दिनादारभ्य इत्यर्थः, रविः सूर्यः, इन्दोः दोषः सन्, रावणभयाभावात् प्रहृष्टतेजाः सन् इत्यर्थः, स्वहस्तविधृतं निजकरस्पृष्टं, राजीवं पद्मम्, उन्मुद्रयति विकासयति, अमृतभुजां सुधापायिनां, देवानामित्यर्थः, प्रत्याहृत्तः पुनरानृत्तः, पूर्वं रावणभयेन भीतभीततया अवस्थानात् द्रव्याणां रसपरित्यागमल्लिलीपादिति भावः, दृश्यते च लोके, भयशोकादयभिभूतानां रसबोधमक्षेरभाव इति, रसः स्वादः यस्य तथाभूतस्य, इन्दोः सुधांशोः, अमृतकिरणवर्षिणश्चन्द्रस्य इति भावः, कलाः अवयवाः, अमृतकिरणानीति यावत्, स्रवन्ते रोचन्ते च; पूर्वं रावणभयात् सूर्यस्य सम्यक्प्रकाशो देवानाञ्च चान्द्रीयसुधापानं नाभूत्, इदानीन्तु तेषामकुतोभयं स्वस्वव्यापाराधिकारो भवतीति भावः। अत्रामृतभुजामिति कृत्ययोगे चतुर्थी विहितायामपि सम्बन्धविवक्षया षष्ठी। मार्दूलविक्रीडितं वृत्तम् ॥ ११ ॥

(न) वालीति।—वालिनः वालिसंज्ञकस्य किष्किन्धाधीश्वरस्य, वधेन मारणेन, विशुद्धः निर्विघ्न इत्यर्थः, विरहित इति यावत्, पार्ष्णिः सेवानां पृष्ठदेशः, पृष्ठदेशादाकृष्यमाणो ग्रन्थिरित्यर्थः, यस्य तथोक्तस्य, वालिनैव तस्य पार्ष्णिग्राहेण भाव्यत्वं ज्ञितम्, इदानीन्तु तद्विरहात् पृष्ठग्रन्थिर्नास्तीति भावः; "पार्ष्णिः स्यादुन्मदस्त्रियाम्। स्त्रियां द्वयोः सेवृपृष्ठे पादस्यान्यधरेऽपि च॥" इति मेदिनी।

(प) अनेकेति।—अनेकेषां बहूना, वानरानीकानां कपिसेनानां, नायकेन प्रभुणा। साक्षात् स्वयम्। उपकृतेन प्राणोपकारेण, वालिनं हत्वा राज्यप्रदानादिति भावः

महापक्षस्य हनूमच्चरितज्ञाताऽस्मदीयवृत्तेः (फ) अयमेव सुविहितसकलाभियाऽऽक्रमणस्तस्याभियोगसमयः (ब)।

सारणः। आर्य्य ! अयमेवात्मद्रव्य प्रकृतिसम्पन्नो नयस्याधिष्ठानं (भ) विजिगीषुरिति प्रथमोदाहरणं दाशरथिः (म)।

माल्यवान्। (स्मृत्वा नाटयित्वा) (य)।—

यत्तस्मिन्निहतेऽपि बालिनि वयं क्षुद्रास्तथैवास्महे
तत् युक्तं भुजयोर्बलादपि बलं दुर्गस्य दुर्निग्रहम्।

(फ) महापक्षस्य हनूमदायत्त, "पक्षः सहायेऽपि" इत्यमरः। हनूमदिति।—हनूमतः मारुतेः, चरितेन आचरणेन, लङ्कादाहादिना कार्य्येणेत्यर्थः, ज्ञाता विदिता, अस्मदीया अस्मत्सम्बन्धिनी, वृत्तिः विवरणम्, आभ्यन्तरीणव्यापारः इत्यर्थः, सामर्थ्यमिति यावत् येन तथाभूतस्य।

(ब) सुविहितेति।—सुष्ठु विहितम् अनुष्ठितं, सकलं समस्तम्, अभियास्यतः विपक्षाभिमुखं गमिष्यतः, विजिगीषोरिति यावत्, क्रमं सैन्यसङ्घटादिव्यापारः येन तथोक्तस्य। तस्य रामस्य। अभियोगसमयः आक्रमणकालः।

(भ) आत्मेति।—आत्मनः स्वस्य, द्रव्याणां धनानि, सम्पदः इत्यर्थः, "द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु" इत्यमरः, "बाहुश्रुत्यं तपस्त्यागः श्रद्धा यज्ञक्रिया क्षमा। भावशुद्धिर्दया सत्यं नियमश्चात्मसम्पदः" इति नीतिशास्त्रोक्ता इति यावत्, प्रकृतयः अमात्यादीनि राज्याङ्गानि, "अमात्य राष्ट्र-दुर्गाणि कोशो दण्डश्च पञ्चमः। एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः॥ एताः पञ्च तथा मित्रं सप्तमः पृथिवीपतिः। सप्तप्रकृतिकं राज्यमित्युक्तं ब्रह्मभिः॥" इति नीतिशास्त्रोक्ताः, ताभिः सम्पन्नः युक्तः। नयस्य नीतेः, अधिष्ठानम् आश्रयः, नीतिशास्त्रानुसारेण व्यवहर्त्ता इत्यर्थः।

(म) प्रथमोदाहरणम् आद्यो दृष्टान्तः, विजिगीषुणा यादृशेन भवितव्यं, तत्र प्रथमो दृष्टान्तः इत्यर्थः, रामसदृशः आत्मद्रव्य-प्रकृतिसम्पन्नः नीतिपरायणो विजिगीषुः इतः पूर्वं कुत्रापि न दृष्टः, अत एव प्रथमोदाहरणमिति भावः। दाशरथिः रामः।

(य) स्मृत्वा नाटयित्वा स्मरन्वत निश्चलं स्थित्वेत्यर्थः।

यदिति।—तस्मिन् रावणविजेतरि इति भावः, बालिनि किष्किन्धापतौ, निहतेऽपि विनष्टेऽपि, रामशरेणेति शेषः, क्षुद्राः अल्पाः, बालिनमपेक्ष्य बलहीनाः इत्यर्थः, निर्बीजा इति भावः, "निषु क्रूरेऽधमेऽल्पेऽपि क्षुद्रः" इत्यमरः, वयं निशाचराः, सीतापहारि रावणपक्षा इति भावः, यत् तथैव पूर्ववदेव, सीताहरण-

मर्त्येनापि जगद्विलक्षणगुणग्रामेण रामेण तु
ह्येकं गव्यूतिशते हि नाम कियती तीर्णोऽयमर्णोनिधिः ॥ १२ ॥

(दीर्घमुष्णं च निःश्वस्य आकाशे)—

तर्षात्तिव्यतिलेलिहानरसनारम्यैर्मुखैरष्टभिः
क्रन्दन्तौ क्रमशः पपौ दशमुखो वत्सस्य यस्याः स्तनौ।
वत्से कैकसि ! विश्ववीरजननीसीमन्तमुक्तामणिः
सा तादृग्भवतो कथं गुणवतः पुत्रस्य किं द्रक्ष्यति ? ॥१३॥

वाक्षिनिश्चनात् पूर्वं यथा तथैव इत्यर्थः, आस्महे उपविशामः, निर्वेष्टाः सुखिताः स्म इत्यर्थः, तत् युक्तम् उचितं, तवास्माकं किमपि स्वखलु ज्ञातमिति न मन्ये इति भावः, यतः भुजयोः बाह्वोः, बलादपि सामर्थ्यादपि, दुर्गस्य कोटस्य, दुर्गमत्वात्मस्य इत्यर्थः, बलं सामर्थ्यं, दुर्निगडं दुःखेन निगडितुं शक्यं, दुरतिक्रमणमिति यावत्, अस्माकं समुद्ररूपं यत् दुर्गमस्ति तत् रामस्य बाहुबलेन नातिक्रम्यते इति बुद्ध्या अस्माभिः सुज्ञितमिति भावः; तु किन्तु, मर्त्येनापि मनुष्येणापि सता, जगतां भुवनानां, जगत्सु वा भुवनेषु, विलक्षणः असाधारणः, गुणग्रामः गुणसमूहः यस्य तादृशेन, रामेण दाशरथिना, हे हिरण्मते, गव्यूतिशते क्रोशयुगशते, चतुःशतक्रोशपरिमिते इत्यर्थः, शतयोजनविस्तृते इति यावत्, "गव्यूतिः स्त्री क्रोशयुगम्" इत्यमरः, हिरण्मयत्वे किंयती किंपरिमाणे, नाम सम्भावनायाम, अल्पे इत्यर्थः, गोष्पदपरिमाणमिव अत्यल्पं सत्वा इति भावः, अयम एषः, दुर्लङ्घ्यत्वेन प्रसिद्ध इति भावः, अर्णोनिधिः अर्णोनिधिः, शतयोजनपरिमितः समुद्र इति यावत्, "अम्भोऽर्णस्तोयपानीय—" इत्यमरः; तीर्णः लङ्घितः, सागरदुर्गमत्वात् रक्षतीति प्रत्याशाऽपि अस्माकं विनष्टेति भावः। आर्द्रलविक्रीडितं वृत्तम् ॥ १२ ॥

तर्षेति।—वत्से कैकसि ! हे वत्सायाः रावणमातः ! ; कैकसी खलु सुमालिनः कन्याभेदः, तथा च रामायणे—"राक्षो पुष्पोत्कटा चैव कैकसी च यशस्विनी। त्रिलोकेषु च विख्याता सुमालेः प्रसवाः सुताः॥" इति, कैकस्याः कथा च रामायणे उत्तरकाण्डे द्रष्टव्या; "निकषा" इति च तस्या नामान्तरम्; वत्सस्य रावणस्य, दशानां दशसङ्ख्याकानां, मुखानां वदनानां समाहारः दशमुखी मुखदशकं, तर्षस्य पिपासया, "तृष्णा तु पिपासा तट् तर्षः" इत्यमरः; या आर्त्तिः पीडा, तया व्यतिलेलिहानाः पुनः पुनरास्वादयन्त्यः, आस्वादलोलुपा इत्यर्थः, या रसनाः जिह्वाः, अष्टसङ्ख्याका इति भावः, ताभिः रम्यैः मनोज्ञैः, अष्टभिः अष्टसङ्ख्यकैः, मुखैः

सारथः । शान्तं शान्तम् ; प्रतिहतममङ्गलम् ; (२) अनर्थशङ्कीनि बन्धुहृदयानि भवन्ति । किं च आर्य्य !—

भुजनिवहविहङ्क्रिकावलम्बी
निविडगुणीवधृतोऽपि राज्यभारः ।
स्वयमपि दशकन्धरे धुरीणे
स्खलति यदि स्खलनं तदाऽस्य रूपम् ॥ १४ ॥

आनने, क्रन्दन्ती रुदन्ती सती, मातुः स्तनदयमानविशिष्टत्वात् द्राभ्यां मुखाभ्यां ततस्तत्पानकाले अपरेषामप्राप्तानां स्तन्यलाभात् तत्प्राप्तिलालसया क्रन्दन बाहुल्यम् ; यस्याः भवत्याः, स्तनौ कुचौ, क्रमशः क्रमानुसारेण, द्वौ द्वौ क्रुत्वेति भावः, पपौ पीतवती, द्राभ्यां मुखाभ्यां स्तनदय पीयते, अपराणि अष्टौ रुदन्तीति भावः ; विश्वेषां निखिलानां, वीराणां शूराणां, या जनन्यः मातरः, तासां सीमन्तमुक्तासखिः सीमन्तेषु विन्यस्तकेशेषु, याः मुक्ताः मौक्तिकानि, तासां सखिः रत्नं, रत्नस्वरूपिणीत्यर्थः, श्रेष्ठमुक्तास्वरूपिणीति यावत्, सर्वासां शिरोभूषणभूतत्वात् ताभ्यः श्रेष्ठेति भावः, तादृशी तथाविधा, सा वीरप्रसविनीत्यर्थः, भवती गुणवतः गौर्यादिगुणयुक्तस्य, पुत्रस्य तनयस्य रावणस्य, कथं केन प्रकारेण, किं कं परित्यागमिति यावत्, विनाशमिति भावः, द्रक्ष्यति ? अवलोकयिष्यति ? अमङ्गलत्वात् विनाशमितिपदस्थाने किं-पदं प्रयुक्तमिति बोध्यम् । शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

(२) शान्तं शान्तं निवृत्तं निवृत्तम्, एतादृक् वचनं न वाच्यमित्यर्थः । प्रतिहतम् अज्ञानिभिर्नाशितं, यद्वा—प्रतिहतं विनष्टं, भवत्विति शेषः, दूरीभवतु इत्यर्थः ।

भुजेति ।—भुजनिवहः बाहुसमूह एव, विहङ्गिका भारयष्टिः, "बाँक" इति प्रसिद्धः सञ्चिक्यलगुड इत्यर्थः, "अथ विहङ्गिका भारयष्टिः" इत्यमरः ; तस्याम् अवलम्बते धारयतीत्यर्थः, वहतीति यावत्, इति तथोक्तः, निविडेन घनेन, प्रभूतेनेति यावत्, दृढेन च, गुणीघेन मौर्व्यादिगुणसमूहेन, रज्जुसङ्घेन च, श्लिष्टेनेति यावत्, धृतोऽपि अवलम्बितोऽपि, राज्यभारः राज्यपालनरूपं गुरुभारं वस्तु इत्यर्थः, तथा स्वयं साक्षादेव इत्यर्थः, दशकन्धरे दशग्रीवे रावणे इत्यर्थः, धुरीणे धूर्वहेऽपि, भारवाहिनि सत्यर्थः, "धुर्वहे धुर्य्यधौरेय-धुरीणाः सधुरन्धराः" इत्यमरः ; स्खलति च्यवति, भ्रश्यतीत्यर्थः, यदि तदा अस्य राज्यभारस्य, स्खलनं च्यवनमेव, रूपं स्वरूपं, स्वभाव इत्यर्थः, प्रकृतिरिति यावत्, "रूपं स्वभावे सौन्दर्य्ये" इति मेदिनी ;

माल्यवान्। (अभूमि सम्भ्रम्य)। वत्स!—

विद्वानपावृत्तमिव स्वभाग्यं
न तावदात्मानमहं ब्रवीमि।
महामुनेर्विश्रवसस्तपोभि-
र्निवापबीजं यदि नः कुलं स्यात्॥ १५॥

(प्रविश्य पटौचेपेन (ख) सम्भ्रान्तः शुकः)।

शुकः।—

प्रहस्तधूम्राक्षमहोदरादीन्
व्यापाद्य सेनाधिपतीनमात्यान्।
स एष लङ्कामुपरुध्य रामः
शाखामृगैर्णैवमातनोति॥ १६॥

एकवत्सरात् भारद्वाजं सम्भवति, दशवत्सरात्तु तस्य अगस्त्यवत्सेऽपि खलनमेव यस्य स्वभावः, तस्य खलननिरोधो दुष्कर एवेति भावः। पुष्पितायां ज्ञातम्॥ १४॥

विद्वानिति।—स्वभाग्यं निजशुभाहृष्टम्, अपावृत्तमिव अपगतमिव, विद्वान् जानन्, अहं तावत् आत्मानं स्वं, न ब्रवीमि न कथयामि, इदानीमस्माकं सौभाग्यसूर्यास्तगमनात् कुशरत्वणं न सम्भवतीति जानन्निव वत्स्यमाणप्रकारेण आत्मानं न प्रवीषयामीति भावः, परन्तु महामुनेः मुनिश्रेष्ठस्य, विश्रवसः रावणपितुः पुलस्त्यतनयस्य, तपोभिः तपस्याभिः, निवापस्य पितॄन् उद्दिश्य अन्नाद्यर्पितदानस्य, "पितृदानं निवापः स्यात्" इत्यमरः, बीजं कारणभूतं, नः अस्माकं, कुलं वंशः, यदि स्यात् तिष्ठेत्, यदि अस्माकं कुलं तिष्ठेत्, तदा तत्र महामुनेस्तपोबलमेव हेतुः, नास्माकं भाग्यबलमिति भावः, पितॄन् उद्दिश्य अस्माभिः यद्यथा दत्तस्य अन्नपानादेर्ग्रहणे यदि तेषामिच्छा स्यात्, तदा महामुनेस्तपोबलेनैवास्माकं वंशरक्षा भवेत्, न पुनरस्माकं भाग्यबलेनेति निष्कर्षः। उपजातिवृत्तम्॥ १५॥

(ख) पटौचेपेण जवनिकाऽपसारणेन। "पटौचेपेण" इत्यत्र "अपटौचेपेण" इति पाठकल्पनं सुधीभिः, जवनिकापातनस्य अनुल्लेखात्, सारङ्ग-माल्यवतोः सद्यो वध्यत्वात्, सम्भ्रान्तस्य पटपरिवर्तनादिविलम्बासहत्वाच्चेति सुधीभिर्बोद्धव्यम्; एवञ्च अपटौचेपेण पटपरिवर्तनमकृत्वैव, सहसा इत्यर्थः।

प्रहस्तेति।—स राक्षसालङ्कारेण प्रविष्टः, एष लङ्कावरोधकारी अयं, रामः दाशरथिः, लङ्कां लङ्कापुरीम्, उपरुध्य संरुध्य, प्रहस्तादीन् सेनाधिपतीन् सेना-

माल्यवान् । (सविषादम्) । पुरस्तादेव दृष्टमिदम् (व) अस्माभिः । देश-कालव्यवहितस्यापि प्रमेयग्रामस्य यथामुखीनमादर्शतलं हि स्थविरबुद्धिः (श) । (विहस्य आकाशे) । साधु रामभद्र ! साधु ; विजिगीषोरदीर्घसूत्रता (ष) हि कार्यसिद्धेरवश्यम्भावः (स) ।

माल्यः । सखे शुक ! अथ किं-विधानो यातुधानेश्वरः ? (ह)

शुकः । (सखेद-स्मितम्) । सखे ! किं तस्य विधानम् (क)—

श्रुत्वा दाशरथौ सुवेलकटके साटोपमर्दं धनु-
ष्टङ्कारैः परिपूरयन्ति ककुभः प्रोज्झन्ति कौक्षेयकान् ।
अभ्यस्यन्ति तथैव चित्रफलके लङ्केशपत्तेस्तत् पुन-
र्वैदेहीकुचपत्रवल्लिरचनाचातुर्यमर्दं कराः ॥ १७ ॥

नायकान्, तथा अमात्यान् सचिवान्, व्यापाद्य निहत्य, आकाशगैः वानरैः, अर्णवं समुद्रम्, आतनोति विस्तारयति, आकाशगतपक्षसमुद्रेण लङ्कामाक्रमतीति भावः । उपजातिवृत्तम् ॥ १६ ॥

(व) पुरस्तादेव पूर्वमेव । दृष्टं प्रत्यक्षीकृतं, मानसनेत्रेणेति भावः । इदं लङ्काऽवरोध-राक्षसध्वंसादिरूपं कर्म इत्यर्थः ।

(श) देशकालेति ।—देशेन कालेन च व्यवहितस्य अन्तरितस्य, चक्षुषोऽगोचरे देशान्तरे कालान्तरे वा अनुष्ठितस्यापीत्यर्थः, प्रमेयग्रामस्य ज्ञेयवस्तुनिचयस्य । यथामुखीनं सुखानुरूपमित्यर्थः, सम्मुखस्थितमिति यावत् । आदर्शतलं दर्पणतलम् । स्थविरबुद्धिः वृद्धप्रज्ञा, वृद्धा आदर्शस्थितमिव पदार्थं सर्वं बुद्ध्या पश्यन्तीति भावः ।

(ष) साधु सम्यक् आचरितमित्यर्थः । अदीर्घसूत्रता अचिरकारिता ।

(स) अवश्यम्भावः निश्चितं भवतीति भावः ।

(ह) किं-विधानः किमाचारः । यातुधानेश्वरः राक्षसपतिः, "राक्षसः कौणपः क्रव्यात्··· । यातुधानः पुण्यजनः" इत्यमरः ।

(क) तस्य यातुधानेश्वरस्य । विधानम् आचरणम् ।

श्रुत्वेति ।—लङ्केशपत्तेः रावणस्य, अर्दं विनष्टेरर्दुपरिमिता इत्यर्थः, कराः हस्ताः, दशरथस्य इत्यर्थः, सुवेलस्य तदाख्यपर्वतस्य, कटके नितम्बे, "कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः ; दाशरथौ राम-सम्बन्धी, समागतौ इति शेषः, श्रुत्वा आकर्ण्य, साटोपं

माल्यवान्। (निःश्वस्य)। हा वत्स रावण! कथमद्यापि सैव हृदयपरिस्पन्दमुद्रा !! (ख)। (शुकं प्रति)। वत्स! अथ गोपुर-गौल्मिकबलाध्यक्षेण (ग) वत्मेन नरान्तकेन किं प्रतिपन्नम् ? (घ)

शुकः। (निःश्वस्य)। मातामह! कृतैव कुमारेण द्वार-मर्य्यादा, (ङ) परमङ्कटेन सोऽपि—(इत्यर्द्धोक्ते सास्रमधोमुखस्तिष्ठति)।

माल्यवान्। हा वत्स दशग्रीवनन्दन! कथमिदं तव दृष्टपूर्वमेतावन्तं कालमस्माकमायुः !! (च)

सत्वरम्, सत्वरमित्यर्थः, साटोपं सगर्वं वा, धनुष्टङ्कारैः धनुर्निनादैः, ककुभः दिशः, परिपूरयन्ति व्याप्नुवन्ति, तथा कौचेयकान् करवालान्, "कौचेयको मण्डलाग्रः करवालः कृपाणवत्" इत्यमरः, प्रोञ्छन्ति मार्जन्ति, तेजयन्तीत्यर्थः, अन्ये अहं अपरे च अहं, कराः पुनः किन्तु, तथैव पूर्ववदेव, खड्गाऽवरोधाद्दैः पूर्वं यथा तद्वैरित्यर्थः, चित्र-फलके आलिख्यपटे, वैदेह्याः सीतायाः, कुचयोः स्तनयोः, या पत्रवल्लिः पत्रावली, तिलकविशेष इत्यर्थः, तस्याः रचना लिखनं, तत्र चातुर्य्ये नैपुण्यमित्यर्थः, आयस्यन्ति श्रिचन्ति, पुनः पुनः करणेन अभ्यासं कुर्वन्तीत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ १७ ॥

(ख) हृदयेति।—हृदयस्य चेतसः, परिस्पन्दः चापल्यं, तस्य मुद्रा चिह्नम्।

(ग) गोपुरेति।—गोपुरं पुरद्वारं, "पुरद्वारस्तु गोपुरम्" इत्यमरः, तत्र यानि गौल्मिकबलानि गौल्मिकानि गुल्मो यष्टिः, "यष्टिः" इति पर्य्यायात् सेनानिवेशविशेषः इत्यर्थः, तत्र भवानि स्थितानीत्यर्थः गौल्मिकानि, ताट्टशानि बलानि सैन्यानि, यथा—नव गुल्माः, सप्तविंशतिः चम्वाः, पञ्चचत्वारिंशत् पदातयः एतत्सङ्ख्याकाः सैन्य-समूहाः, ते एव गौल्मिकाः ताट्टशानि बलानि प्रोक्तसङ्ख्यकगजाश्वपदातिसमन्वितानि सैन्यानि इत्यर्थः; "गुल्मः सेना-चतुष्टयी सेनारक्षश्च-वाहिनी" इति मेदिनी; "पत्त्यक्षै-स्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम्। सेनामुख गुल्म-गणौ वाहिनी पृतना चमूः॥ अनीकिनी" इत्यमरश्च; तेषाम् अध्यक्षः अधिपतिः तेन।

(घ) नरान्तकः रावणस्य पुत्रविशेषः। प्रतिपन्नम् आचरितम्।

(ङ) कृता विहिता, प्रतिपालिता इति यावत्। कुमारेण नरान्तकेन। द्वारस्य गोपुरस्य, मर्य्यादा स्थितिः, धारणा इत्यर्थः, रक्षणमिति यावत्; "मर्य्यादा सीमनि स्थितौ" इति मेदिनी। सोऽपि कुमार-नरान्तकोऽपि, निहत इति शाक्यशेषः।

(च) इदम् एवम्भूतमस्माकमायुरित्यन्वयः।

(नेपथ्ये)।

भो भो महापार्श्वप्रभृतयः सैनिकाः!—
व्यावर्त्तध्वमुपाङ्गमुद्धुरशरज्वालामुखीं मातरं
देवोमस्त्रमयीं प्लवङ्गपशवः पश्यन्ति पृष्ठानि वः।
चेतः शक्रजितोऽपि लक्ष्मणवधे बद्धोत्सवं मध्यमः
पौलस्त्यः स्वयमायुधं विधृतवानद्यापि रामाद्भयम्?॥ १८॥

सारणः। (श्रुत्वा सहर्षम्)। आर्य्य! जातं जातमवलम्बनं, यदयं प्रतिबुध्य (क) कुमारकुम्भकर्णः पुरस्कृत्य (ज) च मेघनाद-मभ्यमित्रीणः (झ) संवृत्तः।

माल्यवान्। (निःश्वस्य)। स्वस्ति, (ञ) विजयेतां राम-लक्ष्मणौ कुम्भकर्ण-मेघनादौ।

व्यावर्त्तध्वमिति।—व्यावर्त्तध्वं प्रत्यावर्त्तध्वं, प्रत्यावर्त्तन कुरुत इत्यर्थः, युद्धात् मा पलायध्वमिति भावः, उद्धुरा उत्कटा, शराणां बाणानां, ज्वाला तेज एव, प्रभा एवेत्यर्थः, मुखं वदनं यस्याः तादृशीम्, अस्त्रमयीम् अस्त्रस्वरूपिणीं, मातरं जननीं, देवीम् अस्त्राधिष्ठात्रीं देवतामित्यर्थः, उपाङ्गं सेवध्वं, प्लवङ्गपशवः प्लवङ्गाः वानरा एव, पशवः अधमजातिविशेषाः इत्यर्थः, अधमवानरा इति यावत्, वः युष्माकं, पृष्ठानि पश्चाद्भागान्, पश्यन्ति अवलोकयन्ति, पराङ्मुखत्वादिति भावः, रणभूमौ पृष्ठप्रदर्शनस्य घोराधमतोक्त अवमानकरत्वात् अलमर्थवाच्च व्यावर्त्तध्वमिति निष्कर्षः, शक्रजितः इन्द्रजितः अपि, चेतः मनः, लक्ष्मणस्य रामानुजस्य, सौमित्रेरित्यर्थः, वधे विनाशे, बद्धोत्सवं बद्धः दृढतया स्थितः इत्यर्थः, उत्सवः आनन्दः, उत्साह इति भावः यत्र तादृशम्, उदयुक्तमित्यर्थः, मध्यमः द्वितीय इत्यर्थः, पौलस्त्यः पुलस्त्यनन्दनः, कुम्भकर्णः इत्यर्थः, स्वयम् आत्मनैव, आयुधम् अस्त्रं, विधृतवान् गृहीतवान्, अद्यापि इदानीमपि, रामात् दाशरथेः, भयम्? भावः? अवात् किम्? इति शेषः, एतयोः सङ्ग्रामे विद्यमानयोः न युष्माकं कुतोऽपि भयं सम्भवतीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्॥ १८॥

(क) अवलम्बनम् आश्रयः, सहाय इति यावत्। प्रतिबुध्य जागरित्वा।

(ज) पुरस्कृत्य अग्रे-कृत्य।

(झ) अभ्यमित्रीणः अमित्रस्य अग्रेरभिमुखीनः, सामर्थ्याधिक्यात् अग्रेर्वा चक्षुरुद्वाहयोरित्यर्थः, "यो नक्षत्रयुतं विद्विषतः प्रति। सोऽभ्यमित्रोऽभ्यमित्रीयोऽभ्यमित्रीणोऽपि इत्यपि॥" इत्यमरः।

(ञ) स्वस्ति शुभं भवतु।

शुकः। (सविषादमात्मगतम्)। शान्तं शान्तम्। कथमविशिष्ट-कर्तृ-कर्मभावम् (ट) उभयत्र द्विवचनं प्रयुक्तमार्ष्येण।

माल्यवान्। (सखेदम्)। वत्सौ शुक-सारणौ! अद्य खल्वियं राक्षसलक्ष्मीः सर्वथा कुम्भकर्णमवलम्ब्य वर्त्तते। इदं तु न विद्मः,—(ठ)

अग्रजं वा दशग्रीवमनुजं वा विभीषणम्।
अन्वय-व्यतिरेकाभ्यां वीरः कमभिषेक्ष्यति? ॥ १८ ॥

(नेपथ्ये)।—

मा भैष्टं कमठेन्द्र-पन्नगपतौ! कश्चिन्न वैशेषिको
भूमेरद्य भरः पतिः पलभुजामाज्ञापयत्येष वाम्।—

(ट) अविशिष्टेति।—अविशिष्टः अविशेषेण उक्तः, सामान्यभावेन प्रयुक्त इत्यर्थः, कर्तृ-कर्मभावः यत्र तत् तादृशम्, उभयत्र रावणे कुम्भकर्णे चेत्यर्थः, कुम्भकर्ण-मेघनादादाविति प्रधीगदर्थेऽपि, उभयत्रापि प्रथमा-द्वितीयाद्विवचनयोरभेदादिति भावः।

(ठ) न विद्मः न जानीमः।

अग्रजमिति।—वीर विक्रान्तः, कुम्भकर्णः इत्यर्थः, अग्रजं ज्येष्ठं, दशग्रीवं वा रावणं वा, अनुजं कनिष्ठं, विभीषणं वा, कम् एतयोरुभयोः कतरम्, अन्वय-व्यतिरेकाभ्यां सत्त्वासत्त्वाभ्यामित्यर्थः, अभिषेक्ष्यति? अभिषिक्तं करिष्यति? इदं न विद्मः इति गद्यस्यवाक्येनान्वयः, अयं रावणं पराजयै विभीषणम् अभिषेक्ष्यतीति भावः। अनुष्टुप् छन्दः॥ १८॥

मा भैष्टमिति।—कमठेन्द्र-पन्नगपतौ! हे कूर्मराज-शेषनागौ। पृष्ठदेशे शिरःस्थ भूभारधारकौ! इति भावः, एष अयं, पलं मांसं, भुञ्जते भक्षयन्ति इति पलभुजो राक्षसाः तेषां, पतिः प्रभुः, विभीषणः इत्यर्थः, वां युवां, भवन्तौ इति शेषः, आज्ञापयति आदिशति, मा भैष्टं युवां भीतिं मा कुरुतम्, अद्य अस्मिन् अहनि, भूमेः पृथिव्याः, भरः भारः, कश्चित् वैशेषिकः विशेषभवः, अधिकप्रकार इत्यर्थः, न, भवेदिति शेषः; कुम्भकर्णशरीरपतनेनाधिको भरः स्यादिति भयं युवाभ्यां नैव कार्यम्। अत्र "पलभुजां पतिः" इत्यनेन विभीषण एव लक्ष्यते, रामचन्द्रस्य लङ्काराज्ये तस्य अभिषेक्तृत्वात्, ततश्च श्लोकार्द्धोऽयं रामप्रधीयेव केनापि पठित इति मन्तव्यम्। "पलभुजां पतिः" इति शब्दश्च रावणार्थकत्वं

शुकः। (सदर्षम्)। नूनमस्मदीयैर्विशेषेण किमपि विक्रान्तम्। (ड)

(माल्यवानवधूते)। (ढ)

(पुनर्नेपथ्ये)।—

दोःशैलौ हरता पृथक् पृथगथो मूर्द्धानमुत्क्षिप्तुना
रामेणापि लघूकृतं पतति यत् तत् कौम्भकर्णं वपुः॥ २०॥

माल्यवान्। हा वत्स! (इति मूर्च्छितः पतति)।

उभौ। (साश्रम्)। आर्य्य! समाश्वसिहि समाश्वसिहि।

माल्यवान्। (आश्वस्य)। वत्सौ! जीवतो रामभद्रस्य मैथिली-

"दोःशैलौ हरता" इत्यादि श्लोकपरार्द्धोक्तिः न सङ्गच्छते, कुम्भकर्णविनाशश्च छद्मरूपेण रावणकर्तृकवर्णनायाः रावणानुचरेण केनापि वा वर्णनायाः असङ्गतत्वात् इति सुधीभिर्विभाव्यम्। एतत्तु अग्रे "अद्यापि" इत्यादि माल्यवदुक्त्या स्फुटीभविष्यति। किञ्च, पक्षभुजा पति-ग्रहण रावण एव अभिमतश्चेत् तदा "कश्चिन्न वैशेषिको भरः" इत्यस्य एव व्याख्या कार्या—कुम्भकर्णजागरणेन भूमेः भरः कश्चित् वैशेषिको न, यतः स सचिवैः नर-वानरान् निहत्य अचिरादेव भूमेर्भारलाघवं कारयिष्यति, अतो मा भैष्टमिति भावः।—

(ड) विक्रान्तं विक्रमः प्रदर्शित इत्यर्थः। अत्र शुकेन यत् "अस्मदीयैः" इत्युक्तं, तत् तस्य भ्रममादाय इति प्रतीयते; रामपक्षीयस्य कस्याप्युक्तिरियम।

(ढ) अवधूते अवहिता भवति, उत्कर्णो भूत्वा भरःवसानपूर्वकं शृणोतीत्यर्थः।

भूमेर्भरो वैशेषिको न इति उदुक्तं, तत्र हेतुमाह, दोःशैलाविति।—यत् यत्, पृथक् पृथक् भिन्न-भिन्नभावेन, एकैकश इति यावत्, दोःशैलौ भुजपर्वतौ, पर्वतवत् कठिन-विशालौ वा हे इत्यर्थः, हरता छिन्दता, अशनिवत्, बाहुदयच्छेदनानन्तरमित्यर्थः, मूर्द्धानं मस्तकम्, उत्क्षिप्तुना ऊर्द्धं क्षिपता, ईषात् विच्छिद्य बाणवेगेन ऊर्द्धं नयता इति भावः, रामेणापि लघूकृतं भारशून्योकृतं, तत् ईदृक्तया प्रसिद्धं, कौम्भकर्णं वपुः कुम्भकर्णशरीरं, पतति भूमौ लुठति, कुम्भकर्णशरीरञ्च विधा विभज्य कर्त्तनात्, विभिन्नस्थानेषु पातनाच्च भाराधिक्यविरहेण यूथपोर्मध्ये नास्तीति भावः। पूर्वार्द्धञ्च रामपक्षीयस्य उक्तिरूपे उत्तरार्द्धञ्च एवं प्रकृतिः कार्या यत्, पूर्वार्द्धपाठात् समनन्तरमेव कुम्भकर्णपतनात् रामपक्षीयेण केनापि पूर्तिमनुसृत्य भरः भावहेतुः कश्चित् इति योजयेत्। आर्द्धूलविक्रीडितं छन्दः॥ २०॥

हरणादेतत् (ण) अस्माभिरान्तरेण चक्षुषा विषयीकृतमेव (त); किमिदानीं समाख्यसितव्यमस्ति।

शुकः। धिक्कष्टम्!! कौम्भकर्णं वपुः पतति, एतदपि देवेनाज्ञापयितव्यम्!! (थ)।

माल्यवान्। वत्स! अद्यापि रावणस्याज्ञा!! नूनमन्योऽन्येषां वैहासिकाः कपयो दशकण्ठमुल्लुण्ठयन्ति (द)।

सारणः। आः क्षुद्राः!—

यद्यस्ति वीर्य्यमस्त्येव तत् कर्म कथयिष्यति
मेघनादमजित्वैव धिक् प्रहासविभीषिकाम्॥ २१॥

(नेपथ्ये)।

भो भो यूथपतयः! विलुम्पन्तु (ध) भवन्तो लङ्कागोपुर-प्राकार-तोरणानि (न)।—

(ण) जीवतो रामभद्रस्य जीवन्त रामभद्रमनाहृत्य इत्यर्थः। मैथिलीहरणात् सीताहरणात् हेतोः। एतत् दुर्घटनं, कृत्यकर्णादिनिधनरूपमिति भावः।

(त) आन्तरेण चक्षुषा ज्ञानचक्षुषेत्यर्थः। विषयीकृतं गोचरीकृतं, दृष्टमित्यर्थः, ज्ञातमिति भावः, "विषयो गोचरे देशे तथा जनपदेऽपि च" इति मेदिनी।

(थ) देवेन महाराजेन रावणेन। आज्ञापयितव्यम् आदेष्टव्यम्। देवेन केन अस्मारेण वज्रनिपातसदृशमिदं वाक्यमुच्चारितम्? इति भावः।

(द) अन्योऽन्येषां परस्परेषां मध्ये। वैहासिकाः हास्यकराः, परिहासशीला इति यावत्। दशकण्ठ दशग्रीवं, दशाननमित्यर्थः। उल्लुण्ठयन्ति उपहसन्ति। दुष्टानां आज्ञा रावणस्य नैव भवितुमर्हति, नूनं कपिषु केचन रावणमुपहसितुमेवमुद्दीपयन्तीति फलितम्।

यदीति।—यदि वीर्यं वीरत्वम्, अस्ति विद्यते, अस्त्येव विद्यते एव, तत् वीर्यं, (कर्मभूतं) कर्म क्रिया, वीर्यसूचकमाचरितमित्यर्थः, कथयिष्यति प्रकटयिष्यति, चरितेनैव तत् प्रकाश्यते इति भावः, मेघनादम् इन्द्रजितम्, अजित्वैव अपराभूय एव पराभवमकृत्वैवेत्यर्थः, प्रहासविभीषिकाम् उपहासरूपभयप्रदर्शनं, धिक् निन्दामि, मेघनाद विजेतुं समर्थयेत तदा युष्माकं वीर्यवत्तां श्लाघेऽहं, अन्यथा युष्माकं विभीषिकादिरूप संरम्भं निन्दायोग्यमेवेत्यर्थः। अनुष्टुप् वृत्तम्॥ २१॥

(ध) यूथपतयः! यूथाधिनाथाः। कपिसेनापतयः! इत्यर्थः। विलुम्पन्तु विध्वंसयन्तु।

(न) भवन्त इति।—लङ्कापुरस्य लङ्कानगरस्य, गोपुरं पुरद्वारं, पुरमध्ये प्रवेशस्य

सन्नद्धेन्द्रायुधमविरलारम्भि गोर्वाणबाण-
श्रेणीवर्षं तदवजगृहे येन दुष्टग्रहेण ।—

माल्यवान् । (सोद्वेगम्) । आः !! किमनेन आवयितव्योऽस्मि ।

(इति कर्णौ पिदधाति) । (प)

(पुनर्नेपथ्ये) ।—

दृष्ट्वा काञ्चित् प्रहरणमयीं वीरयज्ञानमिष्टिं
दिष्ट्या सोऽयं संमुपगमितः शक्रजिल्लक्ष्मणेन ॥ २२ ॥

प्रधानद्वारानित्यर्थः, "पुरद्वारन्तु गोपुरम्" इत्यमरः, प्राकाराः प्राचीराः, तोरणानि बहिर्द्वाराणि, नगरप्रवेशद्वाराणीत्यर्थः, "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः ।

सन्नद्धेति ।—येन दुष्टः क्रूरः, ग्रहः अनैश्वरादिरूपः तेन, पक्षे—दुष्टः अनुचित इत्यर्थः, यज्ञः रणोद्यमः, युद्धार्थम् आयद्दः इत्यर्थः यज्ञ तथोक्तेन, अन्याययुद्धपरायणेन दुरात्मनेति भावः, "यज्ञोऽनयद्दनिर्बन्ध-सङ्गमेषु रणोद्यमे" इति मेदिनी ; सन्नद्धं व्यूढं, सुविन्यस्तमित्यर्थः, समुदितमिति यावत्, "सन्नद्धो वर्मिते व्यूढे" इति मेदिनी ; इन्द्रायुधं शक्रधनुरेव तथोक्तम्, अत्यन्त—सन्नद्धस्य वर्मितस्य, वर्मावृतस्येत्यर्थः, इन्द्रस्य देवराजस्य, आयुधम् अस्त्रम्, अयमिरित्यर्थः यत्र तादृशम्, अविरलारम्भि अविरलः निरन्तरः, आरम्भः उद्यमः, प्रवृत्तिरिति यावत् यत्र तादृशम्.अत्यन्त—अविरलः निरन्तरः आरम्भः वधः, राक्षसैरवधिनाश इति भावः यत्र तादृशम्, "आरम्भस्तु त्वरायां स्यादुद्यमे वध-दर्पयोः" इति मेदिनी ; तत् प्रसिद्धं, गोर्वाणानां देवानां, बाणश्रेणीव शर-पङ्क्तिरिव, वर्षं वृष्टिरित्यर्थः, अवजगृहे विहतं, सञ्चाधितमित्यर्थः ; पक्षे—गोर्वाणानां देवानां, युध्यमानानामिति भावः, बाणश्रेणीनां शरसमूहानां, वर्षं वर्षणं, वृष्टिधारावत् पतनमित्यर्थः, अवजगृहे प्रतिबद्धं, सविघ्नं कृतमित्यर्थः, निवारितमिति यावत्, देवाः पराजिता इति भावः । "अवग्रहो वृष्टिरोधे प्रतिबन्धे गजाशिके" इति मेदिनी ॥—

(प) आः !! इति पीडासूचकमव्ययम् ; "आस्तु स्यात् क्षेप-पीडयोः" इत्यमरः । पिदधाति आवृणोति, करास्याम् अङ्गुलिभ्यां वा इति शेषः, दुःसंवादश्रवणक्रियां इति भावः ।

काञ्चित् अपूर्वामित्यर्थः, प्रहरणमयीम् अस्त्रमयीं, वीरः शूरः, मेघनाद इत्यर्थः, यज्ञां याज्ञिकीं यत्र तादृशीम्, इष्टिं यज्ञं, निकुम्भिलाख्यमिति भावः, दृष्ट्वा अवलोक्य, लक्ष्मणेनेति भावः ; "दृष्ट्वा" इत्यत्र "इष्ट्वा" इति पाठकल्पनं समीचीनम्, इष्ट्वा अर्चयित्वा इत्यर्थः, दिष्ट्या दैवेन, दैवरूपिणेति भावः ; यद्वा—दिष्ट्या इति

माल्यवान्। सत्योऽयम् अतिदुःखो निर्दुःख इति लोक-प्रवादः, (फ) यत् (ब) अस्मिन्नपि समूलघातमभिघ्नति व्यतिकरे तथैव श्वसिमः (भ)।

यक्षः। (ऊर्ध्वमवलोक्य)। यथा समन्तादम्बरचरविमान-वीथयः ककुभां (म) मुखानि पर्य्यवष्टभ्नन्ति, (य) तथा शङ्के, (र) दुर्वारदारुणक्रोधबड़वानलनिपीयमानशोकसमुद्रो दाशरथिविजयाय सन्नह्यते (ल) देवः।

हर्षसूचकं मङ्गलसूचकं वा अव्ययम्, अतीव हर्षविषयं मङ्गलकरं वा एतदित्यर्थः; "दिष्ट्या हर्षे मङ्गले च" इति मेदिनी; लक्ष्मणेन सौमित्रिणा, सोऽयं अवयाहकः, दुष्टयह इत्यर्थः, अक्रान्तिर् मेघनादः, समुपशमितः निहत इत्यर्थः, यज्ञकर्मणा च लोकैरवयह्यन्तिः क्रियते इति ध्वनिः। मन्दाक्रान्ता वृत्तम् ॥ २२ ॥

(फ) अतिदुःख इति अतिशयितं दुःखं यस्य सः। निर्दुःखः दुःखरहितः, दुःख-बोधासमर्थ इत्यर्थः, प्रबलदुःखवेगेन सर्वानुभूतिराहित्यादिति भावः, इति लोकानां जनानां, प्रवादः प्रसिद्धिः, सत्यः।

(ब) यत् यतः।

(भ) समूलघातं समूलं इति यस्मिन् कर्मणि तत् यथा तथा। अभिघ्नति अभिहननं कुर्वति, विनाशं कुर्वतीत्यर्थः। व्यतिकरे व्यसने, विपदि इत्यर्थः, इन्द्रजिन्निधनरूपे इति भावः, "अथ व्यतिकरः पुंसि व्यसन-व्यतिषङ्गयोः" इति मेदिनी; तथैव पूर्ववदेव। श्वसिमः जीवामः।

(म) अम्बरचरेति।—अम्बरचराणां खेचराणां, देव-गन्धर्वादीनामित्यर्थः, विमानवीथयः देवयानपङ्क्तयः। ककुभां दिशाम्।

(य) पर्य्यवष्टभ्नन्ति अवलम्बयन्ति, आश्रयन्तीत्यर्थः, अवष्टम्भन्तीत्यर्थो वा, "अवष्टम्भोऽविदूरे स्यादाक्रान्ते चावलम्बने" इति मेदिनी।

(र) शङ्के मन्ये।

(ल) दुर्वारेति।—दुर्वारः अनिवार्य्यः, अत एव दारुणः उत्कटः, क्रोधः कोप एव, बड़वानलः बड़वाग्निः, तेन निपीयमानः निःशेषं यथा तथा चर्व्व्यमाणः, शोकसमुद्रः पुत्रवियोगजनितसागरः यस्य तथाभूतः, सर्व्वथा प्रबल-क्रोधेन दलितशोकोऽस्तिरिति भावः। दाशरथिविजयाय दाशरथेः रामस्य, विजयाय पराभवाय, सन्नह्यते व्यूढो भवति, बद्धपरिकरो भवतीत्यर्थः।

सारथः। (सविषादमात्मगतम्)। कष्टम्!! कथं दाशरथि-विजयायेत्यविशिष्टोपपत्तिककर्तृ-कर्मकारकार्थविषयं वयस्य-वचनम्। (व)

माल्यवान्। (उत्थाय)। तदस्माभिरपि जरसा दूषितस्य (श) आत्मनः प्रक्षालनाय प्राप्तं शस्त्रधारातीर्थम् (ष)। (इति सपरि-वारो निष्क्रान्तः)।

(विष्कम्भकः)।

(ततः प्रविशति विद्याधरहस्तमालाप्रयोगेण)।

एकः। अहो! बहोः कालात् (स) अनया गगनवीथ्या निरातङ्कमिव सञ्चरावहे। (ह) (अधोऽवलोक्य)।—

देवेन्द्रोपनिवेद्यनन्दनवनस्त्रीरत्नसाधिनी
लङ्केयं दशकण्ठविक्रमसखी यस्यां समन्तादिमाः।

(व) दाशरथेति।—अविशिष्टा अविशेषेण उक्ता, उपपत्तिः प्रतीतिर्यत्र तथाभूतः, कर्तृ-कर्मकारकयोः यः अर्थः अभिधेयः, तद्विषयं तत्सम्बन्धि, वयस्यस्य मित्रस्य, वचनं वाक्यं, तथा च, दाशरथेर्विजयाय इति समासे दाशरथेरिति कर्तरि कर्मणि च कृत्ययोगे षष्ठीविधानात् दाशरथिकर्तृकविजयस्य इति, दाशरथि-कर्मक-रावणकर्तृकविजयलाभस्येत्यर्थद्वयबोधात् अविशिष्टोपपत्तिककर्तृ-कर्मकारकत्व-मिति भावः।

(श) जरसा वार्द्धकेन। दूषितस्य अभिभूतस्य, कर्मासमर्थस्येति भावः।

(ष) प्रक्षालनाय शोधनाय, जरादोषदूरीकरणाय इति यावत्, नवीनदेहलाभाय इति भावः। शस्त्रधारातीर्थं शस्त्रधारा एव तीर्थं पुण्यक्षेत्रम्। प्राप्तं गतं, गन्तव्यमित्यर्थः, शीर्णतादोषपरिहाराय रणक्षेत्रे शस्त्राघातेन प्राणान् त्यक्ष्यामीति भावः।

(स) बहोः कालात् बहुकालात् परमित्यर्थः।

(ह) अनया उड्डापुर्या उपरिस्थया इत्यर्थः। गगनवीथ्या आकाशमार्गेण। निरातङ्कमिव निःशङ्कमिव, राक्षसानां निधनादिति रावणस्य आसन्नविनाशत्वादिति च भावः। सञ्चरावहे इत्यावः।

देवेन्द्रेति।—देवेन्द्रेण वासवेन, उपनिवेद्या रावणप्रीणनार्थं प्रदेया, उपभोग्या इत्यर्थो वा, देवेन्द्राय उपनिवेद्या समर्पणीया, देवेन्द्रस्य उपभोगाय प्रदानीया इत्यर्थो वा, या नन्दनवनस्त्री नन्दनवनीयपुष्पमाला, तच्छोभितेन शीरत्नेन यद्वि-

युद्धालोकनकौतुकोन्मुखवधूसङ्क्षोभकर्णीरथा
रथ्याः किं कथयामि यासि यदमी न व्योम्नि वैमानिकाः ? ॥२१॥

(सखेदमुत्तम)। सखे हेमाङ्गद !—

एताः पश्य पलादपत्तनभुवः सौत्रामणीनां दृशा-
मस्राम्भोभिरदेवमाहवकृतद्वारामाभिरामश्रियः।

र्शनेन, श्लाघ्यते प्रशस्यते, अभिलष्यते वा ताहशी, ताहशतोरणेन सभीहारिणीत्यर्थः, "श्लाघा स्त्रियां प्रशंसायां परिष्क्याऽभिलाषयोः" इति मेदिनी, दशकण्ठस्य रावणस्य, यो विक्रमः पराक्रमः, अजेयत्वमिति यावत्, तस्य सखी सहायः, सहायस्वरूपिणीत्यर्थः, अत्यदूराक्रम्यत्वादिति भावः; यद्वा—विक्रमसखी पराक्रमस्य साक्षिस्वरूपिणीत्यर्थः, लोकत्रयस्थितदुर्लभद्रव्यसम्भारेण शोभमानत्वादिति भावः, दृश्यन्ते इति शेषः, यस्यां सङ्कायां, समन्तात् चतुर्दिक्षु, इमाः परिदृश्यमानाः, वृहत्यः सङ्घाताश्च, आलोकने दर्शने, यत् कौतुकं कुतूहलं, तेन सम्मुखाभिः ऊर्ध्वमुखीभिः, बहूनिः राक्षसमहिलाभिः, सङ्क्षोभाः व्याप्ताः, कर्णीरथाः प्रवहणानि, "डुलि" इति प्रसिद्धाः स्त्रीरथा इत्यर्थं यासु तथाभूताः, "कर्णीरथः प्रवहणम्" इत्यमरः; रथ्याः राजमार्गान्, किं कथयामि ? अनिर्वचनीयतया कथयितुं न शक्नोमीत्यर्थः, यत यतः, रावणस्त्रीणां राजमार्गविहरणादिति भावः, अमी सम्मुखाः, वैमानिकाः विमानचारिणो देवाः, व्योम्नि आकाशे, न यान्ति न सञ्चरन्ति, राक्षसमहिलानां सन्दर्शनभयादिति भावः। यद्वा—यस्याः समन्तादिमाः रथ्याः युद्धालोकनकौतुकोन्मुखवधूसङ्क्षोभकर्णीरथाः, दृश्यन्ते इति शेषः, तथा यस्याः सङ्कायाः, व्योम्नि आकाशे, सङ्क्षोभरहितस्थूलदेशे इत्यर्थः, अमी वैमानिका न यान्ति इति यत्, तत्र किं कथयामि ? रावणस्य दुर्दमः प्रभावो यत् सङ्कायाः उपरिष्टादाकाशेऽपि वैमानिका अपि गन्तुं न प्रभवन्तीति भावः। आर्दूलविक्रीडितं वृत्तम् ॥ २१ ॥

एता इति।—सुत्रामा इन्द्रः, "इन्द्रो मरुत्वान्मघवा ...। सुत्रामा गोत्रभिदृज्री" इत्यमरः; तस्य इमाः सौत्रामण्यः, ताासाम इन्द्रसम्बन्धिनीनां, दृशा नेत्राणां, सहस्रसङ्ख्यानां नयनानामित्यर्थः, अस्राम्भोभिरश्रुजलैः, अदेवमाहवाः; देवमाहवाः; देवसम्भुपालिताः न भवन्ति इति ताहशाः, इन्द्रस्य सहस्रनयनत्वेन सुतजलैरेव देवसम्भुपालितत्वात् तैरेव च आरामपोषणादिति भावः, "देवो मघवा-देवसम्भु-देवस्त्रोद्विपालितः। आजन्दीमाहवी देवमाहवश्च यथाक्रमम्॥" इत्यमरः; ये गृहारामाः निष्कुटाः,

एतासु प्रतिघातिविक्रमकथोपालम्भवैतण्डिकैः
क्रूरेन्द्रध्वजिनोजयानुकृतिभिर्डिम्भैरपि क्रीडितम् ॥ २४ ॥

द्वितीयः । सखे रत्नचूड ! किमुच्यते,—

रक्षांसीति पुराऽपि संशृणुमहे वीरस्तु कस्तादृशो
जागर्त्ति स्म जगत्त्रयोविपदलङ्कर्मीणदोर्विक्रमः ? ।
अश्वत् हारभुवि प्रशस्तिरचनावर्ण्यायमानेक्षण-
श्रेणीसम्भृतगोत्रभिन्नमयजय्यस्तभो यथा रावणः ॥ २५ ॥

गृहोपवनानि इत्यर्थः, "गृहारामास्तु निष्कुटाः" इति "आरामः स्यादुपवनम्" इति चामरः, ते अभिरामा मनोहारिणो यौ शोभा यासां तथाभूताः, एता परिदृश्यमानाः, पलाद्यत्तनभुवः पलादाना मांसानां निलया, राक्षसानामित्यर्थः, पत्तनभुवः नगरस्थस्थानानि, राक्षसनगरोपरिष्टाणीत्यर्थः, पश्य अवलोकय, एतासु पलादपत्तनभूषु, डिम्भैरपि शिशुभिरपि, "पोतः पाकोऽर्भको डिम्भः पृथुकः शावक शिशुः" इत्यमरः; क्रूरा क्रता, इन्द्रस्य देवराजस्य, ध्वजिनीना सेनाना, "ध्वजिनी वाहिनी सेना" इत्यमरः; जयानुकृतिः पराजयानुकरणं यैः तथाभूतैः, अत एव प्रतिघातिनाम अरातीना, अरूणामित्यर्थः, "अभि(प्रति)घाति परावाति-मथ्यर्थ-परिपन्थिनः" इत्यमरः; विक्रमकथासु शौर्यविषयकालीचनासु, उपालम्भे अधिक्षेपे, निन्दाकरणे इत्यर्थः, वैतण्डिकैः वितण्डा विवादः प्रयोजनमेषामिति तथोक्तैः सद्भिः, परस्परं कलहं कुर्वाणैः सद्भिरित्यर्थः, क्रीडितं खेलितं, रावणेन देवसेनाना यथा पराजयः कृतः, अवज्ञा बालका अपि तदनुकरणरूपा क्रीडां कुर्वन्तीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २४ ॥

रक्षांसीति ।—पुराऽपि पूर्वमपि, रावणप्रादुर्भावात् प्रागपीत्यर्थः, रक्षांसि राक्षसाः, सन्तीति शेषः, इति संशृणुमहे एतावन्मात्रमस्माभिः परम्परं श्रुतमित्यर्थः; व्यतीहारे आत्मनेपदम्, तु किन्तु, जगता त्रयी त्रिलोकीत्यर्थः, तथा विपदः अनर्थस्य, अनर्थोत्पादनस्येत्यर्थः, यद्वा—विपदि अनर्थे, अनिष्टसाधने इत्यर्थः, अलङ्कर्मीणः कर्मठस्य, समर्थ इत्यर्थः, "कर्मठोऽलं-कर्मीणः" इत्यमरः, दोर्विक्रमः बाहुबल यस्य तथाभूतः, विभुवनविजयीति भावः, तथा अश्वत् निरन्तरं, हारभुवि हारदेशे प्रशस्तिरचना प्रशंसालिपिरित्यर्थः, रावणस्येति भावः, तथा वर्ण्यमाना अक्षरायमाणा, वर्णमालेवेत्यर्थः, या दृक्चक्षुषां नयनपङ्क्तयः, सहस्र नेत्राणीति

रत्नचूड० । सखे हेमाङ्गद ! पश्य पश्य, पौलस्त्यप्रत्तन-प्रतोलीषु दीयमाने सन्नाहपटहे (क)—

दिग्दन्तावलदन्तमौक्तिकमयद्वास्तोरणस्रग्विणो
गीर्वाणाधिपतिप्रतोष्टनिगडोन्मृष्टान्यवन्दीशुचः ।
वीरश्रीसहपांशुकेलिसुहृदो मन्दोदरीबन्धुता-
श्लोटीरासुरसुन्दरीसुरभयः क्षुभ्यन्ति रक्षोगृहाः ॥ २५ ॥

भाव०, तैः सम्मृतः परिपूर्णः, व्याप्त इत्यर्थः, संयुक्त इति यावत्, यः गीर्वाणित् इन्द्रः, तस्यायं तदात्मकः, इन्द्रस्य इत्यर्थः, जयस्तम्भ विजयसूचकः सभः यस्य तथोक्तः, रावणो दशानन, यद्वा यादृशः, तादृशः रावणतुल्य, वीर शूरः, क आगच्छति स्म ? प्रकाशते स्म ? न कोऽपीत्यर्थः, राक्षसा जगति बहवो विद्यन्ते, किन्तु ईश्वरो यस्य द्वारदेशे नियत मृत्यभावेन प्राक्प्रतिष्ठिष्ठति, एतन्मूलः विभुत्वे रावणादन्यो राक्षसवीरो न कदाऽपि भूत; इति पर्य्यवसितोऽर्थः । शार्दूलविक्रीडित छन्दम् ॥ २५ ॥

(क) पौलस्त्येति ।—पौलस्त्यस्य रावणस्य, पत्तन नगर, "पुः स्त्री पुरो नगर्यौ वा पत्तनं पुटभेदनम्" इत्यमरः, तस्य प्रतोलीषु रथ्यासु, मार्गेषु इत्यर्थः "रथ्या प्रतोली विप्रिख्या" इत्यमरः । दीयमाने ताड्यमाने इति भाव०, सन्नाहपटहे सङ्ग्राम-सूचकभेरौ ।

दिग्दन्तेति ।—दिशां पूर्वादीना, दन्तावलाः हस्तिन, दिशाना इत्यर्थः "दन्तौ दन्तावलौ हस्ती द्विरदोऽनेकपो द्विप" इत्यमरः, तेषा दन्ता मौक्तिकानि मुक्ताफलानि च, तत्प्रभवा इति भाव०, तन्मयौ तन्निर्म्मिता इत्यर्थः, हारा, तोरणस्रक् वहिर्द्वार-माला च, वहिर्द्वारविलम्बिनी मालिकेत्यर्थः, यद्वाऽक्षं दन्तमयौ द्वार् मौक्तिकमयौ तोरणस्रगिति भाव० सङ्गत, गीर्वाणाधिपतिना देवेन्द्रेण, प्रतोष्टा गृहीताः, सण्ढा इति यावत्, निगडोन्मृष्टाना निगडबद्धानाम्, अन्याना स्वव्यतिरिक्ताना, वन्दीना कृतबन्धनाना स्त्रीणा, शुचः शोका येषु तथोक्ता०, वीरश्रिया वीराणा शूराणा, श्रिया लक्ष्म्या, विजयलक्ष्म्या इत्यर्थः सह पांशुकेलि धूलिक्रीडा तत्सुहृद तत्सङ्गिन इत्यर्थः, तद्गृहवासिन: सर्वे अबालवृद्धा एव रणभूमौ विपक्षान् विजित्य तेषां श्रीमि गृहशोभा वर्द्धयन्तीति भाव० मन्दोदरी रावणमहिषी, असुरकन्येति भाव०, तया या बन्धुता सख्य तया श्लोटीरा, गर्विता०, "श्लौटीरस्तु मतो गर्वे" इति शाश्वत०, या असुरसुन्दर्य; असुरस्त्रिय०, तासि, सुरभय: क्षात्रा०, मनोज्ञा: इत्यर्थः,

ईनाङ्दः । (विदूषक) । ननमिदानीमत्र—

दृष्ट्वा राघवमेकराक्षसवनस्वच्छन्ददावानलं
जानक्यां निजवल्लभस्य परमं प्रेमाणमालोक्य च ।
काङ्क्षन्तौ मुहुरात्मपक्षविजयं भङ्गञ्च मुग्धा मुहु-
र्ध्यायन्तौ ध्रुवमन्तरालपतिता मन्दोदरौ वर्त्तते ॥ २७ ॥

रत्नभूः । (सक्रोधम्-स्मितम्) । वयस्य ! विबुधराजविजयविक्रम-क्रीतचेतसा (ख) हृदयपितामहेन स्वयं परमेष्ठिना (ग) प्रतिष्ठितेन्द्रजिन्नामधेयशेषस्य तादृशस्य तनूजस्य (घ) शुचा विचेष्ट-

---

"सुरनिः प्रह्लकोलाहलिभुरा गोषु योषिति । सुगन्धि-ज्ञालधौतेषु" इति मेदिनी ; रक्षोगणाः राक्षसानां गणाश्च, शुभ्यन्ति शुम्भा भवन्ति, यच्छया भवन्तीति यावत्, सन्नाहपटहनादादिति भावः । आर्दूलविक्रीडितं वृत्तम् ॥ २६ ॥

दृष्टेति ।—मन्दोदरी रावणमहिषी, राघवं रामम्, एकः अद्वितीयः, राक्षसाः निशाचरा एव, वनानि काननानि, तेषां तेषु वा स्वच्छन्दं निरवग्रहः, निर्बाध इत्यर्थः, स्वेच्छाप्रवृत्तः इति यावत्, "स्वतन्त्रोऽवाहतं स्वैरी स्वच्छन्दो निरवग्रहः" इत्यमरः ; दावानलः वनाग्निः तत्तत्स्वरूपमित्यर्थः, राक्षसवनदाहकमिति यावत्, दृष्ट्वा अवलोक्य, तथा जानक्यां सीतायां, निजवल्लभस्य निजजानस्य, रावणस्य इत्यर्थः, परमम् अत्यर्थं, प्रेमाणम् अनुरागम्, आलोक्य दृष्ट्वा च, मुग्धा विमूढा, अत एव मुहुः पुनः पुनः, सदाचिदिति भावः, आत्मपक्षायाः स्वपक्षायाः, राक्षसानामित्यर्थः, विजयं विशिष्टं जयं, काङ्क्षन्ती अभिलषन्ती, तथा मुहुश्च सदाचिच्चेति भावः, भङ्गं पराजयं, ध्यायन्ती चिन्तयन्ती सती, ध्रुवं निश्चयेन, अन्तरालपतिता जय-पराजय-चिन्तयोर्मध्यवर्त्तिनी, वर्त्तते तिष्ठति, स्वपक्षीयजये रावणः सीताप्रेमवशो मा परित्यक्ष्यति, अतश्चायं जयो मम वैघव्यमित्युभयथैव ममानिष्टमिति चिन्ताकुला तिष्ठतीति भावः । आर्दूलविक्रीडितं वृत्तम् ॥ २७ ॥

(ख) विबुधेति ।—विबुधानां देवानां, राजा अधिपतिः विबुधराज इन्द्रः, तस्य विजये पराजये, यो विक्रमः शौर्यं, तेन क्रीतं वशं-गतं, चेतः चित्तं यस्य तथाभूतेन ।

(ग) परमेष्ठिना ब्रह्मणा, "ब्रह्माऽऽत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः" इत्यमरः ।

(घ) प्रतिष्ठितेति ।—प्रतिष्ठितं संज्ञापितमित्यर्थः, इन्द्रमिति यावत्, इन्द्र-

मानामरातिगृहिणीम् (ङ) अपि नैवमुपक्रोष्टुम् (च) अर्हसि। (पुरोऽवलोक्य च)। हस्तदक्षिणेन कथमयं द्विधा (छ) विभज्यते महाजनः॥ (निरूप्य च सभय-कौतुकम्)। सखे! पश्य पश्य—

न्यञ्चन्न्यञ्चद्धरित्रीधृतचरणभरस्पन्द्हासैकदृष्टि-
व्यावल्गद्यौगपद्योत्सुकसकलभुजाक्रान्तदिक्चक्रवालः।
क्रीधक्रूराक्षिरक्तोत्पलरचितवियत्तोरणस्रज्जि बिभ्र-
द्वक्त्राणि प्रत्यनीकप्रसरसरभसो निर्जिहीते दशास्यः॥ २८॥

जित् वासवविजयी, इति नामधेयं नाम, नाममात्रमित्यर्थः, शेषः अवशेषः यस्य तथाविधस्य। तादृशस्य महावीरस्येति भावः। तनूजस्य पुत्रस्य, मेघनादस्येति शेषः।

(ङ) मुधा मौढ्येन, विचेष्टमाना विरुद्धमाचरन्ती, व्याकुलतया विचरन्ती-मित्यर्थः, क्रन्दनीमिति यावत्। वरातिगृहिणीं श्रेष्ठपत्नीम्।

(च) उपक्रोष्टुं विनिन्दितुम्; "उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे" इत्यमरः।

(छ) हस्तदक्षिणेन हस्तस्य दक्षिणभागे, दक्षिणस्यां दिशि इत्यर्थः। द्विधा भागद्वयेनेत्यर्थः। महाजनः जनता इत्यर्थः।

न्यञ्चदिति।—न्यञ्चन्ती न्यञ्चन्ती न्यग्भवन्ती न्यग्भवन्ती, अतिशयेन निम्नी-भवन्तीत्यर्थः, रावणपदभरेण तत्क्षेपणपदभरेण वा इति भावः, या धरित्री पृथ्वी, तस्या धृतः आर्पितः, चरणभरः पादयोर्भारः येन तथोक्तः, चन्द्रहासे निजकरवाले, एका केवला, दृष्टिः नयनवीक्षणं यस्य तथाभूतः, निजकरधृतखड्ग आत्मदृष्टिरित्यर्थः, व्यावल्गद्भिः सञ्चलद्भिः, यौगपद्येन समकालत्वेन, उत्सुकैः अभीष्टसाधनायसमुद्यतैः, स्वव्यापारव्यग्रैरित्यर्थः, "इष्टार्थोद्यता उत्सुकः" इत्यमरः, सकलैः समस्तैः, भुजैः बाहुभिः, विंशत्येति भावः, आक्रान्तं व्याप्तं, दिक्चक्रवालं दिङ्मण्डलं येन तथाविधः, क्रोधेन कोपातिशयेन, क्रूराणि भीषणानि, आरक्ता लोहितवर्णा इति भावः, अक्षीणि एव नेत्राण्येव, विंशतिसङ्ख्याकानीति भावः, रक्तोत्पलानि कोकनदानि, तैः रचिता यजिता इत्यर्थः, वियति आकाशे, तोरणस्रक् वहिर्द्वारविलम्बिमाला यैः तथाभूतानि, वक्त्राणि मुखानि, दशसङ्ख्याकानीति भावः, बिभ्रत् दधानः, प्रत्यनीकेषु प्रतिभटेषु, शत्रुषु इत्यर्थः, प्रसराय अभिगमनाय, सरभसः सवेगः, त्वरावानित्यर्थः, दशास्यः रावणः, निर्जिहीते निर्गच्छति, जङ्घापुरादिति शेषः। अनुष्टुप् वृत्तम्॥ २८॥

देवाकरः (निर्वर्ण्य)। अहो! दृष्टचरमपि (ज) अस्य साङ्ग्रामिकमोजायितमयातयाममिव भीषयते। (झ) सखे रत्नचूड!—

महत्वदम्भोलिक्षणघटितघोरक्षयथुना
निसर्गोदयेन प्रसभमुरसा पीतगगनः।
श्रियं देवद्रोचीं निजभुजबलोद्दामकरिणी-
मयं कुर्वन् वीरः स्मरति कथमासीदयमुखः? ॥ २८ ॥

रत्नचूडः। सखे! किमुच्यते, महतामप्युपरि किमप्यय रावणः,—(ञ)

(ज) दृष्टचरमपि दृष्टपूर्वमपि, प्राक् दृष्टमपीत्यर्थः।

(झ) साङ्ग्रामिकं युद्धसम्बन्धि, युद्धसाधिकमित्यर्थः। ओजायितं ओजस्विता, प्रताप इति यावत्। अयातयाममिव अजीर्णमिव, अपुरातनमिवेत्यर्थः, नवमिवेति यावत्, सद्यो दृष्टमिवेति भावः, "ओजः च परिभुक्तस्य यातयाममिदं द्वयम्" इत्यमरः। भीषयते भापयति, भयमुत्पादयतीत्यर्थः।

महत्वदिति।—अयं उद्ग्रामयोद्मुख इत्यर्थः, वीरः शूरः, दशमुखः रावणः, महतः देवाः यस्य सन्तीति महत्वान् इन्द्रः, "इन्द्रो महत्वान् मघवा" इत्यमरः; तस्य दम्भोलिना वज्रेण, "क्रादिनो वज्रमस्त्री स्यात्···। दम्भोलिरस्त्रियाम्।" इत्यमरः; क्षणम् अल्पकालमात्रं, न तु चिरमिति भावः, घटितः कृतः, उत्पन्न इत्यर्थः, घोरः भीषणः, क्षतिप्रवृत्त इत्यर्थः, क्षयथुः भीरुः, क्षोततेति भावः यत्र तादृशेन, निसर्गोदयेन स्वभावत एव विप्रलीन, उरसा बलेन, प्रसभं हठात्, बलपूर्वकमित्यर्थः, तदृशया तया, पीतम् आक्रान्तं, यदा—"उरसा" इत्यनन्तरम् अकारो लुप्तो द्रष्टव्यः, तेन अपीतं मतम्, उत्पतितमिति यावत्, आक्रान्तमिति भावः, गगनम् अन्तरीक्षं, सुरपुरमिति यावत् येन तथाभूतः सन्, देवान् अश्नुतीति देवद्रोचीं तां देवानुवर्त्तिनीं, देवसम्बन्धिनीमित्यर्थः, "देवान् अश्नुते देवद्राङ्" इत्यमरः; श्रियं लक्ष्मीं, कथं केन प्रकारेण, निजभुजबलेन स्वीय-बाहुबलेन, विप्रतिपन्नाऽतिरूक्षकारणमस्येत्यर्थः, उद्दामकरिणीं मत्तहस्तिनीं, सदृशं स्वस्य अधीनमिति यावत्, कुर्वन् विदधत्, आसीत् अवर्त्तत, तत् अरवि? स्मृतिविषयीकरोषि? मिश्रयिष्यो इत्यम॥ २८॥

(ञ) महतामपि महाप्रभावसम्पन्नानामपीति यावत्, किमपि अवर्णनीयं, वाङ्

एनं कल्पतरूद्भवैरसुकरव्याजैः सदा भूषणै-
राराध्नोति सुराधिपः किमपरं दीनो नदीनां पतिः।
दण्डाधिक्यभयात् कथं-कथमपि स्वल्पोपनेयान् मणी-
नप्यस्मै परिशोधयत्यपदिशन् निःसम्पदः स्वाकरान् ॥१०॥

ईनाशब्दः। (समयम्)। कथमयं परापतित (ट) एवासम-
समरहर्षहेषमाण-वनायुज-वाजिनिवह-वितीर्ण-कौनाश्व-कासर-

प्रख्यापयितुमसमर्थमिति यावत्, उपरि ऊर्ध्वदेशे, अतिमहान् इति भावः, रावणस्य महत्त्वं सर्वातिशायि वर्णनातीतश्चेति समुदायार्थः।

एनमिति।—सुराधिपः इन्द्रः, कल्पतरूद्भवैः कल्पवृक्षप्रसूतैः, असुकरादि असुलभानि, व्यज्यन्ते गम्यन्ते, अनुभूयन्ते इति यावत् इति तथोक्तैः, बहुमूल्यैरपि दुष्प्रापैरिति भावः, भूषणैः अलङ्कारैः, एनं रावणं, सदा नित्यम्, आराध्नोति सेवते, किमपरम् अन्यत् किं, वक्तव्यमिति शेषः, नदीनां पतिः समुद्रः, दण्डाधिक्यभयात् दण्डोऽस्येव, एतस्मात् अधिको मा भूदिति प्रख्यापयेति भावः, दीनः दुःखितः सन्, स्वाकरान् स्वविहीनकरत्वात् ईतोरिति भावः, स्वस्य निजस्य, आकरान् उत्पत्तिस्थानानि, स्व-गर्भानि रत्नानामुत्पत्तिस्थानानीति भावः, निःसम्पदः सम्पत्तिविहीनान्, रत्नशून्यानिति यावत्, अपदिशन् कुर्वन्, कथं-कथमपि अतिकृच्छ्रेण, यद्वा—कथं-कथमपि भीत-भीतं यथा तथा, अस्मै रावणाय, स्वल्पोपनेयानपि स्वल्पवाह्यानपि, स्तोकानिति भावः, मणीन् रत्नानि, यद्वा—स्वाकरान् निःसम्पदः अपदिशन् अपि मणीन् स्वल्पोपनेयान्, कुलेति शेषः, स्वल्पे वहनं कुलेत्यर्थः, परिशोधयति ददातीत्यर्थः। प्रार्थनाविक्रीडितं इदम् ॥ १० ॥

(ट) परापतितः समागतः।

(ठ) असमेति।—असमे अतुल्ये, तुलनारहिते इत्यर्थः, "राम-रावणयोर्युद्धं राम रावणयोरिव" इति कविवचनादिति भावः, समरे सङ्ग्रामे, यो हर्षः आनन्दः, तस्मात् इति यावत्, तेन हेषमाणो क्रेषाशब्दं कुर्वन्, "हेषा क्रेषा च निःस्वनः" इत्यमरः; यः वनायुज वाजिनिवहः वनायुजाख्यदेश(आरब)भवाश्वसमूहः, तेन वितीर्णः दत्तः, कौनाश्वखाशरश्च यमसम्बन्धिश्च, "कौनाशः कर्बुरे वृद्धे कृतान्तोपायुधादिषु" इति विश्वः; "तुल्यादौ सदृशो वाह-विषत्खाशरशैरिभाः"

कर्णज्वरेण प्रजविना (ठ) रथेन कार्मुकपाणिः (ड) महावीरः।

रक्षपुङ्गवः। (सभयाद्भुतम्)।—

कल्पान्तक्रूरसूरोत्करविकटमुखो मानुषद्वन्द्वयुद्ध-
क्रीड़ाकण्डूयदूर्जस्वलसकलभुजालोकभूयोविलज्जः।
सम्भूयोत्तिष्ठमानस्वपरबलमहाशस्त्रसम्पातभीमा-
मुर्वीं गीर्वाणगोष्ठीगुरुमदनिकषो नैकषेयः पिधत्ते ॥३१॥

देवाङ्गदः। (सकौतुकम्)। सखे! दक्षिणतः (ठ) पश्य तावत्—

इत्यनरः, कर्णज्वरः श्रवणव्याधिः यस्य तथाभूतेन, तीव्रशब्देन यमवाहनश्रवणपीडाजनकत्वादिति भावः। प्रजविना प्रकृष्टवेगवता।

(ड) कार्मुकपाणिः धनुर्धरः, धनुर्द्धर इत्यमरः।

कल्पान्तेति।—कल्पान्ते प्रलयकाले, क्रूरः दारुणः, कालानलवर्णीति भावः यः सूरोत्करः सूर्यसमूहः, द्वादशसूर्य इत्यर्थः, तद्वत् विकटानि भीषणानि, मुखानि आननानि यस्य तथोक्तः, मानुषद्वन्द्वेन मानवयुगलेन, राम-लक्ष्मणाख्येनेति भावः, यः युद्धं सङ्ग्रामः, तदेव क्रीडा खेला, क्रीडावत् अक्लेशकरम् इत्यर्थः, तया कण्डूयन् कण्डूतिं कुर्वन्, ऊर्जस्वलाः बलवन्तः, ये सकलाः समस्ताः, भुजाः बाहवः विंशतिबाहव इति भावः, तेषाम् आलोकेन दर्शनेन, भूयः अधिकं यथा तथा, विलज्जः लज्जितः, मानुषौ मनुष्यतुल्यबलौ, एताभ्यां सह मम विंशतिभुजबलं युद्धे लज्जाकरमिति भावयन्निति भावः, गीर्वाणगोष्ठीनां देवसमाजानां, गुरुमदान् यः मद गर्वः, वयमेव सर्वोपरिवर्त्तिन इत्येवरूप, अहङ्कार इति यावत्, तस्य निकषः कषपाषाणः, गर्वस्य परीक्षाज्ञानमित्यर्थः, विध्वंसक इति भावः, नैकषेय निकषासुतः रावणः, सम्भूय मिलित्वा, उत्तिष्ठमानानाम् उद्यमं कुर्वतां, स्व परबलानां स्वसैन्यानां विपक्षसैन्यानाञ्चेत्यर्थः, महद्भिः अतिप्रचण्डैः, शस्त्रसम्पाते आयुधनिक्षेपैः, भीमां भीषणाम्, उर्वीं पृथ्वीं, पिधत्ते आच्छादयति निजशरीरेण वा, शस्त्रवर्षेण वा, स्वसैन्यायि-सैन्यैः वेति शेषः। 'स्वपर' इत्यमरः ॥ ३१ ॥

(ठ) दक्षिणतः दक्षिणस्यां दिशि।

अगस्त्याश्रमसद्यःशमितविपुलोच्छ्रायविषमा-
नुदस्यन्तः सेतावलगितवतो विन्ध्यशिखरान्।
शिरःसङ्ख्यासत्याकृतदशमुखालोकरभसा-
दुपेत्यातित्रस्ताश्चपलमपसर्पन्ति कपयः ॥ २२ ॥

स्रग्धरा। (हृदा सप्ताश्वम)।—

शस्त्रीकृतान् कपिभिरापततो मुदैव
विक्रम्य चन्दनतरून् दधते पलादाः।
तत्सङ्गिनस्तु भुजगाः क्षणपाशबन्ध-
दुःखासिकामवयवेषु दिशन्त्यमीषाम् ॥ २३ ॥

अगस्त्येति।—अगस्त्यस्य कुम्भीसम्भवस्य मुनेः, आश्रमस्य आटेशेन, सद्यः तत्क्षण-मेव, शमिताः निरस्ताः, नम्रीभूता इत्यर्थः, विपुलोच्छ्रायेण महोन्नत्या, विषमाः तीव्राः तान्, यद्वा—अगस्त्याश्रमस्य सद्यः शमितेन प्रशान्तिं गतेन, नम्रीभूतेन इत्यर्थः, विपुलोच्छ्रायेण महोन्नत्या हेतुना, विषमान् उन्नतानतान्, क्वचिदुन्नतान् क्वचिदव-नतान् इत्यर्थः, सेतौ सेतुबन्धने, अवलगितवतः अवलग्नान्, सेतुबन्धनार्थमानीतान् किन्तु आधिक्येन प्रयोजनाभावात् परित्यक्तानिति भावः, विन्ध्यशिखरान् विन्ध्य-गिरिशृङ्गान्, उदस्यन्तः उत्क्षिपन्तः, कपयः वानराः, उपेत्य समीपं गत्वा, रावणस्येति भावः, शिरसां मूर्द्धां, सङ्ख्यायै एकादिकमेव गणनायै, सत्यालोकतः सत्यत्वेन स्वीकृतः, सत्यरूपेण परिज्ञातः इत्यर्थः, रावणस्य दशमुखत्वं सत्यं न वेति सङ्ख्या ज्ञातुं समीपं गत्वा सङ्ख्याकरणेन सत्यत्वेन स्वीकृत इति यावत्, यः दशमुखः रावणः, तस्य, यद्वा—सत्याकृतानि दश दशमङ्ख्याकानि, मुखानि आननानि, तेषां यदालोकरभसात् दर्शनसम्भ्रमात्, अतिशयेन त्रस्ताः भीताः सन्तः, चपलं चञ्चलं यथा तथा, क्षिप्रमिति यावत्, अपसर्पन्ति अपगच्छन्ति, पलायन्ते इत्यर्थः। शिखरिणी वृत्तम् ॥ २२ ॥

शस्त्रीकृतानिति।—पलं मांसम्, अदन्ति खादन्तीति पलादाः राक्षसाः, कपिभिः वानरैः, शस्त्रीकृतान् प्रहरणीकृतान्, अस्त्ररूपेण व्यवहृतान् इत्यर्थः, आपततः आगच्छतः, चन्दनतरून् चन्दनवृक्षान्, विक्रम्य उत्क्रम्य, उत्पु-ट्येति यावत्, यद्वा—विक्रम्य प्रभूतबलमाश्रित्य, अतिसम्पदा इत्यर्थः, "विक्रमस्तु पुमान् क्लान्तिमाने स्यात् अतिसम्पदि" इति मेदिनी; मुदैव हर्षेणैव, दधते

वैमानिकः। (विहस्य)। हतोऽपि तावत्—

रक्षःस्वयंवरविडम्बपराङ्मुखीभिः
पुष्पोत्करं सुरवधूभिरनुज्झितेऽपि।
श्लक्ष्णीकृतेन तरुणा हरिणा हतोऽसौ
नक्तञ्चरः स्वपिति तत्कुसुमावकीर्णः॥ ३४॥

रत्नचूडः। (चिरं विमृश्य)। सखे! पश्य पश्य—

स्वतनुरुचिभिर्दीर्घाङ्गीं श्यामितः सृजतां निजै-
रथ विदधतः कायाभोगैरकाण्डतमस्विनीम्।
दधति नितरामुद्दीप्राणामधश्छिदुरश्रियो
हरिहुतभुजां धूमच्छायाममी रजनीचराः॥३५॥

धारयन्ति, तु किन्तु, तत्साङ्गतः तत्सङ्गा इत्यर्थः, चन्दनतरुच्छायाश्रिता इति यावत्, भुजगाः सर्पाः, अमीषां पक्षादीनाम्, अवयवेषु अङ्गेषु, चर्म अजस्रालम्बालम्बित्यर्थः, यद्वा—चर्मणेव तत्त्वणमेव, हृदयधारणालम्बवत्यर्थः, पाशवत्सन्नागपाशाख्यास्त्रेण बन्धनवत् बन्धनेनेत्यर्थः, दुःखानिका दुःखेन अवस्थानं, राक्षसानामिति भावः, दिशन्ति जनयन्ति। चन्दनतरुषु भुजगास्तिष्ठन्तीति प्रसिद्धिः। वसन्ततिलकं वृत्तम्॥ ३३॥

रक्ष इति।—रक्षसां निशाचराणां, सङ्गामङ्गतानामिति भावः, स्वयंवर एव स्वेच्छया पतित्वेन वरणमेव, विडम्ब तिरस्कारः, गर्वव्यापार इति यावत्, तस्मात् पराङ्मुखीभिः विमुखीभिः, सुरवधूभिः सुराङ्गनाभिः, अप्सरोभिरित्यर्थः, पुष्पोत्करं पुष्पसमूहैः, अनाक्रान्तेऽपि अत्यक्तेऽपि, युद्धमार्गात् अङ्गेऽपि इत्यर्थः, पुष्पवर्षणे अक्रान्तेऽपि इति यावत्, सङ्गामङ्गता वीराः स्वर्गं गच्छन्ति, तांश्च सुराङ्गनाः पुष्पवृष्ट्या अभिनन्द्य अयं हतः स्वर्गं यास्यति, किन्तु राक्षसानाम् अतिदुराचारतया सुराङ्गनानां पीडनकारितया च तेषां स्वयंवरणे पराङ्मुखत्वमिति भावः, हरिणा श्रीपतिना, वामनरूपेण इत्यर्थः, "शुक्राहिकपिभेकेषु हरिणं कापिले त्रिषु" इत्यमरः; श्लक्ष्णीकृतेन अक्षतया श्लक्ष्णेन, तरुणा वृक्षेण, पुष्पितेन इति भावः, हतः विनष्टः, असौ नक्तञ्चरः राक्षसः, तस्य तरोः, कुसुमैः पुष्पैः, अवकीर्णः अभिव्याप्तः, अनिष्टः सन् इत्यर्थः, स्वपिति निद्राति, रत्नभूमाविति शेषः। वसन्ततिलकं वृत्तम्॥ ३४॥

स्वतन्वातन—छिदुरा भङ्गुरा, विनश्वरीत्यर्थः, श्रीः शोभा येषां तथाभूताः;

इनाङ्दः। (साक्षतम्)। सखे। पश्य पश्य—

किमपि कपयः कर्माचार्यं महातरुशस्त्रिणो
विदधति यथा दिक्कूलेभ्यस्तथाऽपसरन्त्यमूः।
ध्रुवमवपतद्वृत्त.श्रेणीविमुक्तनभोऽन्तर-
प्रतिभरणिकानिःस्यामानो दशाननकौर्त्तयः॥ २६॥

रक्षपुरुषः। (ससम्भ्रमम्)। अहह! दारुणमुपस्थितम्—

क्रमेण क्षयखामादिति भावः, अनो परिदृश्यमाना एते, रजनीचराः राक्षसाः, निजैः स्वीयैः, कायाभोगैः शरीरस्य परिपूर्णताभिः, दंदहिलाः दरिद्रयथः, "आभोगः परिपूर्णता" इत्यमरः, अकाण्डे अनवसरे, अप्राप्तकाले इत्यर्थः, "काण्डोऽस्त्री दण्ड-वाणार्व-वर्गावसरवारिषु" इत्यमरः, तमस्विनीं तामसीं रात्रिं, विदधत जनयन्तः सन्तः, क्षणवयत्वादिति भावः, खतनुरुचिभिः निजदेहकान्तिभिः, इतः अस्मिन् प्रदेशे, वानराधिष्ठितप्रदेशे इत्यर्थः, व्योम् आकाशं, दीर्घाङ्गो दीर्घादवसा, सृजता कुर्वता, पिङ्गलवर्णप्रभया इति भावः, अधः निम्नदेशं, भुवोऽर्थः, नितराम् अत्यर्थम्, उद्दीप्ताभां जयन्तीमेन दीप्यमानामित्यर्थः, हरयः वानरा एव, हुतभुजः अग्नयः, तेषां, धूमच्छायां धूमकान्तिं, दधति धारयन्ति, वानरा भूमिष्ठाः पिङ्गलवर्णा दीप्यमानाश्चेति अग्निसाम्यं, राक्षसास्तु रथारूढत्वादुपरिवर्त्तनः, पराजयलाभेन मङ्गुरतया; क्षणवर्त्तित्वेन धूमसाम्यमिति भावः। उपमालङ्कारः। हरिणी वृत्तम्॥ २५॥

किमपीति।—कपयः वानराः, महातरुशस्त्रिणः प्रकाण्डवृक्षप्रहरणाः सन्तः, अत्यद्भुतान् वृत्तान् अस्त्रकौशलानि प्रयुञ्जानाः सन्तः इत्यर्थः, किमपि अनिर्वचनीयम्, आश्चर्यं विस्मयजनकं, कर्म क्रियां, यथा विदधति कुर्वन्ति, तथा अमूः एताः, दशाननकौर्त्तयः रावणयशांसि, अवपतद्भिः अवलुठद्भिः, रणभूमाविति शेषः, रक्षसां राक्षसानां, श्रेणीभिः पङ्क्तिभिः, रथारोहभिरिति भावः, विमुक्तं विरचितं, युद्धचैत्यं पतनादिति भावः, यत् नभोऽन्तरम् आकाशमध्यं, तच्च प्रतिभरणिकया प्रतिपूरणेनेत्यर्थः, उद्वहद्भिः कपिभिरेवेति भावः, राक्षसैरेवात्मनः समापतद्भिः ब्रह्मप्रहरणधारिभिः कपिभिः रथारूढराक्षसैर्जनिपातनात् तैः नभोऽन्तरस्य प्रतिपूरणं बोद्धव्यम्; निर्नासि, म्यान वर्त्म, निजदेन्यरूपमवलम्बनमित्यर्थः, यासां तथाभूताः, क्षीणाः सत्य इत्यर्थः, "दरिद्रं तर.सङ्कीर्णक्षीणाश्चि स्यान् गुप्त च। आक्तः प्रराक्तप्राणौ" इत्यमरः; दिक्कूलेभ्यः दिगन्तेभ्यः, अपसरन्ति अपगच्छन्ति, येषां

रक्तोनिपिष्टकपिमुक्तमहीध्रचूर्ण-
पूर्णान्तराभिरिषुवृष्टिभिरुज्जिहानः।
रोषाट्टहासदशनप्रसरैस्तडित्वां-
स्तडाधिपः किमपि सन्तमसं ततोति ॥ ३७ ॥

इलाघटः। (अयं निर्वर्ण्यः)। अहो! क्षुद्रैरपि सम्भूय भूयोभिः (ण) एको महान् सुकरः कदर्थयितुम्; (त) यतः,—

दृप्यद्दिक्पालदन्तावलबहलमदावग्रहोग्राभिरक्षां
तारामिर्दीप्यमानं दिशि विदिशि दशग्रीवमुद्वीक्षयन्तः।

सहायेन रावणस्य यमः दिगन्तप्रसारि सञ्जातं, तेषामभावेन दिगन्तेभ्यः रावणयशसः स्खलनं युक्तमेवेति भावः। हरिणी वृत्तम् ॥ ३६ ॥

रक्त इति।—रक्तोभिः राक्षससेनाभिरित्यर्थः, निपिष्टः पिष्टो विशेषेण पिष्टः, चूर्णित इत्यर्थः, कपिभिः वानरसेनाभिरित्यर्थः, मुक्तः निक्षिप्तः, राक्षसविनाशार्थमिति भावः, यः महीध्रः पर्वतः, तस्य चूर्णेन क्षोदेन, रजोरूपेणेति भावः, पूर्णे व्याप्ते, अन्तरं मध्यं यासां ताभिः, इषुवृष्टिभिः बाणवर्षणैः, उज्जिहानः उद्गच्छन्, युद्धाय उत्तिष्ठन् इत्यर्थः, तडाधिपः रावणः, रोषेण क्रोधेन, ये अट्टहासाः विकटहसितानि, ते एव दशनप्रसराः अग्निविस्फुलिङ्गाः, क्रोधेन मुखादीनां रक्तवर्णत्वेन दाडिमस्य च सुतीव्रत्वेन अग्निवत् सन्तापकरत्वादिति भावः, तैः, तडित्वान् विद्युत्वान्, दीप्तिमान् अग्निरिति भावः, अथ च तडाधिप एव तडित्वान् मेघ इति व्यस्तरूपकम्; "अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः। धाराधरो जलधरस्तडित्वान्" इत्यमरः, रावणस्य कृष्णवर्णत्वादिति भावः, किमपि अनिर्वचनीयं, सन्तमसं गाढान्धकारं, ततोति विस्तारयति, वर्धितमरुत्-आलीन पर्वतचूर्णेन च नभःप्रदेशस्य आवृतत्वात् स्वस्य कृष्णवर्णत्वाच्च अन्धकारस्य गाढत्वं बोद्धव्यम्। मेघस्य अन्धकारजनकत्वञ्च प्रसिद्धमेवेति भावः। वसन्ततिलकं वृत्तम् ॥ ३७ ॥

(ण) क्षुद्रैरपि क्षोदैरपि, वस्तुतोनैरपीति यावत्। सम्भूय मिलित्वा। भूयोभिः अनेकैः।

(त) महान् उत्तमः, बलवानिति यावत्। सुकरः सुष्ठुकरः, अनायासलभ्य इत्यर्थः। कदर्थयितुं क्लेशयितुम्, अभिभवितुमित्यर्थः।

एतैर्निःशेषसेतुग्रथनसमधिकैः शस्त्रिणः शैलपादै-
रुद्दामानः कपीन्द्रा रजनीचरपुरीमुत्तरेण प्लवन्ते ॥ १८ ॥

रक्षचूडः। (सविषादम्)। हन्त! महत् विषमिव पश्यामि, यदमी निष्कृपकृपाणपाट्यमानप्रतिभटविकटोरःकपाटकण्ट-
कितकपोलभित्तयः सन्तानपातिनीभिरनीकरुधिरधाराभिरति-

इत्यादिति।—निःशेषं निरवशेषं, सम्पूर्णं यथा तथेत्यर्थः, यत् सेतुग्रथनं सेतुबन्धनं, तस्मात् समधिकैः अवशिष्टैरित्यर्थः, अतिरिक्तैरिति यावत्, सेतुबन्धने सम्पूर्णे सति ये शैलपादाः अवशिष्टाः आसन् तैरिति निष्कर्षः, शैलपादैः पर्वतखण्डैः, शस्त्रिणः आयुधवन्तः, तान् शस्त्ररूपेण व्यवहरन्तः इत्यर्थः, उद्दामानः अत्युद्धतौर्व्याः, अनिवार्यपराक्रमा इत्यर्थः, उच्छृङ्खला इति यावत्, एते पुरतो दृश्यमाना इत्यर्थः, कपीन्द्राः महाकपयः, दृप्यतां अहङ्कारिणां, दर्पशालिनामित्यर्थः, दिक्पालदन्तावलानां दिग्पालाः दिशां रक्षकाः धारकाः वा, ये दन्तावलाः हस्तिनः तेषां, दिक्पालानाम् इन्द्रादीनां, ये दन्तावलाः तेषामित्यर्थो वा, ऐरावतादीनामष्टानां दिग्गजानां, "दन्तो दन्तावलो हस्ती" इत्यमरः; "ऐरावतः पुष्करीकः वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः॥" इति चामरः; मदजलः प्रभूतः, यो मदः दानं वारि, तस्य अवग्रहे दृष्टिप्रतिबन्धे, मदस्रावनिरोधे इत्यर्थः, रावणस्य सकोपदृष्टिपातेनैव भयात् तेषां स्रावनिरोधादिति भावः, "दृष्टिर्दृक्तद्विघातेऽवग्रहावग्रहौ समौ" इत्यमरः; उग्राभिः उत्कटाभिः, क्रूराभिरिति यावत्, अक्ष्णां नेत्राणां, तारकाभिः, कनीनिकाभिः, दिशि विदिशि दिशोर्मध्ये, अन्यादिकोणे इत्यर्थः, दीप्यमानं प्रज्वलन्तं, दशग्रीवं रावणम्, उत उन्नता, ग्रीवा कन्धरा यस्य स उद्ग्रीव ऊर्ध्वग्रीवः तं कुर्वन्तः सन्तः, रजनीचरपुरीं राक्षसनगरीं लङ्कां, उत्तरेण लङ्कायाः उत्तरस्यां दिशीत्यर्थः, प्लवन्ते उत्पतन्ति, उत्तरद्वारमवरुन्धन्तीति भावः। स्खलिता हस्तम् ॥ १८ ॥

(अ) हन्त। खेदे। विषमं दारुणं, सङ्कटमित्यर्थः। निष्कृपेति।—निष्कृपे दारुणे, यद्वा—निष्कृपं निर्दयं यथा तथा, कृपाणैः खड्गैः, पाट्यमानाः विदार्यमाणाः, प्रतिभटानां विपक्षसैन्यानां, विकटाः विशालाः, ये उरःकपाटाः कपाटवत् विस्तृतवक्षःस्थलानीत्यर्थः, तैः दृष्टैरिति भावः, कण्टकिताः रोमाञ्चिताः, कपोलभित्तयः गण्डदेशाः येषां तथोक्ताः; यद्वा—कपोलभित्तिः गण्डदेशः, अजाकृपाणीति भावः, यैः तथोक्ताः। सन्तानपातिनीभिः धारया पतन्तीभिः,

प्रवृद्धवीरपाणगोष्ठीमहोत्सवाः (थ) समन्तादभिद्रवन्ति यातुधानाः (द) प्लवङ्गमयूथपतीन्।

हेमाङ्गदः। (सहर्षम्)। सखे! कृतं विषादेन, (ध) यदेषः,—

दशमुखशरपीडितापयानो-
द्यमपरिपुच्छयमानवानराणि।
सरभसमभिसान्त्वयन् बलानि
द्विषमभियोधयति प्लवङ्गराजः॥३९॥

रत्नचूडः। (दृष्ट्वा सखेद-हासाद्भुतम्)। अहह!—

प्रवाहिणीभिरिति यावत्। अनीकैरिति।—अनीकानां सैन्यानां, युद्धे हतानामिति भावः, रुधिरधाराभिः रक्तप्रवाहैः। अतिप्रवृद्धेति।—अतिशयेन प्रवृद्धः वृद्धिं गतः, वीराणां शूराणां, पानगोष्ठीमहोत्सवः पानगोष्ठीवत् सुरापानसभेतिवत्, महान् उत्सवः उल्लासः येषां तथाभूताः।

(द) समन्तात् सर्वतः, चतुर्दिक्षु इत्यर्थः। अभिद्रवन्ति आक्रामन्ति इत्यर्थः, अभिघ्नन्तीत्यर्थो वा। यातुधानाः राक्षसाः, "राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः। यातुधान पुण्यजनो नैर्ऋतो यातु-रक्षसौ॥" इत्यमरः। प्लवङ्गमयूथपतीन् वानरेन्द्रान्, ऋक्षसेनाध्यक्षानित्यर्थः।

(ध) कृतम् अलम्, "कृतं युगेऽलमर्थे स्यात् विहिते हिंसिते त्रिषु" इति मेदिनी; विषादेन वैमनस्येन, खेदनेति यावत्, विषादं मा कुरु इति समुदितार्थः।

दशमुखेति।—प्लवङ्गराजः वानराधीशः, सुग्रीवः इत्यर्थः, दशमुखस्य रावणस्य, शरैः बाणैः, पीडिता व्यथिताः, अत एव अपयानम् अपक्रमः, पलायनमित्यर्थः, "अपक्रमोऽपयानञ्च" इत्यमरः, तस्य उद्यमे उपक्रमे, परिपुच्छयमानाः पुच्छम् उत्क्षिपन्तः, एतच्च पशुवाधारणाना स्वभाव एव यत, ते पलायनकाले पुच्छम् ऊर्ध्वीकृत्य धावन्तीति, वानराः कपयो येषु तानि, बलानि सैन्यानि, अभिसान्त्वयन् प्रियवचनेन प्रोत्साहयन्निति भावः, सरभसं सत्वरं, द्विषं शत्रुं, रावणमिति यावत्, अभियोधयति युद्धार्थमभिमुख्येन गच्छतीत्यर्थः। पुष्पिताग्रा वृत्तम्॥ ३९॥

अस्त्राणि प्लवगाधिपेन विहिता: पौलस्त्यवक्षःस्थलो-
सङ्घट्टानलदत्तदाववि पदः सीदन्ति भूमीरुहाः।
उत्पाट्य प्रहितश्च शैलशिखरो लङ्केन्द्रहस्तावलो-
निष्पिष्टो निजकुक्षिनिर्भरजलैर्ब्रह्मालपिण्डायते ॥ ४० ॥

हेमाङ्गदः। (विहस्य)। सखे! दशकन्धरमधिक्षिप्य न किञ्चिदेतत्—(न)

तथैतेनोद्धृत्य स्फटिकशिखरी सोऽपि विदधे
समन्तादा-मूलत्रुटितवसुधाबन्धविधुरः।

अस्त्राणीति। -प्लवगाधिपेन वानरराजेन, सुग्रीवेण इत्यर्थः, अस्त्राणि अस्त्रत्वरायोग्यं, विहिताः प्रयुक्ताः, आयुधत्वेन निक्षिप्ता इत्यर्थः, भूमीरुहाः द्रुमाः, पौलस्त्यस्य रावणस्य, वक्षःस्थलात् उरःस्थले, प्रस्तरकठिनायामिति भावः, सङ्घट्टेन सङ्घर्षणेनेत्यर्थः, य. अनलः अग्निः, उत्थित इति भावः, तेन दत्ता उत्पादिता इति यावत्, दावविरात् वनाग्नियसनं यैषां तथाभूताः सन्तः, दग्धाः सन्त इति भावः, "दव दावो तु वनवह्नौ वनेऽप्युभौ" इति मेदिनी, सीदन्ति अवसादं गच्छन्ति, भस्मीभूता भवन्तीत्यर्थः, तथा उत्पाट्य उन्मूल्य, आकर्षणेन उत्खायेत्यर्थः, शैलादिति शैलः, प्रहित प्रेरितः, रावणं प्रति निक्षिप्त इत्यर्थः, शैलशिखरश्च पर्वतशृङ्गञ्च, लङ्केन्द्रश्च लङ्केशः रावणश्च, इतावपीति सुसमासहे, विग्रहेसङ्घातस्थले इति यावत् निष्पिष्टः चूर्णितः सन् निजस्य आत्मनः, स्वनिष्ठस्येति यावत्, कुक्षस्य खातादिविहितस्थानस्य, निर्भरजलैः प्रस्रवणानि सुप्रवाहैः, ब्रह्मालपिण्डायते ब्रह्मदनपिण्ड इवाचरति। "निष्ठुरस्तु ब्रह्मालः पङ्कोऽत्रो माद-मर्दनौ" इत्यमरः। ब्रह्मदनविक्लेदितं इत्यर्थः ॥ ४० ॥

(न) दशकन्धरं रावणम्, अधिक्षिप्य विजयोक्त्या, एतत् शैलशृङ्गचूर्णीकरणं, न किञ्चित् अकिञ्चित्करं, रावणबलस्य एतत्पर्वतचूर्णीकरणस्य किमपि गुरुत्वं नास्ति, अनायासेनाध्यमेतदिति निष्कर्षः।

तथेति।—एतेन रावणेन, सः शिखावत्त्वेन सुविदितः अभ्येषामत्यन्तं इत्यर्थः, स्फटिकशिखरी अपि स्फटिकमयत्व-कैलासपर्वतोऽपि, तथा तेन प्रकारेण, उद्धृत्य उत्क्षिप्य, समन्तात् सर्वतः, आ-मूलं मूलपर्यन्तं, यद्वा—आ-मूलात् मूलादारभ्य, त्रुटितेन

अमुं येनाद्यापि त्रिपुरहरनृत्यव्यतिकरः
पुरस्तादन्येषामपि शिखरिणामुल्लसयति ॥४१॥

किञ्च तर्कयामि—

शस्त्रीकृतस्तरुवरो हरिपुङ्गवेन
लङ्केन्द्रवक्षसि मृणालमृदुः पपात।
तत्र स्थितैस्तु कुसुमैः कुसुमेषुरेनं
सीतावियोगविधुरं दृढमाजघान ॥४२॥

रत्नचूडः। (विहस्य)। सखे! किमुच्यते, महासत्त्ववतामुपरि (प) खल्वसौ रावणः। तथा हि—

छिन्नेन, वसुधामन्थेन पृथिवीबन्धनेन, पृथिव्या सह संयोगकारणभूतेन दृढबन्धनेनेत्यर्थः, विधुरः विकलः, शिथिल इत्यर्थः, विश्लिष्टो वा, विच्छिन्न इत्यर्थः, "वैकल्येऽपि च विश्लेषे विधुरं विकले विधु" इति विश्वाख्यशेषः; विदधे कृतः, 'तथा' इत्यस्य तादृग इत्यर्थो वा, तेन च—स्फटिकशिखरी भङ्क्त्वा समलात् तथा तादृग, भा-मूलतुटितवसुधा-बन्धविधुरः कृत इत्यर्थः, येन वैधुर्येण, अद्यापि इदानीमपि, त्रिपुरहरस्य शङ्करस्य, नृत्यव्यतिकरः नर्तनव्यतिषङ्गः, नर्तनव्यापार इत्यर्थः, यद्वा—नृत्यमेव व्यतिकरः व्यसनं, कैलासस्य विपदित्यर्थः, चञ्चलीभावादिति भावः, "अथ व्यतिकरः पुंसि व्यसन-व्यति-षङ्गयोः" इति मेदिनी; अन्येषां कैलासव्यतिरिक्तानां, शिखरिणां पर्वतानां, पुरस्तात् पूर्वम्, अमुं कैलासम्, उल्लसयति चालयति, कम्पयतीत्यर्थः, छिन्नमूलत्वात् कृत्स्नेषां पर्वतानां कम्पनात् पूर्वमेव कैलासः कम्पीभवतीति निष्कर्षः। शिखरिणां ॥ ४१ ॥

निश्चिन्त्योक्तमिति।—हरिपुङ्गवेन वानरराजेन, शस्त्रीकृतः प्रहरणीकृतः, बलवता विशालनिकायेत्यर्थः, तरुवरः महावृक्षः, लङ्केन्द्रस्य रावणस्य, वक्षसि उरसि, मृणालमिव तु पुनः, पद्मादेर्नालवत्सुकुमारमित्यर्थः, मृदुः कोमलः सन्, पपात पतितो बभूव; पुष्पैः, कुसुमेषुः कामः, तत्र तरुवरे, स्थितैः वर्तमानैः, पद्मादेरिति यावत्, कुसुमैः रावणनिज-प्रहरणैरिति भावः, सीतावियोगेन जानकीविरहेण, विधुरं कातरम्, एनं रावणं, दृढम् अत्यर्थं यथा तथा, निर्दयं यथा तथेत्यर्थः, आजघान प्रहृतवान्।

खेषूत्कृत्य हुताशेषु मूर्द्धसु जवादग्ने स्फुटित्वा वहि-
र्व्याकीर्णेष्वलिकेषु देवलिपिभिर्दृष्टं पि रामायणम्।
चित्ते यस्खलितेन यस्तदधिकं ब्रह्मा णमप्रीणयत्
कस्तस्मै प्रथमाय मानिषु महावीराय वैरायते ? ॥ ४२ ॥

देवाइदः। सखे! पश्य पश्य, भयानकमद्भुतं च वर्त्तते—

विभिन्नखीघ विकीर्णगण्डशैले
तरुभ्यूर्णितयक्षिकोमरे च।
कपि-राक्षसराजयोरजस्रं
तुमुले भान्ति तलातलिप्रपञ्चाः ॥ ४३ ॥

(प) महासत्त्ववतां मनस्विश्रेष्ठानां, महावज्राणां वा, उपरि अग्रे, वर्त्तते इत शेषः। उपरि प्रधानमित्यर्थो वा।

खेषूति।—उत्कृ। उत्कृत्य, खेषूत्कृत्येति भावः, खेषु निजेषु, मूर्द्धसु शिरःसु, हुतभु ज्ञतहोमेषु, अग्नेः अहुतखरूपेषु निजेषु सत्सु इत्यर्थः, जवात् वेगात्, अग्नेः अग्निकुण्डात्, अग्नेः जवात् इति वा अन्वयः, स्फुटित्वा विदीर्य, वहिः स्फुटनेन बहीवरणापगमात् वहिर्भूते इत्यर्थः, व्याकीर्णेषु विक्षिप्तेषु, प्रकाटितेषु इत्यर्थः, अलिकेषु ललाटेषु, ललाटस्थेषु इत्यर्थः, "ललाटमधिकं गोधिः" इत्यमरः; देवलिपिभिः विद्याद्यलिखितैरक्षरैः, रामायणं रामस्य अयनं गतिः, कर्त्तव्यामाचरणमित्यर्थः, यद्वा —अयनं चरितं, रामस्य आचरणादिकमित्यर्थः, रामकर्त्तृकमात्मनो वधमिति यावत्, दृष्टमपि प्रत्यक्षीकृतमपि, यः, अस्खलितेन अविचलितेन, चित्तेन मनसा, तदधिकं तस्मात् पुर्वमादित्यर्थः, अधिकं यथा यथा, ब्रह्माणं पितामहम्, अप्रीणयत् तोषयामास, मानिषु मानवत्सु, प्रथमाय अग्रगण्यायेत्यर्थः, महावीराय मुख्यवीराय, तस्मै, रावणायेति शेषः, कः को जनः, वैरायते ? विरुद्धयति ? तं प्रति वैरमाचरति ? इत्यर्थः, न कोऽपीति भावः। आर्दूलविक्रीडितं वृत्तम् ॥ ४२ ॥

विभिन्नेति।—विभिन्नखीघन शरक्षतमूर्द्धन, विकीर्णाः विक्षिप्ताः, निराकृता इति यावत्, रावणेनेति भावः, गण्डशैलाः गिरिच्युतस्थूलशिलाः, सुग्रीवप्रहिता इति भावः यत्र तादृशे, "गण्डशैलास्तु च्युताः स्थूलशिलाः शिरः" इत्यमरः, तथा तरुभिः वृक्षैः, महाद्रुमप्रहारैरित्यर्थः, सञ्चूर्णिताः निष्पेषिताः, सुग्रीवेणेति भावः, अतएव तोमरास्त्र

ननमिदानीं—

श्वासोर्मिप्रतिबन्धतुन्दिलगलप्रच्छिन्नहारावली-
रत्नैरापतयालुभिः कृतफणप्राग्भारभङ्गभ्रमः।
श्रोत्राभावनिरन्तरालमिलितैः स्तब्धैः शिरोभिर्भुवं
धत्ते वानरवीरविक्रमभरात् भुग्नेभुजङ्गाधिपः॥ ४५॥

अस्त्रविशेषाः, रावणप्रहिता इति भावः यत्र तथाभूते, कपि-राक्षसराजयोः सुग्रीव-रावणयो, अनवरतं, तुमुले रणसङ्कुले सङ्कुलयुद्धे इत्यर्थः, "तुमुलं रणसङ्कुले" इत्यमरः; यद्वा—तुमुले रणे, घोरे सङ्ग्रामे इत्यर्थः, "तुमुल व्याकुले रणे" इति विश्वलोचनः; तलातलिप्रपञ्चाः तलेश्च तलेश्च चपेटेश्च चपेटेश्च प्रहृत्य यत् युद्धं तत् तलातलि इत्याहुरिति युद्धनिमित्तयं, "तलश्चपेटे तालद्रौ" इति मेदिनी; तत्-प्रपञ्चाः तद्विस्ताराः, भान्ति राजन्ते॥ ४४॥

श्वासेति।—भुजङ्गाधिपः सर्पराजः, वासुकिरित्यर्थः, वानरवीरश्च कपिषु शूरश्च, सुग्रीवश्च इत्यर्थः, विक्रमभरात् पदविक्षेपभारात्, युद्धकाले सक्रोधप्रचण्डपदताडनादि-त्यर्थः, आपतयालुभिः पुनः पुनः पतनशीलैः, छिन्नहारादिति भावः, श्वासोर्मीणां निःश्वासतरङ्गाणां, तरङ्गवत् उच्छ्वसितभावेन प्रवहतां निःश्वासानाम्, अतिभारेण परिश्रान्ततया अविरतप्रवृत्तोच्छ्वासानामित्यर्थः, यद्वा—श्वासोर्मीणां निःश्वासवेगानाम्, "ऊर्मिः स्त्री-पुंसयोर्वीच्या प्रकाशे वेग-भङ्गयोः" इति मेदिनी, प्रतिबन्धेन निरोधेन, बाधितत्वेनेत्यर्थः, तुन्दिलात् उच्छूनात्, स्फीतादित्यर्थः, गलात् कण्ठदेशात्, प्रच्छिन्नायाः त्रुटितायाः, हारपरिवाहापेक्षया गलदेशस्य अतीव स्फीतत्वेन तत्र परिमातु-मशक्यत्वात् हारच्छेदं बोद्धव्यं, तुन्दिलशब्दस्य स्थूलोदरार्थकत्वेऽपि अत्र स्फीततामात्रे उपचारः, हारावल्याः मौक्तिकमालायाः, रत्नैः मणिभिः, कृतः जनितः, फणानां फटानां, सङ्कलसङ्कटानामिति भावः, प्राग्भारस्य विस्तारस्य, भङ्गस्य भोटनस्य इति, न्यूनताभावेनेति वा, भ्रमः भ्रान्तिरित्यर्थः, यत्र तथाभूतः सन्, श्रोत्राभावेन कर्णविरहेण, सर्पजातेरश्रुतःश्रवत्वादिति भावः, निरन्तरालम् अविच्छिन्नं यथा तथा, मिलितैः संयुक्तैः, स्तब्धैः निश्चलैः, किन्तु भुग्नैः अवनतैः, शिरोभिः मस्तकैः, सङ्कल-फणमण्डलैरिति यावत्, भुवं पृथिवीं, धत्ते धारयति। शार्दूलविक्रीडितं वृत्तम्॥४५॥

(सविषादम्)। अहह! बाहुयन्त्रेण(फ) आपीड्य वानरराजं सुग्रीवं किमाह रावणः,—

अस्मद्बाहुवनान्दोल-सुलभं फलमाप्नुवन्।
नियुद्धलाघवक्लान्त! शाखामृग! सुखी भव॥ ४६॥

रक्षसः। (सहर्षम्)। सखे! करणकौशलमोचितात्मा विपक्षदुर्वचनलुप्यमानहृदयो हृदयङ्गमम्(ब) आमदधाति वानरेन्द्रः,—

विंशत्या युगपत् क्षमैरपि भुजैराकर्षणच्छेदयो-
रच्छिन्नं दशमं शिरः कथयति च्छिन्नानि यानि क्रमात्।

(फ) बाहुयन्त्रेण बाहुः भुज एव, यन्त्र पीडनसाधनद्रव्यविशेषः तेन।

अमदिति।—नियुद्धे बाहुयुद्धे, "नियुद्धं बाहुयुद्धे स्यात्" इत्यमरः; यत् लाघवं क्षिप्रहस्तत्वं, यद्वा—लाघव लघुता, लूनता इत्यर्थः, पराभव इत्यर्थो वा, तेन क्लान्तः अवसन्नः तत्सम्बुद्धौ, शाखामृग! हे वानर! "कपिप्लवङ्गप्लवग-शाखामृगवलीमुखाः। मर्कटो वानरः कोशो वनौका" इत्यमरः; अस्माक बाहुवनेन भुजारण्येन, भुजनिवहेन इत्यर्थः, यः आन्दोलः आलम्बन, पीडनमिति यावत्, तेन सुलभं सुप्रापम्, अनायासलभ्यमित्यर्थः, फल परिणामं, मृत्युरूपमिति भावः, आप्नुवन् लभमानः सन्, सुखी भव, यातनानुभवाभावादिति भावः। अनुष्टुप् वृत्तम्॥ ४६॥

(ब) करणेति।—करणस्य इन्द्रियस्य, साधकतमस्य वा, उपायस्य वा, गात्रस्य वा, "करणं साधकतमं क्रियायामिन्द्रियेष्वपि" इत्यमरः; कौशलेन नैपुण्येन, इस्तादि-कौशलेन वा, उपायविशेषेण वा, कामरूपित्वात् मायाबलेन देहं सङ्कुच्य वा इत्यर्थः, मोचितः त्यागितः, रावणेनेति, रावणभुजबलनादिति वा भावः, आत्मा शरीरं यस्य येन वा तथाभूतः। विपक्षेति।—विपक्षस्य शत्रोः, रावणस्य इत्यर्थः, दुर्वचनेन कटुवाक्येन, तिरस्कारवचनेनेत्यर्थः, लुप्यमानं भिद्यमानं, हृदयं अन्तः-करणं यस्य तथोक्तः। हृदयङ्गमं मनोज्ञम्।

विंशत्यति।—युगपत् समकालम्, आकर्षण-च्छेदयोः आकर्षण-कर्त्तनयोः, आकर्षणपूर्वकच्छेदने इत्यर्थः, क्षमैरपि समर्थैरपि, विंशत्या भुजैः बहुभिः, अच्छिन्नम् अकर्त्तितं, दशमं दशानां पूरणं, शिरः मस्तकं, यानि शिरांसि, क्रमात् क्रमशः,

तान्याराद्मदेश्वराणि भवतः शीर्षाणि तुल्यं दश
च्छिन्नानि द्दशभिर्नखैर्यदि पुनः श्राखामृगेन्द्रः सुखी ॥ ४७ ।

अपि च, रे रे राक्षस !—

दशमुखबधनाट्यसूत्रधारो
रघुपतिरस्य च पारिपार्श्विकोऽहम् ।

छिन्नानि त्रुटितानि, कथयति, आराद्र सेवितः, मदेश्वर मद्भर्ता यैः, तानि, भवतः दश शीर्षाणि दशभिर्नखैः यदि पुनः छिन्दानः निकृन्तन् भवानीति शेषः, तदा श्राखामृगेन्द्रः अहं सुखी श्रानन्दीति शेषः । दशमं शिरः यानि छिन्नानि कथयति तानि दशशीर्षाणीत्यसम्भवं, प्रत्युत नव शीर्षाणीति युक्तं, तदेव यत्प्रथम प्रमाद इव प्रतिभातीति चित्यम् । यद्वा—दशमं दशानां पूरणं, दशमसङ्ख्याकमित्यर्थः, शिरः मस्तकं, तथात शेषः, विंशत्या विंशतिसङ्ख्याकैः, भुजैः, बाहुभिः, युगपत् एकदैव, आकर्षण-च्छेदयोः आकर्षण-कर्तनयोः आकर्षणपूर्वकच्छेदने इत्यर्थः, अनेरपि समर्थैरपि, दशभुजैराकर्षणेन अवभुजेन छेदनम्, एवं विंशतिभुजेषु दाभ्यां दाभ्यां भुजाभ्यां दशानामेव शिरसां युगपत् आकर्षण-च्छेदनयो समर्थैरपि इत्यर्थः, अच्छिन्नम् अकर्तितं सत्, यदि शिरांसि, क्रमात् पौर्वापर्य्यानुसारेण, इदमादौ, इदं तत परम, इदं ततः परम एवं क्रमेणेत्यर्थः, छिन्नानि कृतानि, कथयति वक्ति, भुजाना विंशतिसङ्ख्याकत्वात् दशमशिरोऽपि छेदनसमर्थेऽपि दैवयोगात् तत् यत् अच्छिन्नं स्थितं तेनैव अवशेषं भवानी छेदनक्रमं निर्देष्टुं समर्थं भवतीति समुदायार्थः, आराद्रः सेवितः, मदेश्वरः मद्भर्ता यैः ताद्दशानि, भवतः तव, तानि मद्भर्तृराघवनाथे छिन्नानि नवसङ्ख्याकानि इत्यर्थः, शीर्षाणि शिरांसि, तथा दश दशमं शिरश्च इत्यर्थः, यद्वा—तानि नवसङ्ख्याकशिरःसङ्घटितानि इत्यर्थः, दश शीर्षाणि, तुल्यं युगपदेव, त्वया एकमेकं कृत्वा क्रमात् छिन्नम्, अहन्तु एकदैव, येन किमपि कथमपि छेदनक्रमं कथयितुं न शक्नुयादिति भावः, दशमिर्नखैः दशसङ्ख्याकरकटैः, त्वया विंशत्या भुजैः नवसङ्ख्याकं शिरोमात्रं छिन्नम्, अहन्तु भुजद्वयमात्रेण दशसङ्ख्याकखलनामेव दशैव शिरांसीति भावः, यदि पुनः यद्यपि, छिन्दानः निकृन्तन्, भवानीति शेषः, तदा श्राखामृगेन्द्रः वानराधीशः, सुखी दुःखाभाववान्, भवेदिति शेषः, न पुनस्तव बाहुबलाद्दीप्तसुखभक्षणेनेति भावः । श्रार्दूलविक्रीडितं वृत्तम् ॥ ४७ ॥

इतीति ।—रघुपतिः रामचन्द्रः, दशमुखस्य रावणस्य, वध एव विनाश एव,

प्रकरणफलबीजभावकाना-
मस्मृतभुजां समुपास्महे समाजम् ॥ ४८ ॥

इत्यभिदधानेनैवोत्प्लुत्य निर्दयं शिरसि ताडितो रथध्वज-दण्डावलम्बो कथञ्चिदाश्वसिति (भ) रावणः। (सर्वतोऽवलोक्य सदर्पम्)। सखे! पश्य पश्य—

यन्माल्यग्रथनावशेषविकलैः सन्तानकैर्नाकिनां
भर्त्रे गर्भगमेव दाम निभृतं स्वर्मालिकैर्गुम्फितम्।

माल्यम् अभिनेयं वस्तु, तस्य सूत्रधारः प्रधाननटः, अङ्कस्य अस्य रघुपतेः नाट्यस्य वा, पारिपार्श्विकः सूत्रधारस्य पार्श्वचरो नटविशेषः, "सूत्रधारेण सहितः संलापं प्रकरोति यः। सूत्रधारसमो वाऽपि स भवेत् पारिपार्श्विकः॥" इत्युज्ज्वलदत्तः, प्रकरणं नाटकविशेषः, तस्य फलं प्रतिपाद्यार्थः, बीजं कारणं, नायकादिव्यापार-विशेष इति भावः, तद्भावज्ञाना तदनुभविनः, पक्षे—प्रकृष्टं करणम् उत्पत्तिरादि, तस्य फलं कार्यं ताडनादि, तस्य बीजं कर्कशवचनादिकं, तद्भावज्ञाना तदनुभवि-नश्च, अमृतभुजाम् अमृतमिव अमृतं नाटकास्वादजनितं सुखं भुञ्जते इति तथोक्ताना, सद्वदयानामित्यर्थः, पक्षे—देवाना, समाजं सभा, पक्षे—समूहं, समुपास्महे आराधयामः, तव वधेनेति शेषः। पुष्पिताग्रा वृत्तम् ॥ ४८ ॥

(भ) इति एवम्, अभिदधानेनैव कथयता एव सुग्रीवेणेति शेषः, उत्प्लुत्य उल्लम्फ्य। ताडितः प्रहृतः। रथेति।—रथस्य स्यन्दनस्य, ध्वजदण्ड पताकार्थयष्टिम्, अवलम्बते धारयतीति तादृशः, आघातेन विचलितम् आत्मानं स्थिरीकर्तुमिति भावः। आश्वसिति प्राणिति, प्रकृतिस्थो भवतीत्यर्थः।

यदिति।—यस्य दशास्यस्य मूर्ध्नः, माल्य दाम, तस्य ग्रथनात् गुम्फनात्, अव-शेषाणि अतिरिक्तानि, अतिरिक्तत्वात् परित्यक्तानीति भावः, अत एव विकलानि स्खलानीत्यर्थः, विशीर्णानीति भावः तैः, सन्तानकैः देवतरुविशेषकुसुमैः, "पञ्चैते देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥" इत्यमरः; नाकिनां देवाना, भर्त्रे अधिपतये, इन्द्राय इत्यर्थः, इन्द्रायेमिति यावत्, तादर्थ्ये चतुर्थी; गर्भगमेव गर्भः कुक्षिः इव गर्भः, "गर्भो भ्रूणेऽर्भके कुक्षौ खञ्जो पनसबदरे" इति मेदिनी, तस्मिन् गच्छति तिष्ठतीति तादृशं द्रव्यविशेष-मध्यस्थितं, द्रव्यविशेषेण आवरणेनावृतं, येन बाह्यतो माल्यत्वेन प्रतीतिर्न आयाति

तस्मिन्नद्य दशास्यमूर्द्धनि नवप्रस्तावनामापदां
पश्यन्तो रभसोद्धतर्क्षितभियः क्रीडन्ति नः स्यन्दनाः ॥४९॥

हेमाङ्गदः। (सविषादम्)। अहह! सोऽप्याश्वस्य दशकण्ठेनापि मुष्टिना ताडितो मूर्च्छितः कपीन्द्रो नील-हनूमद्भ्यामाश्वास्यमानोऽपनीयते (म)।

रत्नचूडः। सखे! प्रथमस्य (य) हि प्रथमे पर्वणि शतक्रत्वो (र) विजयन्ते पराजीयन्ते च वीराः, तत्र को विषादः।

हेमाङ्गदः। (अथोऽवलोक्य)। सखे रत्नचूड! दिष्ट्या वर्द्धसे यदयमनुप्राप्तः,—

इति भावः, "गर्भगम्" इत्यत्र "गर्भकम्" इति पाठे—गर्भकं कैशमध्ये धार्य्यं, तच्च शिरःप्रभृतिपक्काम्रफलेषु, रावणस्य दृष्टिपातभयादिति भावः, "कैशमध्ये तु गर्भकम्" इत्यमरः, दाम माल्यं, स्वर्गिकाः स्वर्गीयाः पारिजातपारिजातादयः, निसर्गम् अतिशयं यथा तथा, गुम्फितं ग्रथितम्, अद्य इदानीं, तस्मिन् पूर्वोक्तरूपे, दशास्यमूर्द्धनि रावणशिरसि, आपदां विपत्तीनां, विनाशरूपाणामनर्थानामित्यर्थः, नवप्रस्तावना नवीना सूचना, पश्यन्तः आलोकयन्तः, नः अस्माकं, स्यन्दनाः रथाः, रभसोद्धतेन हर्षसमूहेन, आनन्दातिशयेनेत्यर्थः, "रभसो वेग-हर्षयोः" इत्यमरः; भर्त्सिताः तिरस्कृताः, निराकृताः इत्यर्थः, भीः भयं येषां तथाभूताः सन्तः, आनन्दरोगेण निर्भीकाः सन्तः इत्यर्थः, क्रीडन्ति उच्चैःशब्दं कुर्वन्ति, घर्घरशब्दं कुर्वन्तीत्यर्थः। शार्दूलविक्रीडितं छन्दः ॥ ४९ ॥

(म) सोऽपि रावणशिरसि ताडयिताऽपि। आश्वस्य आश्वासीभूय, प्रकृतिस्थेन सुस्थेत्यर्थः, दशकण्ठेन दशग्रीवेणान्वयः। कपीन्द्रः वानरेश्वरः सुग्रीवः। आश्वास्यमानः साम्त्व्यमानः, शुश्रूष्यमाण इत्यर्थः। अपनीयते अपनीयते।

(य) प्रथमस्य युद्धस्य, "युद्धमायोधनं जन्य प्रधनं प्रविदारणम्" इत्यमरः।

(र) पर्वणि प्रस्तावे, उपक्रमे इत्यर्थः, प्रथमावस्थायामिति यावत्, "पर्व ग्रन्थावहरूपे यज्ञांशे विषुवादिषु" इति धरणिः। शतक्रत्वः शतं शतं वारानित्यर्थः। विजयन्ते पराभवन्ति, अन्यानिति शेषः, पराजीयन्ते पराभूयन्ते, अन्यैरिति शेषः, कदाचित् अन्यान् पराभवन्ति, कदाचित्च अन्यैः, पराभवं प्राप्नुवन्तीत्यर्थः।

कुशिकसुतसपर्यादृष्टदिव्यास्त्रतन्त्रो
भृगुपतिसहयुध्वा वीरभोगीणबाहुः।
दिनकरकुलकेतुः कौतुकोत्तानचक्षु-
र्बहुमतरिपुकर्मा कार्मुको रामभद्रः॥ ५०॥

रक्षपूडः। (सहर्षं रामभद्रमवलोक्य रावणं प्रति)। राक्षसराज!—

बालेनापि विलूनधूर्जटिधनुःस्तम्भेन बाहुश्रमि-
र्येन खेदयता मनोहरमृजूचक्रे मुनिर्भार्गवः।

कुशिकेति।—कुशिकसुतस्य विश्वामित्रस्य, सपर्यया अर्चया, सेवया इत्यर्थः, "पूजा तनस्याऽर्चायां: सपर्यांऽर्चाऽर्हणा: समाः" इत्यमरः, दृष्टस्य अवलोकितं, प्राप्तमित्यर्थः, दिव्यस्य अलौकिकस्य, अस्त्रस्य आयुधस्य, तत्र शास्त्रभेदे, वेदस्य शास्त्रान्तरे वा, अस्त्रवेद इत्यर्थः, धनुर्वेद इत्यर्थो वा येन तथोक्तः, "तत्र कटुत्वकुण्ठ्यात्...।...शास्त्रभेदे परिच्छिदे॥ स्मृतिशास्त्रान्तरे—" इति मेदिनी, तथा भृगुपतिना परशुरामेण, सहयुध्वा सह युद्धवान्, परशुरामेण सह कृतयुद्ध इत्यर्थः, परशुरामविजेता इति भावः, वीरभोगीवौ वीरयोग्यौ इत्यर्थे, बाहू भुजौ यस्य तथाविधः आ-आजानुलम्बितबाहुरित्यर्थः, दिनकरकुलकेतुः सूर्यवंशध्वजः, कौतुकेन कुतूहलेन, मुनीश-रावणयोः युद्धदर्शनौत्सुक्येनेत्यर्थः, रावणदर्शनकौतूहलेन इत्यर्थो वा, उत्तानेन उन्नमिते, रावणस्य रथस्थत्वात् ऊर्ध्वं च भूयत्वादिति भावः, चक्षुषी नेत्रे यस्य तथोक्तः, बहुभिः अनेकैः, जनैरिति शेषः, सततं आहतं, रिपुषु शत्रुषु, कर्म क्रिया, युद्धव्यापार इत्यर्थः यस्य तादृशः, कार्मुकी धनुष्मान्, रामभद्रः रामचन्द्रः, अनुप्राप्त इति गद्यस्थवाक्येनान्वयः। मालिनी वृत्तम॥ ५०॥

बालेनेति।—बालेनापि शिशुनाऽपि, विलून, छिन्नः, भग्न इत्यर्थः, धूर्जटेः शिवस्य, धनु स्तम्भः स्तम्भोपमविशालं कार्मुकं येन तथाभूतेन, तथा बाहुश्रमिः बाह्वोः भुजयोः, ऊष्मभिः तेजोभिः, बलैरिति भावः, खेदयता खिन्नीकुर्वता, सन्तापयता इत्यर्थः, "खेदस्तु खेदने घर्मे" इति मेदिनी, येन बालेन रघुनन्दनेन, मुनिः भार्गवः परशुरामः, अत्यर्थं कुटिलः सर्वथा अनमनीयश्च इति भावः, मनोहरं मनोज्ञं यथा तथा, अनायासेन इति लक्ष्यव्यवहारेण इति वा भाव, ऋजूचक्रे सरलीकृतः, दमित इति भावः, दृश्यते च लोके, अत्यर्थं कुटिलं (वक्रं) यूकं वा लंदक्षादिकं खेदनेन

स प्राप्तो रघुनन्दनः किमपरं तेनाधुना नेष्यते
धन्यो वालिसमानकर्तृकवधश्लाघाऽतिभूमिं भवान् ॥ ५१ ॥

इनाशदः । (सकौतुकम्) । सखे ! तूष्णीमास्वहे (ल) तावत्, शृणवः किं ब्रवीति रावणः । (कर्णं दत्त्वा) । कथमेवमाह, साधु रे क्षत्रियांडम्भ ! (व) साधु—

यत्कन्यामभिलष्यता निमिपतेर्न स्थाणवीयं मया
दोर्लीलातुलितावतारितहरग्रावाणाऽपि कृण्णं धनुः ।
तत् द्रक्ष्यन्त्यधुना कियन्तमवधिं यावद्भवानित्यमो
देवेन्द्रद्विपदानदुर्दिनभिदो रौद्रार्चिषो मार्गणाः ॥ ५२ ॥

यथा कण्डूयन्ति स्त्रीजाः, कण्डूयितुं वा अङ्गप्रत्यङ्गादिकं खेदेनेव मृदूकुर्वन्ति, तद्वत् इति भावः, स ताहशः महाबोरः, रघुनन्दनः रामचन्द्रः, प्राप्तः समागतः, अपरम् अन्यत्, किं, वक्तव्यमिति शेषः, अधुना इदानीं, तेन रघुनन्दनेन, भवान् वालिनः वालिराजस्य, वालिवधस्येति भावः, समानः तुल्यः, कर्त्ता निष्पादकः यश्च ताहशो यो वधः विनाशः, वालिवधे यः कर्त्ता तत्कर्तृकवध इत्यर्थः, रामकर्तृकवध इति भावः, तेन या श्लाघा प्रशंसा, तस्याः अतिभूमिम् अतिशयं, नेष्यते प्रापयिष्यते, अतः भवान् धन्यः पुण्यवान्, तव विजेतारं यः अवधीत्, तस्य केनचिदनुचरेण तव हननस्य औचित्येऽपि तेनैव तव विनाशप्राप्तिः श्लाघनीयैवेति निष्कर्षः । आर्दूलविक्रीडितं छन्दः ॥ ५१ ॥

(ल) तूष्णीं मौनम्, आस्वहे तिष्ठावः ।

(व) क्षत्रियांडम्भ ! क्षत्रियाग्रणीः ! "पोतः पाकोऽर्भको डिम्भः पृथुकः शावकश्शिशुः" इत्यमरः ।

यदिति ।—निमिपतेः निमिवंशीयानामधिपतेः जनकस्य, कन्यां तनयां सीताम्, अभिलष्यता स्पृहयता, मया दोर्लीलया भुजविलासेन, अवलीलयेति भावः, तुलितं परिमितः, कियान् गुरुः इति निर्णयार्थं क्रीडाकन्दुकवत् अवहेलया उत्क्षिप्य तुलनीकृत इत्यर्थः, पश्चात् अवतारितः अवनामितः, स्वस्थाने एव स्थापित इत्यर्थः, हरस्य शङ्करस्य, कैलासं इत्यर्थः येन तथाभूतेनापि, धनुर्भङ्गे समर्थेनापीति भावः "आयाची शैव-पाशाची" इत्यमरः; यत् यतः, आयतीयं आगामि, हरस्येदमिति

(सविस्मयम्)। कथम्, अद्यापि तृणीकृतजगत्त्रयः स एवास्य तावान् अहङ्कारग्रन्थिः!! (अ)

रत्नचूडः। (सोत्रास-स्मितम्)। सखे! कथम्, इदमेव भवन्तं विज्ञापयते (ब)—

मानाध्मातः खां किलोत्कृत्य तावन्-
न्यूर्ध्वश्रेणीमेकशृङ्गोन्नमाङ्गः।

मत्तेत्यर्थः, धनुः चापः, न क्रय न मयम्, इष्टदेवस्येश्वरस्य मानभङ्गभियेति भावः, तत् तस्मात्; अत्र तच्छब्दस्य हेत्वर्थकत्वे क्रते अर्थांसङ्गतेः वक्ष्यमाणा एवा व्याख्या मनोरमत्वेन प्रतीयते; यथा—धनुर्न कर्णयतीति यत् तत् आकर्णीयम्, इति कृत्वेति शेषः; अधुना इदानीमेव, देवेन्द्रद्विपस्य इन्द्रगजस्य ऐरावतस्य, दानं मद-वारि, तस्य दुर्दिनं वर्षणमिति भावः, "मेघच्छन्नेऽह्नि दुर्दिनम्" इति कोषात् दुर्दिनशब्दस्य मेघाहत-दिनार्थकत्वेऽपि अत्र उपचारात् मेघकार्य्यवर्षणार्थे प्रयोगो बोद्धव्यः, तद्विदः तच्छोषिण इति यावत्, रौद्राः तीव्राः, "रौद्रो घर्मे रसे चण्डा स्त्री तीव्रे भीषणे त्रिषु" इति मेदिनी; अर्चिषः प्रभाः येषां तथाभूताः, रौद्रत्वलाभात् दुर्दिनं नश्यतीति ध्वन्यते; अलौ मम तृणस्य इतस्ततः वा, मार्गणाः शराः, "मार्गणं याचनेऽन्वेषे मार्गणस्तु शरेऽर्थिनि" इति हैमः; कियत्तम अवधिं यावत् किं परिमितं कालं यावत्, भवान्, त्वामिति लोपिष्यति वा इति शेषः, इति ब्रुवन्ति अवलोकयिष्यन्ति, भवदायुषः सीमानं ब्रुवन्ति, अचिरमेव भवान् मरिष्यतीति भावः। यद्वा—कियत्तम अवधिं काल यावत् भवान् इति ब्रुवन्ति? भवन्तम् अवलोकयिष्यन्ति? न तु चिरं ब्रुवन्ति, अविलम्बमेव भवन्तं संहरिष्यन्तीति भावः। भवानिति निपातेनाभिहितत्वात् प्रथमा। आर्षत्वविक्रीडितं वृत्तम्॥ ५२॥

(अ) तृणीकृतेति।—तृणीकृतं तृणवत् तुच्छीकृतं, जगत्त्रयं त्रिभुवनं येन तादृशः, सः त्रिलोकविख्यातः, अहङ्कारग्रन्थिः गर्वबन्धः, ग्रन्थिवत् सुदृढाहङ्कारः इत्यर्थः, अद्यापि अधुनाऽपि, अस्यास्मदवस्थायामपीत्यर्थः, तावानेव तत्परिमित एव, पूर्ववदेवेत्यर्थः, वर्त्तते इति शेषः।

(ब) सोत्रास-स्मितं सोद्वेग-हास्यं, सोपहास हास्यमित्यर्थः, उपहासमूलक-हास्यं कृत्वेति यावत्। विज्ञापयते विज्ञप्तिं करोति।

मानाध्मात इति।—मानेन गर्वेण, आध्मातः पूरितः, अतिमानीत्यर्थः, अयं रावण

स्त्रीमर्द्धाङ्के वक्षयित्वा मुखेन
प्रीतः शम्भोरेकपादे पपात ॥ ५३ ॥

(ऊर्ध्वमवलोक्य च सवितर्कम्)। भगवतो दिवस्पतेरिव रथो दाशरथिमुपतिष्ठते। (स)

हेमाङ्गदः। (दृष्ट्वा सहर्षम्)। सखे! स एवायं, किं न पश्यसि, लोचनमार्गसहस्रचन्द्रकमेचकितमाहेन्द्रकवचहस्तो मातलिः॥ (ह)। (चक्षुं निर्वर्ण्य विहस्य च)।—

विविधमणिमयूखमञ्जरीभिः
कृतसुरचापसहस्रसन्निपाते।

इति अध्याहार्यं, किलेति प्रसिद्धौ, त्वा निजा, मूर्द्धश्रेणीं शिरःपङ्क्तिं, नवमस्तकमिति यावत्, उत्कृत्य छित्त्वा, एकमेव एकसङ्ख्याकमेव, शेषम् अवशिष्टम्, उत्तमाङ्गं शिरः यस्य तथाभूतः सन्, मुखेन तेनैव एकेन आननेन, प्रीतः सन्तुष्टः सन्, अर्द्धाङ्गे देहार्द्धे, वर्त्तमानामिति शेषः, स्त्रीं भार्य्यां, गौरीमिति भावः, वक्षयित्वा रक्षित्वा इत्यर्थः, शम्भोः हरस्य, इह-गौरीरूपस्येति भावः, एकपादे एकस्मिन् चरणे, दक्षिणचरणे इति यावत्, दक्षिणस्येव इतरार्द्धाङ्गत्वात् इति भावः, पपात प्रणिपातम् अकरोत्, न तु स्त्रिया गौर्याः पादे इति भावः, मानीश्वरत्वात् गौरीमपि न गण्यामासेति निष्कर्षः। शालिनी वृत्तं, "मात्तौ गौ चेच्छालिनी वेद-लोकैः" इति तल्लक्षणात्॥ ५३॥

(स) दिवस्पतेरिन्द्रस्य। उपतिष्ठते उपेत्य वर्त्तते, रामचन्द्रस्य समीपे तिष्ठतीत्यर्थः, यद्वा—उपतिष्ठते सेवते, सेवार्थं समागत इत्यर्थः।

(ह) स एवायम् इन्द्रस्य एवायम्। लोचनेति।—लोचनानां नेत्राणां, मार्गसहस्रे अध्वसहस्रे, सहस्रलोचनस्य सहस्रसङ्ख्याकाक्ष्णः इत्यर्थः, चन्द्रकैश्च मयूरपुच्छस्थचन्द्रकाकृतिविचित्रवर्णसमूहैश्च, मेचकितः चित्रितः, अलङ्कृतः इत्यर्थः, मयूरपुच्छचन्द्रकाकृतिसहस्रलोचनाङ्कित इति यावत्, माहेन्द्रकवचः इन्द्रवर्म, हस्ते पाणौ यस्य तादृशः। मातलिः इन्द्रसारथिः।

विविधेति।—देवराज इन्द्रः, अधिसमरं समरे, विभक्त्यर्थे अव्ययीभावः; विविधानां विचित्राणां, मणीनां रत्नानां, मयूखमञ्जरीभिः किरणवल्लरिभिः, हरस्य मञ्जरीवत पारदृश्यमानकिरणराजिमिति यावत्, कृत आरोपितः, सुरचापानां शक्रधनुषां, सहस्रस्य सन्निपातः समावेशः यस्मिन् तादृशे, अत्र रामोपस्थानार्थे

अधिसमरमहारयत् विमाने
निजमपि कार्मुकमत्र देवराजः ॥ ५४ ॥

(आकाशे कर्णे दत्त्वा)। किमाह रावणप्रतीहारः,—(क) अरे रे पुरुहूतसूत !—(ख)

दर्पोऽयं भवतः सुरासुरचमूदोःकाण्डकण्डूविष-
ज्वालाजाङ्गुलिकेन जङ्गलभुजां पत्याऽपि न त्याजितः ? ।
येनैन्द्रे रथ-वर्त्मणो रघुशिशोरस्योपनीते त्वया
राजद्विष्टमिदं विधाय स कथं शक्तोऽपि वर्त्तिष्यते ? ॥५५॥

प्रेरिते अस्मिन्, विमाने व्योमयाने, गुप्तमार्गे गमनोपयोगिनि रथे इत्यर्थः, निज स्वकीयं, कार्मुकं धनुरपि, अहारयत् प्रेषयामास। पुष्पितायां उक्तम् —"अयुजि न-युगरेफतो नकारो युजि तु न-जौ ज-र-गाश्च पुष्पितायाः" इति तल्लक्षणात् ॥ ५४ ॥

(क) रावणप्रतीहारः रावणद्वारपालः, रावणदैवरक्षिसैन्यविशेषो वा, प्रतीहार-शब्दस्य द्वाररक्षकार्थकत्वेऽपि अत्र उपचारात् दैवरक्षकार्थो बोद्धव्यः।

(ख) पुरुहूतसूत ! इन्द्रसारथे ! "इन्द्रो मरुत्वान् मघवा··· । पुरुहूतः पुरन्दरः ॥" इत्यमरः।

दर्प इति।—सुरासुराणां देव-दैत्यानां, याः चम्वः सेनाः, ताभ्यो यौ दोःकाण्डाः भुजस्तम्भाः भुजवर्गा वा, भुजसमूहा इत्यर्थः, "काण्डोऽस्त्री दण्डवाणार्व-वर्गावसर-वारिषु" इत्यमरः; तेषां काण्डूरेव काण्डूतिरेव, युद्धस्पृहा एव इति भावः, विज्वालाः विषतेजः, सर्पादिदंशजनितविषस्य यातना इत्यर्थः, तस्याः जाङ्गुली विषप्रशमन-विद्या तां वेत्तीति जाङ्गुलिकः तेन विषवैद्येन इत्यर्थः, तत्काण्डूपशमनकारिणेति यावत्, सुरासुरभुजदर्पहारिणेति भावः, "जाङ्गुली विषविद्यायाम्" इति मेदिनी; "विषवैद्यो जाङ्गुलिकः" इत्यमरः; जङ्गलं निर्जलं मांसलमित्यर्थः, भुञ्जते इति जङ्गलभुजः तेषां राक्षसानामित्यर्थः, "जङ्गलं निर्जलस्थाने विशिष्टां पिशितेऽस्त्रियाम्" इति मेदिनी; पत्याऽपि प्रभुणाऽपि, रावणेनापि इत्यर्थः, भवतः तव, अयम् एषः, दर्पः अहङ्कारः, न त्याजितः ? न विनाशितः ? इति यावत्, न दूरीभूतः ? इति भावः, येन त्वया ऐन्द्रे इन्द्रसम्बन्धिनी, रथ-वर्त्मनी स्यन्दन-कवचे, अस्य रघुशिशोः रामस्य, उपनीते प्रापिते, दत्ते इति यावत्, स भवान् इदम् एवम्प्रकारं, राजद्विष्टं राजद्वेषं,

रक्षपूजः । (सूतिमभिनीय) । किमाह रामः,—सत्यमिदं भोः ! यच्छीलः (ग) स्वामी, तच्छीलास्तस्य प्रकृतयः, (घ) यदेवमपि स्वामिनो मूलोच्छेदिना दुर्णयेन विकत्थन्ते (ङ) ।

हेमाङ्गदः । (आकाशे कर्णं दत्त्वा) । किमाह रावणः,—अरे तापसवटो !—

क्रोधेन ज्वलिता मुहूर्त्तमनु च स्वैरेव निर्वापिताः
क्लीवैरश्रुमहोर्मिभिर्मखभुजां पत्युः सहस्रं दृशः ।
यैर्दृष्टा भुवनत्रयोविजयिभिः सर्वंसहाः सन्त्यमी
ते सम्प्रत्यपि मे नयापनययोर्निर्वाहमूलं भुजाः ॥ ५६ ॥

रक्षपूजः । (कर्णं दत्त्वा विहस्य) । किमाह रामः,—

विधाय कृत्वा, अक्लीबोऽपि समर्थोऽपि, आत्मानं रक्षितुमिति शेषः, कथं केन प्रकारेण, वर्त्तिष्यते ? जीविष्यति ? नैव कथमपि जीविष्यतीत्यर्थः । आर्द्रचूडविक्रीडितं हसम् ॥ ५५ ॥

(ग) यच्छीलः यत्स्वभावः ।

(घ) तच्छीलाः तत्स्वभावाः । प्रकृतयः अमात्याः, पौरवर्गा वा ।

(ङ) मूलोच्छेदिना समूलविनाशिना । दुर्णयेन दुराचारेण । विकत्थन्ते श्लाघन्ते ।

क्रोधेनेति ।—भुवनत्रयोविजयिभिः त्रिभुवनजेतृभिः, ये: भुजैः, मुहूर्त्तं अल्पकालं, क्रोधेन कोपेन, ज्वलिताः प्रदीप्ताः, अनु च पश्चात्, ज्वलनानन्तरमेवेत्यर्थः, स्वैरेव निजैरेव, क्लीवैः अविक्रमैः, विक्रमाभावसूचकैरित्यर्थः, भयव्यञ्जकैरिति यावत्, निष्प्रकैरिति भावः, "क्लीबं नपुंसके षण्ढे वाच्यलिङ्गेऽविक्रमे" इत्यमरः ; अश्रुमहोर्मिभिः बाष्पसन्ततरङ्गैः, नेत्रजलप्रवाहैरित्यर्थः, निर्वापिताः उपशमिताः, निरुद्धीकृताः इत्यर्थः, मखभुजां देवानां, पत्युः अधिपस्य इन्द्रस्य, सहस्रं दृशः नेत्राणि, दृष्टाः अवलोकिताः, सर्वंसहाः सर्वंसहावन्त इति यावत्, नयापनययोः नीति-दुर्नीत्योः, निर्वाहे सम्पादने, मूलं हेतुभूताः, मे मम, ते पूर्वोक्तरूपाः, अमी परिदृश्यमानाः, भुजाः बाहवः, सम्प्रत्यपि इदानीमपि, सन्ति वर्त्तन्ते, एभिरेव भुजैस्त्वां निहनिष्यामीति भावः। आर्द्रचूडविक्रीडितं हसम् ॥ ५६ ॥

छित्त्वा मूर्द्धः किमिति स हतो धूर्जटिर्यद्यमीषां
दोःस्तम्भानां त्रिभुवनजयश्रीरियं वास्तवी ते ? ।
मूर्द्धानो वा न खलु भवतो दुर्लभाः सम्भवेयु-
र्यत् देवस्य त्वमसि जगतां शिल्पिनोऽपि प्रपौत्रः ॥ ५७ ॥

यत् पुनर्ब्रवीषि, "सम्प्रत्यपि ते भुजाः सन्ति" इति, तदधुनैव ज्ञास्यन्ते। (च)

हेमाङ्गदः। (कर्णं दत्त्वा)। किमाह रावणः,—अरे रे राजत्यडिम्भ! भवतः पुराणपितामहेन बहु तावदनरण्येनैव ज्ञातम्, (छ) इदानीं भवानपि ज्ञास्यति।

छित्त्वेति।—यदि ते तव, अमीषां पारदृश्यमानानां, दोःस्तम्भानां बाहुरूप-स्तम्भानाम्, इयं त्वदुक्ता इत्यर्थः, त्रिभुवनजयश्रीः त्रिलोकविजयलक्ष्मीः, वास्तवी पारमार्थिकी, वस्तुतः बाहुबलेनैव सिद्धेति यावत्, तदा मूर्द्धः शिरांसि, छित्त्वा कर्त्तित्वा, स धूर्जटिः शिवः, किमिति कथं, हतः ? प्रार्थितः ? त्रिभुवनजय-श्रियमिति शेषः; त्वया स्व-मस्तकच्छेदने च यत् साहसं प्रदर्शितं, तदपि न वास्तवसाहसवर्णनं, परन्तु तव कारणविशेषो विद्यते इत्याह—मूर्द्धान इति। वा पक्षान्तरे, यत यतः, त्वं जगतां भुवनत्रयस्य, शिल्पिनः कारोः, सृष्टुरित्यर्थः, दैवस्य ब्रह्मण इत्यर्थः, प्रपौत्रः पुत्रस्य पौत्रः, असि भवसि, अतः भवतः तव, मूर्द्धानोऽपि शिरांस्यपि, न खलु नैव, दुर्लभाः दुष्प्रापाः, सम्भवेयुः गच्छेयुरिति यावत्, सुलभा एवेति भावः, त्वया ज्ञातं यत् मम शिरांसि यावन्ति छिन्नानि भवन्ति, तावत्यस्य मम प्रपितामहः पुनर्जनिष्यति, तत् कथं शिरःकर्त्तनात् मम भयमिति बुद्ध्या त्वया स्वशिरांसि छित्त्वा शङ्करस्तोषितः, वास्तवं तव न साहसिकत्वमिति तात्पर्यम्। मन्दाक्रान्ता वृत्तम् ॥ ५७ ॥

(च) ज्ञास्यन्ते, अस्माभिरिति शेषः। "ज्ञास्यन्ते" इति पाठस्तु न समीचीनतया प्रतिभाति, 'तत्' इत्यस्य कर्मत्वेन "ज्ञास्यते" इत्यस्यैव युक्तत्वादिति सुधीभिर्बोद्धव्यम्।

(छ) पुराणपितामहेन प्रपितामहादीनामपि पितामहेनेत्यर्थः, बहुपूर्वतन-पुरुषेणेति यावत्। अनरण्येनैव सूर्य्यवंशीयराजविशेषेणैव। बहु समधिकं यथा तथेत्यर्थः, विशेषभावेनेति यावत्। ज्ञातं, मम भुजाः सन्ति न वा इतीति शेषः, यद्वा—भुजबलमिति शेषः। अनरण्यो रावणेन रणे निहत इति पुराणम्।

रत्नचूडः। (कर्णे दत्त्वा विहस्य)। किमाह रामः,—अरे रे राक्षसीपुत्र!—

न दूये नः पूर्वं नृपतिमनरण्यं यदवधी-
र्जयो वा मृत्युर्वा युधि भुजभृतां कः परिभवः?।
जितं तु त्वा कारागृहविनिहितं हैहयपतेः
पुलस्त्यो यत् भिक्षामकृत कृपणस्तत् व्यथयति॥ ५८॥

हेमाङ्गदः। (कर्णे दत्त्वा)। किमाह रावणः,—आः क्षत्रियवटो! वाचाट! कथम, अपूर्वंगिल्यो (ज) रजनिचरेन्द्रचरितचन्द्रेऽपि लक्ष्म लिखसि (झ), तदयं न भवसि (ञ)।

हेमाङ्गदः। (सक्रुधमवलोक्य)। कथम्, उपक्रान्तमेव शरसहस्रसंदर्दिनं मन्दोदरीदयितेन। (ट)

न दूये इत्त।—नः अस्माकं, पूर्वे पूर्वपुरुषम, अनरण्यं तदाख्यं, नृपतिं राजानं, यत् अवधीः हतवानसि, तेन न दूये न परितप्ये, भुजभृतां बाहुशालिनां, युधि युद्धे, जयो वा विजयशाली वा, मृत्युर्वा मरणं वा, उभयोरेकतरमित्यर्थः भवति, तव परिभवः भवमानं, कः? नेत्यर्थः, तु किन्तु, पुलस्त्यः तव पितामहः, कृपणः दीनः सन्, हैहयपतेः कार्तवीर्यस्य, कारागृहविनिहितं बन्धनागारनिक्षिप्तं, जितं पराभूतं, कार्तवीर्यार्जुनेनेति भावः, त्वा भवन्तं, यत् भिक्षां याञ्चां, तव मुक्तिप्रार्थनामित्यर्थः, अकृत कृतवान्, तत् भिक्षणं, व्यथयति तापयति, मामिति शेषः, अनल्पविडम्बस्य ब्रह्मतनयस्य मुनेर्दीनभावेन भिक्षाकरणदर्शनादिति भावः। भिक्षारिणो इत्तम॥ ५८॥

(ज) वाचाट। वाचाल। अबद्धबहुभाषिन्! इत्यर्थः। अपूर्वंगिल्यो नूतनविलक्षरः, लक्ष्मेति शेषः, अपूर्वत्वञ्च इतःपूर्वं कैलासादि शत्रुगिरिष्वेव कलङ्कालेखनादिति भावः।

(झ) रजनीति।—रजनिचरेन्द्रस्य निशाचरराजस्य, रावणस्येत्यर्थः, चरितचन्द्रे चन्द्रवत् निर्मलचरिते इत्यर्थः। लक्ष्म कलङ्कम्। लिखसि विलयसि, आरोपयसीत्यर्थः।

(ञ) भवसि एव, ईदृश इत्यर्थः, न भवसि न तिष्ठसीत्यर्थः, न जीवसीति भावः, लक्ष्मेति शेषः।

रक्षचूडः। कथं, मैथिलीवल्लभेनापि प्रत्युपक्रान्तमेव। (ठ)

(विहस्य)—

पतन्ति रामभद्रेण खण्डिता रावणेषवः।
पूर्वार्द्धैः फलिभिर्वेगात् पश्चार्द्धैः पत्रिभिश्चिरात्॥ ५९॥

किञ्च—

अश्वेषु केतुदण्डे च सारथौ च हयेषु च।
खेलन्ति राक्षसेन्द्रस्य स्यन्दने रामपत्रिणः॥ ६०॥

हैमाङ्गदः। (सभयम्)। अहह!—

अन्धकारीकृतव्योमा बाणवर्षेण रावणः।
रामारूढं तिरोधत्ते शताङ्गं शातमन्यवम्॥ ६१॥

(ठ) उपक्रान्तम् आरब्धं, शरसङ्घसदृक्षेन बाणसङ्घसदृक्षेणेत्यर्थः। मन्दोदरीदयितेन मन्दोदरीवल्लभेन।

(ड) मैथिलीवल्लभेन जानकीप्रियेण। प्रत्युपक्रान्तं प्रत्यारब्धं, प्रतिकूलमारब्धमित्यर्थः, शरसङ्घसदृक्षमिति शेषः, रावणवर्षितशरनिवारणार्थं शातकूलमादेन शरवर्षणमारब्धमिति तात्पर्यार्थः।

पतन्तीति।—रामभद्रेण रामचन्द्रेण, खण्डिताः द्विधाकृताः, रावणस्य दशकः शराः, फलिभिः भल्लाग्रवद्भिः, लोहनिर्मितायविशिष्टैरित्यर्थः, "फलं ··भल्लाग्रे स्युष्टि-ज्ञामयोः" इति हैमः, पूर्वार्द्धैः द्विधा खण्डितस्य प्रथमार्द्धभागैः, फलोपशोभितप्रथमार्द्धभागा इत्यर्थः, वेगात् सत्वरं, शरस्यौढफलबंयुक्तत्वादिति भावः, तथा पश्चाद्भिः पत्रवद्भिः, पक्षयुक्तैरित्यर्थः, पश्चार्द्धैः द्विधा खण्डितस्य शेषार्द्धांशैः, पक्षोपशोभितपश्चाद्भागा इत्यर्थः, चिरात् दीर्घकालेन, विलम्बादित्यर्थः, वातादधोगतिवशेनेति भावः, पतन्ति खेलन्ति। अनुष्टुप् छन्दम्॥ ५९॥

अश्वेषु इति।—रामपत्रिणः रामशराः, "कङ्कपत्रनाराचशराः पत्री रोप इषुर्द्वयोः" इत्यमरः; राक्षसेन्द्रस्य रक्षोराजस्य रावणस्य, स्यन्दने रथे, अश्वेषु चक्रेषु, रथावयवविशेषचक्रेषु इत्यर्थः, "अक्षाक्षिन्द्रियेषु। नाभ्यूहाङ्गे वर्षे चक्रे व्यवहारे क्षणिदुमे॥" इत्यमरः; केतुदण्डे च ध्वजयष्ट्यां च, सारथौ च सूतेऽपि, हयेषु च अश्वेषु अपि, रक्षोनिवहचोटकेष्वपीत्यर्थः, खेलन्ति क्रीडन्ति, इतस्ततश्चरन्ति, भ्रमन्तीत्यर्थः, एवं सर्वत्र चक्रचक्षनाशेनाशिं पतन्तीत्यर्थः॥ ६०॥

(चिरं दृष्ट्वा सविस्मयम्)। सखे!—

नानाविधानि अस्त्राणि अस्त्रैर्नानाविधैरपि।
इमौ हि प्रतिकुर्वाते न कश्चिदतिरिच्यते ॥ ६२ ॥

सूत्रधारः। एवमेतत्—

यत् रावणो बहुभिरेष भुजैः करोति
तत् राघवः प्रतिकरोति भुजद्वयेन।
कर्म द्वयोर्यदपि तुल्यफलं तथाऽपि
रक्षोभटाद्दशगुणं नरवीरशिल्पम् ॥ ६३ ॥

अम्बरावरोक्षतेति।—वाचवर्षेण शरवर्षेण, अम्बरावरोक्षं समाच्छन्नमिति यावत्, व्योम आकाशं येन तथाभूतः, रावणः राक्षसराजः, रामेण रघुनाथेन, आरूढम् अधिष्ठितं, शतं मखाः क्रतवः, यस्य सः शतमन्युः शतक्रतुः, शताश्वमेधयाजीत्यर्थः, "मन्युर्दन्ये क्रतौ क्रुधि" इत्यमरः; शतमन्योरिदं शातमन्यवम् ऐन्द्रं, शताङ्गं रथं, "शताङ्गः स्यन्दनो रथः" इत्यमरः; तिरोधत्ते अन्तर्भूतमिवाचष्टेऽयं प्रयोगः, तिरोधापयतीत्यर्थः, आच्छादयतीति यावत्, वाचवर्षेणेति भावः। अनुष्टुप् वृत्तम् ॥ ६१ ॥

नानेति।—इमौ राम-रावणौ, नानाविधैः विविधैः, अस्त्रैः आयुधैः, नानाविधानि विविधानि, अस्त्राणि आयुधानि, प्रतिकुर्वाते निर्यातयतः, निवारयत इत्यर्थः, विफलीकुरुतः इति यावत्, हीति अवधारणे, कश्चिदपि कोऽपि, अनयोरिति शेषः, न अतिरिच्यते न अतिरिक्तो भवति, कोऽपि कमपि अतिक्रमितुं न समर्थो भवतीत्यर्थः, तुल्यतयैवानयोर्युद्धं वर्त्तते इति भावः। अनुष्टुप् वृत्तम् ॥ ६२ ॥

यदिति।—एषः अयं, रावणः दशाननः, बहुभिः अनेकैः, विंशत्येति भावः, भुजैः बाहुभिः, यत, कर्मेति शेषः, करोति सम्पादयति, राघवः रामः, भुजद्वयेन बाहुद्वयमात्रेणैव, तत्, कर्मेति शेषः, प्रतिकरोति प्रतिकूलतया सम्पादयति, भुजद्वयमात्रेण विंशतिभुजनिष्पादितस्य कर्मणः प्रतिविधानं करोतीत्यर्थः, यदपि यद्यपि, द्वयोः उभयोः राम-रावणयोः, कर्म कार्य्ये, तुल्यफलं समफलं, इति-प्रतिकृतिभ्यामिति भावः, तथाऽपि नरवीरस्य नरेषु मनुष्येषु मध्ये, वीरस्य एकमात्रशूरस्य, मनुष्यमध्ये वीरश्रेष्ठस्य, रामस्य राघवस्य, शिल्पं कलाविशेषः, युद्धकौशलमिति यावत्, रक्षोभटात् राक्षसवीरात्, दशगुणं दशाहतं, बहुलतया श्रेष्ठमित्यर्थः, वर्त्तते इति शेषः। वसन्ततिलकं वृत्तम् ॥ ६३ ॥

ईमाङ्कदः। (विहस्य)। सखे!—

विंशत्याऽपि भुजैरेष द्वौ भुजावभियोधयन्।
अदूषितद्वन्द्वयुद्ध-मर्य्यादो दशकन्धरः॥ ६४॥

[सखेद-भयं च)। कथम्, अयं रावणो माहेन्द्रस्यन्दनात् (ड)—

तस्यारिबलभीमस्य ध्वजदण्डस्य लाञ्छनम्।
दर्पदीप्तः क्षुरप्रेण मायूरं पिच्छमच्छिनत्॥ ६५॥

रत्नचूडः। (सहर्षम्)। सखे! पश्य पश्य, कुलिशकेतुः केतनविमाननाविलक्षकुडेन (ढ)—

दिक्पालद्विपदर्पदानलहरीसौरभ्यगर्भानिलैः
पत्तैरेव समस्तराक्षसकथाकल्पान्तकर्णेजपाः।
दीयन्ते रघुपुङ्गवेन कतिचित् पौलस्त्यमौलिष्वमौ
पौलोमीनयनाम्बुशीकरकणावग्राहिणो मार्गणाः॥ ६६॥

विंशत्येति।—एषः अयं, दशकन्धरः दशग्रीवः रावणः, विंशत्या विंशतिसङ्ख्यकैः, भुजैः बाहुभिः, द्वौ भुजौ बाहुद्वयं, रामस्येति शेषः, अभियोधयन्नपि युद्धं कारयन्नपि, न दूषितः न खण्डितः इति यावत् द्वन्द्वयुद्धस्य द्वैरथसङ्ग्रामस्य, रथद्वयाऽटद्योः वीरयोः सम्मुखसङ्ग्रामस्येत्यर्थः, मर्य्यादा स्थितिः, नियमः इत्यर्थः, येन तथोक्तः, "मर्य्यादा सीमनि स्थितौ" इति मेदिनी; वर्त्तते इति शेषः। परिहासोक्तिरियम्। अनुष्टुप् छन्दम्॥६४॥

(ड) माहेन्द्रस्यन्दनात् ऐन्द्ररथात्।

तस्येति।—दर्पेण गर्वेण, दीप्तः प्रज्वलितः, गर्वान्वित इत्यर्थः, रावणः इति शेषः, क्षुरप्रेण तदाख्येन अस्त्रेणेत्यर्थः, अरिबलानां शत्रुसैन्यानां, भीमस्य भयङ्करस्य, तस्य प्रसिद्धस्य, ध्वजदण्डस्य पताकायष्टेः, लाञ्छनं चिह्नभूतं, मायूरं मयूरसम्बन्धि, पिच्छं बर्हम्, अच्छिनत् चिच्छेद। अनुष्टुप् छन्दम्॥ ६५॥

(ढ) कुलिशेति।—कुलिशकेतोः वज्रलाञ्छनस्य, वज्रधरस्य इन्द्रस्य इत्यर्थः, "केतुर्ना कल्पताकारि-पक्षोत्पातेषु लक्ष्मणि" इति मेदिनी; केतनं ध्वजः, ध्वजदण्डः इति यावत्, "केतनन्तु ध्वजे गार्ह्ये निवासस्थो:" इत्यजयः; तस्य विमाननस्य अपमानेन, छेदनरूपमर्य्यादाभङ्गेनेनेत्यर्थः, विलक्षः लज्जितः, क्रुडस्य दृष्टस्य तेन।

दिक्पालेति।—रघुपुङ्गवेन रघुश्रेष्ठेन रामेण, दिक्पालद्विपानां दिक्पालगजानाम्

ऐनाकदः । (सखेदाद्भुतम्) । कथं, किरीटपरम्परापरिभव-
ममृष्यमाणेन बाणवर्षाहेतमातन्वता (ण) राक्षसराजेन—

विदेहकन्याकुचकुम्भकोटि-
कठोरतासाक्षिणि सायकोऽयम् ।
रामस्य जन्मान्तरमेलकार-
श्री-कौस्तुभे वक्षसि हा ! निखातः ॥ ६७ ॥

(सम्यगवलोक्य) । सखे !—

इन्द्रादीनां, ये दिग्याः गजाः तेषाम् ऐरावतादीनां दिग्गजानां, दर्पेण अहङ्कारेण, आरोपितया इति भावः, या दानलहरी मद-वारितरङ्गः, मदवारिप्रवाह इत्यर्थः, तस्याः सौरभं सौगन्ध्यं, गर्भे अभ्यन्तरे येषां तादृशाः, अनिलाः वायवः येषां तथाभूतैः, पवनैरेव पुङ्खैरेव उपलक्षिताः, तादृशपवनसन्निता इत्यर्थः, समस्तानां सकलानां, राक्षसकुलानां राक्षस इति शब्दानां, कल्पान्तस्य प्रलयस्य, सर्वथा उच्छेदस्येत्यर्थः, "संवर्तः प्रलयः क्षयः कल्पान्त इत्यपि" इत्यमरः ; कर्णेजपाः सूचकाः, "कर्णेजपः सूचकः स्यात्" इत्यमरः ; पौलोम्याः पुलोमदुहितुः शच्याः, नयनाम्बूनाम् अश्रूणां, ये मौक्तिकच्छायाः जलबिन्दवः, रावणकृतैकराज्यापहरणेन निःसृता इति भावः, तेषाम् अवयाहिनः विघातिनः, प्रतिबन्धिनः इत्यर्थः, "वृष्टिर्वर्षं तद्विघाते-ऽवयाहावग्रहौ समौ" इत्यमरः ; शच्याः मौक्तिकहारस्य इति भावः, अमी दृश्यमाना एते, कतिचित् मार्गणाः शराः, "मार्गणो याचके शरे" इति मेदिनी ; पौलस्त्यस्य रावणस्य, मौलिषु किरीटेषु, "मौलिः किरीट-चन्द्रिकौ" इत्यमरः ; दोषन्ते निक्षिप्यन्ते । शार्दूलविक्रीडितं वृत्तम् ॥ ६६ ॥

(ण) किरीटेति ।—किरीटानां मुकुटानां, इन्द्रसङ्क्रामणामिति भावः, परम्परा श्रेणिः, तस्याः परिभवं तिरस्कारं, शराघातेन छेदनादिरूपमिति भावः, असृष्यमाणेन असहमानेन । बाणवर्षाहेतम् अहितोयं शरवर्षमित्यर्थः, आतन्वता निक्षिपतेति यावत्, आतन्वता विस्तारयता, कुर्वता इत्यर्थः ।

विदेहेति ।—विदेहकन्यायाः मैथिलतनयायाः सीतायाः, कुचौ स्तनौ, कुम्भाविव घटाविव, तयोः कोटेः अग्रभागस्य, चुचुकस्येत्यर्थः, या कठोरता काठिन्यं, तस्य साक्षिणि साक्षात् द्रष्टरि, अनुभाविनीति यावत्, जन्मान्तरे मूर्त्तिभेदे, विष्णुदेहे इति यावत्, मेलकारी सङ्घटनाविधायकः, श्री-कौस्तुभौ लक्ष्मी-कौस्तुभाख्यमणौ यस्य

एकेनैव निवातकङ्कटभिदा लङ्केशितुः पत्रिणा
विद्धोऽयं यदि नाम कोऽपि जगतामुल्लाघनो राघवः।
चक्षुर्वर्त्मसहस्रनिःसरदसृग्धारौघभाङ्कारिणा
माहेन्द्रेण तु वर्मणा विहसते वीरः सहस्रं व्रणान् ॥ ६८ ॥

रत्नचूडः। (सहर्षम्)। राघवेणापि—

सीतास्तनस्तवकुङ्कुमपङ्कलोप-
सङ्कल्पपातकिनि वक्षसि रावणस्य।

यत्र वा तादृशे, रामस्य सीतापतेः, वक्षसि उरसि, अयं सायकः शरः, निखातः विद्धः, निक्षिप्तः इत्यर्थः, हा! इति खेदे। उपजातिः वृत्तम् ॥ ६७ ॥

एकेनेति।—एकेनैव एकसङ्ख्याकेनैव, निवातं नास्ति वातः वायुप्रवेशः इति यावत् यत्र तथाभूतं, वायुप्रवेशशून्यमपि रन्ध्रविहीनमित्यर्थः, शरीरेण सह दृढसम्बन्धमिति यावत्, कङ्कटम् उरस्त्रं, वर्मेति यावत्, "अथ तनुत्रं वर्म दंशनम। उरस्त्रं कङ्कटः" इत्यमरः; भिनत्ति विदारयतीति तथोक्तेन, लङ्केशितुः रावणस्य, पत्रिणा शरेण, "कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः" इत्यमरः, जगतां भुवनानां, त्रिभुवनमध्ये इत्यर्थः, कोऽपि अनिर्वचनीयचरित इति, अतिशयः इति वा भावः, उल्लाघनः निरामयः, नीरोग इत्यर्थः, यद्वा—उल्लाघनः निपुणः, युद्धकुशलोत्यर्थः, "उल्लाघो निपुणे हृष्टे व्याधि-नीरोगयोरपि" इत्यमरः; यद्वा—उल्लाघः नीरोगः, तं करोतीति उल्लाघ-शब्दात् "तत्करोति तदाचष्टे" इति णिचि कृते ल्युटा उल्लाघनः नीरोगजनकः, रोगग्लानिकरः इत्यर्थः, उत्पातविध्वंसीति यावत्, "उल्लाघो निरुजः" इति वैयाकरणाश्च, अयं वीरः शूरः, राघवः रामः, यदि नाम यद्यपीत्यर्थः, नामेति विस्मयद्योतकमव्ययं, विद्धः ताडितः, तु किन्तु, चक्षुषा नयनाभ्यां, वर्मणि अङ्गित्राणे सहस्रसङ्ख्याकानीति भावः, वर्मसहस्रात् रन्ध्रसहस्रात, निःसरतः निर्गच्छतः, असृग्धारौघस्य रक्तप्रवाहसमूहस्य, भाङ्कारिणा भाङ्कारशब्दवता, माहेन्द्रेण ऐन्द्रेण, वर्मणा कवचेन, सहस्रनेत्रचिह्नितेनेति भावः, सहस्रं व्रणान् क्षतानि, विहसते प्रकाशयति, वर्मणः महेन्द्रशरीरवर्त्तिना सहस्रनेत्राणां प्रकाशवर्त्मरन्ध्रेण प्रस्तुतत्वात् तदर्पितदेहस्य रामस्य एकाङ्गे क्षतेऽपि सहस्रनेत्रवर्त्मभ्यः शोणितस्रावात् सहस्रव्रणमालिलिङ्गिव प्रकाशते इति भावः। मार्दूलविक्रीडितं वृत्तम् ॥ ६८ ॥

सीतेति —सीतायाः जानक्याः, स्तनौ कुचौ तावेवाविव पुष्पगुच्छाविव, तयोः

न्यस्तः शरो विबुधकुञ्जरदन्तघात-
रूढ़व्रणार्बुदचतुष्टयमध्यवर्त्ती ॥ ६९ ॥

वैमानिकः। (कर्णं दत्त्वा सविस्मयम्)। एकेन सव्यपाणिना विग्रिख-
मुत्खाय (त) किमाह रावणः,—साधु रे मनुष्यडिम्भ!
साधु—

त्रैविक्रमः सकलदानवजीवितव्य-
विद्यासमाप्तिलिखितरिव सुदर्शनो मे।
यस्मिन् निपत्य हृदये दलितारजाल-
ज्योतिस्तुषारमयमाभरणं बभूव ॥ ७० ॥

क्रुङ्कुमपङ्कस्य काश्मीरद्रवस्य, लोपे खण्डने, प्रोञ्छने इत्यर्थः, वैधव्यादिति आलिङ्गनादिति वा भावः, य सङ्कल्पः इच्छा, तेन पातकिनि पापयुक्ते, "लोप" इत्यत्र "लेप" इति पाठे—सीतायाः स्तनस्तवकयोः क्रुङ्कुमपङ्कस्य लेपः लेपनं, सीता वशीकृत्य तस्याः स्तनद्वये प्रसाधनार्थमिति आश्लेषेणेति वा भावः, तत्र यः सङ्कल्पः, तेन पातकिनि पापयुक्ते, रावणस्य दशाननस्य, वक्षसि उरसि, शरः बाणः, विबुधकुञ्जरस्य सुरगजस्य, ऐरावतस्येत्यर्थः, दन्तैः दशनैः, चतुर्भिरिति शेषः, तस्य चतुर्दन्तत्वादिति भावः, घातेन प्रहारेण, रूढानां जातानां, व्रणार्बुदानां व्रणपिण्डीभूतक्षतदेशानां, चतुष्टयस्य चतुःसङ्ख्यकस्य, क्षतचिह्नचतुष्टयस्येत्यर्थः, मध्यवर्त्ती यथा तथा मध्यभागे इत्यर्थः, न्यस्तः निखातः। वक्षस्यतिक्षतं दत्तम् ॥ ६९ ॥

(त) सव्यपाणिना दक्षिणहस्तेन वामहस्तेन वा, दशसङ्ख्यकानां वामहस्तानां दक्षिणहस्तानां वा एकेन हस्तेन इत्यर्थः, "सव्यं वामे च दक्षिणे" इत्यमरः। विग्रिखं शरम्, उत्खाय उत्क्षिप्य।

त्रैविक्रम इति।—सकलानां समस्तानां, दानवानाम् असुराणां, जीवितव्यं जीवनमेव, विद्या ज्ञानं, तस्याः समाप्तिलिखितः समाप्तिसूचकलेखः, समाप्तक इत्यर्थः, दानवसर्वप्राणान्तक इति यावत्, त्रैविक्रमः त्रिविक्रमो विष्णुः तत्सम्बन्धी, एष सुदर्शनः चक्राख्यास्त्रविशेषः, मे मम, यस्मिन् यत्र, हृदये वक्षसि, निपत्य पतित्वा, दलितं खण्डितं निष्पिष्टं वा, यत् अरजालं चक्रप्रान्तसमूहः, यद्वा—अरजालं रथाङ्गावयवसमूहः, चक्रप्रान्तावयवसमूह इत्यर्थः, "अरमङ्गे रथाङ्गस्य शीघ्र-शीघ्रगयोरपि" इति मान्धत., तस्य ज्योतिषा प्रभया, तुषारमयं हिमिरमयम्, अतिशीतलमिति

तस्मिन्नपि रुधिरदर्शनं कुर्वाणेन भवता दर्शितेयं सुरासुर-वीरातिशायिनी हस्तवत्ता। (थ)

रजपूतः। अहह! विपक्षगिरामुद्गारेण सर्वंसह्यिगुरुणा दूरं दीप्यमानस्य—(द)

सुविनिहितचन्द्रहासव्रणकिणवलयोपहसितहारेषु।
रामस्य मार्गणगणाः पतन्ति दशकण्ठकण्ठेषु॥ ७१॥

हैमाङ्गदः। (सक्रोधम्)। सखे! पश्य पश्य—अनुरूप-वीरसंवादप्रमोदभरद्विगुणितावष्टम्भसङ्क्षोभितभुवनत्रयस्य निर-

---

ाव; यद्वा—तुषारमयं तुहिनात्मकं, तुषारवदतिशीतलमिति भावः, आभरणं भूषणं, भूव, सुदर्शनास्त्रप्रहारेण व्यथा दूरे आस्ता, प्रत्युत तज्जातिषा मम हृदयस्य ीमेवाभूदिति भावः। वसन्ततिलकं वृत्तम्॥ ७०॥

(ब) तस्मिन्नपि तादृशे वक्षस्यपि। सुरेति।—सुरासुरवीरेषु देव-दानववीरेषु, ातिशायिनी उत्कर्षशालिनी, देव दानववीरेभ्योऽपि अधिकेत्यर्थः। हस्तवत्ता प्रशस्त-हस्तशालित्वं, भुजवीर्यशालित्वमित्यर्थः।

(द) विपक्षगिरां शत्रुवचसाम्, उद्गारेण उच्चारणेन। सर्वंसह्यगिरिः कर्मधा० तेन; यद्वा—सर्वेषु क्षमासु, यन्त्रिषु पर्वसु, वंशादिग्रन्थिवत् अतिकठिनेषु ाक्येषु इत्यर्थः, अपीति शेषः, यद्वा—यन्त्रिषु बन्धेषु, सर्वंविषयबन्धनेषु इत्यर्थः, गुरुणा ृता, श्लथं कठिनेनेत्यर्थः, "यन्त्रिस्तु यन्त्रिपर्वे ना बन्धे कुम्भेद-पर्वणोः" इति मेदिनी; यपक्षगिरां शत्रुवाक्यानां, शत्रोः साहङ्कारवाक्यालापेनित्यर्थः, उद्गारेण उच्चारणेन, शत्रोः ाहङ्कारवचसा इत्यर्थः। दूरम् अतिमात्रम्। दीप्यमानस्य प्रज्वलतः, कुप्यत इत्यर्थः। वक्ष्यमाणश्लोकस्थ-रामस्य इत्यनेनान्वयः।

सुविनिहितेति।—रामस्य राघवस्य, मार्गणगणाः शरसमूहाः, सुष्ठु विनिहितस्य ाापितस्य, कर्तनार्थं कण्ठदेशे इति भावः, चन्द्रहासस्य दशग्रीवकरवालस्य, रावणस्य ासेरित्यर्थः। "चन्द्रहासो दशग्रीवकरवालेऽसिभावके" इति मेदिनी; ये व्रणाः ातानि, तेषां किणवलयैः मांसग्रन्थिमण्डलैः, वलयाकारशुष्कक्षतचिह्नैरिति भावः, पहसितः अवज्ञातः, अनादरेण परित्यक्त इति भावः, हारो येषु तथाभूतेषु, शकण्ठस्य रावणस्य, कण्ठेषु दशसु ग्रीवासु, पतन्ति निपतन्ति भवन्तीत्यर्थः। ाप्यां वृत्तम्॥ ७१॥

न्तरप्रक्षीयमाणबाणपञ्जरमध्यवर्त्तिना (घ) रामभद्रेण क्रीड़ा-
शकुन्तकौतुकं पूर्य्यते (ङ) राक्षसराजस्य। ननमिदानीम्—

उदस्तस्यत्सङ्कुचितनिभृतानामलुफणं
मणीनां विद्युद्भिः क्षणमुषितपातालतिमिरः।
भुजक्रीड़ावल्गद्दशमुखपदन्यासगरिम-
प्रगल्भैर्निश्वासैरजनि भुजगानामधिपतिः॥ ७२॥

(घ) अनुद्धतेति।—अनुद्धतेन सुसङ्गतेन, वीरसंवादेन वीरसम्भाषणेन, वीर्य्येण प्रतिद्वन्द्विना सह युद्धेनेति यावत्, यः प्रमोदभरः हर्षातिशयः, तेन द्विगुणितः द्विराकृतः, यः अवष्टम्भः गर्वः, यद्वा—अवष्टम्भः प्रारम्भः, द्विगुणोत्साहेन युद्धारम्भ इत्यर्थः, "अवष्टम्भः सुवर्णे च स्तम्भ-प्रारम्भयोरपि" इति मेदिनी; तेन सङ्कोचितं सङ्कुचीकृतं, भुवनत्रयं त्रैलोक्यं येन तथोक्तस्य, राक्षसराजस्येत्यनेनान्वयः। निरन्तरेति।—निरन्तरम् अजस्रं, प्रक्षीयमाणाः प्रक्षिप्यमाणाः, रावणेनेति भावः, बाणाः शराः, पञ्जरमिव पक्ष्यादिबन्धनगृहमिव, तस्य मध्यवर्त्तिना मध्यस्थितेन।

(ङ) क्रीड़ेति।—क्रीड़ाशकुन्तस्य क्रीड़ापक्षिणः, चित्तविनोदनाय पोषितस्य पक्षिण इत्यर्थः, कौतुकं कौतूहलम्। पूर्य्यते सफलीक्रियते।

उदस्तेति।—भुजगानां सर्पाणाम्, अधिपतिः राजा, वासुकिरित्यर्थः, उदस्तौ ऊर्द्धमस्तौ, युद्धप्रसङ्गेन सम्फलादिव्यापारवशेन रावणपदन्यासभरविरहादिति, शिथिलभावेन रावणकर्त्तृकपदविन्यासकाले इति वा भावः, तथा न्यस्तौ अवनमनौ, गाढतया तत्पदन्यासभरादिति भावः, या भूः पृथ्वी, तया हेतुना विततानि प्रकाशं गतानि, निभृतानि सङ्कुचितानि च, यथाक्रममिति भावः तेषाम्, उन्नमने विततानाम्, अवनमने च निभृतानामिति निष्कर्षः, अलुफणं प्रतिफणं, सङ्कुचितप्रकटफणासु इत्यर्थः, मणीनां रत्नानां, विद्युद्भिरिव विद्युद्भिः प्रभाभिरिति यावत्, क्षणं क्षणे क्षणे, उन्नमनक्षणे इत्यर्थः, मुषितं नाशितं, पातालतिमिरं रसातलान्धकारं येन तथाभूतः सन्, भुजक्रीड़या बाहुलीलया, उद्धतौशत्यप्रदर्शनेनेत्यर्थः, बलात् सत्वरम्, यो दशमुखः रावणः, तस्य पदन्यासस्य चरणविक्षेपस्य, यो गरिमा गुरुत्वं, भारवत्त्वमिति यावत्, तेन प्रगल्भाः उद्धताः, दीर्घाः इति यावत् तैः, निश्वासैः श्वासवायुभिः, उपलक्षित इति शेषः, विशेषणे तृतीया; अजनि जातः। मिश्रविष्टो वृत्तम्॥ ७२॥

रङ्गचूडः। (सभयमवलोक्य)। सखे! एवमेतत्—

रक्षोविक्षोभवेगोच्छलितजलनिधिव्यक्तमातङ्गचक्र-
क्रुध्यद्दिङ्नागमुक्तोद्धरणगुरुभरामद्य नागाधिराजः।
अङ्गेरङ्गेषु मग्नैरविरलबलिना वामनेनातिपीव्ना
देहेनापङ्गुवानः फणफलकपरीणाहमुर्वीं बिभर्त्ति ॥७१॥

(ऊर्ध्वमवलोक्य)। कथमितस्ततो वैमानिकैरपक्रम्यते (प) गगन-तलात्?

हेमाङ्गदः। (सचमत्कारम)। अहो! त्रिभुवनभयङ्करमायोधन-मुपक्रान्तं महावीराभ्याम्। तथा हि—

ध्यायत्ययं गाधिसुतादधीतान्
दिव्यास्त्रमन्त्रान् मनुवंशवीरः।

रक्ष इति।—नागाधिराजः वासुकिः, रक्षसः राक्षसस्य रावणस्य, विक्षोभः चाञ्चल्यं, रणचैत्ये सवेगमितस्ततः विचरणमिति यावत्, तस्य वेगेन भारातिशयेनेत्यर्थः, उच्छलितः उद्वेलितः, वेलातिक्रान्त इत्यर्थः, यः जलनिधिः समुद्रः, तेन हेतुना व्यक्तानि प्रकटानि, दर्शनं गतानीत्यर्थः, यानि मातङ्गचक्राणि जल-हस्तिसमूहाः, "मातङ्गनक्र" इति पाठे—व्यक्ता ये मातङ्गा जलहस्तिन., नक्राश्च जलजन्तुभेदाश्च, तेषां क्रुध्यद्भि क्रुध्यद्भि, दिङ्नागैः दिग्गजैः, मुक्त त्यक्तं, यत् उद्धरणम उत्क्षेप धारणम, अतस् दिशु दृढभावेन धारणमित्यर्थः, तेन हेतुना गुरुभरान्, नवभिरुद्धत्य भारश्च उक्तस्येव वासुकेर्मस्तके प्रदानादिति भाव:, भर भार: यस्या: तस्याम्, दिग्गजानां पृथ्वीधारणं पुराणप्रसिद्धम, उर्वीं पृथ्वीम, अविरल-बलिना बहुविलीयुक्तेन, वामनेन खर्वेण, अतिपीव्ना अतिस्थूलेन, सर्वत्रैव भारभारावहत्वात् देहं बहुत्व कुण्डलीभूततया अवस्थानादिति भाव:, दर्शन नायेन, फणफलकपरीणाहं फणसमूहविस्तारम, अपङ्गुवान: सङ्कोचयन् इत्यर्थ:, अत एव अङ्गेषु जायेषु, कुण्डलीभूतेषु इति भाव:, मग्नै गूढै, अङ्गै: जायै, कुण्डलीभूतैरवलक्षित: सन् इति भाव:, अद्य अधुना, अस्मिन् समये इत्यर्थ:, बिभर्त्ति धारयति। सम्बरा इत्तम् ॥ ७१ ॥

(प) वैमानिकै, विमानचारिभि:। अपक्रम्यते पलाय्यते।

आयत्यति।—अयम् एष:, मनुवंशवीर: मनुकुलोत्पन्नशूर:, राम: इत्यर्थ:, गाधि:

ब्रह्मोपदिष्टामिह शस्त्रविद्या-
मभौ तदाऽऽकाङ्क्षति राक्षसेन्द्रः ॥७४॥

तदावामप्यपसरावः। (इत्यपसृत्यासाते)। (क)

(ऐन्द्रद्रः)। (समन्तादवलोक्य)। सखे! यथा भुवनसङ्क्षोभः तथा तर्कयामि, (ख) तामिस्रं भानवीयेन, भानवीयं राहवीयेण, (भ) राहवीयं वैष्णवीयेन, वैष्णवीयं पौष्पकेतवेन (म) पौष्पकेतवं च पाशुपतेन अस्त्रमस्त्रेण प्रतिकुर्वाणयोः पुलस्त्य-ककुत्स्थकुलैक-वीरयोस्तुमुलमायोधनं (य) वर्त्तते।

रक्षचक्षुः। सखे! कृति-प्रतिकृतीनामविशेषेऽपि (र) जेतव्य-

सुतात् विश्वामित्रात्, अधीतान् शिक्षितान्, दिव्यास्त्रमन्त्रान् ब्रह्मशिरादीना दिव्या-युधानामुपस्थापनार्थं मन्त्रवर्णानित्यर्थः, ध्यायति चिन्तयति, असौ अयं, राक्षसेन्द्रः रक्षोराजः रावणः, इह रङ्गवेदे, तदा तस्मिन् काले, पुरेति भावः, यदा—तदा तस्मिन् काले, रामो यदा मन्त्रवर्णान् स्मरति, तस्मिन् अवसरे इति भावः, ब्रह्मणा वेधसा, उपदिष्टां कथितां, शस्त्रविद्यां अस्त्रविद्यां, आकाङ्क्षति अभिलषति, अरतीति भावः, आशीर्वचनार्थमिति शेषः। इन्द्रवज्रा वृत्तम् ॥ ७४ ॥

(क) अपसृत्य किञ्चिदूरं गत्वा, आसाते तिष्ठतः।

(ख) भुवनसङ्क्षोभः भुवनानां जगतां, सङ्क्षोभः चाञ्चल्यं, तत्क्षोभमिव इति यावत्। तर्कयामि सम्भावयामि।

(भ) तामिस्रं तमिस्रा तामसी रात्रिर्देवता अस्येति तथोक्तम्, अस्त्रमिति शेषः, तिमिरबाणमित्यर्थः, भानवीयेन भानुः सूर्यः देवता यस्य तथोक्तेन, अस्त्रेणेति शेषः, सौरबाणेनेत्यर्थः। भानवीयं सूर्यदैवतं, सौरं बाणमित्यर्थः, राहवीयेण राहुर्दैवतेन, राहुबाणेनेत्यर्थः।

(म) राहवीयं राहुबाणम्, वैष्णवीयेन विष्णुदेवताकास्त्रेण च, वैष्णवबाणेनेत्यर्थः। वैष्णवीयं वैष्णवबाणं, पौष्पकेतवेन पुष्पकेतुः कामः तद्दैवतेन, कामबाणेनेत्यर्थः।

(य) पौष्पकेतवं कामबाणं, पाशुपतेन पशुपतिर्देवताऽस्येति, पाशुपतबाणेनेत्यर्थः। प्रतिकुर्वाणयोः निवारयतोः, छिन्दतोरिति यावत्। आयोधनं युद्धम्।

(र) कृति-प्रतिकृतीनां सार-प्रतीसाराणां, क्षेप-प्रतिक्षेपाणामित्यर्थः, प्रयोक्तृ-संहाराणामिति यावत्। अविशेषेऽपि अभिन्नतायामपि, समानतायामपीत्यर्थः।

मिति रामस्य मर्त्तव्यमिति रावणस्य निर्णय-निर्भरः अयं सर्वास्त्रमोक्षः। (ल) विग्रिक्षमुखोपस्थायिनोनां (व) च पुनर्देवतानामबलीयानाटोपः कल्प्यते। (श) तथा हि—

यद्देवतं क्षिपति पत्रिषु राक्षसेन्द्रः
स्नेहेन तत् रघुपतेर्मृदु सन्निधत्ते।
यां देवतामुपदधाति च रामभद्र-
स्तामादसौ दशमुखस्य शनैरुपैति ॥ ७५ ॥

(ल) निर्णयेति।—निर्णयश्च निश्चयस्य, निर्भरः अतिशयः यस्मिन् तथाभूतः। सर्वेति।—सर्वेषां सर्वविधानाम्, अस्त्राणां बाणानां, मोक्षः प्रयोगः, अनेन अस्त्रेण रामो हन्तव्यः मया च जेतव्यमिति रावणस्य निश्चयः, अनेन अस्त्रेण रावणो हन्तव्यः मया च जेतव्यमिति रामस्य निश्चयः सर्वेषु एव अस्त्रप्रयोगेषु अस्तीति भावः। यद्वा—रामस्य सर्वास्त्रमोक्षः जेतव्यमिति, रावणस्य सर्वास्त्रमोक्षः मर्त्तव्यमिति निर्णय-निर्भरः, रामस्य अस्त्रपातन-कौशलदर्शनेन एव निर्णीयते यत् रामेणावश्यमेव जेतव्यं, रावणस्यास्त्रपातनव्यापारदर्शनेन च एवं निर्णीयते यत् रावणेनावश्यमेव मर्त्तव्यमिति निष्कर्षः।

(व) विग्रिक्षेति।—विग्रिक्षाणां शराणां, मुखेषु अग्रभागेषु इत्यर्थः, उपतिष्ठन्ति अधितिष्ठन्तीति तथोक्तानां, बाणाधिष्ठातृणाम्।

(श) अबलीयान् दुर्बलः, मन्दीभाव इत्यर्थः, एकत्र स्नेहेन जिघांसाऽभावात्, अन्यत्र जिघांसासत्त्वेऽपि निजपोषणभयादिति भावः। आटोपः मत्सरः, काठिन्यं व्यनक्तीति भावः। कल्प्यते तर्क्यते, मयेति शेषः, उभयोर्बाणविग्रहदर्शनेनेति भावः।

यद्देवतमिति।—राक्षसेन्द्रः रक्षोराजः रावणः, पत्रिषु शरेषु मध्ये, यद्देवतं यां देवतां, रावणस्य मन्त्रबलेन समागत्य बाणाग्रे अधिष्ठितमिति भावः, क्षिपति प्रयुङ्क्ते, तत् देवतं, रघुपतेः रामस्य, रामं प्रतीत्यर्थः, स्नेहेन प्रेम्णा, रामानुरागेणेत्यर्थः, मृदु मन्दं यथा तथा, जिघांसुतां विहाय अतिकोमलभावेनेति भावः, सन्निधत्ते सन्निहितं भवति, रामभद्रस्य रघुनाथस्य, यां देवतां पत्रिषु यं देवम्, उपदधाति स्थापयति, आधारयतीति यावत्, प्रयुज्यमाने अस्त्रे इति शेषः, असौ देवता, दशमुखस्य दशाननस्य रावणस्य, त्रासात् भयात्, रावणाङ्के आघाते क्षते च प्रकुप्य मां हनिष्यति इति भयसञ्चारादित्यर्थः, शनैः मन्दं यथा तथा, सौम्यतया प्रहर्तुकामादपि मृदुभावेनेति भावः, उपैति उपगच्छति। वसन्ततिलकं वृत्तम् ॥ ७५ ॥

(नेपथ्ये)।—

यद्यत् छित्तं दशमुखशिरस्तस्य तस्येव कान्तो
सङ्क्रामन्त्यामतिशयवती शेषवक्त्रेषु लक्ष्मीः ।
यो यः छित्तो दशमुखभुजस्तस्य तस्येव वीर्यं
लब्ध्वा दृप्यन्त्यधिकमधिकं बाहवः शिष्यमाणाः ॥७६॥

(नेपथ्ये कलकलः)।

उभौ। (सहर्ष-रोमाञ्चमाकर्ण्य)। अये ! शब्दोपष्टम्भसंवर्त्तकेन कर्मणा निर्मितानि त्रिभुवनकोषस्य कोऽयमिन्द्रियाणि प्रीणयति ? (ष)

(पुनर्नेपथ्ये कलकलः)।

उभौ। (सभयाद्भुतम्)। अये ! कथम्, अयं कपटकण्ठीरव-वैकुण्ठकण्ठकठोरकोलाहलकाहलो महानिर्घोषः (स) प्रजा-

---

यदिति।—दशमुखस्य रावणस्य, यत् यत् शिरः मस्तकं, छित्तं छिन्नं, रामेणेति शेषः, तस्य तस्येव शिरसः, कान्तौ दीप्तौ, सङ्क्रामन्त्यां सङ्क्रच्छमानायां सत्यां, शेषवक्त्रेषु अवशिष्टेषु अच्छिन्नेषु मुखेषु, लक्ष्मीः कान्तिः, अतिशयवती आत्यन्तिकीत्यर्थः, भवतीति शेषः, रावणस्य स्वाभाविकी या कान्तिः प्रत्येकशिरसि आसीत्, सा कान्तिः एकैकस्मिन् शिरसि छिन्ने, तत्तत् शिरः परित्यज्य अन्येषु शिरःसु सङ्क्रम्य तदवयवभूत-मुखानां शोभातिशयं जनयतीति निर्गलितार्थः, दशमुखस्य दशाननस्य, यो यो भुजः बाहुः, छित्तः छिन्नः, तस्य तस्येव भुजस्य, वीर्यं बलं, लब्ध्वा प्राप्य, शिष्यमाणाः अवशिष्टाः, बाहवः भुजाः, अधिकम् अधिकम् अत्यन्तमधिकं यथा तथा, दृप्यन्ति दर्पयुक्ता भवन्ति, प्रभूतबलशालिनो भवन्तीत्यर्थः। मन्दाक्रान्ता वृत्तम् ॥ ७६ ॥

(ष) शब्दोपष्टम्भेति।—शब्दानां ध्वनिविशेषाणाम्, उपष्टम्भः धारणं, शब्द-ज्ञानमित्यर्थः, तस्य संवर्त्तकेन सम्पादकेन, कर्मणा अदृष्टजनकव्यापारेण, निर्मितानि सृष्टानि, इन्द्रियाणि शब्दज्ञानसाधनानि श्रवणेन्द्रियाणीत्यर्थः, त्रिभुवनकोषस्य त्रिलोकीभाण्डागारस्य, कोऽयं कलकलध्वनिरित्यर्थः। कोऽयं कलकलध्वनिः इन्द्रियाणि प्रीणयति, सोऽयं कलकलध्वनिः कः ? इति समुदितार्थः।

(स) कपटेति।—कपटेन छद्मेन, कण्ठीरवः सिंहः, तद्वत् यो वैकुण्ठः विष्णुः, दृढिष्ठाकृतिर्नारायण इत्यर्थः, "विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः"

कोषभङ्गमपर्वणि प्रक्रमते ॥ (ङ) नूनं चेदानीं कालकूटोपदिग्ध-
रिव (क) कण्ठध्वनिभिरेव मूर्च्छयतो (ख) भुवनानि भैरवस्य
स्मरति सभयमस्य परमेष्ठी । (ग)

(पुनर्नेपथ्ये) ।—

दिव्यास्त्रैर्भूभुवःस्वस्त्रितयडमरणोड्डामरैर्योधयित्वा
लूनोत्क्षिप्तैः शिरोभिर्दशभिरभिनभो दर्शितैकादशार्कः ।
काकुत्स्थेनावकीर्णो निजविशिखशिखायोगपीठोपरूढ-
ब्रह्मास्त्रेणाधिशेते रजनिचरपतेर्वीरशय्यां कबन्धः ॥७७॥

दृत्यमरः ; तस्य कण्ठात् गलदेशात्, यः कठोरकोलाहलः भीषण-कलकलनिनादः, तद्वत् काहलः शब्दविशेषो यस्य तादृशः, यद्वा—काहलः शुष्कः, नीरस इत्यर्थः, प्रचण्डः इति भावः, "काहलस्त्वरणायुधे । शब्दमात्रेऽपि पुंलिङ्गस्त्रिषु शुष्के भयी खले" इति मेदिनी । महानिर्घोषः भीषणशब्दः ।

(ङ) प्रजाकोषभङ्गं प्रजानां जनानां, कोषः पात्रम्, आधार इत्यर्थः, अव-स्थितिस्थानमिति यावत्, "कोषोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके" इति मेदिनी ; तस्य भङ्गं विनाशं, ब्रह्माण्डलयमित्यर्थः, अपर्वणि अप्रस्तावे, प्रसङ्गाभावेऽपीत्यर्थः, अकाले इति यावत्, ब्रह्माण्डक्षयस्य निर्दिष्टसमये अनागतेऽपीति भावः, "पर्वः स्यादुत्सवे यज्ञो प्रस्तावे विषुवादिषु" इति मेदिनी । प्रक्रमते आरभते ।

(क) कालकूटेति ।—कालकूटेन हलाहलेन, उपदिग्धैरिव विलिप्तैरिव ।

(ख) मूर्च्छयतः मोहयतः ।

(ग) भैरवस्य सङ्हाररूपिणो हरस्येत्यर्थः, स्मरणार्थधातुयोगे कर्मणि षष्ठी । परमेष्ठी ब्रह्मा ।

दिव्यास्त्रैरिति ।—काकुत्स्थेन ककुत्स्थवंशोद्भवेन रामेण, भूः पृथ्वी, भुवः अन्त-रीक्षं, स्वः स्वर्गः, तेषां त्रितयस्य त्रयस्य, डमरस्य चमत्कारणं, विप्लवो वा, अनर्थोत्-पादनमित्यर्थः, भयेन भूरादिलोकत्रयस्थाना पलायनमिति यावत्, "त्रिषु डमर-विप्लवौ" इत्यमरः ; तेन उड्डामरैः अत्युत्कटैः, अतिभीषणैरित्यर्थः, तेजस्वैरि-ति यावत्, दिव्यास्त्रैः विश्वामित्रात् लब्धैरलौकिकप्रभावैरायुधविशेषैः, योधयित्वा युद्धं कारयित्वा, निजविशिखशिखा स्वीयशरायभाग एव, "विशिखस्तीक्ष्णे शरे" इति मेदिनी ; योगपीठं योगासनं, तस्य उपरूढत्वं आरोहितं, यत् ब्रह्मास्त्रं ब्रह्मणः

अभी। (श्रुत्वा सदर्षं-सम्भ्रममुद्दिश्यावलोक्य सविस्मयमनन्तोऽब्रवीत्)। पश्य पश्य प्रलयकालकरालकालानलज्वालापुञ्जपिञ्जरांशि (घ) रावणशिरांसि। (सत्वरमुपसृत्य चाधस्तात् पश्यतः)।

उमापतिः। (सक्रोधम्)। हा महावीरप्रकाण्ड लङ्केश्वर! पर्य्यवसितोऽसि (ङ)—

भिन्नैरावणगन्धसिन्धुरशिरःसम्पातिभिर्मौक्तिकैः
प्रश्वद्दिग्विजयप्रशस्तिरचनावर्णावलीशिल्पिने।
नाकान्तःपुरिकाकपोलविलसत्कालश्मशीरपत्राङ्कुर-
श्रीविन्यासविलासभीषणभुजस्तम्भाय तुभ्यं नमः ॥७८॥

अधिष्ठितः बाणः तैन, लूनानि निकृत्तानि, उत्तप्तिमानि च ऊर्ध्वं नीतानि च तैः, दशभिः दशसङ्ख्यकैः, शिरोभिः मस्तकैः, अभिनभः नभसि, विभक्त्यर्थे अव्ययीभावः; दर्शिताः लक्षिताः, एकादश गणनया एकादशसङ्ख्याकाः, अर्कार्चिः सूर्य्यां. येन तथाविधं, रावणशिरांसि दश प्रकृतः सूर्य्यश्चैक इति एकादशानां सूर्य्याणां दर्शननिमित्तं भावः, अवकीर्णः पातितः, ब्रह्मास्त्रेणेवेति भावः, रजनिचरपतेः राक्षसेन्द्रस्य, जघनः अपमूर्द्धकलेवरं, शिरःशून्यं शरीरमित्यर्थः, "जघन्योऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम्" इत्यमरः; वीरशय्यां रणभूमिम्, अधिशेते आश्रित्य स्वपितीत्यर्थः। अन्वरा इत्तम् ॥ ७७ ॥

(घ) प्रलयेति।—प्रलयकाले कल्पान्तसमये, कराला: भीषणः, यः कालानलः दीप्ताग्निः, त्रिजगद्दाहकारकाग्निरित्यर्थः, तस्य ज्वालापुञ्ज. शिखासमूहः, तेन पिञ्जराणि पिङ्गलवर्णानि, प्रलयाग्निना दह्यमानानीवेति भावः; यद्वा—ज्वालापुञ्जवत् पिञ्जराणि, निःशेषं रक्षयादिति भावः।

(ङ) महावीरप्रकाण्ड! महावीरेषु गुरुश्रेष्ठेषु, प्रकाण्ड! प्रशस्त! प्रशंसनीय इत्यर्थः। पर्य्यवसितोऽसि समाप्तिं गतोऽसि, मृतोऽसीत्यर्थः।

भिन्नैरावणेति।—हे रावण! दृप्तव्याढ्यार्थे, भिन्नं विदारितं, त्वयेति भावः, ऐरावतश्च ऐरावतनाम्नः, गन्धसिन्धुरस्य गन्धगजस्य, "ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः" इत्यमरः; यत् शिरः मस्तकं, तस्मात् सम्पातिभिः सम्पतनशीलैः, मौक्तिकैः मुक्ताफलैः, गजकुम्भस्य मुक्तोत्पत्तिस्थानत्वादिति भावः, प्रश्वत् सततं, विश्वजयस्य निश्चयनविषयस्य, या प्रशस्तिरचना प्रशंसारचिः, तस्याः वर्णावलीनां अक्षरपङ्क्तीनां,

(निर्वर्ण्य)। सखे रत्नचूड!—

ध्रुवं पतितपङ्क्तिकन्धरकबन्धपीडाभरा-
न्निजावनमनक्रमोन्नमितचक्रवालाचलम्।
महीवलयमर्द्धकुण्डलितविग्रहाधारक-
प्रतीष्टफणमण्डलो वहति काद्रवेयाधिपः॥७६॥

रत्नचूडः। सखे! सर्वमतिशायि (च) रावणस्य। पुराऽपि (छ) खलु—

श्लिष्टिने निर्माते, नागालःपुरिकाणां स्वर्गकामिनीनां, कपोलेषु गण्डदेशेषु, विलसन् स्फुरन्, यः कालीरपत्राङ्कुरः कुङ्कुमरचितपत्रावलीप्ररोहः, तस्य श्रीविन्यासेन सौन्दर्यसम्पादनेन, यो विलासः प्रकारस्तच्छङ्कावर्जिषः, तस्य भीषणाः भयङ्कराः, तद्विघातकत्वादिति भावः, भुजा बाहव एव, स्तम्भाः स्थूणाः यस्य तथाभूताय, तदयाभाः सुरसुन्दर्यः सर्वं विलासं परित्यज्य विस्मिताः स्थिता इति भावः, तुभ्यं नमः, अस्त्विति शेषः। शार्दूलविक्रीडितं वृत्तम्॥७८॥

ध्रुवमिति।—कद्रोस्तदाख्यायाः दक्षकन्यायाः कश्यपपत्न्याः अपत्यानि पुमांसः काद्रवेयाः नागाः, सर्पविशेषा इत्यर्थः, "नागाः काद्रवेयाः" इत्यमरः, तेषाम् अधिपः वासुकिः, अर्द्धं यथा तथा कुण्डलितः वलयितः, वलयवत् वृत्ताकारेणावस्थित इत्यर्थः, रावणस्य देहभारेण सरलतया अवस्थातुमशक्यत्वात् इति भावः, विग्रहः देह एव, आधारकः आधार एव आधारकः आत्मा, स्वार्थे कन्-प्रत्ययः; तेन प्रतीष्टम् अवलम्बितं, फणमण्डलं फणासङ्घसन्निवेशः येन तथाभूतः सन्, पतितः भूमौ लुठितः, पङ्क्तिकन्धरस्य दशग्रीवस्य, "पङ्क्तिर्दशाक्षरच्छन्दो दशसङ्ख्याऽऽलिषु स्त्रियाम्" इति मेदिनी; यः कबन्धः शिरःशून्यं शरीरं, तेन पीडाभरात् व्यथाऽतिशयात्, निजेन स्वकीयेन, अवनमनक्रमेण अधोगमनक्रमेण, उन्नमिताः ऊर्ध्वमुत्थिताः, चक्रवालाचलाः "सप्तेन्दो मलयः सह्यो हिमवान् गन्धमादनः। विन्ध्यश्च पारियात्रश्च सप्तैते कुल-पर्वताः॥" इत्यमरः, कुलपर्वताः यस्मिन् तत् यथा तथा, यथा—निजावनमनक्रमेण उन्नमितः चक्रवालाचलः लोकालोकपर्वतः, सीमापर्वत इत्यर्थः यस्मिन् तदृयथा तथा, "लोकालोकस्तु चक्रवालः" इत्यमरः; महीवलयं भूमण्डलं, वहति धारयति, महीवलयस्य अधोगमनेन भूधराणामुन्नत्वं भवतीति भावः; ध्रुवम् उत्प्रेक्षे। पृथ्वी वृत्तं, "भ-भौ ज-स-य-ला वसु-यतयश्च पृथ्वी गुरुः" इति लक्षणात्॥७६॥

(च) अतिशायि अतिशयितम्।

चलति जगतोजैत्रे यत्र स्वभोगिचमूभटै-
र्वलयितमहादेहस्तम्भो बिभर्त्ति भुवस्तलम् ।
प्रचलदखिलक्ष्माभृन्मूलोपलव्यतिघट्टितो-
ल्लवणमणिग्रिलाजल्पाकीभिः फणाभिरहीश्वरः ॥८०॥

इदानीं पुनरुत्क्रान्तवायुरतिदुर्वहो देहबन्धः । (ज)

ईमाङ्गदः । (अन्यतोऽवलोक्य) । कथम्, इयं दशकन्धरस्य कबन्धाभिमुखी शोकविक्लवा मन्दोदरी निशाचरीभिरपकृष्यते (झ) । (सर्वे दृष्ट्वा आकाशे) । कष्टम् !! चपलकपिकुलानुक्रियमाण-करुणकाकुप्रकारकातरस्वरा मन्दोदरी किमाह महावीर-वरवर्णिनी (ञ)—

(छ) पुराऽपि पूर्वमपि ।

चलतीति ।—जगतोजां भुवनानां, जेता एव जैत्रः विजयो तस्मिन्, यत्र रावणे, चलति गच्छति सति युद्धार्थं प्रयोजनान्तरसिद्ध्यर्थं वा इति भावः, अहीश्वरः नागराजः, स्वभोगिचमूभटैः निज-सर्पसैन्ययोधैरित्यर्थः, वलयितः कुण्डलितः, अतएव, रावणपदभारासहत्वादिति वा भावः, महान् विशालः, देह एव काय एव, स्तम्भः स्थूणा यस्य तथाभूतः सन्, प्रचलतां प्रकम्पमानानां, राक्षस-चरणविन्यासभरादिति भावः, अखिलानां समस्तानां, क्ष्माभृतां पर्वतानां, मूलोपलैः मूलप्रस्तरैः, मूल्यः श्रेष्ठैः मूलरूपप्रस्तरभागैरित्यर्थः, व्यतिघट्टिताः सङ्घर्षिताः, अत एव उल्लवणाः उल्लवनाः, या मणिग्रिलाः फणस्थरत्नरूपाः ग्रिलाः, ताभिः जल्पाकीभिः जल्पनशीलाभिः, प्रलापशीलाभिरिति यावत्, फणाभिः सहस्रसङ्ख्यकैः फणैः, भुवस्तलं भूतलं, बिभर्त्ति धारयति । इरिणो इत्यम् ॥ ८० ॥

(ज) उत्क्रान्तवायुः निर्गतप्राणवायुरित्यर्थः । अतिदुर्वहः अतिप्रयत्नेन वोढुम् अशक्यः, नागराजेनेति शेषः, स्वजीवितापेक्षया जीवितयूथ्यस्य भारस्यातिभयादिति भावः । देहबन्धः शरीरभार इति यावत् ।

(झ) अपकृष्यते आकृष्य नीयते ।

(ञ) चपलेति ।—चपलेन चञ्चलेन, लघुचित्तेन इत्यर्थः, दुष्टमनसा इति यावत्, कपिकुलेन वानरसमूहेन, अनुक्रियमाणाः अनुक्रियमाणाः, सादृश्यं नीयमानाः इत्यर्थः, करुणः शोकपूर्णः, काकुप्रकारः शोकात् विकृतिमापन्नः, कातरः व्याकुलः,

भूयिष्ठानि मुखानि चुम्बति भुजैर्भूयोभिरालिङ्गते
चारित्रव्रतदेवताऽपि भवता कान्तेन मन्दोदरी।
हा! लम्बोदरकुम्भमौक्तिकमणिस्तोमैर्ममैकावली-
श्लिष्टे वागधमर्णिकस्य भवतो लङ्केन्द्र! निद्रारसः॥ ॥८१॥

उभौ। (उत्थिदम)। इदमग्रक्यानुभवं चक्षुःश्रोत्रस्य। प्रतिक्षतानां विद्विषामपि व्यसनम् (ट) अतिमात्रं हृदयमर्माणि

स्वरः ध्वनिः यस्याः तथाभूता। महाघोरेति।—महाघोरश्च घोरश्चेष्टश्च रावश्च, वरवर्णिनी "शीते सुखोष्णवर्षासु योषिते च सुखप्रीतिका। भर्तृभक्ता च या नारी सा भवेत् वरवर्णिनी॥" इत्युक्तलक्षणा पतिव्रता अतिमहीयसी भार्या।

भूयिष्ठानीति।—लङ्केन्द्र! हे लङ्काधिप। चारित्रव्रतञ्च चरित्रताऽधिनियमञ्च, सतीत्वपालनरूपनियमश्चेत्यर्थः, देवताऽपि अधिष्ठात्री देवी अपीत्यर्थः, अतिसाध्वी अपीत्यर्थः, मन्दोदरी तव महिषी अहं, भवता त्वया, कान्तेन धवेन, पतिनेत्यर्थः, "कान्ता नार्य्यां प्रियङ्गौ स्त्री शोभने त्रिषु ना धवे" इति मेदिनी; दशाननेन विंशतिभुजेन च हेतुनेति भावः, भूयिष्ठानि बहूनि, मुखानि आननानि, चुम्बति, तथा भूयोभिः बहुभिः, विंशत्या इति भावः, भुजैः बाहुभिः, आलिङ्गते आश्लिष्यते, त्वयेति शेषः, सत्या बहुमुखचुम्बनस्य बहुभुजालिङ्गनस्य च पातिव्रत्यव्याघातिकत्वेन अन्याय्यत्वेऽपि भर्तुस्तव दशमुखवत्त्व-विंशतिभुजवत्त्वेन तत्तत् न मे पातिव्रत्यव्याघातिकरं तस्मात्तमिति भावः, हा! खेदे, लम्बोदरस्य गजाननस्य, कुम्भे शिरःस्थपिण्डाकारदेशे, ये मौक्तिकमण्यः मुक्ताख्यरत्नानि, तेषां स्तोमैः निचयैः, मम एकावली एकसरं माल्यम्, एकयष्टिको हारविशेष इत्यर्थः, तया श्लिष्टे रचने, बाधा बाध्येन, अधमर्णिकस्य ऋणिकस्य, भवतः तव, निद्रारसः॥ निद्रायामनुरक्तिः॥ नोचित एष इति भावः; गणेशं निर्जित्य तस्य कुम्भं विदार्य्य तस्मादाहृतमौक्तिकैः एकावलीं रचयित्वा तुभ्यं दास्यामीत्यङ्गीकारवचसा त्वं मम अधमर्णः आसीः, इदानीं तत् ऋणमपरिशोध्य तव निद्रायाम् अत्याकृष्टतायाम् अनुरागी नोचित इति तात्पर्य्यम्। आर्द्रज्वलितीयं वृत्तम्॥ ८१॥

(ट) चक्षुःश्रोत्रस्य चक्षुषी श्रोत्रे चेति चक्षुःश्रोत्रं तस्य, समाहारद्वन्द्वः, अग्रक्यानुभवम् अग्रक्यः न सहनीयः, अनुभवः अनुभूतिरपि यस्य तादृशम्, अनुभवितुमप्यसमर्थमित्यर्थः, चक्षुर्भ्यां द्रष्टुं श्रोत्राभ्यां श्रोतुञ्च न शक्यते इति भावः। प्रतिक्षतानां निर्यातितानां, पराजितानामित्यर्थः, विद्विषामपि शत्रूणामपि। व्यसनं विपत्।

क्षिपति । (सविमर्शम्)। अहह ! न किञ्चिदनौषत्कारं नाम क्षणालक्ष्य (ठ)—

वन्दारकवृन्दारकवृन्दवन्दी-
मन्दारमालामकरन्दबिन्दून् ।
मन्दोदरीयं चरणारविन्द-
रेणूत्करैः कर्करतामनैषीत् ॥८२॥

(नेपथ्ये) ।—

नीयन्ते वनदेवताभिरमरस्त्रीणोद्धतो नन्दनं
नीतो वल्लभपालकेन च निजामुच्चैःश्रवा मन्थराम् ।

(ठ) अनौषत्कारम् अनल्पकारम्, अकिञ्चित्कारमित्यर्थः, दुष्कारमिति भावः । क्षणालक्ष्य देवम्, "क्षणान्तो यम-देवयोः" इत्यमरः ।

वन्दारेति ।—इयम् आगच्छन्ती, मन्दोदरी रावणमहिषी, चरणारविन्दयोः पदपङ्कजयोः, रेणूत्करैः धूलिनिचयैः, वन्दारवः वन्दनशीलाः, ये वन्दारकाः देवाः, "अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः । वन्दारका देवतानि—" इत्यमरः ; तेषां वृन्दस्य समूहस्य, या वन्द्या स्तुतिकर्त्र्यः स्त्रियः, चरणनिपतिता इति भावः, तासां मन्दारमालायाः पारिजातपुष्पमालायाः, केशपाशस्थितायाः इति भावः, मकरन्दबिन्दून् पुष्परसकणान्, "मकरन्दः पुष्परसः" इत्यमरः, कर्करतां कार्कश्यमित्यर्थः, "कर्करो भाण्डभेदे ना दर्पणे कठिने त्रिषु" इति मेदिनी, अनैषीत् प्रापयामास । इन्द्रवज्रा वृत्तम् ॥ ८२ ॥

नीयन्ते इति ।—वनदेवताभिः आनन्ददेवीभिः, नन्दनवनाधिष्ठात्रीभिर्देवीभिरित्यर्थः, अमरस्त्रीभिरुद्धतः देवसङ्घातः, "पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥" इत्युक्ताः पञ्च-देवतरवः इत्यर्थः, "द्रुमो मरुद्वरः शाखी विटपी पादपस्तरुः" इत्यमरः, रावणेन ये बलात् सङ्ग्रामायानीताः, ते इति भावः, नन्दनं देवोद्यानं, नीयन्ते प्राप्यन्ते, रावणभयापगमादिति भावः, वल्लभपालकेन वल्लभानां सुलक्षणतुरङ्गानां, पालकेन रक्षकेण च, "वल्लभो दयितेऽभीष्टे वल्लभश्चतुरङ्गमे" इति मेदिनी, अश्वपालिनेत्यर्थः, "अश्वारोहो सुदुर्मुखां स स्यात् वल्लभपालकः" इति हारावली, उच्चैःश्रवाः क्षणालक्ष्यात् इन्द्रात्, निजा स्वा, मन्थरां वाजिमाताम्, "वाजिमाता तु मन्थरा" इत्यमरः ; नीतः

रक्षोभिश्च विभीषणप्रणयिभिः कारागृहान्मोचित-
स्वर्वन्दीवदनावलोकनिविड़व्रीड़ो विड़ौजाः कृतः ॥८३॥

रक्षचूड.। (सदर्षम्)। सखे! तदेहि, लङ्केश्वरकाराधिवास-विरप्रवास्तव्यं बन्धुवर्गमोक्षावहे (ड)। (इति परिक्रामन्तौ विलोक्य सदर्षमन्योऽन्यम्)। सखे पश्य पश्य, प्रहारजर्जरवलीमुखाक्षभल्ल-गोलाङ्गूलग्रामसंवलानवल्गितसुग्रीवो लक्ष्मणनिहितधन्वा (ढ) विभीषणभुजावलम्बी विजयश्रिया किमपि प्रदीप्तरमणीयो रामभद्रः। अयं हि सम्प्रति—

पौलस्त्यन्यस्तशक्तिव्रणकिणकणिकालक्ष्मणो लक्ष्मणोरः-
पीठान्निर्मुक्तलज्जो विबुधपुरवधूकृतपुष्पाभिषेकः।

प्राप्तिः, अत्रापि पूर्ववत् रावणभयापगमो हेतुर्बोद्धव्यः; विभीषणप्रणयिभिः विभीषण-सुहृद्भिः, रक्षोभिः राक्षसैः, विड़ौजा इन्द्रः, "इन्द्रो मरुत्वान्मघवा विड़ौजाः पाक-शासन" इत्यमरः; कारागृहात् बन्धनागारात्, मोचितानां त्यजितानां, बहिर्निर्मितानामित्यर्थः, स्वर्वन्दीनां स्वर्गीयदेवतरुणीनां, वदनावलोकेन मुख-सन्दर्शनेन, निविडा घना, अतिशायिनीत्यर्थः, व्रीडा लज्जा यस्य तथाभूतः, कृतः, मया एता मच्छरणा न परिवारा इति धियेति भावः। शार्दूलविक्रीडित वृत्तम् ॥ ८३ ॥

(ड) लङ्केश्वरेति।—लङ्केश्वरस्य रावणस्य, कारावासे बन्धनागारे, चिरं दीर्घकालं, प्रवसतीति प्रवास्तव्यं तं वासकारिणम्। ईक्षावहे पश्यावः।

(ढ) प्रहारेति।—प्रहारैश्च ताड़नैश्च, रावणशरैरिति भावः, जर्जराः कुट्टिताः, भग्नाङ्गा इत्यर्थः, अतिव्यथितदेहा इति भावः, ये वलीमुखा वानराः, "कपिप्लवङ्ग-प्लवग-शाखामृगवलीमुखाः। सर्कटो वानरः" इत्यमरः; अक्षभल्ला भल्लुकाः, "अक्ष भल्लुके। ऋक्षाच्छभल्लभालूकाः" इत्यमरः, गोलाङ्गूलाः गो-लाङ्गूलवत् लाङ्गूलं येषां तथाभूताः, वानरविशेषा इति यावत्, तेषां ग्रामश्च समूहश्च, संवलानं सयमनं, वेदनानिवारणे इत्यर्थः वेदनानिवारणार्थे सान्त्वनावाक्यप्रयोगे इत्यर्थो वा, वल्गितः चेष्टितः, गत इत्यर्थो वा, सुग्रीवो वानराधिपतिः यस्य तादृशः, सुग्रीवमुखेन आदिश्यमानैः चतुर्विधसैन्यैः प्रीयमाणेन भावः। लक्ष्मणेति।—लक्ष्मणे तदाख्ये अनुजे, निहितं न्यस्तं, धनुः कार्मुकं येन तथोक्तः।

पौलस्त्येति।—पौलस्त्येन रावणेन, न्यस्ता निक्षिप्ता, या शक्तिरस्त्रविशेषः, तस्याः

सद्यो नष्टारमन्यं रजनिवरपुरीभद्रपीठप्रतिष्ठं
दृष्ट्वा तुष्यत्पुलस्त्यो जगति विजयते जानकीजानिरेकः ॥८४॥

(इति निष्क्रान्तौ)।

इति दशग्रीवनिधनो नाम षष्ठोऽङ्कः।

सप्तमोऽङ्कः।

(नेपथ्ये)।—

तस्मिन्नामूर्च्छालत्रिजगदगदङ्कारकिरणे
रघूणां गोत्रस्य प्रसवितरि देवे सवितरि।

तया वा त्रपया अतस्त, किंचकथिका शुक्लमालेयान्यलेप:, शुक्लत्वतत्प्राप्ते ईषत् यन्थिलत्वम इत्यर्थ, लज्जा विद्धं यस्य तथाभूतात्, लज्जायुक्त रामानुजात्, उर:पाठात् वक्ष:स्थलात्, प्रसृतवक्त्र:स्रस्तादित्यर्थ:, तादृशार:स्रस्तमवलोक्य इति भाव:, निर्मुक्ता निर्गलिता, लज्जा यस्य तथोक्त:, लज्जयोर: प्राकृविद्धं दृष्ट्वा तत्प्रगलनेनापि रामस्य लज्जा न गता, इदानीं रावणं हत्वा सा लज्जा गतेति भाव, विबुधपुरस्य देवनगरस्य स्वर्गस्य, वधूभि. अप्सरोभि:, विद्याधरीभिरित्यर्थ., कृत: विहित:. कृत इति यावत्, पुष्पै: कुसुमै:. पारिजातादिभिरिति यावत्, अभिषेक: अभिषिञ्चनं, वर्षणमित्यर्थ:, पुष्पवृष्टिरित यावत् यस्य तथाविध', सद्य: तत्क्षणात, रावणवधात परमेवेत्यर्थ:, अन्यम् अपरं. नष्टारं पोषं, विभीषणमिति यावत्, रजनीवरपुर्या: राक्षसराजधान्या लङ्काया:, भद्रपीठे सिंहासने, प्रतिष्ठं स्थानम्, अवस्थानमित्यर्थ., आरोढ्यमिति यावत् यस्य तादृशं दृष्ट्वा अवलोक्य, तुष्यन् सन्तोषं गच्छन्, पुलस्त्य: तदाख्य. रावणपितामह: यस्य तथोक्त', एक: अद्वितीय', अप्रतिमवीर इति भाव:, यद्वा—एक: केवल:, "एकं मुख्यान्यकेवला:" इत्यमर: ; जानक्या जाया यस्य स जानकीजानि: सीतापति: राम:, जगति भुवने, विजयते सर्वोत्कर्षेण वर्त्तते ; यद्वा—जगति एक: मुख्य', त्रिभुवनमध्ये श्रेष्ठ इत्यर्थ:, जानकीजानि. विजयते। खरधरा वृत्तम् ॥ ८४ ॥

इति श्रीशिवानन्दविद्यासागरभट्टाचार्येण कृता
अनर्घराघवषष्ठाङ्कव्याख्या समाप्ता।

पुरःस्थे दिक्पालैः सह परगृहावासवचनात्
प्रविष्टा वैदेही दहनमथ शुद्धा च निरगात् ॥ १ ॥

अयमपि—

एकैकानि शिरांसि राक्षसचमूचक्रस्य हुत्वा निजे
तेजोऽग्नौ दशकण्ठमूर्धभिरथो निर्माय पूर्णाहुतिम् ।
अथ स्वस्त्ययनं समाप्य जगतो लङ्केन्द्रवन्दीकृतां
सीतामप्यवलोक्य शोकरभसव्रीड़ाजड़ो राघवः ॥ २ ॥

तमिस्रेति ।—तमिस्रा तामसी रात्रिरेव, मूर्च्छा मोहः; तद्वत् तमिस्रामूर्च्छालं तमिस्राऽऽत्मकमूर्च्छाक्रान्तं यद्वा—तमिस्रायां मूर्च्छालं मूर्च्छितं, मूर्च्छांतवत् निश्चेष्टमिति यावत्, यत् त्रिभुवनं विभुवनं, तस्य भगदङ्कारः चिकित्सकः, मूर्च्छाव्याधिग्रस्तमिति भावः, ध्वान्तारिरिति यावत्, "रोगहार्यगदङ्कारो भिषक् वैद्यो चिकित्सके" इत्यमरः; यद्वा—अगदङ्कारः औषधं, किरणः मयूखः यस्य तथोक्ते, रघूणां रघुवंशीयानां, गोत्रस्य कुलस्य, प्रसवितरि जनयितरि, आदिपुरुषे इति भावः, दैवे सवितरि सूर्ये, दिक्पालैः दिक्पतिभिः इन्द्रादिभिः, सह सार्द्धं, पुरःस्थे पुरोवर्त्तिनि सति, सम्मुखे स्थिते सतीत्यर्थः, सर्वदर्शनसक्षिणि इति यावत्, परगृहे अन्यालये, परपुरुषावासे इति यावत्, आवासः स्थितिः, तस्य तस्मात् वा वचनं वाक्यं निन्दावाद इति यावत्, परगृहस्था इयं भट्टचारित्रेत्येवंरूपमिति भावः, यद्वा—परगृहावास एव वचनम् अपवादः तस्मात्, दहनम् अग्निं, प्रविष्टा कृतप्रवेशा, वैदेही सीता, अथ दहनप्रवेशादनन्तरं, शुद्धा पूता च सती, विशुद्धचरित्रत्वेन प्रतीता सतीत्यर्थः, निरगात् निरगमत्, आगमत्यात् उत्तरक्रियेत्यर्थः । शिखरिणी छन्दः ॥ १ ॥

एकैकानीति ।—राघवः रामः, राक्षसचमूचक्रस्य निशाचरसैन्यनिचयस्य, एकैकानि एकमेकं कृत्वेत्यर्थः, शिरांसि मस्तकानि, निजे स्वकीये, तेजोऽग्नौ प्रतापानले, हुत्वा आहुत्य, अथानन्तरम्, अथ अस्मिन् दिवसे दशकण्ठस्य रावणस्य, मूर्द्धभिः शिरोभिः, दशभिरिति यावत्, पूर्णाहुतिं पूर्णाहुतिम्, निर्माय विधाय, यज्ञसमाप्तिसूचिकां शेषाहुतिं कृत्वेत्यर्थः, जगतः त्रिभुवनस्य, स्वस्त्ययनं मङ्गलाचरणमनुष्ठीयमानं क्रियाविशेषं, समाप्य सम्पाद्य, लङ्केन्द्रस्य रावणस्य, वन्दीकृतां, बन्दीलोकीभूतां, इतां परिवेष्टितां, सीतां जानकीम्, अवलोक्यापि दृष्ट्वा च, अपिरत्र चार्थे, शोकेन शुचा, निर्दोषाया

क्रमेण च—

सहैव सुग्रीव-विभीषणाभ्यां
सौमित्रि-सीतापरिपूर्णपार्श्वः।
उपैति वेवल्लतवंशवृत्त-
मेध्यामयोध्यामथ पुष्पकेण ॥ ३ ॥ (युग्मम्)

(ततः प्रविशति विमानयानेन विजयाभिरामो (क) रामः सीता-
लक्ष्मणौ सुग्रीव-विभीषणौ च)।

सुग्रीवः। (रामं प्रति)। देव।—

किं-कुर्वाणपयोधिसेवितगृहोद्यानाऽधुनाऽऽलोक्यतां
लङ्केयं रघुवंशविक्रमकथाबीजप्ररोहस्थली।

रावणसहवासिना रक्षसा वधजनितेनेति भावः, रभसेन हर्षेण, विप्रुद्राया: सीताया लाभजनितेनेति भावः, "रभसो वेग-हर्षयो." इत्यमरः; व्रीडया लज्जया, लिङ्कर्त्तृकेण मया सह; युद्धा सीता जानताऽपि आत्मप्रवेशं कारितेति ध्वनितं भाव., लङः लिङर्थः, लज्ज; इत्यर्थः, आसीदिति शेषः। शार्दूलविक्रीडित वृत्तम् ॥ २ ॥

सहैवेति।—अथानन्तरमेव, सुग्रीव-विभीषणाभ्यां किंवा-राक्षसराजाभ्यां, सह सार्द्धं, तथा सौमित्रिर्लक्ष्मणः, सीता जानकी च, ताभ्यां परिपूर्णौ व्याप्तौ, युक्तौ इत्यर्थः, पार्श्वौ पार्श्वयं यस्य तथाभूतः, वामे सीता दक्षिणे लक्ष्मण स्थितावेति भावः, राघव इति शेषः, पुष्पकेण तदाख्येन विमानेन, वेवल्लतवंशाना सूर्यवंशाना, वृत्तेन चरित्रेण, मेध्यां पूताम्, अयोध्या तन्नाम्नी स्वा राजधानीम्, उपैति गच्छति। उपजातिवृत्तम् ॥ २ ॥

(क) विजयेति।—विजयेन जयलाभेन, शत्रुपराभवेणेत्यर्थः, अभिरामः मनोज्ञः, रम्यदर्शन इत्यर्थः, हृष्टात्मा इति भावः।

किमिति।—अधुना इदानीं, किं-कुर्वाणानि किमाचरन्ति, पयोधिसेवितानि समुद्रमध्यवर्तीनि, यद्वा—किमिति प्रश्नार्थकं कुत्सार्थकं वा अव्ययं, किम ? भवता वध्योऽहमिदानीं किमित्यर्थः, करोमीति शेषः, यद्वा—किं कुत्सितः, भवता वध्यत्वेन अदार्थतोऽहमित्यर्थ., "किं कुत्सायां वितर्के च निषेधप्रश्नयोरपि" इति मेदिनी ; इति कुर्वाणेन कुर्वता, एवमभिदधानेनेत्यर्थ., पयोधिना सागरेण, सेवितानि क्षुष्टानि, सागरोपकूलवर्त्तीनीति भावः, गृहाणि भवनानि, उद्यानानि उपवनानि च यस्याः

देवेनात्र दशाननस्य दशभिस्छिन्नैः शिरोभिः क्रमा-
देकैकेन शतं शतं शतमखस्यामोदिता हृष्टयः ॥ ४ ॥

रामः। देवि वैदेहि! दृश्यतामितो (ख) लङ्कां पूर्वेण (ग) सुवेलं पश्चिमेन (घ)—

त्वदर्थीयक्रव्यात्कपिकुलकबन्धव्यतिकरैः
करालेयं भूमिर्भुवनभयमद्यापि तनुते।
अभूवन्नम्भोधेरिह रुधिरमय्यो युवतयः
सहस्रं माहस्रास्त्रिदिवयुवतीनां च पतयः ॥ ५ ॥

तद्भामृता, रघुवंशस्य रघुकुलोत्पन्नस्य रामचन्द्रस्येत्यर्थः, यो विक्रमः शौर्यं, तस्य यथावा आलापस्य, यत् बीजं कारणं, तस्य प्ररोहस्यांकुरस्य उत्पत्तिस्थानम्, इयम् एषा, लङ्का राक्षसनगरी, आलोक्यतां दृश्यताम्, अव लङ्कायां, दैवेन भवतेत्यर्थः, दशाननस्य रावणस्य, क्रमात् क्रमशः, एकमेकं छित्त्वेत्यर्थं, छिन्नैः त्रुटितैः, दशभिः शिरोभिः दशसङ्ख्याकैः मस्तकैः, छिन्नानां दशानां शिरसामिति भावः, एकैकेन एकैन एकैन शिरसा इत्यर्थः, शतमखस्य शतक्रतोः इन्द्रस्य इत्यर्थः, शतं शतं दशशतमित्यर्थः, हृष्टयः नेत्राणि, आमोदिताः तोषिताः, एकैन शिरसा कर्त्तितेन शतमखसङ्ख्यानां नेत्राणाम्, एव-क्रमेण दशभिः शिरोभिः दशशतानां नेत्राणां प्रीतिर्भवता सम्पादिता इति निष्कर्षः। मार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

(ख) इतः अस्मात् प्रदेशात्।

(ग) पूर्वेण पूर्वस्यां दिशीत्यर्थः।

(घ) पश्चिमेन पश्चिमायां दिशीत्यर्थः।

त्वदर्थीयेति।—त्वमेव अर्थः प्रयोजनं ययोः तौ त्वदर्थीयौ त्वत्प्रार्थिनौ, रावणो-ऽहमेति भावः, तयोः यौ क्रव्यात्-कपिकुलौ राक्षस-वानरयूथौ, रावणस्य क्रव्यात्कुलं नरभक्षकं कपिकुलमित्यर्थः, तयोः कबन्धव्यतिकरैः शिरःशून्यकलेवरसङ्घट्टैः, करालेयं भीषणा, इयम् एषा, भूमिः रणस्थली, अद्यापि इदानीमपि, भुवनस्य जगतः, भयं त्रासं, तनुते विस्तारयति, उत्पादयतीत्यर्थः, इह अस्यां भूमौ, अम्भोधेः समुद्रस्य, रुधिरमय्यः शोणितप्लुताः, सहस्रं युवतयः नद्य इति भावः, यद्वा—अम्भोधेः समुद्रस्य, समुद्रतो स्थे इति भावः, इह अस्यां भूमौ, अस्मिन् स्थाने इत्यर्थः, सहस्रं युवतयः युवानः इत्यर्थः, तदधमोऽपि, इति भावः, रुधिरमय्यः रक्ताः त्रिदिवयुवतीनां सुराङ्गनानां, माहस्राः

अपि च—

उद्यस्य दृष्टनिजपन्नगरत्नमात्रा-
नस्त्राणि चन्दनतरूनुपरि भ्रमन्तः।
द्यां ज्योतिरिङ्गणमयीमिह मेघनाद-
मायातमोऽपलपितां कपयो वितेनुः॥ ६॥

सीता। अज्जउत्त! अवि दुवे जेव्व भुअंगपासबंधणं सीदाए अणुहाविदा (ङ) तुम्हे? *

रामः। आं मैथिलि! आम् (च)—

चर्वितपौनाहिगणष्ठणिति विनिष्ठ्यूतफणिमणिरभीक्ष्णम्।
घनवन्धनवैधुर्यं व्यधुनोदिह नौ स विहगेन्द्रः॥ ७॥

* आर्यपुत्र! अपि द्वावेव भुजङ्गपाशबन्धनं सीतयाऽनुभाविता यूयम?

सङ्गरङ्गाङ्गणाः, पतयश्च भर्तारश्च, अभूवन् अजनिषत, उद्गमदता नीराः क्षणे नता: सुराङ्गनाभिः सङ्गच्छन्ते इति गाङ्गादिति भावः। त्रिस्रोरिणी इवेत्यर्थः॥ ५॥

उद्यस्येति।—इह अस्मिन् प्रदेशे, कपयः वानराः, मेघनादश्च इन्द्रजित्, मायातमोभिः मायामयीविद्याकल्पितान्धकारैः, अपलपिता नीपिताम्, आवृतामित्यर्थः यावत्, द्याम् आकाशम्, दृष्टानि अवलोकितानि, निजानि स्वानि, चन्दनद्रुभ्यः सृष्टा-नीति यावत्, पन्नगरत्नमात्राणि केवल सर्पशिरोमणय:, चन्दनतरुस्थितसर्पशिरो-मणिमात्राणीत्यर्थः येषु तादृशान्, चन्दनतरून् चन्दनद्रुमान्, चन्दनद्रुपाणीत्यर्थः, अस्त्राणि प्रहरणानि, उद्यस्य उद्धृत्य, उपरि ऊर्ध्वदेशे, भ्रमन्तः विचरन्तः सन्तः, ज्योतिरिङ्गणमयीं खद्योतात्मिकां, खद्योतव्याप्तामिव इत्यर्थः, "खद्योतो ज्योतिरिङ्गणः" इत्यमरः, वितेनुः विस्तारयामासुः, चक्रुरित्यर्थः, अन्धकारे यथा खद्योताः विस्फुरन्ति, तथा मायान्धकारे चन्दनतरुपादपेषु उद्यतेषु तत्स्थाना भुजङ्गाना केवल शिरो-रत्नानि भाशो भान्ति स्मेति भावः। वसन्ततिलकं वृत्तम्॥ ६॥

(ङ) अपि प्रश्नार्थकमव्ययम्, अनुभाविता किम्? इत्यर्थः, "अपि सम्भावना-प्रश्न-शङ्कागर्हासमुच्चये" इति मेदिनी। भुजङ्गपाशबन्धनं नागपाशबन्धनम्। अनु-भाविताः अनुभवं कारिताः, प्रापिता इति यावत्।

(च) आम् इति निश्चयार्थकं (स्वीकार) अव्ययं, त्वं यत् पृच्छसि तत् सत्यमेवेत्यर्थः, "आ मानिश्चयस्वीकारयोः" इति मेदिनी।

(विदूषकं सस्मितम्)। अहो! वैषम्यमस्या जातेः, (कु)—

हे तावत् करणे रसान् रसयितुं शब्दांश्च रूपाणि च
श्रोतुं द्रष्टुमथैकमिन्द्रियमुरो गत्यै निगूढं पदम्।
अन्येष्वप्यशनेषु सत्सु जगतः प्राणाः क्षदन्तेतरां
मातः कद्रु! यदि प्रसीदति भवती भूयः सुतानीदृशान् ॥ ८ ॥

चर्वितेति।—इह अस्मिन् प्रदेशे, चर्वितः भक्षितः, पीनः स्थूलः, अहिगणो भुजङ्गसमूहः येन तथोक्तः, "चर्वितपीता" इति पाठे—आदौ चर्वितः पश्चात् पीतः चर्वणेन द्रवीभूतत्वात् पानविषयीकृत इत्यर्थः, अहिगणो येन तथोक्तः, अमीक्ष्णं पुनः पुनः, ठण् इति "ठण्" इति शब्दं कृत्वा, विनिष्क्रान्तः उद्गीर्णः, अग्निः सर्पशिरोरत्नं, सर्पमस्तकचर्वणजाते मुखाभ्यन्तरगत इति भावः, येन तथाविधः, स प्रसिद्धः नागारिः, विहगेन्द्रः पक्षिराजः गरुडः, नौ आवयोः, घनं महत्, बन्धनेन नागपाशबन्धनेन, वैधुर्यं व्यथां, यद्वा—घन दृढ, यत् बन्धन नागपाशेन संयमनं, तेन वैधुर्यं वैकल्यं, "विधुरस्तु प्रविश्लेषे न दयोर्विकले त्रिषु" इति मेदिनी, व्यधुनीत् अपनीतवानित्यर्थः। आर्या वृत्तम् ॥ ७ ॥

(कु) वैषम्यं वैपरीत्यम्, अद्भुतत्वमिति यावत्। अस्या जातेः सर्पजातेरित्यर्थः।

हे इति।—रसान् मधुरादीन्, आस्वादनीयानि द्रव्याणीत्यर्थः, रसयितुं आस्वादयितुं, हे हिसङ्गुके, तावत करणे इन्द्रिये, रसनारूपे इति यावत्, हिलिङ्गत्वादिति भावः, "करणं साधकतमं चेन्द्रियेष्वपि" इत्यमरः, सर्वेषां प्राणिनां रसनेन्द्रियम् एकम् एव, सर्पाणान्तु हे इति अद्भुतत्वमिति भावः; अथ किञ्च, शब्दांश्च श्रवणेन्द्रियग्राह्यान्, श्रोतुम् आकर्णयितुं, रूपाणि च दर्शनेन्द्रियग्राह्यांश्च, द्रष्टुम् अवलोकयितुम्, एकम् एकमात्रम्, इन्द्रियं करणं, चक्षुःश्रवस्त्वात् चक्षुषैव दर्शन-श्रवणे सम्पद्येते इति भावः, प्राग्वत्तरार्धे दर्शनार्थं श्रवणार्थञ्च पृथक् पृथक् इन्द्रियद्वयं विद्यते, सर्पस्य तु एकेनैव दर्शनेन्द्रियेण तदुभयकर्मसम्पादनात् वैषम्यमिति निष्कर्षः, उरसा वक्षःस्थलेन, गत्यै गमनाय, निगूढं गुप्तं, पदं चरणम्, अस्तीति शेषः, यद्वा—गत्यै गमनाय, उरः वक्षःस्थलं, निर्दिष्टमिति शेषः, पदं चरणन्तु, निगूढं गुप्तं, लोकलोचनागोचरमिति भावः, सर्वे एव प्राणिनः चरणाभ्यामेव गच्छन्ति, चरणं तेषां गमनसाधनं, सर्पाणान्तु तद्विपरीतमित्यद्भुतत्वम्, अन्येषु अपरेषु, अशनेषु भोजनीयेषु, क्षुद्र्यमानेषु आप, जगतः भुवनस्य, प्राणाः जीवनानि, जीवनहेतवो वायवः

(सर्वे इसन्ति)।

सीता। (सलेह-स्मितं सलक्ष्मणमवलोक्य रामं प्रति)। अज्जउत्त ! सोमित्तिखित्तिकंदलीए उप्पत्तिखेत्तं कदरो उण संणिवेसो ? * (ज)

रामः। (सहर्ष-रोमाञ्चम्)। देवि मैथिलि ! अयमितो हस्तदक्षिणेन दशरथ-दशकन्धरस्कन्धावारैकप्रवीरयोः (भ) लक्ष्मण-मेघनादयोर्द्वन्द्वयुद्धव्यतिकरसाक्षी सुवेलपादः (अ)।

सीता। जहिं एव्व—†

---

* आर्यपुत्र ! सौमित्रिकीर्तिकन्दल्या उत्पत्तिक्षेत्रं ततरः पुनः सन्निवेशः ?

† यत्रैव—

इत्यर्थः, "सुखतः सर्शनो वायुः···।···जगत्प्राण-समीरणः ॥" इत्यमरः, खदन्तितराम् अतिशयेन खदन्ते, रोचन्ते इत्यर्थः, यद्वा—अतिशयेन स्वादवो भवन्तीत्यर्थः, तपांसा पवनाशनत्वादिति भावः, मातः। हे जननि। कटु। भवती लं, यदि चेत्, मम पुनरपि, ईदृशान् एवम्भूतान्, सुतान् पुत्रान्, प्रसूते जनयति, तदा चिरं भवेदिति शेषः। यद्वा—यदीति निन्दार्थकमव्ययं, "यदि गर्हा-विकत्थयोः" इति मेदिनी ; भवतो भूयो बाहुल्येन, ईदृशान् यदि—निन्दितान्, अद्भुतानिति यावत्, सुतान् प्रसूते इत्यर्थः। मार्दूलविक्रीडितं वृत्तम् ॥ ८ ॥

(ज) सौमित्रिकीर्त्तिकन्दल्याः सौमित्रेर्लक्ष्मणस्य, कीर्त्तिरेव; तस्याः कन्दली नवः अङ्कुरः तस्याः, "कन्दली स्यात् गुल्मभेदे नवाङ्कुरे" इति विश्वः ; यद्वा—कीर्त्तिरेव कन्दली गुल्मविशेषः तस्याः, "कन्दली तु मृग-गुल्मप्रभेदयोः" इति मेदिनी ; सन्निवेशः स्थानम्।

(भ) इतः अस्मात् स्थानात्, अस्यां दिशि वा, हस्तदक्षिणेन हस्तस्य दक्षिण-भागे। दशरथेति।—दशरथ-दशकन्धरयोः दशरथ-रावणयोः, स्कन्धावारेषु सैन्येषु सेनानिवेशेषु वा, एकप्रवीरयोः अद्वितीययोधयोः।

(अ) इन्द्रयुद्धेति।—इन्द्रयुद्धस्य हैरथयुद्धस्य, द्वयोर्वीरयोः सम्मुखयुद्धस्येत्यर्थः, व्यतिकरः सम्बन्धः, तस्य साक्षी साक्षात् द्रष्टा। सुवेलपादः सुवेलस्य तदाख्यस्य गिरेः, पादः प्रत्यन्तदेशः।

अणुरागरोमकंटअसेअजलेहिं णिसाअरी काबि।
उट्ठोविअणिव्वाविअदइदचिदाणलमणुमरेदि ? * ॥ ९ ॥

रामः। अं जानकि! आम्। इदमेव तत् लक्ष्मणवीरलक्ष्मी-स्वयंवरकौतुकागारम् (ट)। इह हि—

आनीतद्रोणशैलेन सौमित्रेः शल्यहारिणा।
अक्रियन्त जगत्त्रयेव निःशल्यानि हनूमता ॥ १० ॥

---

* अनुरागरोमकण्टकस्वेदजलैर्निशाचरी काऽपि।
उद्दीपितनिर्वापितदयितचिताऽनलमनुम्रियते ? ॥ ९ ॥

अनुरागेति।—यत्र इति गद्यस्थेनान्वयः, यत्र यस्मिन् स्थाने, काऽपि निशाचरी राक्षसी, मेघनादपत्नीति भावः, अनुरागात् भर्तरि प्रेमातिशयात्, यानि रोमकण्टकानि रोमाञ्चाः, स्वेदजलानि च घर्मोदकानि च तैः, उद्दीपितः प्रज्वालितः, निर्वापितश्च प्रशमितश्च, दयितश्च प्रियश्च, चिताऽनलः चिताऽग्निः, तं, इक्षुकण्टकवत् अनुराग-जनितरोमकण्टकैः इक्षुनेन उद्दीपितम् अनुरागजनितस्वेदजलेन च निर्वापितं चिताग्निमित्यर्थः, अनुम्रियते ? अनुमृता भवति ? भर्तारमनुगन्तुं चिताग्निम् अनुप्रविशति ? इत्यर्थः ॥ ९ ॥

(ट) लक्ष्मणेति।—लक्ष्मणवीरलक्ष्म्याः लक्ष्मणस्य सौमित्रेः, वीरलक्ष्म्याः विजय-श्रियाः इत्यर्थः, स्वयंवरस्य आत्मना पतित्वेन वरणस्य, कौतुकागारम् उत्सवगृहं, वैवाहिकमङ्गलमुत्सवागारमित्यर्थः इह वा, "कौतुकन्त्वभिलाषे स्यादुत्सवे मङ्गलेऽर्थयोः। विवाहसूत-गोत्रादभोगयोरपि न स्त्रियाः॥" इति मेदिनी।

आनीतेति।—आनीतः उपस्थापितः, द्रोणशैलः, पर्वतविशेषः येन तथोक्तेन; अत्र "द्रोण" इति गन्धमादनस्यैव नामान्तरं, यतः रामायणादौ लक्ष्मणशक्तिरक्षार्थं हनूमत्कर्तृकगन्धमादनानयनप्रसङ्ग एव दृश्यते; सौमित्रेः लक्ष्मणस्य, शल्यहारिणा शल्यान्याम्लाद्यातञ्जनितव्यथां नाशयता, हनूमता तदाख्यप्रसिद्धवानरवीरेण, जगन्ति एव भुवनत्रयमेव, निःशल्यानि शल्यशून्यानि, अक्रियन्त कृतानि, शल्यवैधव्यव्यापद्वारकौषधाविष्करणादा लक्ष्मणव्यथायां निजगदाहिना सर्वेषामेव व्यथितत्वादा इति भावः। अनुष्टुप् छन्दः ॥ १० ॥

सीता। (श्रुतिमभिनीय सानुरागम्)। अज्जउत्त! किक्किंधेसरकंधावारधुरंधरो रघुउलकुटुंबबिहुरबंधु (ठ) सो कहिं हणूमंतो? *

रामः। देवि निमिराजनन्दिनि!—

क्षुण्णे निशाचरपतौ रविबिम्बवर्त्ती
तातो मया दशरथः स्वयमेव दृष्टः।
तस्याज्ञया रघुपुरीं प्रहितः पुरैव
राज्याभिषेकविधिमस्मृतये हनूमान्॥ ११॥

(विमानवेगनाटितकेन)। देवि! प्रणम्यतामयमितो भगवान् अम्बुराशि,—(ड)

लक्ष्मीरस्य हि यादः क्षणोरःस्थाऽपि सुभटभुजवसतिः।
इन्दुः स च मृडचूडामणिरपि जगतामलङ्कारः॥ १२॥

* आर्यपुत्र! किष्किन्धेश्वरस्य स्कन्धावारधुरन्धरो रघुकुलकुटुम्बबन्धुः स कुत्र हनूमान्?

(ठ) किष्किन्धेति।—किष्किन्धेश्वरस्य किष्किन्ध्याऽधिपतेः सुग्रीवस्य, स्कन्धावारेषु सैन्येषु स्कन्धावारे सेनानिवेशे वा, धुरन्धरः अर्पितकार्यभारवहनक्षमः, श्रेष्ठ इत्यर्थः। रघुकुलकुटुम्बेषु रघुवंशीयानां पोष्यवर्गेषु, "कुटुम्बं पोष्यवर्गे च" इत्यमरमालायां, ये बिधुराः आपन्नाः, तेषां बन्धुः मित्रम्।

क्षुण्णे इति।—निशाचराणां राक्षसानां, पतौ स्वामिनि, रावणे इत्यर्थः, क्षुण्णे क्षय गते सति, रविबिम्बवर्त्ती सूर्यमण्डलस्थः, तातः पिता, दशरथः मया स्वयमेव साक्षादेव, दृष्टः अवलोकितः, तस्य तातस्य, अनुज्ञया आदेशेन, पुरैव पूर्वमेव, राज्याभिषेक एव विधिः, यथा—राज्याभिषेकस्य यो विधिः विधानं, नियम इत्यर्थः, तस्य अस्मृतये अस्मारणाय, आयोजनायेत्यर्थः, भरतद्वारा इति भावः, हनूमान् रघुपुरीम् अयोध्यां, प्रहितः प्रेषितः। वसन्ततिलकं वृत्तम्॥ ११॥

(ड) इतः अस्मात् स्थानात्, अत्रा दिशि इत्यर्थो वा। अम्बुराशिः समुद्रः।

लक्ष्मीरिति।—लक्ष्म्याः नारायणस्य, उरसि वक्षसि, स्थितः वसत इति तथोक्ता, तथा सुभटानां सुवीराणां, भुजेषु बाहुषु, वसतिः वासः यस्याः तथाभूता, अम्भोरपि

(सविमर्शम्) ।—

स्यादेव तोयममृतप्रकृतिर्यदि स्या-
देकान्तमद्भुतमिदं पुनरद्भुतं नः ।
लक्ष्मी-तुषारकर-कौस्तुभ-पारिजात-
धन्वन्तरिप्रभृतयो यदपां विवर्त्ताः ॥ १३ ॥

अपि च देवि !—

आकण्ठदृष्टशिरसाऽभ्यविभाव्यपृष्ठ-
पार्श्वोदरेण चिरमम्भिरुपास्यमानः ।
नाभीसरोरुहजुषा चतुराननेन
प्रीतेः किलात्र भगवानरविन्दनाभः ॥ १४ ॥

श्रीरपि, तथा सदस्य ईश्वरस्य, "—शिरोऽयं शिरिमौ सदः;.... ईश ऐश्वरो भर्गः" इत्यमरः; चूडामणिः शिरोरत्नं, जगतां भुवनानाम्, अलङ्कारः भूषणं, भूषणस्वरूपमित्यर्थः, स प्रसिद्धः, इन्दुश्च चन्द्रोऽपि, अस्य अम्बुराशेः, समुदस्य, जातः हि जलजन्तुभेद एव, "यादांसि जलजन्तवः" इत्यमरः; अस्मादवान्तरोद्भवादिति भावः । आर्या वृत्तम् ॥ १२ ॥

स्यादिति ।—यदि तोयं जलम्, अमृतप्रकृतिः अमृतस्य सुधारसस्य, प्रकृतिः योनिः, उत्पत्तिहेतुरित्यर्थः, जलात् यदि अमृतस्य उत्पत्तिरिति यावत्, "प्रकृतिः योनौ लिङ्गे च" इत्यमरः; स्यात् भवेत्, तदा स्यादेव भवेदेव, अमृतप्रकृतित्वमस्य तोयस्यैवेति भावः, इदं तोयस्य अमृतप्रकृतित्वम्, एकान्तम् अत्यन्तम्, अद्भुतम् आश्चर्यं न, यद्वा—तोयमेव यदि अमृतप्रकृतिः स्यात्, तदा एकान्तमद्भुतं न स्यात्, अमृतस्य द्रवत्वात् समुद्रोत्पन्नत्वाच्चेति भावः, इदं पुनः एतदेव, वक्ष्यमाणव्यापार एवेत्यर्थः, नः अस्माकम्, अद्भुतम् आश्चर्यं, प्रतिभातीति शेषः, यत् लक्ष्मीः श्रीः, तुषारकरश्चन्द्रः, कौस्तुभः मणिविशेषः, पारिजातः सुरतरुविशेषः, तथा धन्वन्तरिः वैद्यश्च स्वावतंयिता स्वसंविदितमन्त्रः, एतत्प्रभृतयः एतदादयः, एते तथा उच्चैःश्रवादयश्च इत्यर्थः, अपां जलानां, विवर्त्ताः परिणामाः, एषां तोयस्य च परस्परवैसादृश्यात् विरूपैकमूलत्वाच्चेति भावः । वसन्ततिलकं वृत्तम् ॥ १३ ॥

आकण्ठेति ।—भगवान् षडैश्वर्यसम्पन्नः, अरविन्दनाभः नाभौ नाभिदेशे यस्य स तादृशः, विष्णुरित्यर्थः, आकण्ठ कण्ठपर्यन्तं, दृष्टानि नेत्रविषयीभूतानीत्यर्थः, शिरांसि

(सीता वन्दते)।

अक्षयः। यत् सत्यमुत्सर्पिणी धर्मोत्तराणां सिद्धिः, (ढ)—

जरयतु जगत् कल्पोच्छित्तौ पिपर्तु पयोधरान्
वहतु बडवावक्त्रज्योतिर्दधातु सुधाभुजः।
भवतु वपुषा यावांस्तावानगस्त्यरुषा पुन-
र्निधरयमपामोघत्यानस्तपासि ! नमोऽस्तु वः ॥ १५ ॥

मस्तकानि, चत्वारि इति भावः यस्य तथोक्तेनापि, अविभाव्यपृष्ठ-पार्श्वोदरेण अज्ञात-पृष्ठ-पार्श्व-जठरेण, ब्रह्मपर्यन्तशिरोदर्शनेनापि अस्य पृष्ठादिकं क्वेति न विभावयितुं शक्यते चतुर्मुखत्वादिति भावः, यद्वा—अविभाव्यम् अतर्क्यम्, अदृश्यत्वादविज्ञेय-मित्यर्थः, पृष्ठ-पार्श्वोदर यस्य तादृशेन, स्तवनार्थे मुखमात्रस्यैव ऊर्ध्वीकरणात् अङ्गान्तराणां नाभिसरोरुहाभ्यन्तरे एव वर्तमानत्वादिति भावः, नाभीसरोरुहजुषा नाभिपद्मस्थितेन, चतुराननेन चतुर्मुखेन ब्रह्मणा, चिरं दीर्घकालं व्याप्य, ऋभिः त्रैदिवलक्षविशेषैः, उपाख्यमानः स्तूयमानः, मनुः अत्र अस्मदाख्यो, शेते स्वपिति, क्षिपेति प्रसिद्धौ। वसन्ततिलकं वृत्तम् ॥ १४ ॥

(ढ) उत्सर्पिणी वर्द्धमाना, सद्गतीति यावत्। धर्मः उत्तरः प्रधानं येषां तथोक्तानां धर्मनिष्ठानामित्यर्थः। सिद्धिः साफल्यं, कृतकृत्यता इत्यर्थः।

जरयतिति।—अयम् एषः, अपां निधिः समुद्रः, कल्पोच्छित्तौ कल्पस्य ब्रह्मणो दिनस्य, उच्छित्तौ विनाशे, अवसाने इत्यर्थः, प्रलयकाले इति यावत्, "कल्पः शास्त्रे विधौ न्याये प्रलये ब्रह्मणो दिने" इति मेदिनी; जगत् भुवनं, जरयतु जीर्णं करोतु, आप्लावनेन विध्वंसयतित्यर्थः, "जरयतु" इत्यत्र "जनयतु" इति पाठे—कल्पोच्छित्तौ कल्पस्य प्रलयस्य, उच्छित्तौ उच्छेदे, उपरमे इत्यर्थः, प्रलयानन्तरमिति यावत्, "संवर्त्तः प्रलयः कल्पः क्षयः कल्यान्त इत्यपि" इत्यमरः; जगत् जनयतु उत्पादयतु, "तस्माद्वा आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी" इति श्रुतेः; पयोधरान् मेघान्, पिपर्तु पूरयतु, आदित्यशिरआकृष्ट-समुद्राम्भसा मेघपूरणादिति भावः, बडवायाः अम्बायाः, वक्त्रज्योतिः मुखानलं, बाडवानलमित्यर्थः, वहतु धारयतु, सुधाभुजो देवान्, दधातु पुष्णातु अमृतदानेनेति भावः, वपुषा शरीरेण, यावान् यत्परिमाणः, तावान् तत्परिमाणः, भवतु अस्तु, पुनः, किन्तु, अगस्त्यस्य कुम्भसम्भवस्य मुनेः, रुषा कोपेन, दुःखपात, दुरतं

राजा। (सबहुमानम्)। वत्स! किमुच्यते—

मुनेः कलशजन्मनो जयति काऽपि गम्भीरता
यया चुलुकमम्बुसामपि निधिः समुत्पद्यते।
अमुष्य पुनरोद्यमे न विवरीतुमुत्सुक्यतां
यया भवति नोच्चकैरहह! सोऽपि विन्ध्याचलः॥ १६॥

अपि च वत्स! दुरवगाहगम्भीरस्वभावानि महतां चरितानि।

(ण) तथा हि—

जगद्विगमघस्रघर्मरसहस्रभानुप्रभा-
परिक्वथितपिण्डितो लवणकूटमेवार्णवः।
अयं क्षणमभूदथ ज्वलति कालरुद्रानले
चटच्चटदिति स्फुटन्न भवति स्म यावत् क्षणात्॥ १७॥

चुलुकमात्रं, गण्डूषमात्रमेव इति भावः, पानं पेयता यस्य तादृशः, अल्पपरिमितवत् सुखपेयः इत्यर्थः, तस्मात् हे तपसि। यः युष्मभ्यं, नमः अस्तु, तपोऽपथसंलिष्टानां न विनम्यताध्वनिति भावः। अगस्त्यश्च समुद्रपानवार्त्ता प्रायुक्तेत्यत्र न पुनरुक्तता। इदिवो इत्यम्॥ १५॥

मुनेरिति।—कलशात् कुम्भात्, जन्म उत्पत्तिः यस्य तथाभूतस्य, मुनेरगस्त्यस्य, काऽपि अनिर्वचनीयेत्यर्थः, गम्भीरता दुरवगाहत्वकृतिमत्वं, जयति सर्वोत्कर्षेण वर्तते इत्यर्थः, यया गम्भीरतया, अम्बूनां निधिरपि समुद्रोऽपि, चुलुकं गण्डूषः, समुत्पद्यते सञ्जायते, गण्डूषीक्रियत इत्यर्थः, अमुष्य अगस्त्यस्य, उत्सुकतां सदोद्यतत्वं, सदस्तीति यावत्, विवरीतुं प्रकटयितुं, न पुनः नैव, दुरुद्यमे प्रभवामः, यया उत्सुकतया, सः अत्युन्नतत्वेन प्रसिद्धः, विन्ध्याचलोऽपि विन्ध्यगिरिरपि, उच्चकैः उन्नतः, न भवति न पुनर्वर्द्धते इति भावः, अहह! आश्चर्यम्। पृथ्वी इत्यम्॥ १६॥

(ण) दुरवगाहेति।—दुरवगाहः दुष्प्रवेशः, दुर्बोध इत्यर्थः, गम्भीरः अगाधश्च इति यावत्, स्वभावः स्वरूपं येषां तादृशानि, चरितानि आचरणानि।

जगदिति।—अयम् एषः, अर्णवः समुद्रः, जगतां भुवनानां, दिनस्य अवसानस्य, सन्ध्यायेत्यर्थः, यः यत्र दिनं, प्रलयकाल इत्यर्थः, "घस्रो दिनाहनी" इत्यमरः; तस्य घस्रः अमरः, भवत्र इत्यर्थः, दिनसन्ध्यात्र इति भावः, "सन्ध्या सन्ध्यांशयोः" इत्यमरः; यः यत्र घस्रभानुः सूर्यः, प्रलयवह्निरिव वाडवसूर्य इति यावत्,

सीता। अज्जउत्त! जलणिद्दिमज्झवट्टिणो लंकापोदअस्स जंबूदीवसंजमणखिंखलेव्व को एसो पडिहासदे? * (त)।

रामः। देवि मेदिनीनन्दिनि! पतितपौलस्त्यजगद्विजयकेतुदण्डानुकारी ककुत्स्थकुटुम्बदुःखसंविभागदायादस्य वानरपतेः कीर्त्तनमयोऽयं महासेतुः। (थ)

* आर्य्यपुत्र! जलनिधिमध्यवर्त्तिनो लङ्कापोतस्य जम्बूद्वीपोपसंयमनमङ्कुशेव स एष प्रतिभासते?

तस्य प्रभया तेजसा, परिक्षपितः अतिपक्वः, अत्यर्थं शोषित इति यावत्, अत एव पिण्डितः पिण्डाकारतां प्रापितः सन्, अयं अयमानेयः, लवणकूटमेव लवणराशिरेव, "पुञ्ज-राशी तूत्करः कूटनस्त्रियान" इत्यमरः; अभूत्, दृश्यते च लोके, समुद्रतीरवासिनः लवणोदधेर्जलमग्निसन्तापेनोत्क्राथ्य संशोष्य च लवणतया परिणमयन्तीति, अथानन्तर, कालरुद्राग्नौ संहारक-रुद्राग्नौ, ज्वलति प्रज्वलिते सति, अथात् प्रज्वलनक्षणे एव, चटचटदिति अव्यक्तध्वनिनेति भावः, स्फुटन् विदीर्य्यमाणः सन्, यावत् साकल्येन, सम्पूर्णभावेनेत्यर्थः, "यावत्तावच्च साकल्ये एवार्थेऽपि समुच्चये" इत्यमरः; न भवति स्म न तिष्ठति स्म, अयमानेय विनाशं गत इत्यर्थः, अलोभूत इति यावत्, यः समुद्रः द्वादशसूर्य्यकिरणेन शोषितः लवणराशिरूपेण परिणतोऽभविष्यत्, यस्य कालाग्नितेजसा निःशेष दग्धोऽभविष्यति, तस्य चुलुकीकरणमसाध्यमेव अगस्त्येन तत् कृतं, तस्मात् महतां न किमप्यसाध्यमिति भावः। पृथ्वी इत्तम्॥ १७॥

(त) जलनिधेः समुद्रस्य, मध्यवर्त्तनः मध्यदेशे अवस्थितस्य। लङ्कापोतस्य लङ्कारूपपत्तिरस्य। जम्बूद्वीपोपसंयमनेति।—जम्बूद्वीपे सप्तसु द्वीपेषु जम्बूवृक्षचिह्निते खण्डसप्तविभक्तद्वीपविशेषे, यत् उपसंयमनं बन्धन, तस्य अङ्कुशेव लोहनिर्मितरज्जुरूपवस्तुविशेष एव, पोतो हि महद्भा रज्ज्वा तीरे बध्यते इति दिक्। प्रतीयते? प्रतीयते? परिदृश्यते? इति यावत्।

(थ) मेदिनीनन्दिनि। पृथिव्यात्मजे। सीतायाः भूमिकर्षणकाले लाङ्गलाग्रे भूमितः प्रादुर्भावात् मेदिनीनन्दिनीत्वम्। पतितेति।—पतितः भूमौ लुण्ठितः, पौलस्त्यस्य रावणस्य, यः जगद्विजयः त्रिजगद्वशीकरणं, तस्य केतुदण्डः ध्वजयष्टिः, जगद्विजयसूचकध्वजदण्डः इत्यर्थः, तदनुकारी तादृशः, पौलस्त्यनिधनेन तस्य ध्वजदण्डस्यापि पतनादिति भावः। ककुत्स्थेति।—ककुत्स्थकुटुम्बस्य ककुत्स्थकीयपरिजनस्य, अस्मदादेरिति भावः, यत् दुःखं क्लेशः, तस्य संविभक्तः; सम्यक्

सीता (सहर्षम्)। दिट्ठिआ (द) अज्जउत्तदंसणपच्चासाए बंधप्परोहणमहोसहं (ध) सेदुबंधो दीसइ। (अञ्जलिं बद्ध्वा)। भअवं! णमो दे। *

रामः। देवि विश्वम्भरासम्भवे! (न) पश्य पश्य—

यथा दूरापातिविदिवयुवतीनेत्रसुलभा-
मपां भर्त्ता द्वारावलिवलयलक्ष्मीं वितनुते।
तथाऽयं माणिक्यस्फटिककनकग्रावशिखरै-
रशून्यात्मा सेतुः प्रभवति महानायक इव॥ १८॥

* दिष्ट्या आर्यपुत्रदर्शनप्रत्याशाया बन्धप्ररोहणमहौषधं सेतुबन्धो दृश्यते। भगवन्! नमस्ते।

विभागः, तव दायं विभाज्यद्रव्यम्, आदत्ते गृह्णाति इति दायादः अंशहरः तस्य, समदुःखभागिन इत्यर्थः। वानरपतेः सुग्रीवस्य। कीर्त्तनमयः कीर्त्तिमयः, कीर्त्तिस्वरूप इत्यर्थः। महासेतुः विशालसेतुः।

(द) दिष्ट्या भाग्येन।

(ध) आर्यपुत्रेति।—आर्यपुत्रस्य भर्तुः तव, दर्शनाय साक्षात्प्राप्तये, या प्रत्याशा तृष्णा, स्पृहा इति यावत् तस्याः। बन्धप्ररोहणेति।—बन्धस्य स्थापनस्य, प्ररोहणम् अङ्कुरोद्गमनम्; यद्वा—बन्धस्य दृढीकरणस्य इत्यर्थः, प्ररोहणं प्ररुह्यते अनेनेति प्ररोहणं बीजं, हेतुभूतम इत्यर्थः, तदेव महौषधं महौषधस्वरूप इत्यर्थः।

(न) विश्वम्भरासम्भवे! पृथिवीतनये। "भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा। गोत्रा क्ष्माः पृथिवी पृथ्वी—" इत्यमरः।

यथेति।—अपां भर्त्ता समुद्रः, दूरात् विप्रकृष्टदेशात्, आपतन्ति निपतन्ति इति दूरापातीनि विप्रकृष्टदेशादपि दर्शनसमर्थानीत्यर्थः, विदिवयुवतीनां देवाङ्गनानां, यानि नेत्राणि नयनानि, तासां खेचरत्वात् नेत्राणां दूरापातित्वमिति भावः, तेषां सुलभा सुखदर्शनीयाभिति यावत्, द्वारावलीवलयस्य द्वारावलीवेष्टनस्य, पृथिव्या इति भावः, लक्ष्मीं श्रियं, यथा वितनुते विस्तारयति, धत्ते इति यावत्, तथा माणिक्य-स्फटिक-कनकग्रावशिखरैः माणिक्यमयैः स्फटिकमयैः काञ्चनमयैश्च शैलशृङ्गैरित्यर्थः, अशून्यात्मा पूरितावयवः, अयम् एषः, सेतुः आलिः, महानायक इव महान् सञ्जनपतिरिव, तथा एव द्वारावल्या इति भावः, "नायको नेतरि श्रेष्ठे द्वारनख-

अपि चास्मिन् बध्यमाने—

शैलप्रवेशात् प्रचलीभवद्भिः
कल्लोलकूटैरभिताडितानाम्।
आसीदिवोत्प्याऽचलगामिनीना-
मम्भोधिरेव प्रभवो नदीनाम् ॥ १९ ॥

(सुग्रीवं प्रति)। सखे!—

तथा सेतुग्रन्थोत्खलितकपिनिक्षिप्तगिरिभि-
प्रतिष्ठावर्द्धिष्णु क्षणमथ नदीभिः प्रतिवहन्।
समुत्खातक्षोणीधरकुहरपूर्त्तिव्यतिकर-
प्रसृष्टाहङ्कारः स्मरसि तदवस्थो निधिरयम्? ॥ २० ॥

अत्रापि" इति मेदिनी; प्रभवति प्रवर्षेच तिष्ठतीत्यर्थः, पृथिव्याः कारवत् परिदृश्यमानस्य अम्भोधेः वक्षसि शोभमानस्य माणिक्यादिप्रस्तरघटितस्य सेतोर्मध्यमधित्यं बोद्धव्यमिति निष्कर्षः। निखरिणी वृत्तम् ॥ १८ ॥

शैलेति।—शैलानां पर्वतानां, सेतुनिमित्तमानीतानां पर्वतानामानामिति भावः, प्रवेशात् जलगमनात्, जलमध्ये आपतनादिति भावः, प्रचलीभवद्भिः प्रवर्षेण चञ्चलीभूतैः, जलप्रवाहप्रतिरोधादिति भावः, कल्लोलकूटैः तरङ्गराशिभिः, अभिताडितानाम् आहतानाम्, अत एव निजस्य प्रत्याहत्य, पुरोभागे गमनाशक्त्या पश्चादपसृत्येत्यर्थः, अचलगामिनीनां पर्वताभिमुखीनां, अत एवागतास्तेषामधीव गच्छन्तीनामिति यावत्, नदीनां सरितां, अम्भोधिरेव समुद्र एव, प्रभवः उत्पत्तिस्थानम्, आसीत् अभूत्; नदीनां पर्वता एव प्रभवाः, अत्र तु शैलप्रवेशात् कल्लोलताडनेन पराहत्य पर्वतानेव प्रतिगच्छन्त्यः नद्यः समुद्रादेव प्रसृता इति भावः। उत्प्रेक्षा वृत्तम् ॥ १९ ॥

तथेति।—तथा तादृशः, सेतुबन्धनकाले परिदृष्ट इत्यर्थः, सेतुग्रन्थया सेतुरचनानुरागेण, उत्खलितैः उत्पुटैः, कपिभिः वानरैः, निक्षिप्तानां पातितानां, गिरिणां पर्वतानां, प्रतिष्ठया क्षिप्ता, वर्द्धिष्णु वर्द्धनशीलः, स्रोतःस्वरूप इत्यर्थः, अथ तत्क्षणानन्तरं च, नदीभिः समुद्रेण सङ्गच्छमानाभिः सरिद्भिः, प्रतिवहन् प्रातिकूल्येन गच्छन्, निम्नाभिमुखमनपसरन्नित्यर्थः, अनन्तरं, समुत्खातानां समुत्पाटितानां, समुत्पाट्य निक्षिप्तानामिति यावत्, क्षोणीधराणां पर्वतानां, कुहराणि विवराणि, "कुहरं सुषिरं विवरं विलम्" इत्यमरः; तेषां पूर्त्तिः पूरणं, तत्प्रवाहैरिति भावः; तत्र

सुयोधः। देव! भवच्चरितचित्रशालिकायाम् (प) अस्माकं चेतसि किं किं नाम न लिखितमस्ति? अपि च—

सेतूद्योगे सपदि लवणादन्यमम्भस्तिमिभ्यः
कालेनापां मधुरमपि हि स्वादमुद्वेदयन्त्यः।
शैलच्चेपोच्छलितसलिलव्यूहतुच्छे समन्तात्
वारां पत्यौ पटुतररयं निम्नगाः सन्निपेतुः॥ २१॥

विभीषणः। देव मनुवंशमौक्तिकमणे!—(फ)

व्यतिकरेण सम्बन्धेन समूहेन वा, प्रभूत, अपनीतः, अहङ्कारः अहं महानिति बुद्धिः यस्य तथाभूतः, बहुभिः प्रवाहैरपि कुहराक्रामपूरणोद्यत्वात् कुहरमध्ये आवद्धो-भावाच्चेति भावः, तदवस्थः वडवानल इत्यर्थः, अपां निधिः समुद्रः, यदासौदिति शेषः, तत् स्मरसि? त्वमिति शेषः। अत्र वाक्यार्थः क्रमेतयाऽन्वेति। शिखरिणी वृत्तम्॥ २०॥

(प) भवदिति।—भवतः तव, चरितमेव चारित्रमेव, चित्रशालिका आलेख्यगृहं तत्र, ततस्वरूपे इत्यर्थः।

सेतूद्योगे इति।—सेतोः सेतुबन्धनस्य, उद्योगे उपक्रमे, सपदि तत्क्षणात्, शैलानां पर्वतानां, पर्वताग्रामणीरिति यावत्, क्षेपात् पातनात्, उच्छलितैः उच्छ्रसितैः, स्फीतैरिति यावत्, सलिलव्यूहैः जलसङ्घातैः, तुच्छे विपद्धूलतां नीते इति भावः, वारां पत्यौ जलनिधौ, निम्नगाः नद्यः, "यद्य नदी सरित्। स्रोतस्वती द्रोपवती सवन्ती निम्नगाऽऽपगा॥" इत्यमरः; कालेन चलात्सलिलः अन्तर्गतेभ्यः तिमिमत्स्येभ्यः, स्वादम् चतुर्थीं; अपां जलानां, स्वादम् आस्वादं, लवणात् अन्यम् अपरम्, अत एव मधुरम्, उद्वेदयन्त्यः जनयन्त्यः सत्यः, पटुतरः प्रबलतरः, रयः वेगः यस्मिन् तत् यथा तथा, समन्तात् सर्वतः, सन्निपेतुः सन्निपतन्ति स्म, लवण समुद्रजले नदीना मधुरजलाना सम्पातात् माधुर्यं सम्भवते इति भावः। मन्दाक्रान्ता वृत्तम्॥ २१॥

(फ) मनुवंशेति।—मनोः स्वायम्भुवप्रजापतेः, वंशे कुले, यद्वा—वाच्यं-वारक्ष-योरभेदोपचारात् मनवः मनुजाः एव, वयाः वेणवः, मुक्ताकरविशेषा इति भावः, गज-मुक्तादिवत् वंशजान्यपि मुक्ताप्रकृतिविशेषत्वात्, तेषु, मौक्तिकाः मुक्तावत् शुभाज्जलयशसः पुरुषाः इति भावः, तेषु मणे! रत्न! प्रधानमित्यर्थः।

सद्यः पीत्वा दरीभिर्जलधिमथ चिरात् दृष्टमैनाकबन्धु-
प्रीतिप्रौढ़ाश्रुपूरद्विगुणमहिमभिर्निर्झरैः पूरयन्तः।
ये विन्यस्ताः पुरस्तान्निधि निधि निवहैरोषधीनां ज्वलद्भि-
स्ते दृश्यन्ते तदात्वोषितकपिशिविरस्मारिणः सेतुशैलाः॥ २२॥

स्रोता। (सस्मितम्)। अज्जउत्त! गौरीगुरुणो गिरिंदस्स जुवराओ (व) जलणिहिगब्भवसदो मेणाओ जाणामि पक्खच्छेअं वि विणा थावरीभूदो *(भ)।

* आर्यपुत्र! गौरीगुरोर्गिरीन्द्रस्य युवराजो जलनिधिगर्भवसतिर्मैनाको जानामि पक्षच्छेदमपि विना स्थावरीभूतः।

सद्य इति।—पुरस्तात् प्रथमं, विन्यस्ताः सन्निवेशिताः, सेतुरयमिति भावः, सद्यः सन्निवेशमात्रेणैव, दरीभिः गुहाभिः, शैलानामिति भावः, जलधिं समुद्रं, समुद्रजलमिति यावत्, पीत्वा, अत्र जलधिपानानन्तरं, चिरात् दीर्घकालानन्तरमित्यर्थः, दृष्टे अवलोकिते, जलाल्पभावात् दृष्टिगोचरं गत इत्यर्थः, मैनाके हिमालयात्मजे तदाख्ये पर्वतविशेषे एव, समुद्रगर्भस्थिते इति भावः, बन्धौ स्वजने, या प्रीतिः स्नेहः, तया हेतुना प्रौढैः प्रगाढैः, अश्रुपूरैः आनन्दजनितनेत्राम्बुनिवहैः, चिरकालादर्शनानन्तरम् अकस्माद्दर्शनजनितानन्दसमुद्भूतैरिति भावः, द्विगुणैः द्विरावृत्तैः, महिमा माहात्म्यम्, आधिक्यमित्यर्थः येषां तादृशैः निर्झरैः प्रस्रवणैः सततजलप्रवाहैः, पूरयन्तः पूर्णतामापादयन्तः, दरीभिः पातात् यावन्ति जलानि क्षयं गतानि, ततोऽधिकं यथा तथा पूरयन्त इति भावः, ये सेतुशैलाः सेतुरूपपर्वताः इत्यर्थः, ते निधि निधि प्रतिरात्रं, ज्वलद्भिः ओषधीनां निवहैः, समूहैः, तदात्वे तत्काले, "तत्कालस्तु तदात्वं स्यात्" इत्यमरः, उषितानां कृतावस्थानानां, कपीनां वानराणां, शिविराणि सैन्यानि, तेषां आरम्भः आरम्भाः, दृश्यन्ते, ओषधीनां तेजसा पर्वतानां पिङ्गलवर्णत्वपिशाच्यादिति भावः। यद्वा—निधिभिः पूरयन्तः, तथा निधि निधि प्रतिरात्रं, ज्वलद्भिः दीप्यमानैः, ओषधीनां लतागुल्मवृक्षाणां, निवहैः समूहैः उपलक्षिताः, ये सेतुशैलाः सेतुरूपपर्वताः, पर्वताश्च वा, शैलसेतव इत्यर्थः, विन्यस्ताः सन्निवेशिताः, निर्मिता इत्यर्थः, तदात्वोषितकपीनां शिविरस्य सैन्यनिवासस्य, कपिसैन्यानामवस्थानाद्धि यज्ञावाससेत्यर्थः, स्मारिणः ते सेतुशैलाः पुरस्तात् पुरतः, दृश्यन्ते अवलोक्यन्ते। अनर्घराघवम् ॥ २२॥

रामः । (विहस्य)। आं जानकि ! आम्—(म)

क्रौञ्चं विमुच्य पुत्रञ्च पितरञ्च हिमालयम् ।
प्रविश्य जलधिं पक्षौ रक्षताऽनेन किं कृतम् ? ॥ २१ ॥

सीता । (रामौ पृथक् प्रति)। विमाणराअ ! गअणमग्गचंक-मणकोदूहलुल्लसिअमाणसाम्हि, (य) ता उअमेहि (र) दाव । *

रामः । (सकौतुक-स्मितम्)। देवि रत्नगर्भागर्भरत्नशलाके ! (ल) पश्य पश्य—

---

* विमानराज ! गगनमार्गचङ्क्रमणकौतूहलोल्लासितमानसाऽस्मि ; तदुन्नमय तावत् ।

(व) गौरीगुरोः पार्वतीपितुः, गिरीन्द्रस्य नगाधिराजस्य, हिमाश्रयस्येत्यर्थः । युवराजः यौवराज्याभिषिक्तः कुमार इत्यर्थः ।

(भ) आवरीभूतः अचलीभूतः, छिन्नपक्ष इव सञ्जात इत्यर्थः, एवञ्च समुद्र-मध्ये एव स्थितेरिति भावः ।

(म) आमिति निश्चयार्थकमव्ययम्, "आं आनन्दिश्चयस्वीकृतौ" इति मेदिनी ; त्वं यत् वदसि तत् परमार्थतः सत्यमेवेत्यर्थः ।

क्रौञ्चमिति ।—पुत्रं तनयं, क्रौञ्चं तदाख्यं गिरिं, तथा पितरं जनकं, हिमाश्रयञ्च हिमगिरिञ्च, विमुच्य त्यक्त्वा, जलधिं सागरं, प्रविश्य पक्षौ पतत्त्रौ, रक्षता पालयता, अनेन मेनाकेन, किं किं कार्य्यं, कृतम् ? सम्पादितम् ? अयुक्तं कृतमिति भावः, नाम्र ततोऽपि पक्षयोः आवरताऽपनोता, न वा पुत्रक्षेत्रः नापि पितृभक्तिरिति सर्वथा दुर्दैवमस्येति भावः ॥ २१ ॥

(य) गगनेति ।—गगनमार्गश्च गगनमार्गौ वा आकाशपथौ तयोर्यत्, चङ्क्रमणे इतस्ततः भ्रमणे, चङ्क्रमणाय वा, कौतूहलेन कौतुकेन, उल्लसितं हृष्टं, मानसं चित्तं यस्याः तथाभूता ।

(र) उन्नमय ऊर्ध्वम् उत्पातय, माम् ऊर्ध्वं नयेत्यर्थः । "उअमेहि" इत्यत्र "उन्नम" इति संस्कृते उन्नम ऊर्ध्वमुत्पत इत्यर्थः ।

(ल) रत्नेति ।—रत्नानि निधयः, गर्भे अभ्यन्तरे यस्याः ताहश्याः रत्नगर्भायाः पृथिव्याः, गर्भश्च कुक्षेः, रत्नशलाका इव रत्नमयशलाका इव शलाका तत्सम्बुद्धौ, आजनगौरवर्णे ! इत्यर्थः ।

यथा यथा परं व्योम विमानमधिरोहति ।
तथा तथाऽपसर्पन्ति परतः परितो दिशः ॥ २४ ॥

किञ्च—

आसन्नतपनाभ्यान-त्वचः पुष्पकपीडिताः ।
गगनार्णवयादांसि स्तिम्यन्ति स्तनायन्नवः ॥ २५ ॥

अपि च—

अमी ते गम्भीरस्तनितरवरौद्रा नयनयो-
रनायुष्यं पुष्णन्त्यवतमसमुच्चैर्बलमुचः ।
विसर्पद्भिर्येषामुपरि परिमन्दोः परिमलै-
रसम्बाधज्योत्स्नातिमिरचर्यापत्वं विदधभूत् ॥ २६ ॥

यथेति ।—विमानं व्योमयानम्, अयं पुष्पकरथ इत्यर्थः, यथा यथा परम् अत्यधिकम्, ऊर्ध्वमिति यावत्, व्योम आकाशम्, अधिरोहति उत्पतति, तथा तथा दिशः पूर्वादि दिक्समूहाः, परतः परं स्थानं, परितः समन्तात्, "परतः परितः" इत्यत्र "परतः परतः" इति पाठः सुष्ठुतया प्रतिभाति, परतः परतः उत्तरोत्तरमित्यर्थः, अपसर्पन्ति पलायन्ते, दिङ्निर्णयो न स्यादिति भावः । अनुष्टुप् वृत्तम् ॥ २४ ॥

आसन्नेति ।—आसन्नेन सन्निहितेन, तपनेन सूर्येण, तप्तेनेति भावः, आस्यानाः मुखाः, त्वच इव त्वचः बाह्यदेशा इति भावः येषां तथोक्ताः, तथा पुष्पकेण तदाख्य-विमानेन, पीडिताः विदारिताः, खण्डीकृता इति भावः, गगनमेव आकाशमेव, अर्णवः समुद्रः, अगाधत्वात् गोलत्वाच्चेति भावः, तस्य यादांसि जलजन्तुभूताः, "यादांसि जलजन्तवः" इत्यमरः ; स्तनयित्नवः मेघाः, "अभ्रं मेघो वारिवाहः स्तनयित्नु-र्बलाहकः" इत्यमरः ; स्तिम्यन्ति आर्द्रतां लभन्तीति यावत्, अश्नुवन्तीति शेषः ; यद्वा—स्तिम्यन्ति मन्दीभवन्ति, श्रमैः श्रमेणेत्यर्थः । यद्यपि "ष्टिमिर् आर्द्रीभावे" इत्यस्य दैवादिकस्याकर्मकत्वं, तथाऽत्र अन्तर्भूतण्यर्थो बोद्धव्यः । अनुष्टुप् वृत्तम् ॥ २५ ॥

अमी इति ।—गम्भीरं गभीरं, स्तनितं गर्जितमेव, रवः ध्वनिः, तेन रौद्राः भीषणाः, उच्चैर्बलाकाः, अमी एते, जलमुचः मेघाः, "अभ्रं मेघो वारिवाहो जलमुक् भूमयोनयः" इत्यमरः ; ते तव, नयनयोः चक्षुषोः, अनायुष्यम् अनायुःप्रयोजकं, दर्शनप्रतिव्याघातकमिति भावः, अवतमसं घोरं तमः, अल्पं तमः इत्यर्थः, "घोरे-

सुग्रीवः। (अधोऽवलोक्य सकौतुकं रामं प्रति)। देव! दूरादवाक्

(व)अवलोकय तावत्—

निष्कुलोन्नतनतप्रविभक्तिः स्वस्ववर्णविनिविष्टपदार्था।
अम्बुराशिपरिवेषवती भूश्चित्रकुट्टिमामिव प्रतिभाति ॥ २७ ॥

अपि च देव!—

अयमनेन महोदधिभोगिना
वलयितो वसुधाफणामण्डलः।

ऽवनतं तमः" इत्यमरः; पुष्यन्ति पुष्टं कुर्वन्ति, वर्द्धयन्तीत्यर्थः, स्वल्पेन तमसा जघने आवृण्वन्तीति भावः, इन्दोरुन्नतस्य, उपरि ऊर्ध्वं परम अवयव, विसर्पद्भिः सञ्चरद्भिः, येषां मेघानां, परिमलैः विमर्दोत्थगन्धैः, मेघानां परस्परघर्षजनित-गन्धैरित्यर्थः, "स्यात् परिमलोऽतिमर्दोत्तमगन्धयोरपि" इति मेदिनी; न सम्यक् बाधा व्याघातः यस्याः तथाभूता, ज्योत्स्ना कौमुदी, तिमिरचयस्य अन्धकार-समूहस्य, चन्द्रिकी ज्योत्स्ना चन्द्रिकातिमिरचयस्येति भावः, तेन चित्रं शबलं, अयं गुक्लवर्णे अवयव कृष्णवर्णमित्यर्थः, विपत्त आभाति, अभूत्, यद्वा इन्दोरुपरि मेघा विसर्पन्ति, तदा ज्योत्स्ना अव्याहता वर्त्तते, यदा च अधः विसर्पन्ति, तदा तिमि-राणि जायन्ते, एवम् ऊर्ध्वाधोविसर्पणक्रमेण ज्योत्स्ना-तिमिरयोरुभयोरपि अवस्थानं जायते इति भावः। "परिमले." इत्यत्र "परिकरैः" इति पाठकल्पना साधीयसी सङ्गतार्था च इति मन्ये, मेघानां परिमलस्य, तेन च परिमलेन ज्योत्स्ना-तिमिरयोः व्याघातस्य च अनभ्युपगमादिति सुधीभिर्विचिन्त्यम्। परिकरैः समूहैः, मेघानां समूहैरित्यर्थः। चित्रकुट्टिमो हृतम् ॥ २६ ॥

(व) अवाक् अधः इत्यर्थः।

निष्कुलेति।—निष्कुला गोपिता, लक्ष्यविषयीभूता इति यावत्, उन्नत-नतयोः उच्च-नीचयोः, स्थानयोरिति शेषः, प्रविभक्तिः प्रकृष्टो विभागः यस्याः तथोक्ता, स्वेषु स्वेषु निजेषु निजेषु, वर्णेषु शुक्लपीतादिषु, विनिविष्टाः अवस्थिता इत्यर्थः पदार्थाः वस्तूनि यस्याः यस्यां वा तादृशी, दूरत्वात् शुक्लादिवर्णवत्त्वेनैव पदार्था भायन्ते, न तु तत्र-गुल्म-वृक्ष प्राकाराद्विविशेषेति भावः, अम्बुराशिः समुद्र एव, परिवेषः वेष्टनं यस्यां, समुद्रपरिवेष्टिता इत्यर्थः, भूः पृथ्वी, चित्रं नानावर्णं, विविधवर्णशोभितमित्यर्थः, कुट्टिमनिव बद्धभूमिरिव, द्वीपनिवेति भावः, प्रतिभाति राजते। रथोद्धता वृत्तं, "रात् परैर्न-र-ब-यै रथोद्धता" इति लक्षणात् ॥ २७ ॥

जगदनर्घमवाप्य भवादृशं
किमपि रत्नमहङ्कृतेतराम् ॥ २८ ॥

सीता। (पुरो दर्शयन्ती)। को एसो कप्पाणलज्जालाकलाव-कढिज्जमाणजलणिहिलवणत्थवकणिम्मलअभंलिहसिहरसहस्स-महुरो महोहरो पलोइज्जदि ? * (ग)

विभीषणः। देवि!—

पुरः प्रालेयशैलोऽयं यस्मिन् मकरकेतवे।
मृतसञ्जीवनी दुर्गा महौषधिरजायत ॥ २९ ॥

* क एष कल्पानलज्वालाकलापकृष्यमाणलवणनिधिलवणत्वकणनिर्मलाभ्रंलिह-शिखरसहस्रमधुरो महीधरः प्रलोक्यते ?

अयमिति।—अनेन परिदृश्यमानेन, महोदधिरेव समुद्र एव, भोगी भुजङ्गः तेन, वलयितः वेष्टितः, अयम् एषः, वसुधा पृथिवी एव, फणः फणा, कुण्डलीभूतसर्पस्य फणा इत्यर्थः, तस्य मण्डलः समूहः, जगता भुवनानां, त्रिभुवनमध्ये इत्यर्थः, अनर्घम् अमूल्यं, दुष्प्रापमिति यावत्, भवादृशं त्वत्सदृशं, किमपि अनिर्वचनीयं, रत्नं मणिम्, अवाप्य प्राप्य, अहङ्कृतेतराम् अतिशयेन अहङ्करोति। द्रुतविलम्बितं वृत्तं, "द्रुतविलम्बितमाह न-भौ भ-रौ" इति तल्लक्षणात् ॥ २८ ॥

(ग) कल्पानलेति।—कल्पानलस्य प्रलयाग्नेः, ज्वालाकलापेन शिखासमूहेन, कृष्यमाणस्य पच्यमानस्य, लवणनिधेः समुद्रस्य, लवणत्ववत् लवणरसाग्निवत्, निर्मलेन विप्रदेन, अभ्रंलिहेन मेघस्पर्शिना, शिखराणां शृङ्गाणां, सहस्रेण मधुरः मनोहरः। प्रलोक्यते दृश्यते ?

पुर इति।—पुरः अग्रतः, अयं परिदृश्यमानः, प्रालेयशैलः तुषाराचलः, हिम-गिरिरित्यर्थः, "अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्। प्रालेयं निहिका" इत्यमरः" वर्त्तते इति शेषः, यस्मिन् प्रालेयशैले, दुर्गा गौरी एव, मकरकेतवे कामाय, मदनजीवनार्थमिति यावत्, तादर्थ्ये चतुर्थी; मृतः सञ्जीव्यते अनयेति मृतसञ्जीवनी मृतस्य प्राणदायिनी, महौषधिः अजायत उदपद्यत, नेत्रानलेन दग्धः कामः गौरी-परिणयात् परं हरेण पुनर्जीवनं प्रापित इति पुराणम्, अत एव मृतस्य कामस्य पुनर्जीवनदानात् गौर्यां महौषधित्वं युक्तमिति भावः। वसन्ततिलकं वृत्तम् ॥ २९ ॥

सीता। (सकौतुकम्)। अवि दुध्ध ज्जेव्व चंदसेहरणअणाणले आहुदीभूदो भअवं मम्महो ? *

विभीषणः। आं देवि! आम्। इयमुत्तरेण देवदारुवनलेखा विषमशरदुरन्तसाक्षिणी (ष)—

पुरा पुरां भेत्तुरिह त्रिनेत्री-
सृङ्गाटके तुल्यरुषि स्थितेऽपि।
धगद्धगित्यज्वलदेकमन्ये
तद्धूमपीड़ामपि नासहेताम्॥ ३०॥

रामः। किमुच्यते—

नीललोहितललाटलाञ्छने
लोचने जयति कोपपावकः।

* अपि दुग्धे एव चन्द्रशेखरनयनानले आहुतीभूतो भगवान् मन्मथः?

(ष) उत्तरेण उत्तरस्यां दिशि। देवदारुवनलेखा देवदारुवाननश्रेणी। विषमेति।—विषमशरस्य कामस्य, दुरन्तः दुरवसानं, दुःखदायकविनाश इत्यर्थः, दाह इति यावत्, तस्य साक्षिणी साक्षाद्द्रष्ट्री।

पुरेति।—पुरा पूर्वम्, इह अस्मिन् देवदारुवने, पुरां भेत्तुः त्रिपुरारेः हरस्य, त्रिनेत्री नेत्रत्रयमेव, शृङ्गाटकं वारिफलक, "पानिफल" इति बङ्गभाषया, "सिङ्गाड़" इति च हिन्दीभाषया प्रसिद्धं तस्मिन्, "शृङ्गाटकं भवेद्वारि-फलके च चतुष्पथे" इति मेदिनी; तुल्यरुषि समक्रोधे, स्थितेऽपि वर्त्तमानेऽपि, नेत्रत्रयमेव युगपत् तुल्यरुषा क्रोधप्रज्वलितमभूदित्यर्थः, एकं खलाटस्थं तृतीयनेत्रमित्यर्थः, धक् धक् धक् इति शब्दम्, अज्वलत् प्रज्वलितमभवत्, अन्ये अपरे, अवशिष्टे द्वे नेत्रे इत्यर्थः, तस्य तृतीयनेत्रस्यारिरित्यर्थः, धूमपीड़ामपि अग्निसमुद्भूतधूमजदुःखमपि, न असहेतां न अक्षमेतां, सोढुं समर्थे न भवेतामित्यर्थः, निमीलिते एव आस्तामिति भावः। उपजाति वृत्तम्॥ ३०॥

नीलेति।—नीललोहितस्य हरस्य, "ब्रह्मादयस्त्रयः सर्व्वे भूर्लटिर्नीललोहितः। हरः शरद्धरो भर्गः—"इत्यमरः; ललाटलाञ्छने भालदेशस्य चिह्नभूते, भालावस्थिते इत्यर्थः, भालभूषणे इति भावः, लोचने नेत्रे, क्रोधपावकः क्रोधाग्निः, जयति सर्व्वोत्-

रक्षितस्य जगदन्तरैतवे
यस्य सुज्वलनमात्मभूरभूत् ॥ २१ ॥

सीता। (रामं प्रति)। अज्जउत्त! तधा णिरणुक्कोसो (ख) अधं उण पडिणिवुत्तो (ग) महादेवो देईए? * (क)।

रामः।—

अरपरिभवनिःसहायदीर्घै-
रथ सुभगरथैरियं तपोभिः।
तदकृत यदसौ निजेऽपि देहे
जयति जगत्पतिरात्मना द्वितीयः ॥ २२ ॥

* आर्यपुत्र। तथा निरनुक्रोशः अर्धं पुनः प्रतिनिवृत्तो महादेवो देव्या?

अरैश्च वर्तते, आत्मभूः ब्रह्मा, जगता भुवनानाम्, अन्तरैतवे अंतराले, प्रलयकाले विजगद्विनाशायेत्यर्थः, रक्षितस्य त्रायितस्य, यस्य शीर्षपालकस्य, सुज्वलनं प्रज्वलनकारणं, सम्भुजकपालम् इति यावत्, अभूत् अलायत। रथोद्धता वृत्तम् ॥ २१ ॥

(ख) निरनुक्रोशः निर्दयः, "कृपा दयानुकम्पा स्यादनुक्रोशः" इत्यमरः।

(ग) प्रातानवृत्तः? विरतः? क्रोधादिति शेषः।

(क) देव्या गौर्या।

अरैरिति।—इयं देवी पार्वती, अरस्य शत्रोः, परिभवेन तिरस्कारेण, विनाशेनेत्यर्थः, निःसहायः सहायशून्यः, दुरन्तैश्चरणैः इति भावः, तेन हेतुना दीर्घाभिः महान्तीत्यर्थः, बहुदिनं व्याप्य प्रवर्तमानैरिति यावत् तथाभूतैः, पूर्वं अरसहायेन इमं यज्ञीयवृषभेन सहायं, ततस्तस्याश्चरणात् सहायाभावमवलोक्य सहसैव एवं सहायोऽवलम्बित इति भावः, असुभगा सुभगा क्रियते ऽनेनेति तपोऽग्निभिः तैः सुभगरथैः भर्तुः प्रियत्वसम्पादकैरित्यर्थः, तपोभिः तपश्चर्याभिः, तत् तथा, अकृत कृतवती, यत् यथा, येन वा प्रकारेण इत्यर्थः, जगत्पतिः विश्वेश्वरः, असौ हरः, निजे स्वकीये, देहेऽपि अरीरेऽपि, आत्मना अरीरेण, नीरोगत्वेनेत्यर्थः, पार्वतीदेहेनेति यावत्, "आत्मा पुंसि स्वभावे च···अरीर-ब्रह्मचोरपि" इति मेदिनी; यद्वा—आत्मना स्वयमेव, स्वेच्छयेत्यर्थः, द्वितीयः द्वयोः पूरकः, अर्धनारीश्वर इत्यर्थः, जगति स्त्रीपुंसावेव वर्तते। पुष्पिताग्रा वृत्तम् ॥ २२ ॥

विभीषणः। (सपरिहासम्)।—

चिरमनया तपसित्वा कपाल-विष-विषधरैकचित्तस्य।
चक्रे हरस्य मूर्तिः फलमर्धं फलदमर्धं च ॥ ३३ ॥

सीता। (विहस्य तं प्रति सकौतुकम्)। कदरस्सिं उण संण्णिवेसे भअवदीए सव्वमंगलाए पाणिग्गहणमंगल (ख) आसी ? *

विभीषणः। इदं पुरस्तादोषधिप्रस्थं नाम नगराजनगरम्। (ग) अत्र हि—

सम्प्रदातरि महौषधीमये भूधरे सुखमुवाह पार्वतीम्।
मूढकङ्कणफणीन्द्रनिर्भयां तारकेश्वरकिशोरशेखरः ॥ ३४ ॥

* कतरस्मिन् पुनः सन्निवेशे भगवत्याः सर्वमङ्गलायाः पाणिग्रहणमङ्गलमासीत ?

चिरमिति।—अनया गौर्या, चिरं सुदीर्घकालं, तपसित्वा तपः तप्त्वा, कृत्वा इत्यर्थः, कपालः नरशिरःकङ्कालं, विषं गरलं, "विष" इत्यत्र "इष" इति पाठे—इषो बाहुनभूतो द्रुमः, विषधरः भुजगः एषु एकं केवलं, चित्तं मनः यस्य तथाभूतस्य, हरस्य महेश्वरस्य, अर्धं मूर्त्तेः शरीरार्द्धं, वामाङ्गमिति यावत्, फलं लाभः, तपसः परिणामः इति यावत्, तस्यास्तदर्धस्य लाभात्, यत् लभ्यते तदेव फलमिति भावः, अर्धं च अपरमर्धाङ्गं, दक्षिणाङ्गमिति यावत्, फलदम अभीष्टदात्, चक्रे कृतं, गौरीतपसा वशं गतो हरोऽर्धनारीश्वरोऽभूदिति भावः। आर्या छन्दः ॥ ३३ ॥

(ख) सन्निवेशे प्रदेशे। सर्वमङ्गलायाः गौर्याः, "उमा कात्यायनी गौरी काली हैमवतीश्वरी। शिवा भवानी रुद्राणी सर्वाणी सर्वमङ्गला॥" इत्यमरः। पाणिग्रहणमङ्गलं शुभविवाहः।

(ग) पुरस्तात् अग्रे। ओषधिप्रस्थम् ओषध्यः फलपाकान्ता लतागुल्मादयः, ताः प्रतिष्ठन्ते अत्र इति ओषधिप्रस्थम्; ओषधिप्रधानं प्रस्थं सानुदेशो यस्य तादृशमिति वा ओषधिप्रस्थं हिमालयः, तस्य ओषधिभूमित्वात्। नगराजनगरं नगराजस्य पर्वताधिपस्य, नगरं राजधानी।

सम्प्रदातरीति।—महौषधीमये महत्यः महाफलाः, ओषध्यः लतादिविशेषाः, तन्मये तद्बहुले इति यावत्, भूधरे पर्वते, हिमवतीति यावत्, हिमालयस्य ओषध्युत्पत्तिस्थानत्वादिति भावः, सम्प्रदातरि सम्यक् प्रदानकर्त्तरि सति, तारकाणां तारकाणाम्, ईश्वरः प्रभुश्चन्द्रः, किशोरः शिशुः, बालश्चन्द्र इत्यर्थः, कलानामश्चन्द्र इति

रामः। आं देवि! दृष्टैव—

पितरि निजतुहिनसम्पत्कल्पितहैमन्तविभ्रमे गौरी।
निर्मदभुजङ्गभूषणमभीषणं प्रियकरं भेजे॥ २५॥

सीता। (सस्मितम्)। अज्जउत्त! अवि एदस्सि जेव्व मअणतणुदहणवइअरणिरप्पणो फुडमविस्सस्संतीए (घ) गोरीए चंदचूडो संघडिदो (ङ) णिअसरीरेण?

रामः। (विहस्य)। आं देवि!—

---

* आर्यपुत्र। अयमेतस्मिन्नेव मदनतनुदहनव्यतिकरनिरात्मीयः स्फुटमविश्वस्त्या गौर्या चन्द्रचूडः सङ्घटितो निजशरीरेण?

यावत्, शेखरं शिरोभूषणं यस्य तथाभूतः, हरः इत्यर्थः, मूढः विवश इति यावत्, प्रशान्त इति भावः, हिमालयस्य हिमस्य महौषधीनाञ्च प्रभावादिति भावः, कटुकः बलवद्रूपः, फणीन्द्रः भुजङ्गराजः, तस्मात् निर्भया भयरहिता, फणीन्द्रस्य मूढत्वादेवेति भावः, पार्वती गौरी, सुखं सानन्दम्, उवाह परिणयति स्म। रथोद्धता वृत्तम्॥ २४॥

पितरीति।—निजतुहिनसम्पदा स्वकीयहिमालीढपेश्वर्येण, कल्पितः कृतः, हैमन्तस्य तदाख्यस्य ऋतोः, विभ्रमः विलासः विशिष्टा भ्रान्तिश्च येन तथाभूते, पितरि जनके, हिमगिरौ इत्यर्थः, पितृगृहे इति यावत्, गौरी पार्वती, निर्मदः निरौद्धत्यः, प्रशान्त इत्यर्थः, ग्रीवायां अवस्थानात् परित्यक्तनिजस्वाभाविकखलतादिदोष इति भावः, भुजङ्ग एव सर्प एव, भूषणम् अलङ्कारो यस्य तादृशम्, अत एव अ-भीषणम् अ-भयङ्करं, प्रियस्य अभीष्टस्य हरस्य, करं पाणिं, भेजे जग्राहेत्यर्थः। आर्या वृत्तम्॥ २५॥

(घ) मदनेति।—मदनस्य कामस्य, तनुदहनं शरीरदाहः, तद्व्यतिकरेण तत्-सम्बन्धेन, तद्धेतुनेति यावत्, निरात्मीयः स्वजनरहितः, निःसङ्गशिलाशीलेति भावः, मदनस्य आत्मभूतात् तद्विनाशेन निरात्मीयः इति तात्पर्यम्; अतः स्फुटं सम्यक्, अविश्वस्त्या मामपि परित्यज्य चण्डेन गमिष्यतीति धिया विश्वासमकुर्वत्या इति यावत्।

(ङ) चन्द्रचूडः अग्निशेखरः, हर इत्यर्थः। सङ्घटितः योजितः, हर-गौरीरूपेण निजार्द्धाङ्गे भावद्योतन इत्यर्थः।

एतस्यां हि तुषारभूधरशिरःसौम्नि प्रियार्द्धेन च
स्वेनार्द्धेन च तादृशे पशुपतौ वृत्तेऽर्द्धनारीश्वरे।
शेषेणार्द्धयुगेन सप्रहसनं गौरीसखीभिस्तदा
चक्रे दक्षिण-वामयोर्विनिमयादन्योऽर्द्धनारीश्वरः॥ ३६॥

अपि च—

सम्भोगानतिरिच्यमानविभवो यद्विप्रलम्भो रस-
स्तद्दिव्यं मिथुनं परस्परपरिस्यूतं नमस्कुर्महे।

एतस्यामिति।—एतस्यां हि अत्रैव, तुषारभूधरशिरःसौम्नि हिमाचलशिखर-प्रदेशे, प्रियायाः गौर्याः, अर्द्धेन अङ्गावयवेन, स्वेन निजेन, अर्द्धेन अङ्गावयवेन च, पशुपतौ हरे, तादृशे तथाभूते, अर्द्धनारीश्वरे अर्द्धं नारी अर्द्धनारी तस्याः ईश्वरः तथाभूते, कृते जाते सति, तदा तस्मिन् समये, गौर्याः पार्वत्याः, सखीभिः सहचरीभिः, सप्रहसनं सोपहासं यथा तथा, शेषेण अर्द्धयुगेन गौर्या अपरेण अर्द्धेन शिवस्य च अन्येन अर्द्धेनेत्यर्थः, दक्षिण-वामयोः दक्षिणार्द्ध-वामार्द्धयोः, विनिमयात् विपर्य्यासात्, दक्षिणे गौर्या अर्द्धे वामे हरस्यार्द्धमिति भावः, अन्यः अपरः, अर्द्धनारीश्वरः चक्रे कृतः। आर्द्धनारिकौडितं प्रहसनम्॥ ३६॥

सम्भोगेति।—यद्दिव्यमयं यस्येत्यर्थः, यस्य हरस्य, विप्रलम्भः वियोगः, प्रियतमा-प्राप्तावस्थाविशेषरूप इति यावत्, रसः शृङ्गारः, स चतुर्धा; तदुक्तं दर्पणे—"यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ। स च पूर्वराग-मान प्रवास करुणात्मक-श्चतुर्धा स्मात्॥ श्रवणात् दर्शनात् वापि मिथः सङ्घटनात्मयोः। दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते॥ श्रवणन्तु भवेत्तत्र दूत-वन्दि-सखीमुखात्। इन्दुजालेषु चित्रे च साक्षात् स्वप्ने च दर्शनम्॥ अभिलाषश्चिन्ता स्मृति-गुणकथनोद्वेग सम्प्रलापाश्च। उन्मादोऽथ व्याधिर्जडता मृतिरेति दशास्य कामदशाः॥ अभिलाषः स्पृहा चिन्ता प्राप्तुपायादिचिन्तनम्। उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि॥ अलक्ष्यवाक् प्रलापः स्याच्चेतसो भ्रमणात् भ्रमः। व्याधिस्तु दीर्घनिःश्वास-पाण्डुता कृशतादयः॥ जडता दीनचेष्टत्वमकार्य्यानां ननसत्त्वता॥" इत्यादि, विस्तरभयादत्र न लिखितम्। सम्भोगात् "दर्शन-स्पर्शनादीनि निषेवेते विलासिनौ। यत्रानुरक्तावन्योऽन्यं सम्भोगोऽयमुदाहृतः॥" इत्युक्तलक्षणात् उभयोः सम्मेलनरूपादिति यावत्, अनतिरिच्यमानः अनधिक इति यावत्, विभवः सामर्थ्यं यस्य तथाभूतः, सर्वत्रैव सम्भोगापेक्षया विप्रलम्भस्यैवाधिक्यं दृश्यते, इह तु तद्विपरीतमिति भावः, परस्परपरिस्यूतम् अन्योऽन्यमिलितं, तत् प्रसिद्धं,

एकस्याः प्रतिविम्बसम्भृतविपर्य्यासे मुहुर्दर्पणे
सव्याङ्कस्थितिकौतुकं श्रमयति स्वामी स यत्रापरः ॥ ३७ ॥

विभीषणः । देव !—

स्वच्छन्दैकस्तनश्रीरुभयमतमिलन्मौलिचन्द्रः फणीन्द्र-
प्राचीनावीतवाही सुखयतु भगवानर्द्धनारीश्वरो वः ।
यस्यार्द्धे विश्वदाहव्यसनविसृमरं ज्योतिरर्द्धे कृपोद्य-
द्ध्यानं चान्योऽन्यवेगप्रहृतिसिमसिमाकारि चक्षुस्तृतीयम् ॥३८॥

द्विपं देवलोकसम्बन्धि, मिथुनं द्वन्द्वं, स्त्री-पुंसौ इत्यर्थः, "स्त्री-पुंसौ मिथुनं द्वन्द्वम्" इत्यमरः ; नमस्कुर्मः वन्दामहे, यत्र मिथुने, दर्पणे आदर्शे, प्रतिविम्बेन प्रतिच्छायया, सम्भृतः सञ्जातः, विपर्य्यासः वैपरीत्यं, वामं दक्षिणं दक्षिणं वाममित्येवं-रूपमिति भावः यत्र तादृशे सति, मुहुः पुनः पुनः, एकस्याः गौर्य्याः, सव्याङ्के वामाङ्के, स्थितिरवस्थानं, तेन कौतुकं कौतुकं, वैचित्र्यजनकव्यापारमिति यावत्, अपरः दक्षिणाङ्गस्थः, स्वामी ईश्वरः, "स्वामी त्वीश्वरः पतिरोशिता" इत्यमरः ; सः हरः, श्रमयति श्रान्तिं नयति, अहोरस्य वामाङ्गे मा धारयतीति ऋजौभाग्याय गुडाया गौर्य्या दर्पणे वामं दक्षिणं दक्षिणञ्च वामं दृश्यते इत्याशयेन हरेण "पश्य तावत् दक्षिणे किं वामे च किम् ?" इति गौर्य्यै प्रदर्शनात् तत् कौतुकं मुहुरपनीतमिति निष्कर्षः । शार्दूलविक्रीडितं वृत्तम् ॥३७॥

स्वच्छन्देति ।—स्वच्छन्दा स्वतन्त्रा, विभीषणेन अदर्शनेति यावत्, एकस्तनश्रीः वामस्तन इति यावत्, स्तनश्च कुचश्च, श्रीः शोभा यस्य तथोक्तः, उभयमतः उभाभ्यां स्त्रीजनैः, उभयसम्मतश्च इत्यर्थः, मिलन् अन्योऽन्यं सङ्गच्छन्, उभयोरेवार्द्धचन्द्रत्वादिति भावः, मौलिचन्द्रः शेखरेन्दुः यस्य तथाभूतः, फणीन्द्रः भुजङ्गराज एव, प्राचीनावीतं दक्षिणस्कन्धे तिर्य्यग्भावेन परिहितं यज्ञसूत्रमित्यर्थः, वहति धारयतीति तथोक्तः, वामस्कन्धञ्च यावीतदक्षिणाङ्गे विलीनत्वादिति भावः, "उपवीतं यज्ञसूत्रं प्रोक्तं दक्षिणे करे। प्राचीनावीतमन्यस्मिन् निवीतं कण्ठलम्बितम् ॥" इत्यमरः ; भगवान् षड्ऐश्वर्यसम्पन्नः, अर्द्धनारीश्वरः अभिलिताभीरी-शङ्करः, वः युष्मान्, सुखयतु सुखीकरोतु, यस्य अर्द्ध-नारीश्वरस्य, अर्द्धे अर्द्धाङ्गे, दक्षिणखण्डे इति भावः, विश्वेषां जगतां, दाहे भस्मीकरणे, ओंकारस्वरूपे इति यावत्, व्यसनम् आसक्तिः, तेन विसृमरं प्रसरच्छीलं, ज्योतिः तेजोरूपमित्यर्थः, अर्द्धे अन्यस्मिन् अर्द्धाङ्गे, वामखण्डे इति भावः, कृपया करुणया,

अपि च—

स्वेदार्द्रवामकुचमण्डलपत्रभङ्ग-
संशोषिदक्षिणकराङ्गुलिभस्मरेणुः।
स्त्री-पुं-नपुंसकपदव्यतिलङ्घनो वः
शम्भोस्तनुः सुखयतु प्रकृतिश्चतुर्थी ॥ ३९ ॥

(अन्यतश्च दर्शयन्)।—

आधत्ते दनुसूनुसूदनभुजाकेयूरवज्राङ्कुर-
व्यूहोल्लेखपदावलोबलिमयैरङ्गैर्मुदं मन्दरः।

विश्वदाहदर्शनादिति भावः, उद्यत् उद्गच्छत्, बाष्पम् अश्रु यस्मात् तथाभूतश्च, अत एव अन्योऽन्यस्य परस्परश्च, ज्योतिषो बाष्पश्च चेत्यर्थः, वेगप्रहत्या वेगप्रतिघातेन, परस्परं वेगसंशोषव्यापारेण इत्यर्थः, अग्नेर्जलशोषणचेष्टया, जलस्य च अग्निनिर्वापणचेष्टया इति भावः, सिमसिमाकारि सिमसिमाशब्दमनुकृत्य अग्नौ खल्वजलसंयोगे सिमसिमाशब्दः सञ्जायते इति भावः, तृतीये ललाटस्थानीति यावत्, चक्षुः नयनम्, अक्षीति शेषः। सग्धरा वृत्तम् ॥ ३८ ॥

स्वेदार्द्रेति।—स्वेदार्द्रस्य घर्मासक्तस्य, हरस्य शम्भोर्वामेन करालुलिस्पर्शजनित-सत्त्वोद्रेकादिति भावः, वामकुचमण्डलस्य वामस्तनवलयस्य, यः पत्रभङ्गः पत्रावली-रचना, तस्य संशोषी संशोषणशीलः, पत्रभङ्गस्य आर्द्रताऽपहारीत्यर्थः, दक्षिणकरा-ङ्गुलीना दक्षिणहस्ताङ्गुलीना, हरस्येति भावः, भस्मरेणुः विभूतिचूर्णं यस्या तथाभूता, स्त्री-पु-नपुंसकपदव्यतिलङ्घनी स्त्री-पु-नपुंसकाना स्त्रीलिङ्ग-पुंलिङ्ग-क्लीवलिङ्गाना, पदं स्थान लक्ष्म वा, "पद व्यवसिति-त्राण-स्थान लक्ष्माङ्घ्रि वस्तुषु" इत्यमरः, तस्य व्यतिलङ्घनी अतिक्रामणी, स्त्रीलिङ्ग-पुंलिङ्ग क्लीवलिङ्गरवाच्येति भावः, अर्द्धनारीश्वरत्वात् स्त्रीत्वं वक्तुं न शक्यते स्त्रीपुरुषत्वात्, पुंस्त्वं वक्तुं न शक्यते सस्त्रीकत्वात्, क्लीवत्वञ्च वक्तुं न शक्यते स्त्रीत्व-पुंस्त्वयोः सत्त्वादिति भावः, अत एव चतुर्थी प्रकृति-रव्यतिरिक्ता, प्रकृतिः लिङ्ग, "प्रकृतिर्योनिलिङ्गयोः" इति विश्वः; शम्भोः हरस्य, तनुः मूर्त्तिः, अर्द्धनारीश्वरमूर्त्तिरिति यावत्, वः युष्मान्, सुखयतु सुख ददातु। वसन्त-तिलकं वृत्तम् ॥ ३९ ॥

आधत्ते इति।—मन्दरः तदाख्यगिरिविशेषः, दनुसूनूनां दानवानां, सूदनस्य संहारिणः, विष्णोरित्यर्थः, भुजासु बाहुषु, चतुर्ष्विति भावः, ये केयराः अङ्गदाः, भूषण-

आधारीकृतकूर्मपृष्ठकषणप्रक्षीणमूलोऽधुना
जानीमः परतः पयोधिमथनादुच्चैस्तरोऽयं गिरिः॥ ४०॥

रामः। (निर्वर्ण्य सस्मितम्)।—

तत्तादृक्फणिराजरज्जुकषणं संरूढपक्षच्छिदा-
घातारुन्तुदमप्यहो! कथमयं मन्थाचलः सोढवान्?।
एतेनैव दुरात्मना जलनिधेरुत्याप्य पापामिमां
लक्ष्मीमीश्वरदुर्गतव्यवहृतिव्यस्तं जगन्निर्मितम्॥ ४१॥

विशेषा इति यावत्, तेषां तेषु वा ये वज्राङ्कुरव्यूहाः हीरकाङ्कुरनिचयाः, क्षुद्र-क्षुद्र-हीरकसमूहा इत्यर्थः, तैः उल्लेखेन उत्कर्षणेन, या: पदावल्य उच्चश्रेणयः, रेखासमूहाः इत्यर्थः, "पदं व्यवसिति-त्राण-स्थान-लक्ष्माङ्घ्रि-वस्तुषु" इत्यमरः, ता एव वलयः जरानिमित्तरुपचर्मश्रेढिल्यानि, सङ्कुचितचर्मावलय इत्यर्थः, "वलिर्दैर्घ्यप्रभेदे च···जरया म्लथचर्मणि ···गठरावयवेऽपि च" इति मेदिनी, तन्मयैः तद्युक्तैरित्यर्थः, अङ्गैः अवयवैः, मुदम् आनन्दम्, आधत्ते जनयति, दर्शकानामिति भावः, अधुना इदानीम्, अयम् एषः, गिरिः मन्दराचलः, आधारीकृतेन अधिकरणीभूतेन, कूर्मस्य कच्छपस्य, पृथ्वीधरस्य द्वितीयावतारस्येति भावः, पृष्ठेन पृष्ठदेशेन सह, कषणात् घर्षणात्, प्रक्षीणं प्रकर्षेण क्षयं गतं, मूलम् अधोदेश इत्यर्थः, यस्य तथाभूतः अत एव पयोधिमथनात् समुद्रमन्थनात्, परतः पूर्वमिति भावः, उच्चैस्तरः अत्युच्चैः, आसीदिति शेषः, एतत् जानीमः मन्यामहे, यद्वा—पयोधिमथनात् परतः परवर्त्तिकाले, पयोधिमथनानन्तरम् अधुना इत्यर्थः, जानीमः अवगच्छामः, अयं गिरिः उच्चैस्तरः, आसीदिति शेषः। पूर्वं विष्णुना समुद्रमन्थनार्थं मन्दरः बाहुभिरावेष्य कूर्मपृष्ठे स्थापितः, ततश्च तस्य बाहुकेयूरहीरकघर्षणेनास्य मध्यभागेषु वलिरूपा रेखा जाताः, कूर्मपृष्ठघर्षणेन च मूलदेशस्य क्षीणतयेदानीन्तनापेक्षया पूर्वावस्थाया उच्चत्वमिति भावः। मार्दूलविक्रीडितं वृत्तम्॥ ४०॥

तदिति।—अयम् एषः, मन्थाचलः मन्दरपर्वतः, तत् प्रसिद्धं, तादृक् तथाविधं, दृढमिति भावः, फणिराज, वासुकिरेव रज्जु गुणः, तया कषणं घर्षणम्, आघर्षणमिति यावत्, सञ्जाता, या पक्षच्छिदा पक्षयोः छेदः, तस्या घातेन घर्षणेन, यद्वा—संजाता सञ्जातः, या पक्षच्छिदाया पक्षच्छेदनकाले, घातः प्रहारः, तेन हेतुना अरन्तुदमपि सर्वव्यथाजनकमपि, कथं केन प्रकारेण, सोढवान्? सह्य कृतवान्?

सीता । (सोद्वेगम्) । इमिणा ज्जेव्व मत्थुसेसीकिददुद्धसाअरेण (च) चंदमुद्दरिअ पउसिदभत्तुणो इत्थिआजणस्स उवरि चारद्धओ (क) विढत्ता * ।

(सर्वे हसन्ति) ।

विभीषणः । (तदेव रामसूक्तं भावयन् (ज)) । अहह ! !—

प्रचेतुमुदधौ लक्ष्मीं भूयोऽपि वलते मनः ।
किन्तु प्रत्तिष्ठ एवायं पुनरायाति चन्द्रमाः ॥ ४२ ॥

* अनेनैव मस्तुशेषीकृतदुग्धसागरेण चन्द्रमुद्धृत्य प्रोषितभर्तृकस्य स्त्रीजनस्योपरि चारध्वजो विस्तीर्णः ।

चण्डी । आर्यपुत्रम्, एतेनैव अनेनैव, दुरात्मना दुष्टचित्तेन, मन्दराचलेनेति शेषः, जलनिधेः समुद्रात्, इमाम् एतां, कार्यदर्शनेन प्रत्यक्षवत् प्रतीयमानामिति भावः, पापा पापाचारा, चापल्यात् दुर्वृत्तात्मिति यावत्, लक्ष्मीं श्रियम्, उत्थाप्य उद्धृत्य, जगत् भुवनम्, ईश्वरो धनी, दुर्गतः दरिद्रः, इति व्यवहृत्य अयमीश्वरः, अयं दुर्गतः इति व्यवहारेण, व्यस्तं व्याकुलं, दुःस्थमिति यावत्, निर्मितं कृतम् , पूर्वे लक्ष्म्या विरहेण सर्वमेव जगत् तुल्यावस्थम् आसीत्, अतः न कस्यापि केनापि सह विसंवादोऽपि आसीत्, ततश्च लक्ष्मीसद्भावेन परस्परं विसंवादाकुलमभूदिति भावः । आर्दूलविक्रीडितं छन्दः ॥ ४१ ॥

(च) मस्तिति ।—मस्तु दधिमण्डं, दध्नः जलनिधेः, "मण्डं दधिभवं मस्तु" इत्यमरः ; तदेव शेषः अवशेषो यस्य तथाभूतः, कृतः अनुष्ठितः, मस्तुशेषत्वेन परिणत इत्यर्थः, सारभूतसुधासमुद्धरणात् असाराक्षीरेण संस्थापित इति भावः, दुग्धसागरः क्षीरार्णवः येन तादृशेन, दुग्धसागरं विलोडयतेति भावः । अनेनैव मन्दरेणैवेत्यर्थः ।

(छ) चारद्धओ पौरुषमित्यर्थः, देशिकप्रयोगोऽयम् । ननु सीतायाः स्वात्मानमुद्दिश्य अयमुपालम्भो न युज्यते, तस्याः प्रोषितभर्तृकात्वस्याभावादिति चेन्न, मायामृगस्य वधार्थं श्रियन्तं कालमवधिं कृत्वा रामे देशान्तरं गत्वा पुनरदर्शनं गतवति तस्याः प्रोषितभर्तृकात्वस्य सिद्धेः, तदुक्तं—"कृतचित् चारणात् यस्याः पतिर्देशान्तरं गतः । दत्त्वाऽवधिं भयार्त्ता सा भवेत् प्रोषितभर्तृका ॥" इति ।

(ज) रामसूक्तं रामस्य सुवचनम् । भावयन् चिन्तयन् ।

प्रचेतुमिति ।—मनः चित्तं, भूयोऽपि पुनरपि, लक्ष्मीं श्रियम्, उदधौ समुद्रे,

(विलक्ष्य चाकाशे)—

कस्मैचित् कपटाय कैटभरिपुः पीठदोर्घालयां
देवि! त्वामभिवाद्य कुप्यसि न चेत्तत् किञ्चिदाचक्ष्महे।
यत्ते मन्दिरमम्बुजन्म किमिदं विद्याग्रहम्? यच्च ते
नीचान्नीचतरोपसर्पणमपामेतत् किमाचार्य्यकम्? ॥ ४२ ॥

लक्ष्मणः। (सहासम्)। हन्त! सुरासुरमल्लभटीतूर्य्यताल-नर्त्तको सकलराजकुलखलीकारखर्जूला साहसिकजनसहस्र-

---

प्रवेष्टुं निविशते, यतते चेष्टते, इच्छतीत्यर्थः, किन्तु प्रविश्य एव पतित एव, देवनिवन्धेनेति भावः, अयम् एषः, चन्द्रमाः चन्द्रः, पुनः भूयः, आयाति आगच्छति, उत्तिष्ठतीत्यर्थः; तथा चागमः, सूर्याचन्द्रमसौ पश्चिमसमुद्रं प्रविश्य पूर्वसमुद्रेणोत्तिष्ठते इति। लक्ष्मीपरिग्रह एव जगता दुर्व्यवहारस्य बीजमिति धिया विभीषणस्योक्तिः। अनुष्टुप् छन्दः ॥ ४२ ॥

कस्मैचिदिति।—देवि! हे लक्ष्मि! चेत् यदि, न कुप्यसि न क्रोधं करोषि, तत् तदा, कस्मैचित् कपटाय वञ्चकाय, यद्वा—कस्मैचित् अनिर्देश्याय, कपटाय वञ्चनाये, छलनाये इत्यर्थः, छलयाहिणी त्वं किमपि छलमुद्भाव्य आश्रितजनं परित्यजसीति भावः, कैटभरिपोः कैटभाख्यदानवारेः, नारायणस्य इत्यर्थः, उरः वक्षःस्थलमेव, पीठम् आसनं, दीर्घः दीर्घकालीनः, आलयः वासस्थानं यस्याः तथोक्ता, केचित् परप्रतारकाः दुर्जना यथा निजदुष्कार्यं प्रच्छादयितुं निजमानसं भावं गोपायित्वा सद्दाशयमवलम्ब्य वर्त्तन्ते, अवसरे च अन्यान् वञ्चयति, तथा त्वमपि निजच्छलनापरत्वं गोपायितुं सदृशो विष्णोरेव वक्षःस्थलमाश्रित्य वर्त्तसे इति तात्पर्यम्; त्वा भवतीम्, अभिवाद्य नमस्कृत्य, किञ्चित् किमपि, आचक्ष्महे ब्रूमः, अम्बुजन्म पद्मं, यत् ते तव, मन्दिरं गृहम्, इदम् एतत् अम्बुजन्म, किं विद्याग्रहम्? अविद्याग्रहम्? कपटताग्निद्याया: ज्ञानम्? इत्यर्थः, आपाततः दर्शनमात्रेण मनोहरत्वं कण्टकाकीर्णनालत्वं पद्मस्य यथा, तथा तव आपातरमणीयत्वं किन्तु परिणामदारुणमिति भावः, यच्च ते तव, नीचात् पामरात्, असज्जनादित्यर्थः, नीचतरोपसर्पणम् अतिदुर्जनसेवनमित्यर्थः, एतत् किम् अपां जलानाम्, आचार्य्यकम्? आचार्य्यकर्म? उपदेशः? इत्यर्थः, पद्मसङ्गेन जलसम्पर्कात् जलानि यथा नीचात् नीचं गच्छन्ति, तथा त्वया गृहीतमिति भावः। लक्ष्मीरापातरम्या परिणामविरसा नीचगामिनी चेति तात्पर्यार्थः। आर्द्रवृत्तिकीर्तितं छन्दः ॥ ४२ ॥

अस्त्रान्धकारखेलनखद्योती मधुमथनजीमूतविलासविद्युल्लता किमेवमुपालभ्यते ? (झ) इयं हि—

गुणवद्भिः सह सङ्गममुच्चैः पदमाप्तुमुत्सुका लक्ष्मीः।
वीरकरवालवसतिर्ध्रुवमसिधाराव्रतं चरति ॥ ४४ ॥

जोता। (साभ्यसूयमिव)। णिअदेव्वदुव्विलासविआरालसो लोओ लच्छीदेवीए दुज्जसवअणाइं(ञ) गाएदि। (पुरो दर्शयन्ती)।

(झ) सुरासुरेति।—सुरासुरसङ्गानां देवासुरवीराणां, भटौतूर्य्यं रणवाद्यविशेषे, यद्वा—सुरासुरेषु देव दानवेषु, ये सङ्गभव्याः बलवन्तो योद्धारः, प्रधानवीरा इत्यर्थः, "सङ्गः पाशे जपीलेच सत्यभेदे बलीयसि" इति मेदिनी; तेषां तूर्य्यञ्च वाद्यविशेषस्य, तालेन मानविशेषेण, नर्त्तकी नर्त्तनशीला। सकलेति।—सकलानां समस्तानां, राजकुलानां नृपवंशीयानां, खलीकारे वञ्चने, एक नृपं वञ्चयित्वा नृपान्तरप्रयत्नेन, तं वञ्चयित्वा अपरनृपाप्रयत्नेन, एवं सर्वेषां नृपाणां वञ्चनव्यापारे इति भाव., खर्जूला कण्डूतिमती, सततासक्तेति यावत्। साहसिकेति।—साहसिकाः साहसे दुष्करकर्मणि निरताः साहसिकाः, तादृशाः जनाः लोकाः, वीरा इत्यर्थः, तेषां सङ्गस्य अस्त्रान्धकारेषु अस्त्रवर्षजनिततिमिरेषु, जनवरतशरवर्षणेष्वित्यर्थः, समरक्रीडेषु इति भावः, यत् खेलन क्रीडनं, विचरणमित्यर्थः, तस्मिन् खद्योतो ज्योतिरिङ्गणसदृशी। मधुमथनेति।—मधुमथनः मधुसूदनः विष्णुः एव, जीमूतः मेघः, तेन विलासे क्रीडाविशेषे, विद्युल्लता सौदामनी, तत्सदृशीत्यर्थः, किं खलु, एवम् इत्थम्, उपालभ्यते ? अधिक्षिप्यते ? निन्द्यते इत्यर्थः, उपलक्ष्यते इति भावः।

गुणवद्भिरिति।—वीराणां शूराणां, करवाले खड्गे, वसतिः वासो यस्याः तथाभूता, वीरजनसेव्या इति भावः, लक्ष्मीः जनता, गुणवद्भिः सह सङ्गममेव उच्चैः पदम् आप्तुं लब्धुम; यद्वा—उच्चैः उन्नतं, पदं स्थानम, अभ्युदयमित्यर्थः, आप्तुं लब्धुं, गुणवद्भिः सगुणैः, सज्जनैरित्यर्थ, सह साकं, सङ्गमं साहचर्य्यं, कर्तुमिति शेषः, उत्सुका उद्यता सती, आपदान्विता सतीत्यर्थः, असिधाराव्रतम असिधारायां खड्गधारायां, भ्रमणरूपं व्रतं नियमं, चरति अनुतिष्ठति, ध्रुवम् उत्प्रेक्षे। आर्य्या छन्दः ॥ ४४ ॥

(ञ) निलीति।—निलज्ज खल, दैवदुर्विलासस्य भाग्यविपर्य्ययस्य, दुर्दैवस्येति यावत्, विचारे विवेके, अवशः विमुख इत्यर्थः। दुर्यशोवचनानि निन्दावाक्यानि।

को एसो दीसदि दिअसकूडोकिदजोण्हाविच्छड्डपडिरूवो (ट) गिरी ? *

विभीषणः। देवि !—

सोऽयं कैलासशैलः स्फटिकमणिभुवामंशुजालैर्ज्वलद्भि-
श्छाया पीताऽपि यत्र प्रतिकृतिभिरुपस्थाप्यते पादपानाम्।
यत्रोपान्तोपसर्पत्तपनकरधृतस्यापि पद्मस्य मुद्रा-
मुद्दामानो दिशन्ति त्रिपुरहरशिरश्चन्द्रलेखामयूखाः ॥ ४५ ॥

रामः। हन्त !! यतधा दृश्यमानोऽपि न चक्षुरकौतुकं (ठ) करोति—

* निजदेवदुर्विलासविचारासहो लोको लक्ष्मीदेव्या दुर्यशोवचनानि गायति। क एष दृश्यते दिवसकूटीकृतज्योत्स्नाविच्छर्दप्रतिरूपो गिरिः ?

(ट) दिवसेति।—दिवसानां दिनानां, कूटं राशिः दिवसकूटं, बहूनां दिनानामेकत्र सम्मेलनमिति यावत्, अदिवसकूटं दिवसकूटं कृता दिवसकूटीकृता दिवसराशिवदाचरिता इत्यर्थः, या ज्योत्स्ना चन्द्रिका, तस्या विच्छर्दः विस्तारः, तस्य प्रतिरूपः सदृशः, अतिशुभ्र इत्यर्थः।

सोऽयमिति।—सः प्रसिद्धः, अयम् एषः, कैलासशैलः कैलासपर्वतः, दृश्यते इति शेषः, यत्र कैलासशैले, स्फटिकमणिभुवां स्फटिकमणिकासम्भूतानां, पादपानां त्वचश्छिः अंशुजालैः मयूखनिचयैः, पीताऽपि निगौर्याऽपि, छाया ; यद्वा—यत्र कैलासशैले, स्फटिकमणिभुवां स्फटिकाख्यमणिमयखनीनां, ज्वलद्भिः दीप्यमानैः, अंशुजालैः किरणसमूहैः, पीताऽपि यद्यपि, व्याप्तत्वात् बहुशोऽपीति यावत्, पादपानां छायाः, स्वच्छस्फटिकमणौ प्रतिफलितानामिति भावः, छाया प्रतिबिम्ब, प्रतिकृतिभिः प्रतिबिम्बैः, उपस्थाप्यते न्यस्यते, विष्व, यत्र कैलासशैले, उद्दामानः उत्कटाः, विसृमराः इति यावत्, त्रिपुरहरस्य शङ्करस्य, शिरसि मूर्धनि, या चन्द्रलेखा शशिकला, तस्याः मयूखाः किरणाः, उपान्ते प्रान्तदेशे, उपसर्पतः समागच्छतः, सञ्चरतः इत्यर्थः, तपनस्य सूर्यस्य, करैः किरणैः, धृतस्यापि स्पृष्टस्यापि, विलम्बितस्यापीति भावः, पद्मस्य कमलस्य, मुद्रां सङ्कोचं, दिशन्ति कुर्वन्ति। सग्धरा वृत्तम् ॥ ४५ ॥

(ठ) अकौतुकं कौतुकशून्यं, दर्शननिस्पृहमित्यर्थः।

गिरिः कैलासोऽयं दशवदनकेयूरविलस-
न्मणिश्रेणीपत्राङ्कुरमकरमुद्राङ्कितशिलः।
असुष्मिन्नारुह्य स्फटिकमयसर्वाङ्गविमले
निरीक्षन्ते यक्षाः फणिपतिपुरस्यापि चरितम्॥ ४६॥

अपि च—

दशमुखभुजदण्डमण्डलीनां
दृढपरिपीडनपीतमेखलोऽयम्।
जलगृहकवितर्दिकासुखानि
स्फटिकागरिगिरिश्चस्य निर्ममीते॥ ४७॥

विभीषणः। (सीतां प्रति)। देवि! दृश्यतामयो—

गिरिरिति।—अयम् एषः, कैलासः तदाख्यः, गिरिः पर्वतः, दशवदनस्य रावणस्य, केयूरेषु अङ्गदेषु, विलसन्तीनां स्फुरन्तीनां, मणिश्रेणीनां हीरकपङ्क्तीनां, हीरकखण्डैः घटितानामित्यर्थः, पत्राङ्कुराणां तनुपत्रीकृतानाम्, अघनपत्रसदृशानामित्यर्थः, मकराणां मकराकृतीनां, मुद्रया रेखाविशेषैः, अङ्कितः चिह्नितः, शिलाः पाषाणाः यस्य तथाभूतः, पर्वतशोभनसमये पाषाणभागे केयूरसङ्घर्षणादिति भावः, तथा स्फटिकमयैः स्फटिकात्मकैः, सर्वाङ्गैः समस्तावयवैः, विमले विशदे, असुष्मिन् पर्वते, आरुह्य अधिष्ठाय, यक्षाः देवयोनिविशेषाः, फणिपतिपुरस्यापि वासुकिनगरस्यापि, पातालस्यापीत्यर्थः, चरितं व्यवहारं, निरीक्षन्ते पश्यन्ति, गुरुपर्वतभागे तस्य प्रतिबिम्बपतनादिति भावः। शिखरिणी वृत्तम्॥ ४६॥

दशमुखेति।—अयम् एषः, स्फटिकगिरिः स्फटिकमयाचलः, कैलासपर्वत इत्यर्थः, दशमुखस्य रावणस्य, भुजा एव बाहव एव, विशतिसङ्ख्या एवेत्यर्थः, दण्डमण्डल्यः, लगुडसमूहाः, लगुडसदृशदृढकठिनबाहव इत्यर्थः, तेषां दृढपरिपीडनेन निर्भर-निष्पेषणेनेत्यर्थः, पीता निर्लोभूतेति यावत्, मेखला नितम्बः, मध्यभाग इत्यर्थः यस्य तथाभूतः सन्, गिरिश्चस्य शम्भोः, जलगृहमेव जलगृहकं जलयन्त्रगृहं, कविनोक्तविशिष्टगृहमित्यर्थः, निपीडितस्थानात् जलस्रवणेनेति भावः, तस्य वितर्दिका वेदिका, तत्समीपे उपवेशनस्थानमित्यर्थः, "स्यात् वितर्दिस्तु वेदिका" इत्यमरः; तथा सुखानि आनन्दान्, निर्ममीते करोति। पुष्पिताग्रा वृत्तम्॥ ४७॥

कैलासाद्रितटेषु धूर्जटिजटाऽलङ्कारचन्द्राङ्कुर-
ज्योत्स्नाकन्दलिताभिरिन्दुहरितामद्भिर्नदीमातृकाः ।
गौरीहस्तगृहीतहेमकलशप्रस्पर्धिपीनस्तन-
भ्रातृस्नेहसहोढषण्मुखशिशुक्रीडासुखाः शाखिनः ॥४८॥

अपि च, अस्य नित्यमधित्यकावासी परमेश्वरः,—

सङ्कल्पैरङ्गैर्नमसितरि नीलोत्पलमयी-
मिवात्मानं मालामुपनयति पत्यौ मखभुजाम् ।
जिघृक्षौ च क्रीडारभसिनि कुमारे सह गणै-
र्हसन् वो भद्राणि द्रढयतु मृडानीपरिवृढः ॥ ४९ ॥

कैलासेति ।—कैलासाद्रितटेषु कैलासपर्वततटेषु, शाखिनः वृक्षाः, धूर्जटेः शिवस्य, जटानां खण्डेन्दूनाम्, अलङ्कारः भूषणभूतः, यश्चन्द्राङ्कुरः शशिकला, बालचन्द्र इत्यर्थः, तस्य ज्योत्स्नाभिः चन्द्रिकाभिः, कन्दलिताभिः अङ्कुरिताभिः, निसृताभिरिति यावत्, "कन्दल विसृ कपालेऽप्युपरागे नवाङ्कुरे" इति मेदिनी; इन्दुहरिता चन्द्रकान्तशिला-नाम्, अद्भिः जलैः, चन्द्रकान्तमणिनिसृतैरिति भावः, नदी माता येषां तादृशाः नदीमातृकाः नदीजलपोषिताः, नदीजलैरिव पोषिता इत्यर्थः, "देशो नद्यम्बु-वृष्यम्बु सम्पन्नौदिपालितम्" । व्याप्तदीमातृको देवमातृकश्च यथाक्रमम् ॥" इत्यमरः; गौर्याः पार्वत्याः, हस्तगृहीतेन स्वकरलालितेन, प्रहृष्टं प्रकर्षेण हृष्टिं गतं, वपुः शरीरं येषां तथोक्ताः, तथा धात्रेयकः धात्री उपमाता, गौरीति यावत्, पालनकर्त्रीत्वादिति भावः, तस्या अपत्यं पुमान् धात्रेयकः धात्रीपुत्रः, स चासौ भ्राता चेति धात्रेयकभ्राता, स्कन्द इति यावत्, तस्य स्नेहेन वात्सल्येन, सहोढ सहप्राप्तं, सुखमिति यावत्, षण्मुखशिशुना बालकेन कार्त्तिकेयेन, क्रीडासुखं खेलनानन्दः येषां तथाभूताः सन्तः, यद्वा—षण्मुखेन सह या शिशुक्रीडा बाल्यक्रीडा, तया सुखम् आनन्दो येषां तथाभूताः सन्तः, पुष्यन्ति विकसन्ति । शार्दूलविक्रीडितं वृत्तम् ॥ ४८ ॥

सङ्कल्पैरिति ।—मखभुजां देवानां, पत्यौ अधीश्वरे, इन्द्रे इत्यर्थः, सङ्कल्पैः सङ्कल्पनयनयुक्तैः, अङ्गैः कलेवरैः, नमसितरि नतिं कुर्वति सति, अत एव आत्मानं स्वं, नीलोत्पलमयीम् इन्दीवरग्रथितां, मालामिव स्रजमिव, नेतारो नीलोत्पलसङ्कल्पत्वा-दिति भावः, उपनयति प्रापयति, क्रीडारभसिनि क्रीडावेगान्, खेलनाय चञ्चले इत्यर्थः, खेलनासक्ते इति भावः, कुमारे कार्त्तिकेये, जिघृक्षौ च ग्रहीतुमिच्छौ च सति,

किञ्च—

यन्नाभ्यभ्रमिघूर्णमानवसुधाचक्राधिरूढे भृशं
मेरौ पार्श्वनिविष्टवासरनिशाचक्रे परिभ्राम्यति ।
तैजस्यस्तडितो भवन्तु शतशो दृष्टा हि जाताः कथं
तामस्योऽपि स वः पुनातु जगतामन्त्येष्टियज्वा विभुः ॥ ५० ॥

लक्ष्मणः ।—

जयति परिमुषितलक्ष्मा भयादनुपसर्पतेव हरिणेन ।
दृढ केसरिकरजाङ्कुरकुटिला हरमौलिविधुलेखा ॥ ५१ ॥

ब्रां मालाकपालिन्द्रबलीवर्दयष्टिमिति शेषः, चक्षुषाम् उत्पलसाम्यात् मालातेन भ्रान्तिरिति भ्रान्तिमदलङ्कारः ; "साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता" इति दर्पणे ; मथः प्रमथवर्गैः, "मथः प्रमथ-वङ्गयोर्घे चण्डी-सैन्यप्रभेदयोः" इति मेदिनी, सङ्ग साङ्गं, हसन् हास्यं कुर्वन्, सङ्गानीपरिरूढः गौरीप्रभुः, उमाकान्तः इत्यर्थः, "प्रभुः परिवृढोऽधिपः" इत्यमरः ; वः युष्माकं, भद्राणि शुभानि, दृढयतु दृढीकरोतु, विदधातित्यर्थः । शिखरिणी वृत्तम् ॥ ४९ ॥

यन्नाभ्येति ।—यस्य विभोः, नाभ्ये नर्त्तने, या भ्रमिः भ्रमणं, तया घूर्णमानं भ्रमन्तं, यत् वसुधाचक्रं भूमण्डलं, तत्र अधिरूढे अधिष्ठिते, तदुपरिवर्त्तिनीति यावत्, पार्श्वयोः दान-दक्षिणयोः भागयोः, निविष्टम् अवस्थितं, भ्रान्तम् अविरतं परिभ्रमन्तं, चक्रवद्भावर्णमानमित्यर्थः, वासर-निशाचक्रं दिवा-रात्रिरूपं रथाङ्गं, दिवा-रात्रसमूहो वा यस्य तथाभूते, मेरौ सुमेरौ, भ्रमम् भ्रमणं, परिभ्राम्यति सति परिभ्रमति सति, घूर्णमाने सतीत्यर्थः, शतशः बहुश इति यावत्, तैजसः तेजोरूपाः, तामस्योऽपि तमोरूपा अपि, तडितः विद्युतः, कथं जाताः उत्पन्नाः, दृष्टाश्च लक्षिताश्च, भवन्तु ? हि आश्चर्यमेतदिति भावः ; मेरौ भ्रमति तत्पार्श्ववर्त्तिनोर्दिन-रात्र्योरपि भ्रमणेन तथारूपं तेजस्त्वतामस्त्वयोः विद्युतः सञ्चरन्तीति निष्कर्षः, जगतां भुवनानाम्, अन्त्येष्टिः अन्त्ययज्ञः, संहार इति यावत्, तस्मै यज्वा आग्निकः, संहारकर्त्ता इत्यर्थः, स विभुः परमेश्वरः, शिवः, वः युष्मान्, पुनातु पवित्रीकरोतु । सार्दूलविक्रीडितं वृत्तम् ॥ ५० ॥

जयतीति ।—दृढ यस्मिन् केशसटे, केसरिणः सिंहस्य, करजाङ्कुरः नखप्ररोहः, नखाग्रमित्यर्थः, तद्वत् कुटिला वक्रा, अत एव भयात् सिंहनखराघातात् त्राणादित्यर्थः, अनुपसर्पतेव अनागच्छतेव, पलायमानेनेवेति यावत्, हरिणेन मृगेण,

सीता । (सपरिहासम्) । एदस्स दंदसूअ-णरकरोडि-मुंड-मालामंडणस्स मसाणवासिणो (ड) भूषणदा व्भेव रोहिणीवल्लहस्स (ढ) कलंको, किं तवस्सिणा कुरंगएण ? * (ण)

विभीषणः । (निहस्य) । अङ्के, भगवानपि न मृगाङ्कमलङ्कारकामः कलयति (त) । तथा हि—

सहचरपिशाचपरिषत्प्रसत्तये कामचारतो रजनीम् ।
कारयितुमिव कपाली शिरसि निशाकरमयं वहति ॥ ५२ ॥

(सर्वे हसन्ति) ।

---

* एतस्य दन्दशूक-नरकरोटि-मुण्डमालामण्डनस्य श्मशानवासिनो भूषणतैव रोहिणीवल्लभस्य कलङ्कः, किं तपस्विना कुरङ्गकेन ?

ञ्च व्यक्तरहितेति भावः, परिमुषितं परिहृतं, यत्र तथाभूता, निष्कलङ्केति भावः, इरम्मीलविधुलेखः अङ्करशिरश्चन्द्रकला, जयति राजते । आर्या वृत्तम् ॥ ५१ ॥

(ड) दन्दशूकेति । —दन्दशूकः सर्पः, "सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः । दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ॥" इत्यमरः, नरकरोटः ब्रह्मकपालः, मुण्डमालाः नरमुण्डश्रेणयो वा, मण्डनानि भूषणानि यस्य तथाभूतस्य । श्मशानवासिनः श्मशाने एव तिष्ठतः, इरस्येति भावः ।

(ढ) रोहिणीवल्लभस्य चन्द्रस्य । कलङ्कः, दुर्यशः इति यावत् ।

(ण) तपस्विना दीनेन, निर्दोषेण इति यावत् । कुरङ्गकेण क्षुद्रमृगेण अल्पार्थे कन्-प्रत्ययः । सदाचारविहीनस्य इरस्य शिरसि वास एव चन्द्रस्य कलङ्कः, न तु मृगः, अत एव मृगलाञ्छनत्वं चन्द्रस्य न कलङ्कहेतुः, किन्तु अङ्करशिरोभूषणत्वमेव तस्य हेतुरिति भावः ।

(त) अलङ्कारकामः भूषणार्थी । कलयति धारयति ।

सहचरेति । —अयम् एषः, कपाली कपालभृत्, इरः ईश्वरः, सहचराणां सङ्गिनां, पिशाचानां देवयोनिविशेषाणां, परिषदः समूहस्य, प्रसत्तये प्रसादार्थं, सन्तोषार्थमिति यावत्, कामचारतः स्वेच्छातः, रजनीं रात्रिं, कारयितुमिव आयमयितुमिवेत्यर्थः, निशाकरं चन्द्रं, वहति धारयति, पिशाचानां निशाविहारित्वात् तेषां सन्तोषाय अयं निशां कारयितुमिव निशाकरं धारयतीति निष्कर्षः । आर्या वृत्तम् ॥ ५२ ॥

रामः। (सबहुमानम्)।—

श्रीकण्ठस्य कपर्दबन्धनपरिश्रान्तोरगग्रामणी-
सन्दष्टां मुकुटावतंसकलिकां वन्दे कलामैन्दवीम्।
या बिम्बप्रतिपूरणाय परितो निष्पीड्य सन्दंशिका-
यन्त्रेणेव ललाटलोचनशिखिज्वालाभिरावर्त्यते॥ ५३॥

(पुष्पकं प्रति)। विमानराज! मनागुन्नम्यताम्, (य) आलोक-यतु मैथिली सुमेरुशिखराणि।

विभीषणः। (सीतां प्रति)। देवि! पश्य पश्य—

मेरोर्मेदुरयन्ति सम्मदमधःसम्पातिभिर्ज्योतिषा-
माटोपैर्विटपोपरिस्थिततरुच्छायाभृतोऽधित्यकाः।

श्रीकण्ठस्येति।—श्रीकण्ठस्य श्रीः शोभा कण्ठे यस्य तस्य शङ्करस्य, "श्रीकण्ठः कृष्णसारङ्गे। शङ्करे च—" इति हारावली; कपर्दः जटाजूटः, "कपर्दोऽस्त्री जटाजूटः" इत्यमरः; तस्य बन्धनेन संयमनेन, परिश्रान्तः क्लान्तः, यः उरगग्रामणीः भुजगाधिपतिः, सर्पराजः वासुकिरित्यर्थः, "ग्रामणी प्रधानेऽधिपतौ च त्रिषु नापिते पुंसि" इति मेदिनी; तेन सन्दष्टां अवलिप्ता, वेष्टितामिति यावत्, मुकुटस्य किरीटस्य, मुकुटग्रथस्य जटाजूटस्येति भावः, यत्तंसकलिकां अवतंसरत्नकोरकं, कलिकाकारभूषणस्वरूपामित्यर्थः, इन्दोरियम् ऐन्दवीं तां चान्द्रीं, कलां षोडशांशं, कलामात्रं चन्द्रमित्यर्थः, वन्दे प्रणमामि, या कला, बिम्बप्रतिपूरणाय सम्पूर्णं मण्डलं कर्तुमित्यर्थः, "बिम्बोऽस्त्री मण्डलं विधु" इत्यमरः; परितः उभयोः प्रान्तयोः, सन्दंशिका "सँडाशी" इति प्रसिद्धा एव, यन्त्रं मुद्गरादीव धारणोपायविशेषः इति यावत्, सा च वासुकिरेव इति भावः, तेन निष्पीड्य धृत्वा, खमेवेति भावः, ललाटलोचन-शिखिनः भालनेत्राग्नेः, ज्वालाभिः शिखाभिः, आवर्त्यते इव द्रवीक्रियते इव। अत्रापि हिरण्यादिकं तथा पूरणाय सन्दंशिकया धृत्वा अग्निज्वालया आवर्त्यते इति औत्प्रेक्षिकम्। शार्दूलविक्रीडितं छन्दः॥ ५३॥

(य) उन्नम्यताम् उर्ध्वं क्रियतां, ऊर्ध्वमुत्पत्यतामित्यर्थः।

मेरोरिति।—अधःसम्पातिभिः अधःसञ्चारिभिः, ज्योतिषां सूर्यादीनाम्, आटोपैः तेजःसमूहैरित्यर्थः, विटपोपरिस्थिततरुच्छायाः विटपानां खलानां, गुच्छगातीयवृक्षा-णामित्यर्थः, "विटपो न स्त्रियां खल-गुच्छाविस्तारपल्लवे" इति मेदिनी; उपरि

निष्पीतासु च मासि मासि विबुधैरिन्दोः कलासु क्रमा-
दुद्दामप्लवमानलाञ्छनमृगच्छिन्नाग्रदर्भाङ्कुराः ॥ ५४ ॥

लक्ष्मणः । (सीतां प्रति)।—

एतासु पर्वतनितम्बतटीषु पश्य
मध्यन्दिनेऽपि हरिचन्दनवाटिकेयम् ।
पत्रस्थितद्युमणिबिम्बतयाऽतिदीर्घ-
च्छायावितानमधुरा मुदमादधाति ॥ ५५ ॥

अवभागे. स्थिताः पतिता इत्यर्थः, याः तरुच्छायाः सन्नीपस्यहस्तानां छायाः, ताः विभर्तीति तथोक्ताः, तथा मासि मासि प्रतिमासं, क्रमात् किंचित् किंचित् क्षीणेत्यर्थः, विबुधैः देवैः, निष्पीतासु भक्षितासु, इन्दोश्चन्द्रस्य, कलासु षोडशेषु अंशेषु, अमृत-रूपासु इति भावः, "पञ्चांशपीतस्य सुरैर्हिमांशोः कलाशयः श्लाघ्यतरो हि हन्डेः" इति रघुवंशे कालिदासः; उद्दामम् उच्छृङ्खलं यथा तथा, प्लवमानेन रममाणेन, लम्फता इत्यर्थः, चन्द्राङ्के निजलक्ष्मभावेन धारणात् पूर्वं प्लवनराहित्यमासीत्, इदानीं विबुधैस्तस्य भक्षितत्वात् प्लवनप्रत्यूहाभावेनेति भावः, लाञ्छनमृगेण कलङ्करूपिणा हरिणेन, छिन्नं त्रुटितं, भक्षितमित्यर्थः, अग्रं शीर्षदेशः येषां तथाभूताः, दर्भाङ्कुराः कुशप्ररोहा यासु तथाभूताः, अधित्यकाः पर्वतस्य ऊर्ध्वभूमयः, "उपत्यकाऽद्रेरासन्ना भूमिरूर्ध्व-मधित्यका" इत्यमरः; मेरोः सुमेरुगिरेः, सभगं शोभा, मेदुरयन्ति पुष्टां कुर्वन्ति, वर्द्धयन्तीति यावत्। शार्दूलविक्रीडितं वृत्तम् ॥ ५४ ॥

एतासिति।—एतासु पुरो दृश्यमानासु, पर्वतस्य अचलस्य, सुमेरोरित्यर्थः, नितम्ब-तटीषु कटकप्रदेशेषु, मध्यभागेषु इत्यर्थः, इयं परिदृश्यमाना, हरिचन्दनवाटिका दैवतद्रुविशेषनिर्मितवनश्रेणी, "पञ्चैते देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥" इत्यमरः; यद्वा—हरिचन्दनं गोशीर्षाख्यचन्दन-वृक्षविशेषः, तेषां वाटिका वनराजिः, "हरिचन्दनन्तु गोशीर्षं ज्योत्स्ना-कुङ्कुमयोरपि" इति मेदिनी; मध्यन्दिनेऽपि मध्याह्नेऽपि, पक्षे पार्श्वे, "पक्षौ मासार्द्धके पार्श्वे पक्षे स्याद्विरोधयोः" इति मेदिनी; स्थितं वर्त्तमानं, द्युमणेः सूर्यस्य, बिम्बं मण्डलं यत्र तत्तया, अतिदीर्घच्छायावितानेन अतिदीर्घा अत्यायता, बहुदूरव्यापिनीत्यर्थः, या छाया अनातपः, तस्याः वितानेन विकारेण, "वितानो यज्ञ उल्लोचे विस्तारे पु-नपुंसकम्"

अपि च—

भूमेः स्वर्णतया फलोत्तरतरुस्तेरस्य मेरोस्तटी-
सीमन्तोऽयमनूरुसारथिरथप्रस्थानघण्टापथः।
अक्षिभ्रुद्रियते कथञ्चन हयैरुद्दामचण्डातप-
ज्वालाजालविलीनकाञ्चनशिलाजम्बालमग्नः प्रधिः॥ ५६॥

(निरूप्य च सहर्ष-स्मितम्)। कथम्, उपर्य्युपरि पुष्करावर्त्तकानभ्रमुद्वल्लभः!! (ट)। (विमृश्य)।—

अद्यायं विबुधेन्द्रबान्धववधूसम्भुक्तसन्तानक-
स्यन्दाम्भोममरावतीं विहरते निर्वैरमैरावणः।

इति मेदिनी; मधुरा मनोहारिणी सती, मुदम् आनन्दम्, आदधाति जनयति, यस्य अवलोकय। अत्र वाक्यार्थः कर्मतयाऽन्वेति। वसन्ततिलकं वृत्तम्॥ ५५॥

भूमेरिति।—भूमेः स्थानस्य, सुमेरोरुपत्यकाप्रदेशस्य इत्यर्थः, "भूमिः क्षितौ स्थानमात्रे" इति हैमः; स्वर्णतया काञ्चनमयतया, फलोत्तरैः फलप्रधानैः, फलपूर्णैरिति भावः, तरुभिः वृक्षैः मेरोस्य विकसितस्य, अत्युज्ज्वलस्येत्यर्थः, मेरोः सुमेरोः, अयम् एषः, तटीसीमन्तः सीमन्तवत् परिदृश्यमानः प्रदेशः, अनूरुसारथेः सूर्यस्य, रथप्रस्थाने स्यन्दनसञ्चालने, घण्टापथः ससरणं, प्रशस्तराजमार्गविशेषः इत्यर्थः, "घण्टापथः ससरणम्" इत्यमरः, दृश्यते इति शेषः, अक्षिभ्रुत् घण्टापथे, हयैः अश्वैः, सूर्यस्य सप्तभिरश्वैरित्यर्थः, उद्दामचण्डातपानाम् उत्कटसुतीक्ष्णसूर्यकिरणानां, ज्वालाजालेन शिखासमूहेन, यद्वा—चण्डः तीव्रः, आतपः सन्तापो यस्य सः चण्डातपः सूर्यः, उद्दामः प्रखरः, यश्चण्डातपः सूर्यः, तस्य ज्वालाजालेन किरणसमूहेन, विलीना द्रवीभूता, या काञ्चनशिला स्वर्णमयप्रस्तरः, सैव जम्बालः कर्दमः, "निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शाद्-कर्दमौ" इत्यमरः; तत्र मग्नः प्रविष्टः, प्रधिः नेमिः, चक्रप्रान्त इत्यर्थः, "चक्रं रथाङ्गं तत्प्रान्ते नेमिः स्त्री स्यात् प्रधिः पुमान्" इत्यमरः; उह्यते उत्तोल्यते। आर्द्रवृत्तविक्रीडितं वृत्तम्॥ ५६॥

(ट) पुष्करावर्त्तकान् मेघविशेषान्, उपर्य्युपरियोगे द्वितीया। अभ्रमुद्वल्लभः ऐरावतः, "ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुद्वल्लभाः" इत्यमरः।

अद्येति।—अद्य इदानीम्, अयम् एषः, ऐरावणः ऐरावतः, विबुधेन्द्रस्य देवराजस्य

यं दोर्भारपरिच्छदो युधि मुदोत्क्षिप्य प्रतीच्छन् मुहुः
सन्तेने दशभिर्निजैरपि मुखैः सांराविणं रावणः ॥ ५७ ॥

सुगीव०। सत्यमगोचरे गिरां दशकण्ठक्रीडितानि (ध)—

एकैके निवसन्ति ते भुजभृतः कस्मै निगृह्णामहे ?
वीरश्रेत्रमियं पुनर्वसुमती पौलस्त्यमाबिभ्रती।
बाली त्वाह्वयमानमेनमपि यच्चक्रे क्षते चक्षुषी
पश्यामः श्रवसी क्षते च शृणुमस्तद्दुष्कुलस्ये वयम् ॥ ५८ ॥

इन्द्रस्य, बाल्यवा: खण्डना:, देवा: इत्यर्थः, तेषां वधूभि: अङ्गनाभि:, सन्तानकस्रजा देवतरुविशेषस्य पुष्पमालानां, दाम समूह: यस्यां तथाभूताम्, अमरावतीं देवनगरीं निर्वैरं निर्विरोधं यथा तथा, निःशङ्कं यथा तथेत्यर्थः, रावणभयादगमनादिति भावः, विहरते विचरति, दोर्भार बाहुभारं, परिच्छद: उपकरणं, सहाय इति यावत् यस्य तथाभूतः, अन्यादीनां कथा दूरे आस्ता, केवलबाहुबलसहाय इति भाव: रावण: दशानन:, युधि युद्धे, यम् ऐरावणं, मुदा आनन्देन, अक्लेशेनेत्यर्थः, उत्क्षिप्य उद्धृं निक्षिप्य, मुहुः पुनः पुनः, प्रतीच्छन् बाहुभि: गृह्णन्, दशभि: दशसङ्ख्यकै:, निजै: स्वकीयै:, मुखैरपि आननैरपि, सांराविणं सम्यक् शब्दम्, उच्चै: शब्दमित्यर्थः, सिंहनादमिति भावः, सन्तेने वितस्तार, कृतवान् इत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ ५७ ॥

(ध) अगोचरे गिरां गिरां वाचाम्, अगोचरे अविषये। दशेति।—दशकण्ठस्य दशग्रीवस्य रावणस्य, क्रीडितानि चेष्टितानीत्यर्थः, दशकण्ठचरितं वाचामगम्यमिति भावः।

एकैके इति।—ते प्रसिद्धाः, एकैके अनेके इत्यर्थः, भुजभृतः बाहुशालिनः, बाहुवीर्यसम्पन्ना इत्यर्थः, निवसन्ति पृथिव्यां तिष्ठन्ति, कस्मै भुजभृते निगृह्णामहे ? निगृह्णं कुर्मः ? कं भुजभृतं निन्दामः ? इत्यर्थः, न कमपि निन्दा कुर्म इति भावः; कस्मै इति सम्प्रदानविवक्षया कर्मणि चतुर्थी, पुनः किन्तु, पौलस्त्यं रावणम्, आबिभ्रती धारयन्ती, इयम् अत्याक्रमणधिक्षानभूता एषा, वसुमती पृथ्वी, वीरश्रेत्रं शूरभूमिः, वीरपुरुषप्रसविनीत्यर्थः, बाली तु किष्किन्ध्येश्वरः बलिराज पुनः, आह्वयमानं विजयाय स्पर्द्धमानम्, एनं महावीरं रावणमपि, यत् चक्रे कृतवान्, यथा परिभूतवानित्यर्थः, तत् चक्षुषी चक्षुर्द्वयं, क्षते दृष्टे इत्यर्थः इति हेतो, पश्यामः

राम.। (सबहुमानम्)।—

स किं वाच्यो बाली भुजकुलिशमूलेन दशतो
दशग्रीवं यस्य प्रतिजलधि सन्ध्याविधिरभूत्?।
कथं वा निर्वाच्यः स च दशमुखः? यस्य दमने
मनागासीत् बालिव्ययचरितमेवोपकरणम् ॥ ५९ ॥

सीता। (रामं प्रति) अज्जउत्त! किं उण एदं दलिद-कप्पूरसलाआमलक्कगोरअं (न) गअणंगणे दीसइ? *

* आर्यपुत्र। किं पुनरेतत् दलितकर्पूरशलाकाखण्डगौरं गगनाङ्गणे दृश्यते?

अवलोकयामः, अवसौ च कर्णौ च, "कर्ण-शब्दयोः श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः" इत्यमरः; क्रते श्रुते इत्यर्थः, इति हेतोः शृणुमः आकर्णयामः; यद्वा—चक्षुषी क्रते विहिते, निर्मिते इत्यर्थः, इति हेतोः पश्यामः, श्रवसी च कर्णौ च, क्रते विहिते, निर्मिते इत्यर्थः, इति हेतोः शृणुमः, क्रते इत्यस्य विधावेति कर्तृपदमूह्यं, किन्तु वयं तत् रावणं बालिनोर्वीरयोश्चरितमिति भावः, वक्तुं कथयितुम्, अल्पे अचणा इत्यर्थः, अलौकिकपौरुषावेतावितिं भावः। शार्दूलविक्रीडितं वृत्तम् ॥ ५८ ॥

स इति।—स एताहृशः, बाली किष्किन्धेश्वरः, किं कथं, वाच्यः? वक्तुं शक्यः? न कथमपि तस्य चरितं वक्तुं शक्यते अस्माभिरित्यर्थः, भुज एव बाहुरेव, कुलिशं वज्रं, तस्य मूलेन कक्षयेत्यर्थः, दशग्रीवे रावणे, दशतः पीडयतः, यस्य बालिनः, प्रतिजलधि जलधौ जलधौ, पूर्वादि-सागरचतुष्टये इत्यर्थः, सन्ध्याविधिः सन्ध्यावन्दनम्, अभूत् सम्पन्नोऽभवत् स च महाबीरत्वेन प्रसिद्ध इत्यर्थः, दशमुखः रावणः, कथं वा केन प्रकारेण वा, निर्वाच्यः? निःशेषं वक्तुं शक्यः? न कथमपीत्यर्थः, यस्य दशमुखस्य, दमने विनाशने, मनाक् एकदशतः, बालिनः व्ययः विनाशनमेव, चरितम् आचरणं, कार्यमिति यावत्, तदेव उपकरणं साधनं, कार्यनाशनहेतुभूतमिति यावत्, आसीत् अभवत्, रावणवधार्थमेव बालिवधः कृतः, अन्यथा बालिसदृशस्य तस्य अशक्यविनाशत्वमिति भावः। शिखरिणी वृत्तम् ॥ ५९ ॥

(स) दलितेति।—दलितं पिष्टं, यत् कर्पूरशलाकाखण्डं कर्पूरविरचित-शलाकाभं, तद्वत् गौरं शुभ्रं, "शुक्ल-शुभ्र-शुचि-श्वेत-विशद-श्वेत-वाण्डुराः। अवदातः सितो गौरः," इत्यमरः।

विभोषणः। (सीतां प्रति)। देवि! चन्द्रलोकोपकण्ठमधिरूढो विमानराजः। (प) दृश्यतां च भगवानयम्—

यं प्राक्प्रत्यगवागुदक्षु ककुभां नामानि सम्बिभ्रतं
ज्योत्स्नाजालभृतज्वलज्ज्वलाभिरभितो लुम्पन्तमम्बं तमः।
प्राचीनाचलादितस्त्रिजगतामालोकबीजाद्दृढं-
निर्यान्तं हरिणाङ्कमङ्कुरमिव द्रष्टुं जनो जीवति॥ ६०॥

(प) चन्द्रलोकेति।—चन्द्रलोकश्च चन्द्रमण्डलञ्च, उपकण्ठः समीपम्। अधिरूढः आरूढः, समागत इति यावत्।

यमिति।—यत्र प्रथमम् अञ्चति गच्छति, उदेतीत्यर्थः, सूर्य इति शेषः, यद्वा—या प्रथमम् अञ्चति पूजयति, सूर्यमिति शेषः, प्राञ्चति प्राप्नोति, सूर्यमिति शेषः इति वा इति निरुक्त्या प्राक् प्राची, पूर्वा दिगित्यर्थः, यत्र प्रति प्रतीपं, पश्चादित्यर्थः, दिनान्ते इति यावत्, अञ्चति गच्छति, सूर्य इति शेषः, पूजयति सूर्यमिति वा व्युत्पत्त्या प्रत्यक् प्रतीची, पश्चिमा दिगित्यर्थः, यत्र अव तिर्यक्, अञ्चति गच्छति, यद्वा—अव अक्षी मध्ये, अञ्चति गच्छतीति निरुक्त्या अवाक् अवाची, दक्षिणा दिगित्यर्थः, यत्र उत् उत्तरम्, ऊर्ध्वं वा, अञ्चति गच्छतीति निरुक्त्या उदक् उदीची, उत्तरा दिगित्यर्थः, एवंरूपाणि, ककुभां दिशां, नामानि अभिधानानि, सम्बिभ्रतं धारयन्तं, उदयनमिति भावः, सूर्यांचन्द्रमसोर्गतिवशेनैव प्राच्यादिदिग्व्यवहारादिति भावः, अभितः सकलात्, ज्योत्स्नाजालञ्च कौमुदीपटलञ्च, भासलभासलाभिः भास्वरैः, आविर्भावैरिति यावत्, "आदारक्षालि भासलभासला" इति डारावली; अम्ब तमः गाढान्धकारं, लुम्पन्तं हरन्तम्, इतः अस्मात्, जगतां भुवनानाम्, आलोकस्य द्योतस्य, प्रकाशयितुरित्यर्थः, यद्वा—आलोकस्य दर्शनस्य, दर्शनसाधनस्येत्यर्थः, "आलोकस्तु पुमान् द्योते दर्शने वन्दिमागधे" इति मेदिनी; बीजात् हेतुभूतात्, प्राचीनात् पूर्वदिग्भवात्, अचलात् पर्वतात्, उदयाचलादित्यर्थः, दृढं निर्यान्तं निर्गच्छन्तम्, अङ्कुरमिव प्ररोहमिव, अम्बोऽम्बङ्कुरो बीजात् बहिर्निर्गच्छतीति हलायुधः, यं हरिणाङ्कं चन्द्रं, द्रष्टुम् अवलोकयितुं, जनः लोकः, जीवति प्राणिति, यस्य दर्शनं जनस्य जीवनकारणमिति, दृष्टिविघातके निखिलविश्वावरणकारिणि गाढान्धकारे लोका, मृतवत् निश्चेष्टाय प्राणिनः यदा चन्द्र उदेष्यति, तदा जीवलोक एवास्मान् जीवान् इत्याशया अवधित् अविष्यतीति वा भावः। आर्द्रभविष्यदीक्षितं प्रयुक्तम्॥ ६०॥

अपि च—

स श्रीकण्ठकिरीटकुट्टिमपरिष्कारप्रदीपाङ्कुरो
दैवः कैरवबन्धुरन्धतमसप्राग्भारकुक्षिम्भरिः।
संस्कर्त्ता निजकान्तिमौक्तिकमणिश्रेणीभिरेणीदृशां
गौर्वाणाधिपतेः सुधारसवतीपौरोगवः प्रोदगात् ॥ ६१ ॥

अपि च—

प्राणायामोपदेष्टा सरसिजवने यौवनोन्मादलीला-
गोष्ठीनां पीठमर्दस्त्रिभुवनवनितानेत्रयोः प्रातराग्रः।

स इति।—श्रीकण्ठस्य इरस्य, किरीटं मुकुटमेव, कुट्टिमः निबद्धभूमिः, पाषाणादिनिबद्धाभ्यन्तरभूमिरङ्गइविशेषः इति भावः, "कुट्टिमोऽस्त्री निबद्धा भूः" इति हारावली; तस्य परिष्कारे अलङ्करणे, श्रीनाकण्ठादने इत्यर्थः, प्रकाशकरणे इति यावत्, प्रदीपाङ्कुरः दीपदीपकल्प इत्यर्थः, अञ्जतमसानां गाढान्धकाराणां, प्राग्भारेण उत्कर्षेण, प्रगाढान्धकारसमूहेनेत्यर्थः, कुक्षिम् उदरं, बिभर्त्ति परिपूरयतीति तथोक्तः, प्रबलान्धकारपाशी, गाढान्धकारध्वंसीत्यर्थः, निजकान्तयः स्वकीयद्युतयः एव, मौक्तिकमणयः मुक्तारत्नानि, तेषां श्रेणीभिः अतिशयेरित्यर्थः, एणीदृशां मृगनयनानां स्त्रीणां, संस्कर्त्ता अलङ्कारकः, आह्लादजनक इति यावत्, गौर्वाणानां देवानाम्, अधिपतेः प्रभोः इन्द्रस्य, सुधायाः अमृतस्य, या रसवती पाकशालां, "रसवत्यान्तु पाकशाला-महानसे" इत्यमरः; तस्याः पौरोगवः अध्यक्षः, "पौरोगवस्तदध्यक्षः" इत्यमरः, कैरवाणां कुमुदानां, बन्धुः सखा, स प्रसिद्धः, दैवः चन्द्रः, प्रोदगात् प्रकर्षेण उदियाय। शार्दूलविक्रीडितं वृत्तम् ॥ ६१ ॥

प्राणायामेति।—सरसिजवनानां पद्मानां, वने जालके, प्राणायामस्य प्राणवायु-निरोधविशेषस्य, उपदेष्टा आचार्यः, पद्मविलोडनकर इति भावः, यौवनेन तारुण्येन, य उन्मादः मत्तता, चित्तचापल्यमिति यावत्, तस्य लीलागोष्ठीनां विलासातिशयानामित्यर्थः, पीठमर्दः अनुनायकभेदः, नायकस्य शृङ्गारचेष्टाविशेष इत्यर्थः, उक्तञ्च भरतेन—"पीठमर्दो विटश्चैव विदूषक इति त्रयः। शृङ्गारे नर्मसचिवा नायकस्यानुनायकाः॥" इति, त्रिभुवनवनितानां त्रिलोकीललितानां, नेत्रयोः लोचनयोः, लोचा बहुत्वेऽपि नेत्रयोरिति द्विवचनं लाक्षणिकमिति बोध्यम्; प्रातराग्रः प्रातर्भोजनं, प्राणिनः त्रिलोक्यां

कामायुष्टोमयज्वा शमितकुमुदिनीमौनमुद्राऽनुरागः
शृङ्गारादैतवादी विभवति भगवानेष पीयूषभानुः ॥ ६२ ॥

अन्वयः । (विलोक्य सकौतुकम्)।—

कर्णोत्तंसमयवाङ्कुरं करतले कृत्वा हसित्वा मिथः
संहृतः पुरुहूतपौरयुवतीवर्गेण कौतूहलात् ।
ग्रामार्त्तिक्षुभितोऽयमङ्कहरिणः कुर्वीत किं किं कला-
कन्यामिन्दुमयीमजस्रघटनोद्घाटस्रथावस्थिताम् ॥ ६३ ॥

भुक्त्वा यथा रतेषु प्रवर्त्तन्ते, तथा कामिन्यश्च प्रथमं चन्द्रं दृष्ट्वा सम्भातसम्भवेगाः कामिषु प्रवर्त्तन्ते इति भावः; यद्वा—बुभुक्षवो यथा प्रातर्भोजनेन तृप्तिं लभन्ते, तथा सकौपपत्त्यभर्तृकाः कामिन्यः चन्द्रदर्शनेन प्रीतिं लभन्ते इति भावः, "प्रातराशः कल्यवर्त्तः प्रातर्भोजनमित्यपि" इति हारावली; कामस्य मदनस्य, आयुष्टोमे आयुर्वृद्धिकरयागे, कामस्य उज्जीवनार्थे क्रियाविशेषे इत्यर्थः, यज्वा याज्ञिकः, द्वीत्यर्थः, कामी द्वीपश्च इति भावः, शमितः शान्तिं नीतः, कुमुदिन्याः कैरविण्याः, मौनं तूष्णीम्भावः, मुद्रा निमीलनञ्च, तयोः अनुरागः येन तथोक्तः, कुमुदिनीविकासश्च इति भावः, यद्वा—शमितः कुमुदिन्याः कैरविण्याः, मौनमुद्रायाः निमीलनरूपतूष्णीम्भावे इत्यर्थः, अनुरागः आसक्तिः येन तादृशः, कुमुदिनीमुद्राभञ्जन इति भावः, शृङ्गारः उज्ज्वलाख्यरसविशेषः, तस्य अद्वैतं द्वितयराहित्यं, वदतीति तथोक्तः, शृङ्गार एव एकमात्ररसोऽस्ति नान्य इतिवादीत्यर्थः, भगवान् महनीयः, एषः अयं, पीयूषभानुः अमृतरश्मिः, चन्द्र इत्यर्थः, विभवति विशेषेण भवति, उदेतीत्यर्थः । स्रग्धरा वृत्तम् ॥ ६२ ॥

कर्णोत्तंसेति ।—पुरुहूतस्य इन्द्रस्य, "इन्द्रो मरुत्वान् मघवा···पुरुहूतः पुरन्दरः" इत्यमरः, पौरयुवतीवर्गेण पुरन्ध्रीजनागनेत्यर्थः, कौतूहलात् कौतुकात्, कर्णोत्तंसः कर्णभूषणं, यो यवाङ्कुरः यवप्ररोहः तं, करतले पाणौ, कृत्वा गृहीत्वेत्यर्थः, मिथः परस्परं, हसित्वा हास्यं कृत्वा, संहृतः आकारितः, बहुभिराहूत इत्यर्थः, "हूतिराकारणाऽऽह्वानं संहूतिर्बहुभिः कृता" इत्यमरः; अत एव ग्रामस्य जनस्य, भोजनस्य इत्यर्थः, आर्त्त्या पीडया, भक्ष्याभावजनितक्लेशेनेत्यर्थः, बुभुक्षयेति यावत्, क्षुभितः व्याकुलः, क्षुब्धीभूत इति यावत्, अयम् एषः, अङ्कहरिणः चन्द्रस्य क्रोडवर्त्ती मृगः, अजस्रम् अविरतं, घटनायाः योजनायाः, चन्द्रेण सह संयोगकारणीभूतायाः बन्धनरज्ज्वा इति भावः, उद्घाटेन उद्घाटनेन, बन्धनमोचनार्थं छेदनेन इति यावत्, स्रथं शिथिलं यथा तथा,

सुधीवः।—

रोमन्यप्रचलोष्ठसम्पुटसुखासीनशिरं कौतुकात्
दृष्ट्वा सिद्धवधूभिरङ्कहरिणस्तालैरथोल्लासितः।
मा भाङ्क्षीदनुमासनव्यघटनानिःसन्धिबन्धं वपुः
श्रोतांशोः क्षुभितस्तु शल्यवदयं दुःखाय वर्त्तिष्यते ॥ ६४ ॥

अवस्थितां विद्यमानाम्, इन्दुमयीं चान्द्रीमित्यर्थः, कलाकन्या कलारूपा कन्या अंशरूपवतीं मिति, घटनाऽऽधारभूतामिति यावत्, "कन्या सन्ध्याभिधौ स्यात् तथा प्रावरणान्तरे" इति मेदिनी; किं किं कुत्सिता, भिथिलत्वात् विकृतामित्यर्थः, "किं कुत्साया विकल्पे च निषेध-प्रश्नयोरपि" इति मेदिनी, कुर्यात् ? विदधीत ? अपि तु यदाऽतुरमत्तचक्षुर्भावात् निरन्तर विपर्य्यस्ता कुर्यादित्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ ६३ ॥

रोमन्येति।—चिर दीर्घकालं, रोमन्थेन उद्गीर्य चर्वणेन, प्रचलं चञ्चलं, यत् ओष्ठसम्पुटं पुटाकारौष्ठद्वयं, तेन तद्वयथा तथा इति वा, सुखासीन, रोमन्थावस्थायां निर्व्यापृतनेत्रं निश्चलमवस्थित इत्यर्थः, अथानन्तरं, सिद्धवधूभि सिद्धानां देवयोनिविशेषाणां, वधूभि, अङ्कनाभिः, दृष्ट्वा आलोक्य, तादृश सुखावस्थितमिति शेषः, कौतुकात् हर्षतः, परिहासेच्छया इत्यर्थः, "कौतुकं त्वभिलाषे स्यादुत्सवे हर्ष-हर्षयोः" इति मेदिनी, तालैः करतलशब्दावर्शैः, उल्लासितः भीषितः, अयम एषः, अङ्कहरिणः अङ्कवर्त्ती मृगः, अनुमासं प्रतिमासं, नव्यघटनया नूतनभावेन योजनया, प्रतिमासं नूतनः सन्, ततश्च नूतना ह्यडिरिति नवीननिर्माणेन इत्यर्थ, निःसन्धिः सन्धिशून्यः, नीरन्ध्र इत्यर्थ, बन्धः स्थितिः यस्य तथोक्तं, यद्वा—नव्यघटनायाः नूतनयोजनायाः, चन्द्रस्य प्रतिमासं क्षय-ह्रडिभावात् संयोगकारणीभूतायाः बन्धनरज्ज्वा, नूतनत्वात् इति भावः, निःसन्धिः बन्धशून्य, सुदृढ इति यावत्, बन्धः बन्धनं यत्र तादृशं, श्रोतांशोः चन्द्रस्य, वपुः शरीरं, मा भाङ्क्षीत् भग्नं न करोतु, बन्धनच्छेदनेन अङ्गस्य विकृतिं कर्तुं न शक्नुयादित्यर्थः, तु किन्तु, क्षुभितः व्याकुलः सन्, बन्धनच्छेदनायम् आवरतच्छेदया चञ्चलीभूतः सन् इत्यर्थः, शल्यवत् हृदयावद्धशल्यात्मानम्, दुःखाय क्लेशाय, वर्त्तिष्यते भविष्यति। वर्त्तिष्यते इति वर्त्तमाने भविष्यदुपचारः। शार्दूलविक्रीडितं वृत्तम् ॥ ६४ ॥

अपि च—

एतस्य कक्षामेकामसृतमयूखस्य पार्वतीरमणः ।
वर्णावलिमिव वहति प्रतिमासं घट्यमानस्य ॥ ६५ ॥

रामः । (सादरं प्रणम्य) ।—

त्वं गीर्वाणगणाय नित्यमसृतस्राविं भवद्दीधिति-
र्धात्रीकर्म च वीरुधां विदधती धत्ते जगज्जीवितम् ।
सोम ! त्वामनिधाय मूर्धनि भवेत् कः कालकूटं गिलन्
कण्ठे तच्छलकालपाशवलयालीढोऽपि मृत्युञ्जयः ? ॥ ६६ ॥

(सीतां प्रति)—

नेत्राणां मधुपर्कसत्रमुदधेः सर्वाङ्गमेदस्करः
शृङ्गारस्य रसायनं मखभुजां पीयूषगञ्जापतिः ।

एतस्येति ।—पार्वतीरमणः शम्भुः, प्रतिमासं मासि मासि, घट्यमानस्य क्षयनीयमानस्येत्यर्थः, एतस्य उपरि वर्त्तमानस्य, अमृतमयूखस्य सुधाकरस्य, चन्द्रस्य इत्यर्थः, एका कला षोडशभागेकभागं, वर्णावलीमिव यावती वारान् घटितोऽयं तावदक्षरपङ्क्तिमित्यर्थः, वहति धारयति । आर्या छन्दः ॥ ६५ ॥

त्वमिति ।—सोम हे चन्द्र ! त्वं गीर्वाणगणाय देवगणाय, देवजन्यदनुग्रहेणेति भावः, नित्यं सततम्, अमृतस्राविम् अमृतरूपं स्रवादिकं द्रव्यमित्यर्थः, भवतीति शेषः, भवतः तव, दीधितिः मयूखः, वीरुधां लतानां, वल्ली—विटपानां, द्रुमाणामित्यर्थः, "वीरुध् लता-विटपयोः स्त्रियाम्" इति मेदिनी ; धात्री उपमाता, तस्याः धर्म पोषणरूपं, विदधती कुर्वाणा सती, जगतां लक्ष्यमाणां, जीवातामित्यर्थः, "जगत् स्यात् विष्टपे क्लीबं प्राणी ना जङ्गमे त्रिषु" इति मेदिनी ; जीवितं प्राणान्, धत्ते परिवाजयति, रक्षतीत्यर्थः, चन्द्रमण्डलनिसृतामृतेन इत्थ-गुणादयः पुष्टिं जगतां यथेष्टं सदा प्रसूयते, तच्छलमात्रेण प्राणिनो जीवन्तीति चन्द्रदीधितेः जगज्जीवनधारकत्वं बोद्धव्यं, त्वां मूर्धनि शिरसि, अनिधाय निक्षिप्तमकृत्वा, न संख्यायेत्यर्थः, कालकूटं हलाहलं, गिलन् भक्षयन्, कण्ठे गलदेशे, तच्छलेन कालकूटव्याजेन, कालपाशवलयालीढः यमस्य बन्धनरज्जुवेष्टनेन व्याप्तः अपि, कः को जनः, मृत्युञ्जयः मृत्युविजयी, भवेत् ? न कोऽपीत्यर्थः, यस्मात् भवरत्नां मूर्ध्नि धृतवान्, अत एव स कालकूटभक्षणेनापि न मृत इति तात्पर्यम् । आर्द्रवृत्तिरीक्षितं छन्दः ॥ ६६ ॥

नेत्राणामिति ।—नेत्राणां नयनानां, मधुपर्कः; दधि-घृत-मधु-सर्करोदकमयद्रव्यं द्वन्द्वं,

देवः किं सुमहे महेश्वरशिरोनेपथ्यरत्नाङ्कुरः
क्षीरोदार्णवशुक्तिमौक्तिकमयं दाक्षायणीनायकः ? ॥ ६७ ॥

सीता। (इवलो)। अज्जउत्त! समाणकुल-सील-रूव-जोव्वणाणं वि सवत्तीणं सीसे (फ) दिण्णो धम्माए दक्खणोत्त-धवलाए रोहिणीए (ब) चलणो, जेण रोहिणीरमणो ज्जेव्व भअवं चंदो सुणीअदि। *

* आर्यपुत्र! समानकुल-शील-रूप-यौवनानामपि सपत्नीनां शीर्षे दत्तो धर्मया दक्षिणोत्तमधवलया रोहिण्या चरणः, येन रोहिणीरमण एव भगवांश्चन्द्रः श्रूयते।

तच्च सवं यज्ञः, "सवम्" इति प्रसिद्धं भोजनप्राशीति भावः, यद्वा—सवं सदादानं, "सदाव्रत" इति "दानसव" इति वा भाषया प्रसिद्धमित्यर्थः, अतीवानन्ददायकत्वादिति भावः, "सवमाच्छादने यज्ञे सदादाने वनेऽपि च" इत्यमरः; सदधेः समुद्रस्य, सर्वाङ्गेषु सर्वावयवेषु, मेदस्करः मेदोविकारः, स्फीतिजनक इत्यर्थः, चन्द्रोदयेनाम्ल वर्द्धनादिति भावः, अङ्गारश्च तदाख्यरसविशेषश्च, रसायनं पुष्टिकर औषधविशेषः, क्षारोष्णोपकत्वादिति भावः, मखभुजां देवानां, पीयूषश्च अमृतस्य, गङ्गापतिः ग्रहाध्यक्षः, यद्यपि "गङ्गा स्यान्मदिराग्रहम्" इत्यमरोक्तेः गङ्गा-शब्दस्य मदिराग्रहे एव मुख्यत्वं, तथाऽपि लक्षणयाऽत्र ग्रहमात्रे प्रयोगः; अथवा—गङ्गा खनिः, तस्याः पतिः प्रभुः, "गङ्गा खनौ सुरागेहे" इति मेदिनी; महेश्वरस्य हरस्य, शिरोनेपथ्यं शिरोभूषणं तस्य, यद्वा—शिरोनेपथ्ये मस्तकप्रसाधने, अलङ्काररचनादिना मस्तकस्य शोभासम्पादने इत्यर्थः, "आकल्प-वेशौ नेपथ्यं प्रतिकर्म प्रसाधनम्" इत्यमरः, यद्वा—शिरोनेपथ्यं मस्तकालङ्कारः, "नेपथ्य स्यादलङ्कारे रङ्गस्थायां नपुंसकम्" इति मेदिनी; तस्य रत्नाङ्कुरः मणिप्ररोहः, समुज्ज्वलक्षीरवारिधिरित्यर्थः, क्षीरोदार्णवः क्षीरसागरः एव, शुक्तिः मुक्ताक्षोटः, मुक्तोत्पत्तिस्थानमित्यर्थः, तस्याः मौक्तिकं मुक्ताफलं, दाक्षायणीनां दक्षकन्यानां अश्विनीप्रभृतीनां सप्तविंशतितारकाणां, "दाक्षायण्योऽश्विनीत्यादितारा:" इत्यमरः; नायकः पतिः, अयं देवचन्द्रः, दृश्यते इति शेषः, किं सुमहे? अहमेनं स्तोतुं शक्नुमः? न कथमपीत्यर्थः, अपरिमितगुणत्वात् स्तोतुमशक्य इति भावः। आर्द्रलक्षणोक्तिरियम् ॥ ६७ ॥

(फ) सपत्नीनाम् एकपतिकानाम् अश्विनीप्रभृतीनाम्। शीर्षे शिरसि।

(ब) धन्यया श्लाघ्यया, सुभगया इति यावत्। दक्षिणोत्तमधवलया दक्षस्य

रामः। (विहस्य)। आं जानकि!—

प्रियोपभोगतुल्येऽपि तारणां सप्तविंशतेः।
धत्ते किमपि सौभाग्यमञ्जरीमिह रोहिणी ॥ ६८ ॥

(अर्धं रूपयन्)।—

दलितकुमुदकोषोदश्वदूष्मोपचार-
क्षणश्रमितचकोरीचन्द्रिकापानजाड्याः।
अभिसमरमृगाक्षीमूकदूत्यः खदन्ते
शशिमणिमकरन्दोल्कन्दलाचन्द्रभासः ॥ ६९ ॥

रुक्मामप्रजापतेः, गोत्रं कुलं, तस्य भवता सुन्दरी तया, "भवतः सुन्दरेऽनयी" इति विश्वः। रोहिण्या अश्विन्यादिसप्तविंशतितारासु चतुर्थ्या तारया।

प्रियेति।—इह जगति, रोहिणी तन्नाम्नी चन्द्रकान्ता, सप्तविंशतेः सप्तविंशति-सङ्ख्याकानां, "विंशत्याद्याः सदेकत्वे सर्वाः सङ्ख्येय-सङ्ख्यया" इत्यमरादेकत्वम्; तारायाः नक्षत्रायाः, चन्द्रभार्यायामिति यावत्, प्रियेण भर्त्रा, उपभोगः सम्भोगः, तस्य तुल्येऽपि साम्येऽपीत्यर्थः, सर्वासु समभावेन सम्भोगेऽपीति भावः, किमपि अनिर्वचनीय-हेतुकमिति यावत्, सौभाग्यं प्रियवाल्लभ्यं, तस्य मञ्जरीं ख्यातिमिति भावः, यद्वा—मञ्जरीं तिलकविशेषं, सौभाग्यमेव मञ्जरीं लौकिकमिति वा, सौभाग्यरूपवदुत्कृष्ट-रत्नमित्यर्थः, "मञ्जरी तिलकदुकूलमौलीवंशमञ्जरी द्वयोः" इति मेदिनी; धत्ते धारयति। वसन्ततिलकं वृत्तम् ॥ ६८ ॥

दलितेति।—दलितात् विकसितात्, कुमुदकोषात् कैरवमध्यात्, उदश्वतां उद्भवतां ऊष्मणा उत्तापानां, दिवाभागे उत्पन्नानां सूर्यातपजानामित्यर्थः, उपचारेण व्यवहारेण, प्रयोगेणेत्यर्थः, उत्तापविनयनेनेति यावत्, क्षणात् अल्पेनैव कालेन, श्रमितं श्रान्तिं नीतं, चकोरीणां पक्षिणीविशेषाणां, चन्द्रिकापानेन कौमुदीपानेन, जाड्यं जडता, प्रैत्यलित्यर्थः याभिः तादृश्यः, अभिसमराणां अभिसारिणीनां, मृगाक्षीणां हरिणनयनानां कामिनीनां, मूकाः वाक्यरहिताः, दूत्यः नायक-नायिकयोः सम्भोगकारित्वेन दूतीनां वाङ्मात्रार्थस्यैव तत्रयोः नायक-नायिकयोः सम्भोगकारित्वम्, आत्मानं विना वाक्यं सम्भोगकारित्वमिति दूतीव्यपदेशः, शशिमणीनां चन्द्र-कान्तोपलानां, मकरन्देन अमृतसारेण, चन्द्रकान्तमणिनिःसृतजलेन इत्यर्थः,

अपि च—

तैः सर्वंसहीभवदभिसृतानेत्रसिद्धाञ्जनैर्वा
नीरन्ध्रैर्वा त्रिभुवनहृद्यामन्धपट्टैस्तमोभिः ।
व्याप्तं पृथ्वीवलयमखिलं व्यालयन्नुच्छलद्भि-
र्ज्योत्स्नाजालैरयमुदयते शर्वरीसार्वभौमः ॥ ७० ॥

अपि च, जगतामनुग्रहाय—

उदयति कलमन्द्रैः कण्ठतालैरलीनां
कुमुदमुकुलकेषु व्यञ्जयन्नङ्गहारान् ।
मदमुखरचकोरीतोषकर्मान्तिकोऽयं
तुहिनरुचिरधामा(ऽ)दक्षिणं लोकचक्षुः ॥ ७१ ॥

इक्षुपरागैः नवाङ्कुरैः इति मेदिनी ; चन्द्रभासः इन्दुकिरणाः, स्खदन्ते रोचन्ते, प्रीतिं जनयन्तीति यावत् । मालिनी छन्दः ॥ ६९ ॥

तैरिति ।—अयम एषः, शर्वरीसार्वभौमः रजनीचक्रवर्त्ती, निशानाथः इति यावत्, सर्वंसहीभवन्तीं निखिलजगद्व्यापारवेदीयाम्, अखिलकामकलाऽभिज्ञानेन चतुरायामिति भावः, अभिसृतानाम् अभिसारिणीनां, "कालार्थिनी तु या याति सङ्केतं साऽभिसारिका" इति लक्षणीलानामित्यर्थः, नेत्रसिद्धाञ्जनैर्वा नयनयोः सिद्धाञ्जनाख्याञ्जनस्वरूपैर्वा, सिद्धाञ्जन नाम नेत्रौषधविशेषः, तदञ्जनेनेवायम् अन्धकारोऽपि दृष्टिर्दुर्बलतीति प्रसिद्धम् ; नीरन्ध्रैर्वा सान्द्रैर्वा, प्रगाढैर्वा इत्यर्थः, वा-शब्दयुग्मेनेवायम्, त्रिभुवनस्य त्रिलोक्याः, लोकत्रयवासिनामित्यर्थः, हृद्या नेत्राणाम्, अन्धपट्टैः अन्धीकरणच्छादनैरित्यर्थः, तैः प्रसिद्धैः, तमोभिः तिमिरैः, व्याप्तं पूर्णम्, अखिलं सकलं, पृथ्वीवलयं भूमण्डलम्, उच्छलद्भिः विकासं गच्छद्भिः ज्योत्स्नाजालैः कुमुदोद्गारैः, व्यालयन् अभिषिञ्चन्, विप्रीणयन् इत्यर्थः, प्रकाशयन् इति यावत्, उदयते उद्गच्छति । मन्दाक्रान्ता छन्दः ॥ ७० ॥

उदयतीति ।—मदमुखराणां मदेन हर्षेण, चन्द्रिकापानजनितानन्देनेत्यर्थः, मुखराणां बहुमुखराणाम्, उच्चैः कूजनशीलानामित्यर्थः, चकोरीणां पक्षिविशेषाणां, तोष एव प्रीतिरूपादनमेव, कर्मान्तः, कर्मस्थानम् अस्यास्तीति तथोक्तः, चकोरीणां सन्तोषक इत्यर्थः, दक्षिणं दाक्षिण्यजनकं, प्रीतिप्रदमिति भावः, लोकानां जगतां,

इदं चाह—

प्राचीनाचलचुम्बिचन्द्रमणिभिर्निर्व्यूढपाद्यं निजै-
र्निर्यासैरुडुभिर्निजेन वपुषा दत्तार्घलाजाञ्जलि।
अन्तःप्रौढ़कलङ्कतुच्छमभितः सान्द्रं परिस्तीर्यते
विस्रादङ्कुरभग्ननैशिकतमःसन्दोहमिन्दोर्मधुः॥ ७२॥

चक्षुः नेत्रभूतः, यद्वा—"तुहिनरुचिरयामाऽदर्शि" इति पाठः, तदाह्ने अदर्शि यामं, लोकचक्षुः लोकस्य जगतः, जगदात्मनो ब्रह्मण इत्यर्थः, चक्षुः नेत्रं, परमात्मनो दक्षिणचक्षुषेन सूर्येण, वामचक्षुषेन चन्द्रेण च सृष्टत्वात्, अयम एषः, तुहिनवत् तुषारवत्, शीतं वा शुभं वा इति, सन्तापनिवारकं वा चक्षुःस्थल वा इति वा भावः, रुचिरं मनोज्ञं, याम रश्मिसमूहं स तादृशः, शीतकिरणो वा शुभकिरणो वा चन्द्रः, अलीनां भ्रमराणां, कृता मधुराक्षुटाः, मन्द्राः गम्भीराश्च तैः, कङ्कतालैः कङ्का एव ताला: सङ्गीतक्रियामानानि तैः, यद्वा—कङ्कस्य कङ्कध्वनेरित्यर्थः, तालैः गीतवाद्यक्रियाविशेषैः, कुमुदानां कैरवाणां, मुकुलकेषु कुड्मलसमूहेषु, ईषद्विकाशोन्मुखक्षीरजलसमूहेषु इत्यर्थः, भङ्कारान् भङ्गविक्षेपान्, भङ्गवाचनामीत्यर्थः, मूर्छाविशेष इति यावत्; "भङ्कारोऽङ्गविक्षेपः" इत्यमरः; व्यञ्जयन् प्रकटयन् सन्, उदयति उद्गच्छति। मालिनी वृत्तम्॥ ७१॥

प्राचीनेति।—प्राचीनाचलं पूर्वपर्वतं, चुम्बन्ति स्पृशन्तीति तथोक्ताः, पूर्वाचलस्थिता इत्यर्थः, ये चन्द्रमणयः चन्द्रकान्तोपलाः तैः, चन्द्रकान्तमणिनिसृतजलैरित्यर्थः, निर्व्यूढं सम्पादितं, दत्तमित्यर्थः, पाद्यं पादोदकं यस्मै तत् तादृशं, निजैः स्वीयैः, निर्यासैः सारभूतैः, उडुभिः नक्षत्रैः, निजेन स्वीयेन, वपुषा शरीरेण, अर्घपात्ररूपेणेति यावत्, दत्तः विहितः, अर्घः अर्घस्वरूपः, लाजाञ्जलिः यस्मै तथोक्तम्, उडूनां मुधत्वेन लाजसाम्यम्, अन्तःप्रौढेन अभ्यन्तरस्थितेन उत्कटेन, कलङ्केन भङ्गरूपेण च, तुच्छं हीनम्, अङ्कुरे एव उद्गमसमयेऽपि, भग्नः विनाशित इत्यर्थः, नैशिकः निशासम्बन्धिनः, तमसां अन्धकाराणां, सन्दोहः समूहः येन तथाभूतं, सान्द्रं निरन्तरं, परिपूर्णमित्यर्थः, इन्दोश्चन्द्रस्य, विम्बात् मण्डलात्, प्रस्रवन्निति शेषः, मधुः तेजः, अभितः सर्वतः, परिस्तीर्यते व्याप्नोति। मार्दूलविक्रीडितं वृत्तम्॥ ७२॥

एतच्च—

मृगराजकरजभङ्गुरकिंशुककलिकाऽवतंसिकाः सुदृशः।
भयसङ्कुचदङ्कहरिणबहलोज्ज्वलमिन्दुमीक्षन्ते ॥ ७३ ॥

विभीषणः।—

इन्दोरेककलाया रुद्रेणोद्धृत्य मूर्द्धनि धृतायाः।
स्थानमिव तुच्छमेतत् कलङ्करूपेण परिणमते ॥ ७४ ॥

(विदूषकं रामं प्रति)।—

रोदसीकूपमण्डूकः कियदेष प्रकाशते।
चन्द्रमा यदयं देव! त्वत्कीर्त्तेः प्रतिगर्जति ? ॥ ७५ ॥

मृगराजेति।—सुदृशः सुलोचनाः, रमण्यः इति यावत्, मृगराजस्य सिंहस्य, करजवत् नखरवत्, भङ्गुरा कुटिला, किंशुककलिका पलाशकोरकः, अवतंसः कर्णभूषणं यासां तथाभूताः सत्यः, भयेन त्रासेन, पलाशकलिकायां सिंहनखरभ्रमजनितेनेति भावः, सङ्कुचन् आभुञ्जन्, देहसङ्कोचमापद्यमान इत्यर्थः, यः अङ्कहरिणः क्रोडस्थमृगः, तेन हेतुना बहलोज्ज्वलम् अत्यन्तमुज्ज्वलं, हरिणाङ्कप्रकारेण अधिकाम्लस्य प्रच्छादनविरहादिति भावः, इन्दुं चन्द्रम्, ईक्षन्ते पश्यन्ति। आर्य्या छन्दः ॥ ७३ ॥

इन्दोरिति।—रुद्रेण हरेण, उद्धृत्य आदृत्य, क्रोडप्रदेशलाभ्यः आक्रम्येत्यर्थः, मूर्द्धनि शिरसि, धृतायाः गृहीतायाः, इन्दोश्चन्द्रस्य, एकस्याः एकमात्रायाः, कलायाः षोडशभागस्य, स्थानमिव प्रदेश इव, तुच्छं शून्यम्, एतत् हरिणाङ्कितस्थानमित्यर्थः, कलङ्करूपेण लाञ्छनरूपेण, परिणमते पर्य्यवस्यति। आर्य्या छन्दः ॥ ७४ ॥

रोदसीति।—हे देव! रोदसी एव द्यावा-पृथिव्योर्मध्यमेव, "रोदसी रोदसी अपि दिवं भूमौ पृथक् पृथक्। मह-प्रथोगेऽप्यनयोः रोदः रोदसी॥" इति विश्वः; कूपः सुगभीरजलाधारविशेषः, तस्य मण्डूकः भेकस्वरूपः, कूपमण्डूकप्रायेण एतदायातिं यत, द्यावा-पृथिव्योः किञ्चिन्मानमेव एष जानाति प्रकाशयति च, न रोदस्योरधिकं किमपीति; एष अयं, चन्द्रमाः चन्द्रः, कियत् किञ्चित् परिमाणं यस्य तथा, प्रकाशते प्रकटीभवति, यत् यस्मात्, अयम् एष चन्द्रः, तव कीर्त्तेः यशसः, प्रतिगर्जति स्पर्द्धते, एव कीर्त्तिसदृशमेतञ्च प्रकाशनमिति भावः; यद्वा—रोदसीकूपमण्डूक एव कियत् किं परिमाणं, प्रकाशते? प्रकाशयति? इत्यर्थः, अत्यल्पभूत-

सीता। (सस्मितम्)। जाणामि अज्जउत्तस्स कित्तिकंतीहिं पडिप्पद्धं कदुअ पराजिटेण संपदि भअवदा हरिणंकेण कलंक-संघदी विढत्ता *(भ)।

(सर्वे हसन्ति। रामः लज्जते)।

सीता। (रामं प्रति)।—

आरंभं सिरिवच्छलंछणभुआपज्जत्थमंथाअल-
क्खोभोच्छलिदुद्धसिंधुलहरीगब्भच्छईसच्छअं।
को गायेदि ण ते रघुण्ण पहुणो अंधारपक्खंतरा-
संतुट्टंतमिअंकमंडलमलक्कुद्दामगोरं जसं? † ॥ ७६ ॥

---

* जानाम्यार्यपुत्रस्य कीर्तिकान्तिभिः प्रतिस्पर्द्धां कृत्वा पराजितेन सम्प्रति भगवता हरिणाङ्केन कलङ्कमर्जिता।

† आरम्भं श्रीवत्सलाञ्छनभुजापर्य्यस्तमन्याचल-
क्षोभोच्छलितदुग्धसिन्धुलहरीगर्भच्छविसदृशम्।
को गायति न ते रघूत्तम प्रभोरन्धकारपक्षान्तरा-
संतुष्यन्मृगाङ्कमण्डलमलङ्कुद्दामगौरं यशः? ॥ ७६ ॥

त्रिमलोऽयं प्रयोगः, यत यस्मात् प्रकाशात, त्वत्कीर्त्तेः प्रतिगर्जति? स्पर्द्धते? केवलं द्यावा-पृथिव्योः त्रिविक्रमावष्टम्भकस्य अस्य चतुर्दशभुवनप्रथितयशसा त्वया सह स्पर्द्धां कुर्वाणस्य इति भावः। अनुष्टुप् छन्दः ॥ ७५ ॥

(भ) कीर्त्तिकान्तिभिः यशः-प्रभाभिः। प्रतिस्पर्द्धां संघर्षं, प्रतिस्पर्द्धीवाचरितमित्यर्थः। हरिणाङ्केन मृगलाञ्छनेन, चन्द्रेण इत्यर्थः। कलङ्कमर्जिता अङ्कममुष्य अपवाद-समूहस्य, "कलङ्कोऽङ्केऽपवादे च कालायसमलेऽपि च" इति मेदिनी। अर्जिता अधिगता।

सारम्भमिति।—आरम्भेण उपक्रमेण सहितं सारम्भं प्रथममेवेति यावत, परतः कथम्भूतं वर्द्धिष्यते तत्र आह इति भावः, श्रीवत्सः श्रीयुक्तो वत्सः महत्तलक्षणं श्वेत-रोमावर्त्तविशेषः, लाञ्छनं चिह्नं यस्य सः श्रीवत्सलाञ्छनो विष्णुः, "विष्णुर्नारायणः कृष्णो···विभुः श्रीवत्सलाञ्छनः" इत्यमरः; तस्य भुजाभिः बाहुभिः, चतुर्भिरिति भावः, पर्य्यस्तः निक्षिप्तः, यः मन्याचलः मन्दरपर्वतः, तस्य क्षोभेण विलोडनेन, उच्छलितस्य आलोडितस्य, उच्छ्वसितस्य वा, दुग्धसिन्धोः क्षीरोदस्य, लहरीणां तरङ्गाणां,

रामः। (सहर्षमिव)। अयि प्रिये! प्रियवादिनि!—

चन्द्रलोकादपि परं पदमारोपयन्ति माम्।
अमूरमृतविन्दूनामनुप्रासास्तवोक्तयः॥ ७७॥

विदूषकः। (सानुरागम्)।—

अद्योर्वीतलमूलघर्षणवशादुन्मृष्टचूडामणि-
श्रेणिश्रीपरिपीतपीवरतमःपूरे पुरे भोगिनाम्।
कर्णाभावनिरस्तकुण्डलरवव्यासङ्गमाधुन्वता
मूर्ध्नः पन्नगपुङ्गवेन सुभगं त्वत्कीर्त्तिराकर्ण्यते॥ ७८॥

गर्भस्य मध्यस्य, या छविः कान्तिः, तत्सदृशं तनुत्वम्, अतिशुभ्रमित्यर्थः, अन्धकारपक्षस्य कृष्णपक्षस्य, अन्तरा मध्ये, संदृश्यत् दृश्यं गच्छत, यत् मृगाङ्कमण्डलं चन्द्रबिम्बं, तस्य खण्डवत् छेद इव, उद्दामगौरम् अतिधवलं, रघूणां रघुवंशीयानां, प्रभोः अधिपतेः, रघुश्रेष्ठस्येत्यर्थः, ते तव, यशः कीर्त्तिं, कः को जनः, न गायति? न कीर्त्तयति? न उच्चैः घोषयति? इत्यर्थः, अपि तु सर्व एव गायन्तीति भावः। शार्दूलविक्रीडितं वृत्तम्॥ ७६॥

चन्द्रलोकादपीति।—अमृतविन्दूनां सुधाकणानाम्, अनुप्रासाः अनुरूपाः इत्यर्थः, अनुप्रासवत् श्रुतिमधुरा इत्यर्थो वा, अमूः एताः, तव उक्तयः वचनानि, मां चन्द्रलोकात् अपि परम् ऊर्द्धं श्रेष्ठं वा, पदम् स्थानम्, आरोपयन्ति आरोहयन्ति। अनुष्टुप् वृत्तम्॥ ७७॥

अद्येति।—अद्य इदानीम्, उर्वीतलस्य पृथ्वीतलस्य, मूले अधोदेशे, यत् घर्षणं निघर्षणं, तदधात् तद्धेतोः, उन्मृष्टानां परिमृष्टानाम्, उज्ज्वलीभूतानामिति यावत्, चूडामणिश्रेणीनां शिरोरत्नसमूहानां, श्रिया प्रभया, परिपीतः कवलितः, विनाशितः इति यावत्, पीवरः स्थूलः, सान्द्र इति यावत्, तमसाम् अन्धकाराणां, पूरः निचयः यत्र यत्र वा तथाभूते, भोगिनां भुजङ्गानां, पुरे नगरे, पातालेत्यर्थः, पन्नगपुङ्गवेन नागराजेन, वासुकिनेत्यर्थः, कर्णाभावात् श्रवणेन्द्रियविरहात्, चक्षुःश्रवणयेति भावः, निरस्तः निहतः, कुण्डलानां कर्णभूषणविशेषाणां, रवस्य ध्वनेः, कुण्डलानां परस्परसम्मेलनजनिताव्यक्तशब्दस्येत्यर्थः, व्यासङ्गः प्रत्यूहः यत्र तत् यथा तथा, मूर्ध्नः शिरसि, सहस्रमिति शेषः, आधुन्वता कम्पयता सता, तव कीर्त्तिः यशः, सुभगं सुष्ठु यथा तथा, आकर्ण्यते श्रूयते, कर्णाभावेन कुण्डलपरिधानाभावः

(विश्वा)।—

भोगीन्द्रः प्रमदोत्तरङ्गमुरगीसङ्गीतगोष्ठीषु ते
कीर्त्तिं देव ! शृणोतु विंशतिगुणी यच्चक्षुषां वर्त्तते ।
रक्षोभिः सुरसुन्दरीभिरभितो गीतां तु कर्णद्वयी-
दुःखः श्रोष्यति नाम किं स हि सहस्राक्षो न चक्षुःश्रवाः ? ॥७८॥

रामः । (विश्वाक्षिप्तेन विभीषणेन सुन्नामनुगच्छ (स) चन्द्रं शोभामुखं च चक्षुर्भ्यामीक्ष्य जगतम् ।)—

आरब्धे दयितामुखप्रतिसमे निर्मातुमस्मिन्नपि
व्यक्तं जन्मसमानकालमिलितामंशुच्छटां वर्षति ।

तदान्दोलनजनितशब्दाभावेन सुखेन कीर्त्तिश्रवणमिति बोध्यम् । शार्दूलविक्रीडितं वृत्तम् ॥ ७८ ॥

भोगीन्द्र इति ।—हे देव ! भोगीन्द्रः सर्पराजः, वासुकिरित्यर्थः, उरगीणां सुन्दरीणां, सङ्गीतगोष्ठीषु गानसभासु, प्रमदेन हर्षेण, उत्तरङ्गम् उच्छ्वसितम्, उद्गत-कौतूहलं यथा तथा इत्यर्थः, ते तव, कीर्त्तिं यशः, शृणोतु आकर्णयतु, श्रोतुं पारयतु इत्यर्थः, यत् यतः, चक्षुषां नेत्राणां, विंशतिगुणी सहस्रद्वयसंख्यः, वर्त्तते विद्यते, तस्येति शेषः, सहस्रफणत्वेन चक्षुषा सहस्रद्वयं, चक्षुःश्रवस्त्वाच्च श्रोत्राणामपि सहस्रद्वय-संख्यत्वं तच्च तव चरितश्रवणयोग्यतां द्योतयति भावः, तु किन्तु, सहस्राक्षः, दशशत-लोचनः, इन्द्र इत्यर्थः, कर्णद्वयी कर्णयोर्द्वयी, श्रवणद्वयसमानेत्यर्थः, तया दुःखः दुःखितः, कर्णसहस्रेण श्रवणयोग्यायाः गाथायाः कर्णद्वयसमानेन सम्यक् श्रवणा-भावादिति भावः, अत एव अभितः समन्तात्, रक्षोभिः रक्षःकण्ठीभिः, मधुर-कण्ठीभिरित्यर्थः, यद्वा—रक्षोभिः त्वदनुरागिणीभिः, सुरसुन्दरीभिः देवाङ्गनाभिः, गीतां कीर्त्तितां, तत्कीर्त्तमिति शेषः, किं नाम किमर्थं नाम, श्रोष्यति ? श्रोतुं शक्ष्यति ? नैव श्रोतुं शक्ष्यतीत्यर्थः, हि यतः, सः सहस्राक्षः, न चक्षुःश्रवाः चक्षुरेव श्रवः श्रवणेन्द्रियं यस्य स तथाभूतः । शार्दूलविक्रीडितं वृत्तम् ॥ ७८ ॥

(स) विश्वाक्षिप्तेन सुखज्ञाक्षेण, निजप्रशंसावाक्यश्रवणादिति भावः । विभीषण-सूक्तिं विभीषणस्य शोभनवाक्यं, श्रुतिमधुरवचनमित्यर्थः, अनुगच्छ अभ्युपपद्य, श्लोक्येत्यर्थः, श्लेति भावः ।

आरब्धे इति ।—दयितायाः प्रियायाः सीतायाः इत्यर्थः, मुखञ्च आननञ्च,

आत्मद्रोहिणि रोहिणीपरिवृढे पद्मैकपङ्केरुहः
सङ्कोचादतिदुःस्थितस्य न विधेस्तच्छिल्पमुन्मीलितम् ॥ ८० ॥

(सीतां प्रति)।—

अनेन रम्भोरु! भवन्मुखेन
तुषारभानोस्तुलया धृतस्य ।
ऊनस्य नूनं परिपूरणाय
ताराः स्फुरन्ति प्रतिमानखण्डाः ॥ ८१ ॥

प्रतिसमं प्रतिदर्शे, अनिन् परिदृश्यमाने, रोहिणीपरिवृढे रोहिणीपतौ, चन्द्रे इत्यर्थः, "स्वामी त्वीश्वरः पतिरीशिता। अधिभूर्नाथको नेता प्रभुः परिवृढोऽधिपः ।" इत्यमरः; निर्मातुं सृष्टुम्, आरब्धेऽपि प्रक्रान्तेऽपि, व्यक्तं स्फुटं यथा तथा, जन्मसमानकाले निर्माणसमकाले, मिलितां सङ्गतां, ब्रह्मणा चन्द्रदेहे योजितामिति यावत्, पंशुच्छटां किरणश्रेणीं, वर्षति विकीरति सति, पद्मोपरि इति भावः, पद्मैकस्य आत्मभूतस्य, पङ्केरुहः पद्मस्य, सङ्कोचात् मुद्रणात्, आत्ममात्रचन्द्रकिरणस्पर्शेनेति भावः, अतिदुःस्थितस्य अतिशयेन दुःखावस्थितस्य, विधेः ब्रह्मणः, आत्मनः स्वस्य, विश्वसृरिति यावत्, द्रोहिणि अनिष्टकारिणि सति, स्वकिरणेन पद्मसङ्कोचकारित्वादिति भावः, तच्छिल्पं सीतामुखानुरूपचन्द्रनिर्माणकौशलम्, न उन्मीलितं न सम्यक् प्रकाशितं, न चेतसि स्फुरितमित्यर्थः। "तच्छिल्पमुन्मीलितं" "तच्छिल्पमुन्मीलति" इति च पाठान्तरद्वयम्। आर्दूलविक्रीडितं वृत्तम् ॥ ८० ॥

अनेनेति।—रम्भोरु! हे कदलीवाक्ष इव सुवृत्तनक्षत्रोरुश्रोणिनि! अनेन परिदृश्यमानेन, भवत्याः तव, मुखेन आननेन सह, तुलया तोलनयन्त्रेण, धृतस्य गृहीतस्य, तुलितस्येत्यर्थः, किन्तु ऊनस्य हीनस्य, तुषारभानोः शीतकिरणस्य चन्द्रस्य, परिपूरणाय पूर्त्तिसम्पादनाय, न्यूनता दूरीकृत्य समत्वानयनायेत्यर्थः, ताराः नक्षत्राणि, प्रतिमानखण्डाः क्षुद्रक्षुद्रप्रतिच्छायाः, प्रतिनिधयः इत्यर्थः, "प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया। प्रतिकृतिरर्चा पुंसि प्रतिनिधिः—" ॥ इत्यमरः; स्फुरन्ति दीप्यन्ते, नूनम् उत्प्रेक्षे। किरणादेस्तुलनायां न्यूनस्य क्षुद्रपरिमाणेन पूरणं कृत्वा यथा समीकरणं, तथाऽत्रापीति भावः। उपजातिवृत्तम् ॥ ८१ ॥

किञ्चान्यदपि—

गोत्रे साक्षादजनि भगवानेष यत् पद्मयोनिः
श्रय्योत्थायं यदखिलमहः प्रीणयन्ति द्विरेफान्।
एकाग्रां यद्दधति भगवत्युष्णभानौ च भक्तिं
तत् प्रापुस्ते सुतनु! वदनौपम्यमम्भोरुहाणि॥ ८२॥

सीता। (क्षीरावनतमुखी)। अज्जउत्त! कधं उण संपुण्णमंडल-मेरिसं चंदमवमच्छिअ कलामेत्तं भअवदा भूदणाहेण चूडामणी-किदं (य) आसी?*

रामः। (सप्रहासम्)। प्रिये जानकि! त्रयाणामपि जगता-मुपजीव्योऽयममृतदीधितिः, यदि पुनः समग्रमेनं (र)

---

* आर्यपुत्र! कथं पुनः सम्पूर्णमण्डलमीदृशं चन्द्रमवमत्य कलामात्रं भगवता भूतनाथेन चूडामणीकृतमासीत्?

गोत्रे इति।—सुतनु! हे सुन्दरि! यत् यतः, पद्ममेव कमलमेव, योनिः उद्भवहेतुः यस्य तथोक्तः, एषः प्रसिद्धः सः, भगवान् ऐश्वर्यसम्पन्नः ब्रह्मा, गोत्रे कुले, सन्तति-जीवजनन-कुलान्वभिजनान्वयाः इत्यमरः, पद्मानामिति शेषः, साक्षात् स्वयम्, अजनि उत्पन्नः, यत् यतः, श्रय्योत्थायं श्रय्याया उत्थाय उत्थाय, विकसित्वेति भावः, अखिलं समस्तम्, अहः दिनं व्याप्येत्यर्थः, द्विरेफान् भ्रमरान्, प्रीणयन्ति तोषयन्ति, यश्च यतश्च, भगवति षडैश्वर्यसम्पन्ने, उष्णभानौ उष्णकिरणे, सूर्ये इत्यर्थः, एकाग्राम् ऐकान्तिकीं, प्रगाढामित्यर्थः, भक्तिम् अनुरागं, दधति धारयन्ति, तत् तस्मात्, अम्भोरुहाणि पद्मानि, ते तव, वदनौपम्यं मुखसादृश्यं, प्रापुः लेभिरे, सजीवत्वात् विधातुरनुकम्पया वरोपकारानुष्ठानं सूर्यभक्तिश्चेति त्रयं पद्मानां तव मुखसादृश्यलाभकारणमिति भावः। मन्दाक्रान्ता वृत्तम्॥ ८२॥

(य) अवमत्य अवगण्य। कलामात्रम् एकखण्डमात्रम्। भूतनाथेन महेश्वरेण। चूडामणीकृतं शिखरीकृतं, शिरोभूषणीकृतमित्यर्थः।

(र) उपजीव्य, उपभोग्यः, जीवनकारणमिति भावः। अमृतदीधितिः सुधाकरः, चन्द्र इत्यर्थः। समग्रं सम्पूर्णमण्डलम्, एनम् अमृतदीधितिम्।

मौलिना पिनाकपाणिरधारयिष्यत्, अङ्ग! शिवनिर्माल्यमनुपभोग्य एवायम् (ल) अभविष्यत्।

(सर्वे हसन्ति)।

राजा। किञ्च, भवत्याऽपि मासप्रमितो दृश्यते एवायम्—

पीयूषाश्रपणं जगत्त्रयदृशामालातलेखालवो
विश्वोन्माथहुताशनस्य ककुभामुद्भाटनी कुक्षिका।
वीरेषु प्रथमा च पुष्पधनुषो रेखा मृगाक्षीमुख-
श्रोणाञ्च प्रतिराजबीजमधिकानन्दो नवस्चन्द्रमाः॥ ८१॥

(ल) मौलिना चूडया, शिरसेति यावत्, "चूडा किरीटं केशाश्च संयता मौलयस्त्रयः" इत्यमरः। पिनाकपाणिः महेश्वरः। अङ्गेत्यामन्त्रणे, अङ्ग! भोः! शिवनिर्माल्यं शिवस्य महेश्वरस्य, निर्माल्यम् उपभुक्तं, त्यक्तपुष्पादिरित्यर्थः, तत्त्वरूप इति यावत्, शिरसा धृत्वा उपभुक्तत्वादिति भावः, अनुपभोग्यः अन्येषामुपभोगानर्हः, "अथाप्य शिवनिर्माल्यम्" इत्यनेन शिवनिर्माल्यस्य उपभोगनिषेधात्। अयम् अक्षतदोषितिचन्द्रः।

पीयूषेति।—नवः चन्द्रमाः नवोदितचन्द्रः, जगत्त्रयस्य त्रिभुवनस्य, भुवनत्रयवासिजनानामित्यर्थः, दृशां नयनानां, पीयूषाश्रपणम् अमृतस्रावी, अमृतवर्षणकारीत्यर्थः वा, आनन्ददायक इति यावत्, विश्वेषां भुवनानां, त्रैलोक्यनिवासिनामित्यर्थः, उन्माथः उन्मथनकर्ता, आखोडनकारीत्यर्थः, चित्तचाञ्चल्यजनक इति यावत्, काम इति भावः, स एव हुताशनः अग्निः, तस्य आज्ञातस्य उल्मुकम्, अङ्गार इत्यर्थः, "अज्ञातमुल्मुकम्" इत्यमरः, कोषादौ "अज्ञात" इति प्रयोगात् "आज्ञात" इति यत् क्वचिन्न प्रयुक्तं, तत् छन्दोऽनुरोधात् इति मन्तव्यं, तथा लेखाना राजीना, खलः खण्डः, बिन्दुरित्यर्थः, ककुभां दिशाम्, उद्भाट्यते अनयेति उद्भाटनी परिष्कारकरणी, कुक्षिका मार्जनीत्यर्थः, यद्वा—उद्भाटनी उन्मार्जनी, प्रकाशप्रसारिणीत्यर्थः, कुक्षिका "कावि" इति ख्यातः यन्त्रविशेषः, वीरेषु शूरेषु मध्ये, पुष्पधनुषः कामस्य, प्रथमा आद्या, रेखा चिह्नविशेषः, जगति के के वीरा सन्तीति गणनायां काम एव सर्वप्रथमो वीर इति प्रकाशनार्थं प्रथमकल्पितः अर्धचन्द्राकारचिह्नविशेष इति भावः, मृगाक्षीणां हरिणनयनानां सुन्दरीणां, या मुखश्रियः आननशोभाः, तासां प्रतिराजः प्रतिपक्षो

चोला। (अनुमोदमाना)। अज्जउत्त! परिपुण्णा गुणिणो जहिं कहिं वि सोहंति, खीणा उण सीसमारुहंति त्ति (व) हरजडाचंदो जेव्व पढमं णिदंसणं * (अ)।

राम:। (विहस्य)। देवि! महाकुलक्षत्रियसम्भवे! एवमेतत्—

सेतूपक्रमसम्भ्रमाहृतगिरिप्रक्षेपवेगोच्छल-
न्निःशेषाम्बुपरिस्फुटोदरदरीगम्भीरिमा सागरः।
चक्रे गोष्पदवद्विलङ्घितवतोऽप्यन्तर्भयं मारुतेः
पूर्णत्वादतिरिच्यते हि महतस्तुच्छस्य दुर्लक्ष्यता ॥ ८४ ॥

* आर्यपुत्र! परिपूर्णा गुणिनो यस्मिन् कस्मिन्नपि श्रीमन्ते, क्षीणाः पुनः श्रीर्षमारोहन्तीति हरजटाचन्द्र एव प्रथमं निदर्शनम्।

दाता, तस्य दोर्जं कारणम्, अत एव अधिकं यथा तथा, आनन्दयतीति अधिकानन्दो, दृश्यते इति गद्यशेषान्वयः। आर्द्रवृत्तिकीर्तितं छन्दः ॥ ८३ ॥

(व) परिपूर्णाः सम्पूर्णाः, महान्त इति यावत्, क्षीणाः दुर्बला इत्यर्थः, अधमाः क्षुद्रा वा इति यावत्। शीर्षं शिरः। आरोहन्ति आरूढा भवन्तीत्यर्थः, आश्रयन्तीति भावः।

(अ) हरजटाचन्द्रः महादेवस्य जटायामवस्थितः शशी। निदर्शनं दृष्टान्तः, क्षुद्राणाम् उपरिस्थितिं विना अदर्शनात् श्रीमाविरहः, पूर्णानान्तु सर्वत्र एव दृश्यत्वात् सर्वदैव श्रीमत्ता भावः।

सेतोरिति।—सेतोः आलेः, लङ्कादीनां पारगमनोपायविशेषस्येति यावत्, उपक्रमे आरम्भे, सम्भ्रमेण त्वरया, आहृतानाम् आनीतानां, गिरीणां पर्वतानां, प्रक्षेपात् निक्षेपात्, समुद्रजले इति भावः, यो वेगः तेन उच्छलन्ति उद्गच्छन्ति, निक्षेपवेगात् आदौ उच्छलितानि भूत्वा चतुर्षु पार्श्वेषु दूरमपसरन्तीति भावः, निःशेषाणि समग्राणि, यानि अम्बूनि जलानि, तैः क्षेतुभिः परिस्फुटः सुव्यक्तः, उदरमेव अभ्यन्तरमेवेति यावत्, दरी गुहा, तस्या गम्भीरिमा गाम्भीर्यं, गभीरता इत्यर्थः यस्य तथाभूतः, सागरः समुद्रः, गोष्पदवत् गोः पदपरिमितजलाधारवत्, गोपदमुपगतं क्षुद्रजलाधारमादिति वा, विलङ्घितवतोऽपि उल्लङ्घितवतोऽपि, अतीर्णवतोऽपीत्यर्थः, वायुद-

(नेपथ्ये)।

देव! त्वर्यतां त्वर्यताम्। सन्निधत्ते (ष) खलु भगवद्वशिष्ठ-गृहीतो मङ्गलाभिषेकमुहूर्त्तः (स)।

रामः। (आकर्ण्य)। कथम्, अयोध्यायाः प्रत्यावृत्तो मारुतिः (ह) अञ्जनानन्दनः (क) स्वरयति।

सीता। (सहर्षम्)। अज्जउत्त! कधं अंजणाणंदणो (क) तुवराबेदि? ता भअवं पुप्फअ! अवणम; मेदिणीसंणिहिद-गअणमग्गेण (ख) गच्छम्ह। (अभोऽवलोक्य रामं प्रति)। अज्जउत्त! किं उण एदं तरुणजीमूदसामले महीवलए महुमहणवच्छत्थले (ग) कोत्थुभकिरणत्थवअं विअ जलंतं (घ) लक्खीअदि? *

* आर्यपुत्र! कथम् अञ्जनानन्दनस्त्वरयति? तत् भगवन् पुष्पक! अवनम; मेदिनीसन्निहितगगनमार्गेण गच्छाम:। आर्यपुत्र! किं पुनरेतत् तरुणजीमूतश्यामले महीवलये मधुमथनवक्षःस्थले कौस्तुभकिरणस्तवक इव ज्वलल्लक्ष्यते?

मिति शेषः, सीतान्वेष्टुं लङ्कागमनकाले इति भावः, मारुतः हनूमतः, अतः मनसि, भयं त्रासं, चक्रे कृतवान्, जनयामासेत्यर्थः, परिपूर्णसागरस्य गभीरता-ज्ञानाभावात् सागरलङ्घनकाले मारुतेर्भयं न जातं, सेतुबन्धनकाले तु जलापसरणात् अतलस्पर्शत्वदर्शनेन भयमुत्पन्नमिति निष्कर्षः, हि यतः, लङ्घतः गुणाधिक्यात्, परिपूर्णादिति यावत्, तुच्छस्य गुणहीनस्य, शून्यस्येति यावत्, दुर्लङ्घ्यता दुरुत्तार्यता, पूर्णत्वात् सम्पूर्णत्वमपेक्ष्य इत्यर्थः, अतिरिच्यते अतिरिक्ता भवति। आर्टूण्विक्रीडितं वृत्तम् ॥ ८४ ॥

(ष) त्वर्यतां त्वरा क्रियता, शीघ्रमागम्यतामित्यर्थः। सन्निधत्ते सन्निहितः भवति।

(स) भगवद्वशिष्ठगृहीतः भगवता वशिष्ठेन निरूपित इत्यर्थः। मङ्गलाभिषेकमुहूर्त्तः मार्द्धिकाभिषेकसमयः।

(ह) प्रत्यावृत्तः प्रत्यागतः। मारुतिः हनूमान्।

(क) अञ्जनानन्दनः अञ्जनाकुमारः, हनूमानित्यर्थः।

(ख) मेदिनीति।—मेदिन्याः पृथिव्याः, सन्निहितः समीपवर्त्ती, यः गगनमार्गः आकाशपथः तेन, भूपृष्ठात् किञ्चिदूर्द्धदेशेनेत्यर्थः।

(ग) तरुणेति।—तरुणः आगतः, यः जीमूतः मेघः, तद्वत् श्यामलं

राम.। (इदं विभीषणं प्रति)।—

तर्कुटङ्कलिखितार्कमण्डल-
प्रोच्छलत्कणकदम्बभासुरम्!
शिल्पशालमिव विश्वकर्मणः
किं विभाति मृगतृष्णिकामयम्? ॥ ८५ ॥

विभीषणः। देव! स एषः,—

ज्येष्ठामूलीययात्रासरभसकरभीकाम्यकान्तारवर्त्मा
दूरेऽपि ज्योतिरक्ष्णोरपलपति मरुज्जाज्वलज्जाङ्गलश्री.।

हृत्यर्थः. तस्मिन्। मधौवलये सूनमण्डले। मधुसूदनस्य मधुदैत्यहन्तुः नारायणस्य, यच्चक्रमिव उरसि।

(घ) कौस्तुभेति।—कौस्तुभस्य तदाख्यमणिविशेषस्य, किरणाना मयूखानां, प्रभाजालमित्यर्थः, जयतः गुच्छः, राशिरित्यर्थः। ज्वलन् दीप्यमान।

तर्कुरिति।—तर्कुः क्षुरिकादीनां तीक्ष्णतासम्पादनार्थं चक्राकारयन्त्रविशेषः, तस्य टङ्केन शाणविशेषेण, यद्वा—तत्र य टङ्कः दारुण, घर्षणमिति भावः, "टङ्कः पाषाणदारणे" इत्यमरोक्तेः टङ्कश्च पाषाणदारणास्त्रविशेषोऽपि अत्र उपचारात् घर्षणकठिनदारवार्थी बोध्यः, लिखितम् उद्भूतं, यत् अर्कमण्डलं सूर्यबिम्बं, तस्मात् प्रोच्छलता प्रोद्गच्छता, कणकदम्बेन स्फुलिङ्गसमूहेन, भासुरं दीप्यमानं, विश्वकर्मणः देवशिल्पिनः, शिल्पशालमिव कर्मागारमिव, मृगतृष्णिकामयं मरीचिकामयं, मरीचिकावत् दृश्यमानमित्यर्थः, किम्, एतदिति शेषः, विभाति? राजते? पुरा खलु तेजः सोढुमशक्तया सूर्यपत्न्या संज्ञया प्रार्थितः पिता विश्वकर्मा सूर्यं यन्त्रारूढं कृत्वा शाणयन्त्रेण तच्चणात् क्षीणतेजसमकरोदिति पुराणवार्त्ता। रथोद्धता वृत्तम् ॥ ८५ ॥

ज्येष्ठेति।—ज्येष्ठामूलीयः ज्यैष्ठमासः, "ज्येष्ठामूलीयमिच्छन्ति मासमाषाढपूर्वजम्" इति हारावली, तत्र यात्रायाः प्रयाणे, सरभसा सदर्पा, कामुकीति भावः, या करभी उष्ट्री, तस्या कार्यं सुकरोर्थः, कान्तारवर्त्म दुर्गममार्गः, यत्र तथाभूतः, ज्येष्ठे च उष्ट्री कामुकी जायते इति प्रसिद्धिः; यद्वा—ज्येष्ठमूलीया ज्येष्ठमासस्वत्विनी, या यात्रा प्रयाणं, दूरदेशगमनमित्यर्थः, तत्र सरभसा सवेगा, वेगवतीत्यर्थः, "रभसो वेग-हर्षयोः" इत्यमरः; मरुभूमौ उष्ट्रा एव त्वरितं गन्तु शक्ता इति प्रसिद्धिः, या करभी

विश्वद्रोचोभिरम्भिन्निविडमुडुपतेः कान्तिभिः प्रस्रवन्ताः
फेनायन्ते निजोष्मग्रथनपरिणमद्बुद्बुदं चन्द्रकान्ताः ॥ ८६ ॥

(सर्वे विमानावलिं नाटयन्ति)।

रामः। (विलोक्य सीतां प्रति)। देवि! दक्षिणेन—

सिंहलद्वीपमब्धौधि-सम्भूतमिदमुत्पलम्।
माणिक्याचलकिञ्जल्क-रमणीयमुदीक्ष्यते ॥ ८७ ॥

सीता। जहिं कामकुसुमसंकासो अगत्थहंसो (ङ) चरइ ?*

* यत्र कामकुसुमसङ्काशोऽगस्त्यहंसश्चरति ?

ष्टष्टौ, तस्याः; कान्त्यः सृष्टयोयं, कान्तारवत्म दुर्गमार्गः; यत्र तथाभूत, "कान्तारं वर्त्म दुर्गमम्" इत्यमरात् कान्तारशब्दस्य दुर्गमवर्त्मार्थकत्वेऽपि यत् कान्तारवर्त्मा इति प्रयोगः, स "धनुष्यां" "कर्णकुण्डलम्" इत्यादिवत् समर्थनीयः; ज्वलन्तो देदीप्यमाना, जङ्गलं निर्जनस्थानं, "जङ्गलं निर्जनस्थाने विलिप्ता पिशितेऽस्त्रियाम्" इति मेदिनी; यद्वा—जङ्गलो निर्जलो देशः; तस्य इयं जाङ्गली जनविरहिता जलविरहिता वा, श्रीः शोभा यस्य तथाभूतः, मरुः धन्वदेशः, निर्जलवालुकामयदेशविशेषः इत्यर्थः, दूरेऽपि विप्रकर्षेऽपि, अक्ष्णोः नयनयोः, ज्योतिः तेजः, दृष्टिशक्तिरित्यर्थः, अपलपति हरति, दृष्टिप्रतिघातितेजस्कतया मरोरिति भावः, यस्मिन् मरौ, चन्द्रकान्ताः मणिविशेषाः, विश्वद्रोचोभिः जगद्व्यापिनीभिः, उडुपतेः चन्द्रस्य, कान्तिभिः प्रभाभिः, किरणैरिति यावत्, प्रस्रवन्ताः प्रस्रवन्तः सन्तः, स्रवज्जलाः सन्त इत्यर्थः, निजैः स्वकीयैः ऊष्मभिः सन्तापैः, मरुदेशभवैरिति भावः, यत् कृपणं पाकः, तेन परिणमन् उद्भवन्, बुद्बुदः जलविकारो यस्मिन् तत् यथा तथा, फेनायन्ते फेनमुद्गिरन्ति। स्रग्धरा वृत्तम् ॥ ८६ ॥

सिंहलेति।—सिंहलद्वीपं लङ्काद्वीपं, दक्षिणेन सिंहलद्वीपस्य दक्षिणस्यां दिशि, अब्धौधिसम्भूतं समुद्रसञ्जातं, माणिक्यमया माणिक्यनिर्मिताः, अचलाः क्षिराः, ये किञ्जल्काः केसराः, तैः रमणीयं मनोहरम्, इदम् उत्पलं पद्मम्, उदीक्ष्यते उद्दृश्यते, जनैः अस्माभिर्वा इति शेषः। अनुष्टुप् वृत्तम् ॥ ८७ ॥

(ङ) कामेति।—कामस्य हृद्यविशेषस्य, कुसुमं पुष्पं, तस्य सङ्काशः सदृशः, अतीव श्वेतवर्ण इत्यर्थः। अगस्त्यहंसः अगस्त्य एव हंसः, यद्वा—अगस्त्याख्य-हंसविशेषः; अगस्त्याश्रमस्थहंस इत्यर्थो वा।

रामः। (स्मित्वा)। आं मैथिलि आम्। दृष्टैव रोहण-गिरेरुपत्यकायां द्वितीयमायतनं मुनेर्लोपामुद्रावल्लभस्य। (च) स तत्रभवान् (छ)—

दृढत्वात्प्राप्त्या विततजलमम्भोधिमुदरे
दधावीषद्ग्राह्यं किल कलशजन्मा कुलपतिः।
यमाराध्यन् विन्ध्याचलशिखरशोथैकभिषजं
विवस्वानाश्वौनं गगनमविरोधात् कलयति॥ ८८॥

अपि च—

निपीते येनाब्धौ स्तिमितगुरुभिः पक्षपटलैः
प्रयत्नादुड्डीय प्रतिपदमपर्य्यस्तपतिताः।

(च) रोहणगिरेः रोहणाख्यपर्वतस्य। उपत्यकायाम् आसन्नभूमौ, "उपत्यका-ऽद्रेरासन्ना भूमिः" इत्यमरः। आयतनं स्थानम्, आश्रम इति यावत्। लोपामुद्रा-वल्लभस्य लोपामुद्राभर्तुः, लोपामुद्रेति अगस्त्यभार्य्यायाः नाम, "अगस्त्यः कुम्भसम्भवः। मैत्रावरुणिरस्यैव लोपामुद्रा सपर्णिकी" इत्यमरः।

(छ) तत्रभवान् पूज्यः।

दृढत्वादिति।—किलेति प्रसिद्धौ, कुलपतिः "मुनीनां दशसाहस्रं योऽन्नदानादि-पोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः॥" इत्युक्तलक्षणः, कलशजन्मा कुम्भसम्भवः, अगस्त्य इत्यर्थः, "अगस्त्यः कुम्भसम्भवः" इत्यमरः, ईषत् ग्राह्यं गण्डूष-मात्रेण पातुमर्हं, दृढत्वात् सदृढत्वात्, विस्तृतत्वात् इत्यर्थः, पात्रत्वात् आधारत्वात्, अगस्त्योदर-रूपत्वेति भावः, यदा—ईषद्ग्राह्यं, किन्तु दृढत्वात्पात्रत्वं सुविस्तीर्णखातरूपत्वात् आधारत्वं, प्राप्त्या लाभेन, विततजलं विस्तृतोदयम्, अम्भोधिं समुद्रम्, उदरे जठरे, दधौ धारयामास, विवस्वान् सूर्यः, विन्ध्याचलस्य विन्ध्यगिरेः, शिखराणां शृङ्गाणां, शोथस्य स्फीतिरूपरोगविशेषस्य, अद्वितीयत्वेति भावः, एकम् अद्वितीयं, भिषजं चिकित्सकं, "भिषग्वैद्यौ चिकित्सके" इत्यमरः; विनतीकृतविन्ध्याचलमिति भावः, यम् अगस्त्यम्, आराध्यन् सेवमानः सन्, आश्वौनम् अश्वैः एकाहेन गम्यं, "विन्ध्याश्वीनं यदह्नेन दिनेनैकेन गम्यते" इत्यमरः; गगनम् आकाशम्, अविरोधात् निर्विघ्ने-नेत्यर्थः, कलयति पश्यति। पूर्वमुक्ता पौराणिकी वार्त्ताऽस्य सन्दर्भस्येति विस्तरभयान्न पुनरुक्ता। शिखरिणी वृत्तम्॥ ८८॥

निपीते इति।—येन मुनिना अगस्त्येन, अब्धौ समुद्रे, निपीते निःशेषेण पुनर्नो-

विश्रान्तः कौलीरं कुहरमशरण्याः शिखरिणः
क्षणं दृष्टास्तस्य स्तुतिषु न गिरां साहसरसः ॥ ८९ ॥

अपि च, यत्र शृङ्गारसार्वभौमस्य (ज) रत्नसिंहासने सिंहलद्वीपनाम्नि प्रदोषारम्भेषु (झ)—

उदेष्यत्पीयूषद्युतिरुचिकणार्द्राः प्रशिथिलै-
स्त्वनौना पत्यानो घनचरणलाक्षालिपिभृतः।
चकोरैरुड्डीनैर्भ्रटिति कृतशङ्काः प्रतिपदं
पराच्यः सञ्चारानविनयवतीनां विदधते ॥ ९० ॥

क्षते सति, क्षिप्तानि आदानि, अलालरक्तत्वात्तानादिति भावः, अत एव गुरुणि भारवन्तीत्यर्थः तैः, पक्षपटलैः पक्षसमूहैः, प्रथमात् विप्रेषायामात्, उड्डीय नभसि उत्प्लुत्य, प्रतिपदं पदे पदे, अपव्यस्तं विपर्यस्तं यथा तथा, पक्षाणां स्निग्धत्व-गुरुत्वाभ्यां स्वच्छन्दोड्डयनाच्चमत्वादिति भावः, पतिताः भूमौ लुण्ठिताः, अत एव अशरण्याः रक्षि-त्र्यः, निराश्रया इति यावत्, आश्रयभूतस्य समुद्रस्य व्यसनोदयादिति भावः, शिखरिणः पर्वताः, क्षणात्तादयः इत्यर्थः, क्षणं किञ्चित्कालं, कुलीरं कर्कटं, कर्कटः कर्कटी तत्सम्बन्धि कौलीरं कार्कटं, कुहरं गर्तं, विश्रान्तः प्रविश्रान्तः, दृष्टाः अवलोकिताः, अन्यैरिति शेषः, तस्य अगस्त्यस्य, स्तुतिषु स्तवेषु, गिरां वाचां, साहसरसः सहसा प्रवृत्यनुरागः, न? अपि तु सर्व एव तस्य स्तुतिं कर्तुं प्रवर्तन्ते इति भावः, यदा—साहसरसो न साहसावलम्बनं न, भवतीति शेषः, वाचस्तस्य स्तुतिं कर्तुं न प्रभवन्तीति भावः। शिखरिणी छन्दसि ॥ ८९ ॥

(ज) शृङ्गारेति।—शृङ्गार एव तदाख्यः आदिरस एव, सार्वभौमः तस्मात् तस्य, एतेन सिंहलद्वीपवासिनः सर्वे एव अत्यर्थं शृङ्गारानुरागिणः कामपर-तन्त्रा इति व्यज्यते।

(झ) प्रदोषारम्भेषु प्रदोषो रजनीमुखं, तस्य आरम्भेषु उपक्रमेषु, "प्रदोषो रजनीमुखम्" इत्यमरः।

उदेष्यदिति।—उदेष्यतः उदयं गमिष्यतः, पीयूषद्युतेः अमृतरश्मेः, चन्द्रस्य इत्यर्थः, रुचिकणैः अमृतलवैः, आर्द्राः सिक्ताः, स्रवन्त इति भावः, घना सान्द्रा, या चरण्यौ पादौ, ताभ्यां अलक्तकरागः, तस्य लिपिम् अक्षरं, बिभ्रति धारयन्तीति तथोक्ताः, चरणालक्तकविकृता इति भावः, उड्डीने, उत्पतिते, चकोरैः पक्षि-

(अन्यतो दर्शयन्)। इयमितो मौक्तिकीयानामपामाधारस्ताम्रपर्णी (अ)—

शुक्तिकागर्भसम्बन्ध-स्तम्भितास्तोयबिन्दवः।
भ्रमन्ति सुभ्रुवामङ्गादङ्गमस्याः प्रसूतयः॥ ८१॥

अपि च—

युवतिकुचभोगकर्मभिरुद्भूतैः शुक्तिसम्पुटभृतानि।
दधतीह ताम्रपर्ण्याः स्थिरकरकाभावमम्भांसि॥ ८२॥

विशेषैः, झाटति सदृक्षा, कृता प्राप्ता इत्यर्थः, अङ्गा भावः, जलसमागमभयमिति यावत् यत्र तथोक्ताः, खाचारञ्जितपदचिह्नदर्शनादिति भावः, अग्निमथिष्कीनां चन्द्रकान्तशिलामयभूभागानां, पन्थानः मार्गाः, अविनयवतीनां दुःशीलानाम्, अभिसारिकाणामिति भावः, प्रतिपदं पदे पदे, प्रतिपदर्क्षे इत्यर्थः, पराचः प्रतीपान्, भयात् विपरीतत्वासामिति भावः, सचारान् गतीन्, विडम्बते प्रकटयन्ति। शिखरिणी वृत्तम्॥ ८०॥

(अ) मौक्तिकीयानां मुक्तासम्बन्धिनीनां, मुक्ताप्रसविशीलानामिति यावत्, अपां जलानाम्। ताम्रपर्णी नदीभेदः। ताम्रपर्णी मुक्तोत्पत्तिक्षेत्रमिति प्रसिद्धिः।

शुक्तिकेति।—शुक्तिकानां मुक्तास्फोटानां, मुक्ताग्रहणानामित्यर्थः, "मुक्तास्फोटः स्त्रियां शुक्तिः" इत्यमरः; गर्भेण मध्यस्थ, सम्बन्धेन सम्पर्केण च, गर्भेषु स्त्रिया इत्यर्थः, स्तम्भिताः पिण्डीभूताः, घनीभूता इति यावत्, अम्भाः ताम्रपर्ण्याः, प्रसूतयः समुद्भवाः, यदा—प्रसूतयः तनयाः, तनयस्वरूपा इत्यर्थः, ताम्रपर्णीतः समुद्भूता इति यावत्, "प्रसूतिरुद्भवेऽपि स्यात् तनये दुहितर्यपि" इति मेदनी; तोयबिन्दवः जलकणाः, मुक्ताफलरूपेण परिणता इति भावः, सुभ्रुवां सुन्दरीणाम्, अङ्गात् क्रोडात्, अङ्गं क्रोडं, भ्रमन्ति विचरन्ति, एतस्याः समीपात् अन्यस्याः समीपं, तस्याः समीपात् अन्यस्याः समीपं गच्छन्तीति भावः, सुभ्रुवाम् अङ्गानि अलङ्कुर्वन्तीति निष्कर्षः। अनुष्टुप् वृत्तम्॥ ८१॥

युवतीति।—इह अस्मिन् स्थाने, ताम्रपर्ण्याः नद्याः, अम्भांसि जलानि, उद्भूतैः सञ्जातैः, जन्मान्तरीयैरिति भावः, युवतीनां तरुणीनां, कुचा स्तनाः, तेषां भोगः सम्भोगः, तदुपर्यवलम्बनरूप इति भावः, तस्य कर्मभिः कार्यैः, यैः कर्मभिः युवतिकुचभोगः सम्पद्यते तादृशैः सुचरितैः कर्मभिर्हेतुभिरिति भावः, शुक्तिरेव मुक्तागार एव, सम्पुटः आवरणविशेषः, तत्र धृतानि स्थितानि सन्ति, स्थिरकरकाभावं कठिनवर्षोपलत्वं, "वर्षोपलस्तु करका" इत्यमरः; दधति धारयन्ति॥ ८२॥

दोता। अज्जउत्त ! जेट्ठेत्ति दक्खिण्णमत्तएण (ट) भग्गरदो सागरस्स भाईरहीपक्खवादो (ठ)। पेम्मसव्वस्सणीसंदो (ड) उण सहजसव्वंगमोत्तिआहरणरमणीआए (ढ) तम्मपक्खीए लक्खीअदि। *

राजा। (विदूषकान्तरं दर्शयन्)।—

रमयति मलयाचलोऽयमस्मा-
दुपनमता पवनेन मानिनीनाम्।
दयितविनयकूटसाक्षिणीभिः
स खलु सखीभिरदुष्करप्रबोधः॥ ८३॥

* आर्यपुत्र। ज्येष्ठेति दाक्षिण्यमात्रकेण भगवतः सागरस्य भागीरथीपक्षपातः। प्रेमसर्वस्वनिःस्यन्दः पुनः सहजसर्वांगमौक्तिकाभरणरमणीयायास्तामपक्षां लक्ष्यते।

(ट) ज्येष्ठेति।—ज्येष्ठा प्रथमा पत्नीति हेतोः, दाक्षिण्यमात्रकेण दक्षिणः सरलः उदारो वा, अनेकपत्नीषु समरागो नायकविशेषः इति यावत्, तदुक्तं दर्पणे—"एषु त्वनेकमहिलासु समरागो दक्षिणः क्षमितः" इति, तस्य भावः दाक्षिण्यं, तदेव दाक्षिण्यमात्रं, तेन। स्वार्थे कन्-प्रत्ययः तेन।

(ठ) भागीरथ्या गङ्गायाः, पक्षपातः अनुग्रहः, स्नेह इत्यर्थः।

(ड) प्रेमेति।—प्रेम्ना प्रियता एव, अनुराग एवेत्यर्थः, सर्वस्वं सर्वधनं, तस्य निःस्यन्दः पातः, सर्वधनमित्यर्थः, वितरणमिति यावत्, प्रेमसर्वस्वनिःस्यन्दः प्रणयवत्ता इत्यर्थः।

(ढ) सहजेति।—सहजं स्वाभाविकं, सर्वेषु अङ्गेषु देहेषु, यत् मौक्तिकाभरणं मुक्ताघटितालङ्कारः, मुक्ताकपालङ्कारश्च, तेन रमणीयायाः मनोहरायाः, मुक्ताभिश्चूर्णा चित्ताकर्षिण्याश्च।

रमयतीति।—अयम् एषः, मलयाचलः मलयपर्वतः, रमयति प्रीणयति, अस्मादिति शेषः, अस्मात् मलयाचलात्, उपनमता उपगच्छता, प्रवहता इति यावत्, पवनेन वायुना, (साधनेन) दयितस्य प्रियस्य, विनयानाम् अनुनयानाम्, अनुनयसूचकोक्तीनामित्यर्थः, कूटः राशिः, समूह इति यावत्, तस्य साक्षिणीभिः साक्षात्

लक्ष्मणः। (अपे दर्शयन्)।—

स्वपाणिप्राग्भारप्रबलविततोत्तानसलिल-
स्वयंदृष्टक्रीडत्तिमिनिवहलग्नामिव घृणाम्।
दधानस्यापीतोज्झितजलनिधेरेतदपरं
पुरो लोपामुद्रासहचरमुनेराश्रमपदम् ॥ ८४ ॥

अपि चास्मिन्—

चतुरब्धिपानचेष्टादृष्टपिपासे मुनावुदयमाने।
पाययितुमिवात्मानं विशुष्य सज्जीभवन्त्यापः ॥ ८५ ॥

दृष्टीभिः, सखीभि सहचरीभिः, मानिनीना प्रणयकुपितानां प्रियाणां, खलु निश्चितं, स प्रसीदः सान्त्वनादानं, मानापनयनमिति यावत्, अदुष्करः न दुःसाध्यः, सुसाध्य इत्यर्थः। पुष्पितायां टीकायां ॥ ८३ ॥

स्वपाणीति।—स्वस्य आत्मनः, पाणिः करः, तस्य प्राग्भारेण विस्तारेण, प्रबलम् अत्यन्तं यथा तथा, विततं विस्तृतम्, उत्तानम् ऊर्ध्वगतं, यद्वा—प्राग्भारेण अग्रभागेन, प्रबलं यथा तथा विततं व्याप्तम्, आक्रान्तमित्यर्थः, गण्डूषीकर्तुम् आक्रान्तमिति भावः, अत एव उत्तानम् ऊर्ध्वभागं, पाणौ अवस्थितमिति भावः, यत् सलिलं सामुद्रोदकं, तस्मिन् स्वयम् आत्मना, दृष्टे अवलोकिते, जलगुरुत्वात् प्रथमोभूते इति भावः, क्रीडति इतस्ततः लुठति, समुद्रगर्भे इति भावः, तिमिनिवहै तदाख्यमत्स्यविशेषसमूहै, लग्नां सक्तां, सञ्जातामिति यावत्, घृणां दयां, "आक्रोशे करुणा घृणा। कृपा दयानुकम्पा स्यात्" इत्यमरः, दधानस्येव धारयत इव, जलजन्तवो पीतानुज्झिते सर्वे तिमिप्रभृतयो मज्जन्तीति अनुकम्पा कुर्वत इव इत्यर्थः, आपीतः आदौ सम्यक् पीतः, पश्चात् उज्झितः उद्गीर्णः, जलनिधिः समुद्रः येन तथाभूतस्य, लोपामुद्रासहचरस्य लोपामुद्रा नाम्न्या सुनेर्मुनेरगस्त्यस्य, एतत् इदं अपरं द्वितीयं, आश्रमपदं तपोवनं, पुरः अग्रतः, दृश्यत इति शेषः। शिखरिणी वृत्तम् ॥ ८४ ॥

चतुरब्धीति।—चतुर्णां अब्धीनां समुद्राणां चतुष्टयस्य, पानचेष्टया गण्डूषीकरण-व्यापारेण, दृष्टा अवलोकिता, पिपासा तृषा यस्य तादृशे, मुनौ अगस्त्ये, उदयमाने उद्गच्छति सति, आपः जलानि, आत्मानं स्वं, पाययितुमिव पानं कारयितुमिव, अगस्त्यमिति शेषः, विशुष्य निर्जलीभूय, सज्जीभवन्ति प्रस्तुतीभवन्ति, सज्जिताः सत्यः कथमेते इत्यर्थः, अरदि अगस्त्योदये जलानि विशदानि भवन्तीति प्रसिद्धिः। उत्प्रेक्षा-ऽलङ्कारः। आर्यावृत्तम् ॥ ८५ ॥

सुग्रीवः। (सस्मितम्)।—

ध्रुवमिह चतुरम्भोनिधिरचितापोशानकर्मणि मुनीन्द्रे।
भक्ष्यमन्यानि किमपि चकम्पिरे सप्तभुवनानि ॥ ९६ ॥

(सर्वतोऽवलोक्य सहर्षाङ्गुलम्)। अहो! चिरेणाद्य चतुर्दशलोकैक-दण्डधरे धर्मासनाधिकारिणि रामदेवे (ण) दण्डकारण्यगृह-मेधिनां (त) तपोधनानामुदयः (थ)।

रामः। (सलज्ज-स्मितं विमानवेगनाटितकेनाधोऽवलोक्य) कथं, हिरण्य-हरिणविहारकान्तारस्थलीनामुपरि (द) प्रतिष्ठामहे !! (ध)

ध्रुवमिति।—इह अस्मिन्, मुनीन्द्रे ऋषिप्रवरे, अगस्त्ये इति शेषः, चतुर्भिः चतुःसङ्ख्यकैः, अम्भोनिधिभिः समुद्रैः, समुद्रचतुष्टयजलैरिति यावत्, रचितं कृतम्, आपोशानकर्म आचमनक्रिया इत्यर्थः, गण्डूषोद्धरणमिति यावत्, येन तथाभूते सति, सप्तभुवनानि भूर्भुवः-स्वर्जन-महस्तपः-सत्यरूपाणि जगन्ति, किमपि अनिर्वचनीयरूपेणेत्यर्थः, भक्ष्यमन्यानि आत्मानं भक्ष्य मन्यन्ते इति तथोक्तानि सन्ति, चकम्पिरे कम्पितानि बभूवुः, यस्य चतुःसमुद्रं पेयं, तस्य सप्तभुवनं भक्ष्यम् अवश्यमेव सम्भवतीति भावः ॥ ९६ ॥

(ण) चतुर्दशेति।—चतुर्दशलोकस्य चतुर्दशसङ्ख्यकभुवनस्य, ऊर्द्धं भूरादि-सप्त-लोकस्य अधः अतलादि-सप्तलोकस्य च इत्यर्थः, एकस्मिन् अद्वितीये, दण्डधरे शासितरि, राजनि इत्यर्थः, "दण्डधरो यमे राज्ञि" इति हैमः, धर्मासनाधिकारिणि सिंहासनस्य न्यायसङ्गतस्वामिनि, रामदेवे देवे रामचन्द्रे, समागते सतीति शेषः।

(त) दण्डकेति।—दण्डकारण्ये दण्डकाख्यकानने, ये गृहमेधिनः गृहैर्दारैः, मेधन्ते सङ्गच्छन्ते इति तथोक्ताः तेषां, गृहमेधिना सस्त्रीकाणां, गार्हस्थ्याश्रमिणामित्यर्थः, "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति शास्त्रात् गृहशब्देन दारा उच्यन्ते।

(थ) उदयः अभ्युदयाः, इष्यन्ते इति शेषः।

(द) हिरण्येति।—हिरण्यहरिणस्य स्वर्णमृगस्य, मायाकल्पितकाञ्चनमृगरूपस्य मारीचस्येति यावत्, विहाराः विचरणस्थानानि, याः कान्तारस्थल्यः दुर्गमारण्यभूमयः तासाम्। उपरि ऊर्द्धदेशे।

(ध) प्रतिष्ठामहे वर्त्मामहे, समुपस्थिता इत्यर्थः। यद्वा—प्रतिष्ठामहे प्रस्थानं कुर्मः, गच्छाम इत्यर्थः, अस्मिन् पक्षे—उपरि ऊर्द्धभागेनेत्यर्थः।

सुग्रीवः। (सोपहासम्)। इयं सा मारीचशरीरोपहाररचितात्मनो (न) दशकण्ठस्य कपटभिक्षुवेशविडम्बनाडम्बरेकमर्मज्ञा (प) पञ्चवटी। (सादरम्)।—

विश्वामित्रमखद्विषे च वपुषा चित्रेण पत्युर्मुखा-
दप्याकृष्टविदेहराजतनयानेत्रारविन्दाय च।
मारीचाय नमो नमः किमपरं यस्मै कुले रक्षसां
द्वौ वारौ विभुनाऽपि दाशरथिना चक्रे ततज्यं धनुः॥ ९७॥

(सीता लज्जते)।

(न) मारीचेति।—मारीचश्च तदाख्यश्च राक्षसानुचरश्च, शरीरमेव देह एव, उपहारः उपढौकनं, तेन रचितः त्रातः, आत्मा स्वं, शरीरं इत्यर्थः येन तथोक्तस्य। "आत्मा पुंसि स्वभावे च···शरीर-ब्रह्मणोरपि" इति मेदिनी।

(प) कपटेति।—कपटेन मायाकल्पितेन, भिक्षुवेशेन परिव्राजकनेपथ्येन, या विडम्बना वञ्चना, तस्या डम्बरस्य विस्तारस्य, एका अद्वितीया, मर्मज्ञा सारभिज्ञा, तत्त्वज्ञेति यावत्; यद्वा—कपटेन यः भिक्षुवेशः, तस्य विडम्बनम् अनुकरणं, तस्य आडम्बरः समारम्भः, आधोजनमित्यर्थः, "आडम्बरः समारम्भे गजगर्जित-तूर्ययोः" इति मेदिनी; तस्य एका मर्मज्ञा रहस्यज्ञा, रावणकृतकपटभिक्षुवेशप्रकारस्य अभिप्रायाभिज्ञा इत्यर्थः, अनेन तथाविधवेशपरिग्रहादिति भावः।

विश्वामित्रेति।—विश्वामित्रस्य मखः यज्ञः, तं द्वेष्टि विनष्टीति तथोक्ताय च, विश्वामित्रस्य यज्ञविघ्नकारिणे, चित्रेण अद्भुतेन, विस्मयजनकेनेत्यर्थः, वपुषा शरीरेण, कामनमयेनेति भावः, पत्युः भर्तुः, रामस्येत्यर्थः, मुखादपि वदनादपि, मुखं परित्यागधिक्कारोत्यर्थः, अवज्ञामेतदित्यपि-ग्रन्थार्थः, आकृष्टम् आत्तिम्, विदेहराजतनयायाः सीतायाः, नेत्रारविन्दं नयनकमलं येन तथाभूताय च, सीता पतिविरहिणीं कृतवते इति भावः, मारीचाय तदाख्यराक्षसाय, नमः नमः, अस्तु इति शेषः, पुनः पुनरत्यन्तमीत्यर्थः, किम् अपरम् अन्यत्, वक्तव्यमिति शेषः, रक्षसां निशाचराणां, कुले वंशे, विभुना प्रभुणा, दाशरथिनाऽपि रामेणापि, यस्मै मारीचाय, यदुद्देश्यीकृत्येत्यर्थः, द्वौ वारौ, यद्वा—यस्मै यदर्थं, यन्निमित्तमित्यर्थः, यस्य मारीचस्य कार्यमुद्दिश्येति भावः, विभुनाऽपि प्रभुणाऽपि, एकेनैव वारेण राक्षसकुलविनाशाय समर्थेनापीति भावः, दाशरथिना रामचन्द्रेण, रक्षसां कुले निशाचरवंशविनाशायेत्यर्थः, द्वौ वारौ

राम । (प्रस्रवणाचलं दर्शयन् सीतामपवार्य)। देवि !—

नक्तं रत्नमयूखपाटलमिलत्काकोलकोलाहल-
व्याप्तक्रौञ्चिकभुक्तकन्दरतमाः सोऽयं गिरिः श्रूयते ।
यत्राकृष्टकुचांशुके मयि रुषा वस्त्राय पत्राणि ते
चिन्वन्त्या वनदेवतास्तरुलतामुच्चैर्व्यधुः कौतुकात् ॥ ९८ ॥

वारद्वयं, खर-दूषणादिविनाशाय दण्डकारण्ये वारमेकं, रावणादिविनाशाय लङ्कायां वारमेकमित्यर्थः, बहु. अरासनं, ततो विस्तृता, आकृष्टा इत्यर्थं, ज्या गुणः यत्र सादृशं, चक्रे कृतम् अतिसत्त्ववान् महाभाग्यशाली सर्वेषु राक्षसेष्विति पुनः पुनर्धनुस्संस्कारकौशल्य इति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ ९७ ॥

नक्तमिति।—नक्तं रात्रौ, रत्नानां मणीनां, मयूखाः किरणाः, तेषां पाटलः श्वेतरक्तगुणः, "श्वेतरक्तस्तु पाटलः" इत्यमरः; तथा मिलता सङ्गच्छता, काकोलानां द्वीपिकाकानां, "द्वीपिकाकस्तु काकोलः" इत्यमरः; कोलाहलः कलरवः ताभ्यां, व्याप्ताः विस्तृताः, क्रौञ्चिकैः, पेचकैः, पर्वतीयरत्नप्रभया दिवसभ्रमेण काकसङ्घेन च पेचकानां वास इति भावः, यद्वा—रत्नानां मयूखाः किरणाः, तेषां पाटलेन श्वेतरक्तगुणेन, श्वेतरक्तप्रभयेत्यर्थः, मिलता सङ्गच्छमानम्, अरुणोदयकालिकप्रभावत् आरक्तमणिप्रभया सहागता इति भ्रमेण एकत्र सङ्गतानामिति भावः, काकोलानां द्वीपिकाकानां, पेचकप्रभृतीनामिति भावः, कोलाहलेन 'का का' इति कलकलेन, विश्रान्ति क्रौञ्चिकैः, उलूकैः, पेचकैरित्यर्थं, "मङ्गल्यगुग्गुलूलूक-व्याघ्रयाडिषु क्रौञ्चिकः" इत्यमरः; भुक्तं सेवितम्, आश्रितमित्यर्थः, कन्दरतमः गुहाख्यं तिमिरं यस्य तथाभूतः, सः पूर्वदृष्टः, अयम् एषः, गिरिः पर्वतः, प्रस्रवणः इति यावत्, श्रूयते स्मरणविषयीक्रियते, सर्वैरिति शेषः, यद्वा—श्रूयते ? स्मरणविषयीक्रियते ? त्वयेति शेषः यत्र गिरौ, मयि आकृष्टम् आश्लिष्टम्, अपसारितमित्यर्थः, कुचयोः स्तनयोः, तवेति शेषः, अंशुकं वसनं येन तथाभूते सति, रुषा कोपेन, वस्त्राय वसनाय, कुचाच्छादनाय इति भावः, पत्राणि दलानां पर्णानि, चिन्वन्त्याः सङ्गृह्णन्त्याः, ते तव, वनदेवताः अरण्याधिष्ठात्र्यः दैव्यः, कौतुकात् सकौतुकं कर्तुमित्यर्थः, तरुलतानां तरुक्षितां लतानाम्, उच्चैः ऊर्ध्वं, व्यधुः विदधतुस्म, ऊर्ध्वं कौतुकं कृतवत्य इत्यर्थः, यथा त्वया पत्रं चेतुं न शक्यते तथा कृतवत्य इति यावत्। शार्दूलविक्रीडितं वृत्तम् ॥ ९८ ॥

सीता। (स्वयमाना कपोतदम्पतं (फ) कृत्वा)। भअवदीओ जणट्ठाण-देवदाओ! एसा वो परिचारिआ जाणई पणमदि। *

रामः। (अग्रतो दर्शयन्)। देवि! वन्दस्व भगवतीमितो (ब) गोदावरीम्। (जनान्तिकम्)।—

एतस्याः पुलिनोपकण्ठफलिनीकुञ्जोदरेषु स्रजं
कृत्वा किंशुककोरकैरकरजक्रीडासहिष्णुस्तने।
दत्त्वा वक्षसि ते मयि प्रहसति प्रौढ़ापराधे तदा
कौमारव्रतभङ्गरोषितमपि स्मेरं तवासीन्मुखम्॥ ९९॥

(सीता सलज्ज-स्मितं मुखमवनमयति, नमति च गोदावरीम्)।

* भगवत्यो जनस्थानदेवताः! एषा वः परिचारिका जानकी प्रणमति।

(फ) कपोतदम्पतं कपोतवत् दम्पती: तं कृत्वा, शिरसि अञ्जलिं बद्ध्वेत्यर्थः; यद्वा—कपोतदम्पतः दम्पतस्त्रविशेषः, उक्तञ्च सङ्गीतसर्वस्वे—"पार्श्वद्वयसमाश्लेषात् कपोतः सर्वजोषके। विनयोपगमे प्रीते भर्त्रे सम्भाषणे गुरोः। वयःस्वभावतो स्नेहः कथितस्तु कपोतवत्॥" इति तम्।

(ब) इतः अस्मात् स्थानात्, अस्मिन् पार्श्वे वा।

एतस्या इति।—एतस्याः अस्याः, गोदावर्याः इत्यर्थः, पुलिनं जलमध्यादुत्थितः तटभागः, "तोयोत्थितं तत् पुलिनम्" इत्यमरः; तस्य उपकण्ठे समीपे, "समीपे निकटासन्न-सन्निकृष्टसनीडवत्। उपकण्ठान्तिकाभ्यर्णा—" इत्यमरः; यः फलिनीकुञ्जः प्रियङ्गुलतावेष्टितस्थानं, "प्रियङ्गुः फलिनी फली" इत्यमरः; तस्य उदरेषु अभ्यन्तरेषु, किंशुककोरकैः पलाशकलिकाभिः, "पलाशे किंशुकः पर्णः" इति, "कलिका कोरकः पुमान्" इति चामरः, स्रजं मालां, कृत्वा विरच्य, करजक्रीडा नखक्षतं, तत्सहिष्णु सोढुं क्षमो न भवत इति अकरजक्रीडासहिष्णू रतिक्रीडाया नखाघातवेदना सोढुमक्षमौ, स्तनौ कुचौ यत्र तादृशे, ते तव, वक्षसि उरसि, दत्त्वा निधाय, प्रौढः कृतः, अपराद्धः येन, यद्वा—प्रौढः प्रगल्भः, प्रकर्षं प्राप्त इत्यर्थः, अपराधः आगः; यस्य तथाभूते, "प्रगल्भं प्रौढमेधितम्" इत्यमरः; मयि प्रहसति हास्यं कुर्वति सति, किंशुककलिका हि वक्रहृदया नखक्षताकारा भवति, तथा च, यथा तवेयं स्तनीपरि किंशुककलिका शोभते, तथा मम नखक्षतानि शोभन्ते इति धिया हासकारणेन अपराधिनि सतीति भावः,

रामः। (परिक्रम्यावलोकितकेन सखेदम्)। देवि!—

अस्मिन् माल्यवतस्तटीपरिसरे कादम्बिनीडम्बरः
स स्थूलङ्करणो मदश्रुपयसामासीदवर्षन्नपि।
यद्धारावलितैर्न शाखिभिरपि त्वत्पालितैर्मा तथा
दृष्ट्वा कन्दलितं न केकिभिरपि प्रारब्धि सङ्गीतकम् ॥१००॥

सीता। (सन्युगद्गदकण्ठयथिलस्वरा (म) पुत्रकं प्रति)। त्रिमाणराम!

दा तस्मिन् समये, कौमारव्रतस्य कुमारिकाया व्रतस्य, ब्रह्मचर्य्यावलम्बनरूपस्य नियमस्य वा, सुरतसम्भोगवर्जनरूपस्येति भावः, भङ्गेन खण्डनेन, रोषितं कोपितमपि, तव मुखं वदनं, क्षीरं मन्दहसितम्, आसीत् अभूत्। आर्द्रचरितकीर्तितं उत्तरम् ॥९९॥

अस्मिन्निति।—माल्यवतः तदाख्यगिरेः, अस्मिन् परिदृश्यमाने, तटीपरिसरे तटस्य पर्य्यन्तभूमौ, पार्वत्यभूभागस्य प्रान्तदेशे इत्यर्थः, "पर्य्यन्तभूः परिसरः" इत्यमरः; सः पुरोभूतः, कादम्बिनीडम्बरः मेघमालाडाः समारम्भः, मेघमालाडम्बर इत्यर्थः, "कादम्बिनी मेघमाला" इत्यमरः; अवर्षन्नपि वृष्टिमकुर्वन्नपि, मम अश्रुपयसां नेत्रजलानां, स्थूलङ्करणः अस्थूलं स्थूलं क्रियते अनेनेति तथोक्तः, अत्यर्थं वृद्धिकारकः इत्यर्थः, आसीत् अभूत, मेघमालादर्शनेन त्वद्विरहार्त्तस्य मम मुधाऽश्रुपातः समभवदिति भावः, मा तथा प्रबलतया अश्रु विमुञ्चन्त, दृष्ट्वा अवलोक्य, क्रन्दन्तं दृष्टेत्यर्थः, यस्य कादम्बिनीडम्बरस्य, धाराभिः आसारैः, अविच्छिन्नवर्षणैरित्यर्थः, वलितैः वर्द्धितैः, तथा त्वया भवत्या, पालितैः परिपोषितैः, शाखिभिरपि वृक्षैरपि, न कन्दलितं न पल्लवितं, "कन्दलः स्यात् पल्लवे च नवाङ्कुरे" इति विश्वः, केकिभिः मयूरैरपि, सङ्गीतकं केकारवमित्यर्थः, न प्रारब्धि न प्रारब्धं, न कृतमित्यर्थः, मम विरहार्त्तेन दुःखिन अचेतना वृक्षाः सचेतनाश्चित्यैश्चोऽपि दुःखिता आसन्निति भावः। आर्द्रचरितकीर्तितं उत्तरम् ॥ १०० ॥

(म) सन्युगद्गदेति।—सन्युना दैन्येन, पूर्ववृत्तान्तस्मरणजनितविषादेन इत्यर्थः; "सन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः; यद्वा—सन्युना शोकेन, प्रियस्य शोकविह्वलावस्थास्मरणजनितेनेति भावः, "सन्यु-शोकौ तु युक् स्त्रियाम्" इत्यमरः; गद्गदे बाष्पयुक्ते, कण्ठे गलदेशे, यन्त्रितः यन्त्रियुक्तः, रुद्ध इति भावः, स्वरः ध्वनिः यस्याः तथाभूता।

सीदम्हि, (म) ण दलदि ज्जेव्व वज्जमअं मे हिअअं, तधा वि तुवरेहि, एसा अंतरीअदु (य) दंडआरण्णविच्छोली। *

रामः। (विमानवेगनाटितकेन सीतां प्रति)। देवि! इदमग्रे महाराष्ट्रमण्डलैकमण्डनं (र) क्रुण्डिनं नाम नगरम्। इह हि—

अनन्यचुम्बश्रीर्मलयवनजन्माऽयमनिलो
निपीय स्वेदाम्बु स्मरमकरसम्भुक्तविभवम्।
विदर्भीणां भूरिप्रियतमपरीरम्भरभस-
प्रसङ्गाटङ्गानि द्विगुणपुलकस्रञ्जि तनुते॥ १०१॥

* विमानराज! सीताऽस्मि, न दलत्येव वज्रमयं मे हृदयं, तथाऽपि त्वरस्व, एषा अन्तरीयता दण्डकारण्यपङ्क्तिः।

(म) सीताऽस्मीति।—सीताशब्दः लाङ्गलपद्धतौ वर्त्तते, सा च प्रायश. काठिन्यं तिष्ठति, अतश्च तदुत्पन्नत्वात् कठिनप्रकृतिरेवेति भावः।

(य) दलति विदीर्य्यते। त्वरस्व त्वरितो भव, शीघ्रमित: प्रतिष्ठस्व इति भावः। अन्तरीयताम् अतिक्रम्यताम्, एतद्दर्शनम् अतीव शोककारणमिति भावः।

(र) महाराष्ट्रेति।—महाराष्ट्रश्च देशभेदस्य, एकं केवलम्, अद्वितीयमित्यर्थः, मुख्यं वा, "एके मुख्यान्यकेवलाः" इत्यमरः; मण्डनं भूषणम्, अलङ्कारभूतमित्यर्थः।

अनन्येति।—अनन्यचुम्बश्रीः न अन्येन: परेण:, चुम्बा विदलिता, विकृतेति भावः, श्रीः सम्पद्विर्यस्य तथाभूतः, अन्यसङ्गरहित इति भावः, मलयजन्मा मलयपर्वतीयः, अयम् एषः, अनुभूयमानः इत्यर्थः, अनिलः वायुः, विदर्भीणां विदर्भदेशभवानां नारीणां, स्मरस्य कामस्य, मकरेण रचनाविशेषेण जलजन्तुविशेषकेतुना चिह्नेन, सम्भुक्तः कृतोपभोगः, अनुभूत इति यावत्, विभवः सम्पत्, अतिशय्यमिति यावत् यस्य तथोक्तं, कामावेशजनितसत्त्वोदयात् समुद्भूतमिति भावः, स्मरसाहचर्य्यात् मकरेणापि अनुभूतसुरतामर्दजनितस्वेदाधिक्यमिति वा भावः, स्वेदाम्बु घर्मजलं, निपीय पीत्वा, शोषयित्वेति यावत्, अङ्गानि अवयवाः, भूरिर्बहुल, प्रियतमश्च अभीष्टतमश्च, भर्त्तुर्नाथस्य च इत्यर्थः, परीरम्भेण आलिङ्गनेन, यः रभसः हर्षः, "रभसो वेग-हर्षयोः" इत्यमरः; तत्प्रसङ्गात् तद्योगात्, द्विगुणाः द्विराकृताः, पुलकान्येव रोमाञ्चा एव, स्रजः मालाः येषु तथोक्तानि, यद्वा—द्विगुणानि द्विराकृतानि, अधिकाधिकानीति यावत्, पुलकानि

किञ्च—

बिभ्रतीं कौशिकीं वृत्तिं सौरभोद्गारिणीं गिरः।
दूराध्वानोऽपि कवयो यस्य रीतिमुपासते ॥ १०२ ॥

विभीषणः। (दक्षिणतो दर्शयन्)। देव! प्रणम्यतामयमस्मद्-विषयलक्ष्म्याः सप्तगोदावरहारकलापैकनायको (ल) भगवान् भीमेश्वरः (व)। अयं हि—

तत्कालारभटीविजृम्भणपरिश्रान्तादिव भ्रश्यता
वामार्द्धेन तदेकशेषचरणं बिभ्रद्दृषीरवम्।

एव सजः माला येषु तानि, तनुते विस्तारयति, करोतीत्यर्थः। शिखरिणी वृत्तम् ॥ १०१ ॥

बिभ्रतीमिति।—दूराध्वानोऽपि दूरमार्गवर्त्तिनोऽपि, विभिन्नदेशीया अपि इत्यर्थः, कवयः काव्यकर्त्तारः, कौशिकीं तदाख्यां, वृत्तिं रचनावृत्तिं, बिभ्रतीं दधानां, सौरभोद्गारिणीं सुष्ठु सौन्दर्य्यशालिनीमिति यावत्, यस्य मदीयस्य, गिरः वाचः, रीतिं पदसङ्घटनाविशेषम्, उपासते सेवन्ते, आश्रयन्तीत्यर्थः। कौशिक्यादिलक्षणमुक्तं दर्पणे—"या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसङ्कुला पुष्कलनृत्यगीता। लास्योपभोगप्रभवोपचारा सा कौशिकी चारुविलासयुक्ता ॥ शृङ्गारे कौशिकी वीरे सात्वत्यारभटी पुनः। रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती ॥" इति। "चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः ॥ पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्। उपकार्या रसादीनां सा पुनः स्यात्तुर्विधा ॥ वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा। माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका। अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥" इति। अनुष्टुप् वृत्तम् ॥ १०२ ॥

(ल) अम्ब्रेति।—अम्बा नाम विषयः दाक्षिणात्यजनपदविशेषः, तस्य लक्ष्मीः श्रीः तस्याः। गोदावर्य्यः नदीविशेषाः, सप्तानां गोदावरीणां समाहारः सप्तगोदावरं, तदेव हारकलापः हारसमूहः, तस्य एकः अद्वितीयः, नायकः स्वामी मध्यमणिर्वा।

(व) भीमेश्वरः भीमो नाम दुर्ग्गेश्वरः शिवः; यद्वा—भीमो नाम कश्चित् राजा, तत्प्रतिष्ठितत्वात् तस्य दुर्ग्गेश्वरः।

तत्कालेति।—तत्काले नृत्यसमये, या चारभटी तदाख्यवृत्तिविशेषः, तल्लक्षणमुक्तं दर्पणे—"नायेन्द्रजालसङ्ग्राम-क्रोधोद्भ्रान्तादिचेष्टितैः। संयुक्ता वध-बन्धाद्यैरुद्धता-

तुल्यं चास्थिभुजङ्गभूषणमसौ भोगीन्द्रकङ्कालकै-
र्बिभ्राणः परमेश्वरो विजयते कल्पान्तकर्मान्तिकः ॥ १०३ ॥

रामः। (कृताञ्जलिः)।

नृत्यारम्भपरिश्रमद्गिरिसुतारिक्तार्द्धसम्पूर्त्तये
निर्व्यूढभ्रमिविभ्रमाय जगतामीशाय तुभ्यं नमः।
यस्मूर्ध्नः भुजगेश्वरप्रभृतिभिस्तादृग्भ्रमन्तोदिशः
पश्यद्भिर्भ्रमघूर्णमाननयनैः शान्तोऽपि न श्रद्दधे ॥१०४॥

ऽऽरभटी मता ॥ वस्तूत्थापन-सम्फेटौ सङ्घिप्तिरवपातनम्। इति भेदास्तु चत्वारः आरभट्याः प्रकीर्त्तिताः ॥ मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते। सम्फेटस्तु समाघातः क्रुद्ध-सत्वरयोर्द्वयोः ॥ सङ्क्षिप्ता वस्तुरचना 'अल्पैरितरथाऽपि वा। सङ्क्षिप्तिः स्यादिहासौ च नेतुर्नेतव्यरक्षणः ॥ प्रवेशव्यासक्तिप्राप्ति हर्षविद्रवसम्भ्रमम्। अवपातनमित्युक्तम्—"इति; आरभटी आरभो वा, यद्वा—तत्काले कल्पान्तसमये इत्यर्थः, या आरभटी नाट्य-विशेषः, रुद्रास्तताण्डवविशेष इत्यर्थः, तस्या विजृम्भणं स्फुरण, तद्धितीति यावत्, तस्मात् यः परिश्रमः श्रमं तस्मादिव, श्रमजनितात् खेदात्, अर्द्धात् च्यवमानेनेत्यर्थः, वामार्द्धेन गौरीरूपेण अर्द्धांशेन हेतुना, तत् एकांशेन: एकभागावशिष्टः, वामार्द्धांशगौरीचरण-भंगजनादिति भावः, चरणः पादः, दक्षिण इति भावः, यस्य तथाभूतं, भैरवं भीषणं, वपुः शरीरं, बिभ्रत् दधानः, भोगीन्द्रस्य वासुकेः, कङ्कालकैः अस्थिभिः, तुल्यं समम्; यद्वा—भोगीन्द्रस्य कङ्कालैः देहास्थिभिः, सास्थिदेहैरिति भावः, तुल्यं समं, सदृशमित्यर्थः, अस्थि-भुजङ्गमयम अस्थि-सर्पकृतं, भूषणम् आभरणं, बिभ्राणः धारयन्, कल्पान्ते सृष्ट्यवसाने, कर्मान्तिकः कर्मकर्त्ता, संहारक इति भावः, असौ कथितप्रकारः, परमेश्वरः भीमेश्वरः शङ्करः, विजयते सर्वोत्कर्षेण वर्त्तते। अष्टभूतविकीर्त्तितं ललितम् ॥ १०३ ॥

नृत्यारम्भेति।—नृत्यारम्भे ताण्डवोपक्रमे, परिश्रमन्त्या अत्यर्थं भीतया, नृत्य-व्यापारस्य उत्कटत्वभरणादिति भावः, गिरिसुतया गौर्या, रिक्तस्य हीनस्य, भयात् परिश्रमस्येत्यर्थः, अर्द्धस्य वामार्द्धांशस्य, सम्पूर्त्तये सम्यक् पूरणाय, पुनर्गौरीदेहसङ्गमायेति भावः, निर्व्यूढः त्यक्तः, असमाप्तश्चैव निवारितः इति यावत्, भ्रमिर्भ्रमणं खेलिकया समणं, तेन विभ्रमः विलासो येन तथाभूताय, जगता त्रिभुवनानाम्, ईशाय अधिपतये, महेश्वरायेत्यर्थः, तुभ्यं नमः, यस्य, चूडायां मुकुटे, जटाजूटस्थे

अपि च—

क्रीडानटस्य प्रलयान्धकारैः
कण्ठे निषीते तव नीलकण्ठ !।
पृथक् कबन्धं पृथगुत्तमाङ्गं
नृत्यङ्गयादेवत कालरात्रिः ॥ १०५ ॥

(सर्वे नमन्ति)।

रामः (अग्रतो दृष्ट्वा)। देवि ! द्रविडमण्डलमौलिमण्डन-माणिक्यमणिस्तवकम् (ग) इदं कात्त्यायनीनामधेयमायतनं मीन-केतनस्य (घ)। (सीतामपवार्य)। इह हि—

इति यावत्, क्षिप्ता ये भुजगेश्वरप्रभृतयः वासुकिप्रमुखाः तैः सह, तादृक् तथैव, पूर्ववदेवेत्यर्थः, भ्रमन्तीः घूर्णमानाः, दिशः पश्यन्ति अवलोकयन्ति, अत एव भ्रमेण घूर्णनेन, चक्रवत् भ्रमणेनेत्यर्थः, घूर्णमानानि भ्राम्यन्ति, नयनानि नेत्राणि येषां तैः, भ्रान्तोऽपि त्यक्तनृत्योऽपि, न मुह्यसि न विश्रम्यसि, नृत्यात् निवृत्त इति विश्वसितुं नैव शक्यते इत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ १०४ ॥

क्रीडेति।—नीलकण्ठ। हे अम्बो। प्रलयान्धकारैः कल्पान्तितिमिरैः, क्रीडा-नटस्य लीलानर्तकस्य, संहारलीलया नृत्यं कुर्वाणस्येत्यर्थः, तव कण्ठे गलदेशे, नील-वर्णे इति भावः, निषीते यसिते इत्यर्थः, आच्छादिते इति यावत्, कण्ठस्य नीलत्वेन अन्धकारे अदृश्यत्वादिति भावः, कालरात्रिः महाभैरवी, यदा—कालरात्रिः यम-भगिनी, कल्पान्तनिशा इति यावत्, भयात् त्रासात्, पृथक् नृत्यत् नृत्यं कुर्वत्, कबन्धं शिरःशून्यं देहं, पृथक् उत्तमाङ्गं शिरः, एवत दृष्टवती, प्रलयकाले महारुद्रस्य तद्वामं नृत्यतो महेश्वरस्य रजतधवलाङ्गं तथा भस्मकृष्णं अन्यतमसि परिस्फुटं दृश्यते, किन्तु विषज्वालया कृष्णवर्णस्य कण्ठदेशस्य अदृश्यमानत्वात् शिरसो दृष्ट, पृथगिव प्रतीयते, एवञ्च उत्तमाङ्गस्य कबन्धस्य च पृथक् नर्तनं बोध्यम्। उपजाति-वृत्तम् ॥ १०५ ॥

(ग) द्रविडेति।—द्रविडमण्डलस्य द्रविडदेशस्य, मौलिमण्डनं शिरोभूषणभूतं, माणिक्यमणिस्तवकं मणिमुक्तागर्भितपुष्पगुच्छतुल्यं मनोहरम्।

(घ) आयतनं स्थानम्। मीनकेतनस्य कामस्य।

खेदजलपिच्छिलाभिस्तनुभिर्यूनां च शिथिलमाश्लेषम्।
विपुलं पुलकप्रसराकापटलं झटिति प्रतिकरोति ॥ १०६ ॥

अपि च—

अभिमुखपतयालुभिर्ललाट-
श्रमसलिलैरवधूतपत्रलेखः।
कथयति पुरुषायितं वधूनां
मृदितहिमद्युतिनिर्मलः कपोलः ॥ १०७ ॥

सुधीः। (कामतो दर्शयन्)। इयमितः शृङ्गारदेवतागर्भ-गृहमवन्तिविषयशोभन्तमौक्तिकम् (स) उज्जयिनीनाम राजधानी।

खेदेति।—यूनां तरुणानां स्त्री-पुंसानां, विपुलं महत्, पुलकप्रसराकापटलं रोमाञ्चरूपप्रसराकासमूहः, खेदजलैः घर्मांभोभिः, पुलक-खेदजलयोः सत्त्वोद्रेकात् तद्धर्म इति बोद्धव्यं, पिच्छिलाभिः विज्जलाभिः, क्लिन्नाभिरिति यावत्, तनुभिः शरीरैः, आश्लेषम् आलिङ्गनं, झटिति सहसा, त्रिविधं श्रमम्, अङ्गभित्यर्थः, प्रतिकरोति अनयतीत्यर्थः। आर्या छन्दः ॥ १०६ ॥

अभिमुखेति।—अभिमुखे सम्मुखे, निजदेशे इत्यर्थः, मुखं वदनम्, अभि लक्षीकृत्य अभिमुखम् इत्यर्थो वा, पतयालुभिः पतद्भिः, अवरोहद्भिरित्यर्थः, ललाटश्रमसलिलैः भाल-निस्तस्वेदजलैः, अवधूता विलुप्ता, पत्रलेखा पत्रावलीरचना यस्मात् तथाभूतः, मृदितः विप्लुष्ट इति यावत्, निष्प्रभीकृत इति भावः, यो हिमद्युतिश्चन्द्रः, तद्वत् निर्मलः शुभ्रः, यथा—मृदितः दलितः, यः हिमः तुषारः, तद्वत् द्युतिवत् प्रभेव, निर्मलः स्वच्छः, वधूनां सीमन्तिनीनां, कपोलः गण्डदेशः, पुरुषायितं रतौ पुरुषवत् आचरितं, विपरीत-रतमित्यर्थः, कथयति प्रकटयतीति यावत्। पुष्पितायां छन्दः ॥ १०७ ॥

(स) शृङ्गारेति।—शृङ्गारस्य उज्ज्वलरसस्य, देवता अधिष्ठात्रीत्यर्थः, कामदेव इति यावत्, तस्य गर्भगृहम् अभ्यन्तरस्थप्रकोष्ठम्, अत एव पुरस्कृतमिति यावत्। अवन्तीति।—अवन्तिरेव विषयः जनपदः, तस्य शोभने शोभारचनायां, स्थिता विभक्तेत्यस्य मध्यवर्तिस्थाने इत्यर्थः, मौक्तिकं मुक्ताफलरूपम्, अतीव रम्यदर्शनमिति भावः।

इह हि—

कामितुरभिसृत्वरीणां गौराङ्गीक्षामिहेन्दुगौरीषु ।
उड्डयमानानामिव रजनिषु परमोच्यते छाया ॥ १०८ ॥

अपि च—

अधस्तात् सौधानामिह हि चरतामिन्दुकिरणान्
घनोदञ्चच्चूपुटनिहितनेत्रा युवतयः ।
चकोराणां ज्योत्स्नारसकुतुपकौतूहलकृता-
मुदीक्षन्ते नक्षत्तिमिरविशदाभोगमुदरम् ॥ १०९ ॥

अपि च—

इह युवतिवदनकान्तिभिराप्यायिततुन्दपरिमृजः शेते ।
भुक्तापभुक्तहिमरुचिमरीचिरन्तःपुरचकोरः ॥ ११० ॥

कामितुरिति ।—इह उज्जयिन्याम्, इन्दुगौरीषु चन्द्रकिरणोज्ज्वलासु, रजनिषु रात्रिषु, कामितुः कामिनः, सम्भोगे रतिं प्रीतेः, अभिसृत्वरीणाम् अभिसरन्तीनां, गौराङ्गीणां गुक्लावयवानां, गौरवर्णानां नायिकानामिति यावत्, उड्डयमानानामिव पक्षिणामिव, परं केवलं, छाया प्रतिबिम्बं, न तु शरीरमिति भावः, दृश्यते इष्यते, जनैरिति शेषः, यतो गौराङ्गीनां चन्द्रकिरणैरपहृता इति भावः । आर्या छन्दः ॥१०८॥

अधस्तादिति ।—इह उज्जयिन्यां, युवतयः तरुण्यः, सौधानां हर्म्याणाम्, अधस्तात् अधोभागे, इन्दुकिरणान् चन्द्रमयूखान्, चरतां सेवमानानां, पिबतामिति यावत्, यद्वा—इन्दुकिरणान् चरतां गच्छतां, चन्द्रकिरणान् पातुं विचरतामित्यर्थः, ज्योत्स्ना एव चन्द्रिका एव, रसः द्रवविशेषः, तस्य कुतुपः चर्मनिर्मितालवालोद्देशः, तेषां पृक्षतादि-रक्षार्थं चर्मनिर्मितक्षुद्रपात्रमित्यर्थः, "कुतुः स्यात् लेहपात्रं सेवाल्पा कुतुपः पुमान्" इत्यमरः ; तस्मिन् कौतूहलं कौतुकम्, अभिलाषमिति यावत्, कुर्वन्तीति तथोक्तानां, चकोराणां पक्षिभेदानां, घनं बारंबारं यथा तथा, उदञ्चत् विकसत्, यद्वा—उद्गच्छति, व्यक्तीभवतीत्यर्थः, चञ्चुपुटे पुटाकारौष्ठद्वये इत्यर्थः, निहितं निवेशितं, नेत्रं नयनं याभिः तथोक्ताः सत्यः, नक्षत्तिमिरं नक्षत्रान्धकारं यस्मात् तथाभूतः, विशदः विमलः, आभोगः पारपूर्णता यस्य तादृशम्, उदरं जठरं, चकोराणामिति पूर्वेणान्वयः, उदीक्षन्ते पश्यन्ति । शिखरिणी छन्दः ॥ १०९ ॥

इहेति ।—इह उज्जयिन्याम्, अन्तःपुरचक्रचरः अन्तःपुरवर्ती चकोराख्यपक्षि-विशेषः, भुक्ता अपभुक्ताः वा पीताः अर्द्धपीता वा इत्यर्थः, हिमरुचयश्चन्द्रस्य, मरीचयः

विलोक्यः। इच्छैवायमलकायाः शाखानगरगौरवभाजि त्रिपुरदहनाधिष्ठानप्रतिष्ठो भगवान् महाकालनाथः (इ)। अयं हि—

उद्दामभ्रमिवेगविस्तृतजटावल्लीप्रणालोपतत्-
स्वर्गङ्गाजलदण्डिकावलयितं निर्माय तत्पञ्जरम्।
सम्भ्राम्यद्भुजदण्डपञ्चपटलद्वन्द्वेन हंसायित-
स्त्रैलोक्यव्ययनाटिकानयनटः स्वामी जगत्त्रायताम्॥ १११॥

रामः। (प्रञ्जलिं.)।—

नमस्तुभ्यं देवासुरमुकुटमाणिक्यकिरण-
प्रणालीसम्भेदस्नपितचरणाय स्मरजिते।

किरणाः येन तथाभूतोऽपि, युवतीनां तरुणानां, वदनकान्तिभिः, मुखशोभाभिः, आप्लावितः स्नातः, परिप्लुत इत्यर्थः, अत एव तुन्दपरिमृजः अलसः सन्, "मन्दस्तुन्द-परिमृज आलस्यः शीतकोऽलसोऽतुणः" इत्यमरः, शेते स्वपिति। आर्यां इत्तम्॥११०॥

(इ) अलकायाः कुबेरनगर्याः। शाखानगरस्य मूलनगरादन्यस्य पुरस्य, अलकायाः समीपवर्त्तिनगरान्तरस्येत्यर्थः, "—अन्यत्तु यत् मूलनगरात् पुरम्। तच्छाखानगरम्" इत्यमरः; गौरवं समादरं, भजते प्राप्नोतीत्यर्थः, इति तथोक्तायाम्। त्रिपुरेति।—त्रिपुरदहनस्य हरस्य, अधिष्ठानेन आविर्भावेण, प्रतिष्ठा गौरवं यस्य तथोक्तः। महाकालनाथः, तदाख्यशिवमूर्त्तिः।

उद्दामेति।—उद्दामा उच्छृङ्खला, या भ्रमिः भ्रमणं, नर्त्तनमिति भावः, तस्याः वेगेन आतिशय्येन, विस्तृता प्रसारिता, विमुक्ता इति यावत्, जटावल्ली एव लतेव लम्ब-मानसंयतकेशराशिरेव, प्रणाली पयसः पदवी, जलनिर्गमपथः इत्यर्थः, "द्वयोः प्रणाली पयसः पदव्याम्" इत्यमरः; तस्याः पतन्त्याः स्रवन्त्याः, या स्वर्गङ्गा मन्दाकिनी, तस्या जलान्येव सलिलान्येव, दण्डिकाः शलाकाः, ताभिः वलयितं वेष्टितं, तत्पञ्जरं तस्य हंसस्य, पञ्जरं पिञ्जर, पञ्जरस्वरूपमिति भावः, निर्माय रचयित्वा, सम्भ्राम्यत् सञ्चलत्, इतस्ततो विक्षिपदित्यर्थः, भुजदण्ड एव बाहुयष्टिरेव, पञ्चपटलद्वन्द्वं पञ्चसमूह-युगलं, तेन हंसायितः हंसवत् आचरितः, तथा त्रैलोक्यस्य जगत्त्रयस्य, व्ययः नाश एव, नाटिका नाट्यं, तस्या नये अभिनये, नटः अभिनेता, स्वामी प्रभुः, महाकालः इति यावत्, जगत् भुवनं, त्रायतां रक्षतु। शार्दूलविक्रीडितं इत्तम्॥ १११॥

महाकल्पस्वाहाकृतभुवनचक्रेऽपि नयने
निरोद्धुं भूयस्तत्प्रहरमिव कामं हुतवते॥ ११२॥

किञ्च—

वेगादगात् देव! तव त्रिनेत्र!
युग्मेतरस्मान्नयनात् कृशानुः।
कामे तु सम्मोहनशस्त्रहस्ते
स्वाहामनुध्याय चिरं जडोऽभूत्॥ ११३॥

(इति नेपथ्ये)।

सीता। (विहस्य)। अहो! तत्यभवदो ससहरसेहरस्स

नम इति।—दैवासुराणां सुरदानवानां, मुकुटेषु किरीटेषु, यानि माणिक्यानि रत्नविशेषाः, तेषां किरणा एव अंशव एव, प्रभालोलसन्भेदाः पद्मपदवीस्फुटनं, विदीर्णजलनिर्गमपथनिःसृतपद्मानीति भावः, "भेदः स्फुटने सङ्घे" इति मेदिनी; तैः खचितौ अभिषिक्तौ, आर्द्रीकृतौ इत्यर्थः, प्रक्षालितौ इति यावत्, चरणौ पादौ यस्य तथोक्ताय, महाकल्पे महाप्रलये, "संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि" इत्यमरः; स्वाहाकृतं हुतं, भुवनचक्रं जगन्मण्डलं यस्मिन् तादृशेऽपि, नयने नेत्रे, तृतीये इति शेषः, भूयः पुनः, तस्य नयनस्य, सम्मोहनभुवनस्येति भावः, प्रहरं विलम्बनं, यद्वा—तस्य भुवनचक्रस्य, प्रहरं विनाशं, पुनः सृष्टिमिति भावः, निरोद्धुमिव प्रतिहन्तुमिव, कामं मदनं, हुतवते होमविषयं कृतवते, स्मरजिते कामारये, महादेवाय इत्यर्थः, तुभ्यं नमः। त्रिखरिणी छन्दसम॥ ११२॥

वेगादिति।—हे देव! त्रिनेत्र! हे त्रिलोचन! तव भवतः, युग्मेतरस्मात् अयुग्मात्, तृतीयादित्यर्थः, नयनात् लोचनात्, कृशानुः अग्निः, वेगात् सवेगम्, अगात् निरगच्छत्, तु किन्तु, सम्मोहनं नाम यत् शस्त्रं पञ्चबाणात्मकं बाणविशेषः, हस्ते पाणौ यस्य तथाभूते, कामे मदने, स्वाहां निजपत्नीम्, अनुध्याय स्मृत्वा, चिरं दीर्घकालं, जडः मन्थरः, निष्क्रिय इति यावत्, अभूत् अजायत, कामबाणविद्धः सन् पत्नीं स्वाहां स्मरन् विमूढ आसीदिति भावः, अत्र कामं दग्ध्वा चिरेण शान्तिमलभतेति भावः। इन्द्रवज्रा छन्दसम॥ ११३॥

कवलितचतुर्दशभुवनस्य (क) विगतपलायिता अक्षिबुभुक्षा,
(ख) जेन भअवं मअणो वि विआलिअग्गासोकिदो * (ग)।
(सर्वं दृश्यते)।

राम:। (सविनयम्)। अस्य हि भगवत:,—

वाणीभूतपुराणपूरुषधृतिप्रत्याशया धावितै
र्विद्राति स्फुरदाशुशुक्षणिकणक्लान्ते शकुन्तेश्वरे।
नम्रोन्नम्रभुजङ्गपुङ्गवगुणव्याकृष्टवाणासन-
च्चिन्नास्यस्य पुरद्रुहो विजयते सन्धानसीमाश्रम:॥ ११४॥

* अहो! तत्रभवत: प्रणधरशीखरस्य कवलितचतुर्दशभुवनस्यापि न पलायिता अक्षिबुभुक्षा, येन भगवान् मदनोऽपि विकालिकयाऽवलोकित:।

(क) प्रणधरशीखरस्य चन्द्रचूडस्य। कवलितेति।—कवलितानि यसितानि, चतुर्दश भुवनानि जगन्ति येन तादृशस्य।

(ख) पलायिता निर्गता। अक्षिबुभुक्षा दृष्टिक्षुधा।

(ग) विकालिकयाऽवलोकित: विकाले असमये भव: वैकालिक:, असामयिक:, स चासौ दाह: कवलनेति विकालिकयादाह:, अवैकालिकयादाहो वैकालिकयादाह: कृत इति तथोक्त:, अथवा—मध्याह्ने कृताहारस्य वैकाले यथा यत्किञ्चित् स्वल्पभोजनं, तथा देवस्यापि सर्वंसगत भक्षितवत: कामदेवस्यापि स्वल्पद्रव्यभक्षकमिति भाव:।

वाणीति।—वाणीभूतस्य शरस्वरूपस्य, पुराणपूरुषस्य नारायणस्य, धृतौ धारणे, वहने इति यावत्, या प्रत्याशा वाञ्छा, तया धावितै: चलितै:, किन्तु स्फुरद्भि: ज्वलद्भि:, आशुशुक्षणे: अग्ने:, नेत्रानलस्येति यावत्, "आशुर्वैश्वानरो वाडवर्वीतिहोत्रो धनञ्जय:।...शिखावानाशुशुक्षणि:॥" इत्यमर:; क्षणे: स्फुलिङ्गै:, क्लान्ते म्लाने, दहनभयात् आर्ते इति भाव:, शकुन्तेश्वरे पक्षिराजे गरुडे, नारायणस्य वाहने इति भाव:, विद्राति अपगच्छति सति, दूरमपसरति सतीत्यर्थ:, नम्र: नत:, आनत-मस्तक इत्यर्थ:, गरुडापातभयादिति भाव:, उन्नम्र: उन्नतमस्तक:, गरुडापगमनादिति भाव:, यो भुजङ्गपुङ्गव: सर्पराज: वासुकि:, स एव गुण: मौर्वी, तेन व्याकृष्टं विशेषाकृष्टम्, आकर्णाकृष्टमित्यर्थ:, यत् वाणासनं शरासनं, धनुरित्यर्थ:, तेन छिन्नं पातितम्, अस्त्रं बाणो येन तथाभूतस्य, पुरद्रुह: त्रिपुरारे:, सन्धानं शरसंयोजनं, तदेव सीमा पर्यन्त: यस्य तथाभूत:, श्रम: आयास:, दोषाग्निनैव त्रिपुरभस्मीकरणात्

(अन्यतो दर्शयन्)। इयं च कलचुरिकुलनरेन्द्रसाधारणाग्रमहिषी (घ) माहिष्मती नाम चेदिमण्डलमुण्डमाला (ङ) नगरी। इह हि—

आश्लेषचुम्बनरतोत्सवकौतुकादि-
क्रीडादुरोदरपणप्रतिभूरनङ्गः।
भोगस्तु यद्यपि जये च पराजये च
यूनोर्मनस्तदपि वाञ्छति जेतुमेव ॥ ११५ ॥

ग्रस्तस्थानाय यमनाय: जात:, न तु ग्रसनिर्वेषाय इति भाव:, यद्वा—स्वस्थानाद ग्रस्योज्जनाय, या सीमा स्थिति:, आखोट-प्रत्याखोटभावेनावस्थानमित्यर्थ:, "सीमा-ऽऽघाटस्थितिवेलेष्वण्डकोषेऽपि च स्त्रियाम्" इति मेदिनी; तया यम: तज्जन्यश्चान्ति:, विजयते सर्वोत्कर्षेण वर्तते। त्रिपुरदाहे विष्णु. शर: वासुकिश्च गुणो हस्त इति पुराणवार्त्ता। शार्दूलविक्रीडितं वृत्तम् ॥ ११४ ॥

(घ) कलचुरीति।—कलचुरिकुलं तदाख्यं चत्रियकुलं, तत्र ये नरेन्द्रा राजान:, तेषां साधारणी सामान्या, सर्वभोग्या इत्यर्थ:, अग्रमहिषी ज्येष्ठा महिषी, परिणयात् प्रागेव राजधान्या पतित्वेनाङ्गीकारादिति भाव:।

(ङ) चेदिमण्डलस्य चेदिराज्यस्य, मुण्डमाला मुण्डस्य मस्तकस्य, माला माल्य-स्वरूपिणीत्यर्थ:, शिरोभूषणभूतेति यावत्।

आश्लेषेति।—अनङ्ग. काम:, आश्लेष: आलिङ्गनं, चुम्बनम् अधरपानं, रतोत्सव: सुरतरूपानन्दजनकव्यापार:, तेषु कौतुकम् अभिलाष:, हर्षो वा, "कौतुकत्वभिलाषे स्यादुत्सवे नर्म-हर्षयो:" इति मेदिनी; एते आदयो यस्या: तादृशी, या क्रीडा केलिविशेष:, सैव दुरोदरम् द्यूतक्रीडाया:, पण: ग्लह:, "वाजी" इति भाषा, द्यूतक्रीडाया जय-पराजयथो: मुल्कमित्यर्थ:, "दुरोदरो द्यूतकरे पणे द्यूते दुरोदरम्" इति "पणोऽस्त्रियां ग्लह:" इति चामर:; तस्य प्रतिभू: जामिन:, विश्वासस्थानमिति यावत्, "जामिन्" इति भाषा, "स्युर्जामिका: प्रतिभुव:" इत्यमर:; यद्यपि जये च विजयलाभे च, पराजये च पराभवे च, भोग: सुख, यूनोरुभयोरेव उभयसङ्गजनित-मिति भाव:, "भोग: सुखे स्यादिभृतावहेश्च फण-कायथो:" इत्यमर:; तु अव-धारणार्थकमव्ययम्, तदपि तथाऽपि, यूनो: तरुणयो:, स्त्री-पुंसयोरिति यावत्, मन: चित्त, जेतुमेव जायतोर्जेतुमेव, न तु पराजेतुमिति भाव:, अत्यौत्सुक्यमिति शेष:, वाञ्छति अभिलषति। वसन्ततिलकं वृत्तम् ॥ ११५ ॥

(विमानवेगं रूपयित्वा) । देवि !—

दैव्या भूमेर्मृगमदमसीमण्डनं सिद्धसिन्धोः
सप्तीचीयं जयति यमुना या तटैकायवृत्तीन् ।
प्रेमोत्कर्षादिव पितृपतेर्भ्रातुराकृष्य हस्ता-
दस्ताबाधं गमयति पितुर्मण्डलं चण्डभानोः ॥ ११६ ॥

लक्ष्मणः । (दूरमङ्गुल्या दर्शयन्) ।

त्रिपुरहरकिरीटक्रीडितैः क्रीड़यद्भि-
र्भुवनमसृतभानोर्बालमित्रैः पयोभिः ।
सगरसुतचिताया पावनी तोयराशे-
रियमियमघमग्ने जाह्नवी निह्नुते न ॥ ११७ ॥

दैव्या इति ।—भूमेर्दैव्याः क्षितिदेवतायाः, मृगमदः कस्तूरी एव, मसी तया मण्डनं भूषणम्, आभरणस्वरूपमित्यर्थः, यमुनाजलस्य गाढकृष्णवर्णत्वात् तत्र पृथिव्याः मसी-भूषणत्वारोप इति भावः, सिद्धसिन्धोः खण्यायाः, यद्वा—सिद्धानां मुक्तानां, सुमुक्षूणा-मिति भावः, "सिद्धौ व्यासादिके देवयोनौ निष्पन्न-मुक्तयोः" इति हैमः, सिन्धोः नद्याः, मुक्तिदायिन्याः नद्याः, गङ्गायाः इत्यर्थः, सप्तीची सप्तचरी, इयं पुरतः प्रवहमाणा, यमुना कालिन्दी, जयति सर्वोत्कर्षेण वर्त्तते, या यमुना, तटैकायवृत्तीन् तटे तोरभूमौ, एकायाः ऐकालिकी, वृत्तिः व्यापारः, चित्तस्याकर्षणमिति यावत् येषां तादृशान्, एकायमनसा तटवर्त्तिनः, जनानिति शेषः, प्रेमोत्कर्षादिव स्नेहातिशयादिव, भ्रातुः स्वोदरस्य, पितृपतेः यमस्य, उभयोरेव सूर्यात्मजत्वादिति भावः, "धर्मराजः पितृपतिः समवर्त्ती परेतराट् । कृतान्तो यमुनाभ्राता श्राद्धदेवो यमराड् यमः ॥" इत्यमरः ; हस्तात् करात्, आकृष्य आकृष्य अत्यन्तं दूरीभूतः, आबाधः पीड़ा, विघ्न इति यावत् यत्र तद्यथा तथा, निर्विघ्नं यथा तथा इत्यर्थः, पितुः जनकस्य, चण्डभानोः सूर्यस्य, मण्डलं बिम्बं, स्वोकमिति भावः, गमयति प्रेरयति, गङ्गा यमुनयोः सङ्गमे मृतानां यमयातना नास्ति, प्रत्युत सूर्यस्वोकप्राप्तिरिति भावः । सन्दाक्रान्ता वृत्तम् ॥ ११६ ॥

त्रिपुरेति ।—त्रिपुरहरस्य शम्भोः, किरीटे मुकुटे, मुकुटरूपायां जटायामित्यर्थः, क्रीडितैः क्रीडनैः, क्रीडाभिरित्यर्थः, शम्भुना शिरसा गङ्गाया जलवेगधारणादिति भावः, अमृतभानोः सुधाकरस्य, चन्द्रस्य इत्यर्थः, बालमित्रैः बाल्यसम्भृतैः, चन्द्रस्य जलत्वादिति

रामः। (सदर्षम्)।—

गौरीविभज्यमानार्द्धसङ्कीर्णहरमूर्त्तिनि।
अम्ब! द्विगुणगम्भीरे! भागीरथि! नमोऽस्तु ते ॥११८॥

(सीतां प्रति)। देवि! वन्दस्व—

देवस्याम्बुजसम्भवस्य भवनादम्भोधिमागामुका
सेयं मौलिविभूषणं भगवतो भर्गस्य भागीरथी।

भावः, भुवनं जगत्, क्रोडयद्भिः प्रोच्यद्भिरिति यावत्, जलस्य जीवनत्वादिति भावः, पयोभिः सलिलैः, सगरसुतानां षष्टिसहस्राणां सगरतनयानां, चिता श्वदाहनचुल्ली, कपिलकोपानलेन दहनस्थानमिति यावत् तथाभूतायाः, तोयराशेः समुद्रस्य, सागरगर्भ एव कपिलकोपानलेन तेषां भस्मीभवनादिति भावः, पावनी पवित्रताकारिणी, यस्याः सङ्कल्पानात् गङ्गासागरसङ्गमस्य पवित्रतीर्थत्वादिति भावः, अग्रे पुरतः, अवस्थितेति शेषः, इयम् इयम् एषा एषा, सम्मुखे दिवक्तिः, जाह्नवी गङ्गा, नः अस्माकम्, अघं पापं, निर्धुते नाशयति। पुरा सगरेण राज्ञा अश्वमेधे प्रक्रान्ते देवेन्द्रस्तस्याश्वं हृत्वा पाताले कपिलसन्निधौ न्यधायासीत्। सगरपुत्रैश्च तदन्वेषणपरैः पृथिवीं खनद्भिः भीत्या कपिलसन्निधाने दृष्टः। ततश्च तैस्ताडितो मुनिस्तान् कोपानलेन ददाह। अथ सगरस्य दुष्प्रपौत्रेण भगीरथेन बहुभस्मपोभिर्गङ्गां समानीय तान् प्रापितसद्गान् सगरसुतान् उद्धारितेति पुराणवार्त्ता। मालिनी वृत्तम् ॥ ११७ ॥

गौरीति।—अम्ब! हे मातः। भागीरथि! गङ्गे। गौर्या पार्वत्या, विभज्यमानम् अंशीक्रियमाणं, यिद्धा कृत्वा गृह्यमाणमित्यर्थः, अर्द्धम् एकांशं यस्य तादृशे, अत एव सङ्कीर्णे स्वल्पीभूते, वामार्द्धस्य गौरीसम्बन्धत्वादिति भावः, हरस्य शिवस्य, मूर्त्तनि शरीरे, अर्द्धनारीश्वरमूर्त्तेरीश्वरभागस्य शिरसीत्यर्थः, दक्षिणार्द्धे इति भावः, द्विगुणं द्विरावृत्तं, गम्भीर गभीरता यस्याः तत्सम्बुद्धौ, सङ्कीर्णे प्रदेशे हि नद्यः स्वल्पपरिसराः, किन्तु समधिकगभीरा भवन्तीति भावः, ते तुभ्यं, नमः अस्तु, त्वां प्रणमामीत्यर्थः। अनुष्टुप् वृत्तम् ॥ ११८ ॥

देवस्येति।—अम्बुजसम्भवस्य पद्मयोनेः, देवस्य ब्रह्मण इत्यर्थः, भवनात् आवासात्, ब्रह्मलोकादित्यर्थः, ब्रह्मकमण्डलुतः गङ्गायाः भूमौ आगमनादिति भावः, अम्भोधिं समुद्रम्, आगामुका आगमनशीला, भगवतः षडैश्वर्यसम्पन्नस्य, भर्गस्य हरस्य, "हरः शरहरो भर्गः" इत्यमरः; मौलिविभूषणं शिरोभूषणभूता, सा जगत्पावनीत्यर्थः,

उद्यातानपहाय विग्रहमिह स्रोतःप्रतीपानपि
स्रोतस्तीव्रतरत्वरा गमयति द्राक् ब्रह्मलोकं जनान् ॥११९॥

स्रोता । (ऋताञ्जलिः)। अहु णिअस्रोतसिंखलासंदाणिद-तिहुअणे ! (च) मंदाइणि ! बंदिज्जसि । *

(सर्वे नमन्ति)।

ऋक्षराजः । (अन्यतो दर्शयन्)—

धनाधिनाथप्रणयानुरोधा-
दभग्नकैलासनिकेतनस्य ।
देवस्य कल्पान्तकपालपाणे-
र्वाराणसी नाम पुरी पुरस्तात् ॥ १२० ॥

रामः । (सहर्षमवलोक्य)।—

* अयि निजस्रोतःशृङ्खलासन्दानितत्रिभुवने । मन्दाकिनि । वन्दसे ।

भागीरथी गङ्गा, इयम् एषा, इह भागीरथ्या, विग्रह कलेवरम्, अपहाय त्यक्त्वा, उद्यातान् ऊर्ध्वं गतान्, परलोकं प्रस्थितान् इत्यर्थः, अथच उच्चप्रदेशं गतान्, यस्या दिशी गङ्गा आगच्छति तस्यामेव दिशि गन्तुं प्रवृत्तानित्यर्थः, अत एव स्रोतसः जलवेगस्य, प्रतीपानपि प्रतिकूलानपि, विपरीतगामिनोऽपि इत्यर्थः, जनान् स्रोकान्, स्रोतसो निम्नगामित्वात् ऊर्ध्वगमनमसम्भवमिति विरोधालङ्कारः, ऊर्ध्वं परलोकमिति तत्परिहार इति बोध्यं, स्रोतसः अपि जलवेगादपि, तीव्रतरा अतीव तीव्रा, अत्यर्था इत्यर्थः, त्वरा वेगिता यस्याः तथाभूता सती, द्राक् झटिति, "द्राक् झटित्यञ्जसाऽञ्जसा" इत्यमरः; ब्रह्मलोकं ब्रह्मरूपं लोकं, चतुर्मुखस्य आवासस्थानमिति वा, गमयति नयति । आर्द्रलविक्रीडितं वृत्तम् ॥ ११९ ॥

(च) निजेति।—निजस्रोत एव स्वकीयजलवेग एव, शृङ्खला निगडः, स्रोतोरज्जुरित्यर्थः, तया सन्दानितं बद्धं, त्रिभुवनं त्रैलोक्यं यया तथोक्ता, मन्दाकिनी-अलकानन्दा-भोगवतीरूपेण भुवनत्रयं व्याप्य स्थिता इत्यर्थः, तत्सम्बुद्धौ ।

धनाधिनाथेति।—धनाधिनाथस्य कुबेरस्य, धनाधिनाथो वा यः प्रणयः प्रेम, स्नेह इत्यर्थः, तस्य अनुरोधात् अनुवर्तनात्, प्रणयवशादित्यर्थः, अभग्नम् अखण्डितम्, अत्यक्तमित्यर्थः, कैलास एव तदाख्यपर्वत एव, निकेतनं गृहं येन तथाभूतस्य, कल्पान्ते प्रलयकाले, कपालमेव खर्पर एव, पाणौ हस्ते यस्य तथोक्तस्य, देवस्य शम्भोः,

प्लवमानैरपारोऽयं जनैः संसारसागरः ।
द्वीपे वाराणसीनाम्नि विश्रान्तैरिह तीर्यते ॥ १२१ ॥

अपि चैनां नित्यमध्यास्ते (छ) भगवान्—

कण्ठच्छायनिषीतपन्नगफणारत्नौघमावस्थितौ
हारे निर्भयपार्वतीभुजलताबन्धोल्लसत्कन्धरः ।
तत् सर्वाङ्गविरामवामनतमैरेव स्वरैः सामगं
बिभ्रत् ब्रह्मशिरः शिवाय जगतामेणाङ्कचूडामणिः ॥ १२२ ॥

वाराणसी नाम पुरी नगरी, पुरस्तात् अग्रतः, दृश्यते इति शेषः । उपजातिवृत्तम् ॥ १२० ॥

प्लवमानैरिति ।—अयम् एषः, संसार एव अविद्याजन्यसंस्कारस्वरूपवासना एव, पुनः पुनः कर्मजन्यदेहपरिग्रह एव वा, सागरः समुद्रः, प्लवमानैः सन्तरद्भिः, संसारसागरे एवेति भावः, जनैः जीवैरित्यर्थः, अपारः पारयितुमशक्यः, तर्तुमशक्य इति यावत्, किन्तु इह अस्मिन्, वाराणसीनाम्नि द्वीपे अन्तरीपे, असि-वरुणयोर्नद्योः मध्यभागे अवस्थितत्वात् वाराणस्याः द्वीपत्वमवगन्तव्यं, विश्रान्तैः कृतविश्रामैः, अध्युषितैरिति भावः, जनैरिति शेषः, तीर्यते तर्तुं शक्यते, वाराणसी सुखिभिरेवेति भावः । अनुष्टुप् वृत्तम् ॥ १२१ ॥

(छ) एनां वाराणसीम् । अध्यास्ते अधितिष्ठति ।

कण्ठच्छायेति ।—हारे हारस्वरूपे वासुकौ इत्यर्थः, कण्ठस्य गलदेशस्य, छाया कान्तिः, प्रभा इत्यर्थः, कण्ठच्छाय कालकूटभक्षणात् गलदेशस्य नीलाभा इत्यर्थः, तेन निषीतः निःशेषेण कवलितः, सम्ययूपेन नीलवर्णतामापादितः इत्यर्थः, पन्नगस्य भुजङ्गस्य, वासुकेरिति भावः, फणारत्नानां सहस्रफणासु अवस्थितानां सहस्रमणीनाम्, ओघः समूहः, तन्मालेन कण्ठस्य नीलकान्तिमालेनेत्यर्थः, अवस्थानं स्थितिः यस्य तथाभूते सति, केवलं हारस्वरूपेण, न तु वासुकिरूपेण प्रतीयमाने सतीत्यर्थः, निर्भयायाः भयविहीनायाः, पार्वत्याः गौर्याः, भुजलतायाः बन्धेन बाहुवल्लीवेष्टनेन, उल्लसन्ती शोभमाना, कन्धरा ग्रीवा यस्य तथोक्तः, अथवा गिरीश्वरदीक्षा वासुकीसङ्गावच्छाभेन भयमिति भावः, सर्वेषां निखिलानाम्, अङ्गानां अवयवानां, गिरीश्यतिरिक्तानामन्येषामवयवानामित्यर्थः, विरामेण त्यागेन, अभावेनेत्यर्थः, रुद्रेण ब्रह्मणः एकं शिरश्छित्त्वा स्वयं धारणादिति भावः, वामनतमैरेव अतिरूक्षैरेव, अतिक्षीणैरेवेत्यर्थः, स्वरैः उदात्ताद्दी-

(अग्रतो दर्शयन् सीतां प्रति)। देवि! दृश्यतामितः,—

नवोन्मीलन्मौर्वीकिणनिकरकाकेक्ष्यसदय-
प्रवृत्तस्त्वत्पाणौ किमपि निविडं पीडयति मे।
कृतार्थोऽयं यस्या समजनि करः सैव पुरतः
पुरो पूर्वेषा ते नयनमियमालानयति नः॥ १२३॥

सीता। (साध्वसानुरागं साचीकृताक्षी (ज) रामं पश्यन्ती पुरीं प्रति)। अंब मिहिले! वंदिज्जसि। गुरुजणे वि वंदणं मे विस्सवेसि।*

रामः। (सुग्रीव-विभीषणौ प्रति)। वयस्यौ! इयं सा जानकी प्रजायमानाया (झ) भगवत्या भूमेररिष्टमन्दिरं (ञ) मिथिला।

---

* अम्ब मिथिले। वन्द्यसे। गुरुजनेऽपि वन्दनं मे विश्रावयिष्यसि।

नामन्यतमैरित्यर्थः, सामगं सामवेदगायनं, तत् प्रसिद्धं, ब्रह्मणः चतुराननस्य, शिर मुण्डं, स्रेणेव लुब्धमिति भावः, बिभ्रत् दधान, एषाऽचूडामणिः, सदाशिवशेखरः चन्द्रशेखरः शिव इत्यर्थः, जगतां लोकाना, लोकत्रयनिवासिनामिति यावत्, शिवाः मङ्गलाय, अस्त्विति शेषः। शार्दूलविक्रीडितं वृत्तम्॥ १२२॥

नवेति।—यस्या पुर्याः, नवं नूतन यथा तथा, उन्मीलन् उद्भवन्, मौर्वीकिणनिकर मौर्वी धरधनुर्गुणः, तस्याः किणनिकरः युक्तमासवन्थिसमूहः, मौर्वीघर्षजनित इति भावः, तस्य कार्कश्यात् काठिन्यात्, सदयं सकृपं यथा तथा, मृदु यथा तथेत्यर्थः प्रवृत्तः उद्यतः, त्वत्पाणि यद्दीतुमिति शेषः, मे मम, अयम एषः, करः पाणिः, त यादृशो करे, किमपि अनिर्वचनीयं यथा तथा, निविडं दृढ, पीडयति निष्पेषयति, कृतार्थः कृतकृत्यः, सफल इत्यर्थः, समजनि सञ्जातः, सैव तादृशी एव, इय एषा, ते तव, पूर्वेषां पूर्वपुरुषाणा, पुरो नगरी, मिथिलेति यावत्, पुरतः अग्रतः, न अस्माकं, नयनं नेत्रम, आलानयति बध्नाति, तत्र दृष्टिर्बध्नतीति भावः। शिख रिणी वृत्तम्॥ १२३॥

(ज) साचीकृताक्षी साचीकृते तिर्यक्कृते, वक्रभावेन विनिहिते इत्यर्थः "तिर्यगर्थे साचि तिरोऽपि" इत्यमरः; अक्षिणी नयने यया तादृशी।

(झ) प्रजायमानायाः प्रसूयमानायाः, जनयित्र्याः इत्यर्थः, अन्तर्भूतण्यर्थोऽयं प्रयोगः।

(ञ) अरिष्टमन्दिरं सूतिकागृहम्, "अरिष्टं सूतिकागृहम्" इत्यमरः।

सुग्रीव-विभीषणौ। (सकौतुक-स्मितम्)। यत्र भगवतः पार्वतीजीवितेश्वरस्य धनुर्धनुरन्तेवासिनावजगव-भार्गवौ भञ्जतो भवतः सहपांशुक्रीडादोषसखीयं वीरलक्ष्मीः? (ठ)।

रामः। (सलज्ज-स्मितमभितो दर्शयन् सीतां प्रति)। देवि! इयं पुनस्ततोऽपि पुरस्ताच्चम्पा नाम गौडानां विनयमधुरशृङ्गारविभ्रमरमणीया मकरकेतनकुमारव्रतचर्य्यातपोवनमिव (ठ)राजधानी। (अपवार्य च)। इह हि—

रोमाञ्चोच्छ्वसदङ्गसन्धिनिविडैरालिङ्गनैर्यामिनीं
शेषीकृत्य विजृम्भते निजरहस्यातुर्य्यमेणीदृशः।
यष्टिस्थे सपदि प्रदीपमुकुले दग्ध्वा दशां मल्लिका-
तैले प्रज्वलति स्तृणाति वसतेर्यन्नाभिदग्धं तमः॥ १२४॥

(ट) पार्वतीजीवितेश्वरस्य गौरीनाथस्य। धनुरात।—धनुष धरासनस्य, धनुरन्तेवासी च धनुर्वेदाग्रण्यस्य तौ। अजगवेति।—अजगव पिनाक', "पिनाकोऽजगवं धनुः" इत्यमरः, भार्गवः परशुरामः, तौ, भञ्जतः भग्नौ कुर्वतः, भवतः तव, सहपांशुक्रीडायां सहधूलिखेलने, परस्परं मिलित्वा बाल्यक्रीडायामित्यर्थः, दोषसखी चिरसहचरी। वीरलक्ष्मीः वीर्यशुल्का भार्या इत्यर्थः।

(ठ) गौडानां गौडदेशवासिनाम्। विनयेति।—विनयेन शिष्टाचारेण, मधुरशृङ्गारव्यञ्जकव्यवहारेणेति भावः, मधुरः मनोहरः, यः शृङ्गारोऽयं सुरताय, सुरतक्रीडार्थमित्यर्थः, विभ्रमः विलासावेशः, तेन रमणीया मनोहारिणी। मकरकेतनेति।—मकरकेतनः कामः एव, कुमारः शिशुः, अनूढ इति भावः, तस्य व्रतचर्य्यायाः नियमानुष्ठानस्य, कौमारव्रतोद्यापनस्येति भावः, तपोवनमिव तपश्चरणाश्रमस्थानमिव, विनयमधुरशृङ्गारावश्यमाश्लिलादिति भावः।

रोमाञ्चेति।—एणीदृशः मृगनयनाः स्त्रियः, रोमाञ्चेन लोमहर्षेण, उच्छ्वसता स्फूर्त्तिं गच्छता इत्यर्थः, अङ्गसन्धिना अवयवानां सयोगस्थानेन, निविडैः घनैः, सुदृढैरिति भावः, आलिङ्गनैः आश्लेषैः, यामिनीं रजनीं, शेषीकृत्य अतिवाहयित्वा, विश्रिदवाप्ता क्लृप्तेति यावत्, निजं स्वकीयं, रहस्यातुर्य्यं निगूढनिधुवनवैदग्ध्यं, विजृम्भते प्रकटयति, यत् यत्', सपदि झटिति, यष्टिस्थे प्रदीपाधारदण्डवर्त्तिनि, प्रदीपमुकुले प्रदीपकोरके, कालिकाकारदीपाग्रमुखे इत्यर्थः, दशां वार्त्तां, दग्ध्वा भस्मीकृत्य,

लक्ष्मणः । (अर्थं दर्शयन्)। एते भगवत्यौ भूमिदेवानां मूलायतनमन्तर्वेदीं पूर्वेण कृष्णागुरु-मलयजमयमङ्गरागमिवान्योऽन्यस्य (ङ) कुर्वाणे कलिन्दकन्या-मन्दाकिन्यौ (ढ) सङ्गच्छेते—

हिमालयोत्सङ्गसदाधिवासतो
जातेव पाण्डुः प्रतिभाति जाह्नवी ।
निदाघभानोः पितुरङ्कलालनात्
कृतेव कालो यमुना च दृश्यते ॥ १२५ ॥

मल्लिकातैले मल्लिकापुष्पवासितगन्धतैले इत्यर्थः, प्रज्वलति सति दीप्यमाने सति, ज्वलितुमारब्धे सतीत्यर्थः, ततः अन्धकारः, नाभिदघ्नं नाभिप्रमाणं सत्, वसतोः वेश्मनि, "वसतौ रात्रि-वेश्मनोः" इत्यमरः; क्षणोति आच्छादयति, नाभिप्रमाणोन्नताधारदण्डोपरिस्थदीपस्य दशा यावत् तैलसिक्ता आसीत्, तावत् प्रदीपाधःभागे प्रज्वलितायाश्चक्षुषा आलोकेन सर्वं गृहं समुद्भासितमासीत्, ततः सर्वा निशा व्याप्य प्रज्वलनेन तैले निःशेषिते प्रज्वलितायदग्राभागः क्रमशः मलीभूय दीपगर्भे अवतीर्य दूषयत् लज्जाख, तेन च गृहाभ्यन्तरे दृश्यायमानस्य वस्तुजातस्य किञ्चित् नाभिपर्य्यन्तः गृहौत्सेधः तमसाऽऽवृतोऽभूत, एवञ्च गृहाभ्यन्तरे उपरिभागे एव आलोकः, अधोभागे पुनरन्धकार इति तमस्तरङ्गौ व्याप्य कामिनीनां क्रीडाचातुर्य्यं प्रकटितमिति भावः । शार्दूलविक्रीडितं छन्दः ॥ १२४ ॥

(ङ) भूमिदेवानां ब्राह्मणानां, मूलायतनं मूलस्थानम्, आदिनिवासम इत्यर्थः। अन्तर्वेदीं हरिद्वारमारभ्य प्रयागपर्य्यन्तं "ब्रह्मस्थली" "ब्रह्मावर्त्त" इति च ख्यातं प्रदेशं, पूर्वेण इति योगे हितीया, अस्य च प्रदेशस्य पृथिव्या मध्यस्थितत्वादन्तर्वेदीव। अत्र तु अन्तर्वेदी-शब्देन प्रयाग एव लक्षितव्यः, गङ्गा-यमुनयोः सङ्गमस्थलेनोक्तत्वात्। कृष्णागुरु कृष्णवर्णम् अगुरु गन्धद्रव्यविशेषः, मलयजं श्वेतचन्दनं, तन्मयं तदात्मकम्, अङ्गरागम् अङ्गविलेपनं, यमुनासलिलस्य कृष्णवर्णत्वात् गाङ्गोदकस्य च शुभ्रवर्णत्वादिति भावः। अन्योऽन्यस्य परस्परस्य।

(ढ) कलिन्देति।—कलिन्दकन्या कलिन्दः सूर्य्यः, तस्य कन्या यमुनेत्यर्थः, मन्दाकिनी गङ्गा, ते।

हिमालयेति।—जाह्नवी गङ्गा, हिमालयस्य हिमाचलस्य, उत्सङ्गे क्रोडे, सदा नित्यम्, आधिवासतः अवस्थानात्, पाण्डुः शुभ्रा सती, जातेव प्रादुर्भूतेव, प्रतिभाति

(विभाव्य च)।

बलिद्विषः पादनखांशुराजिभिः
स्मरारिमौलीन्दुमरीचिवीचिभिः ।
हिमाद्रिनिःस्यन्दरसे: पदे पदे
विवर्द्धते वेबुधसैन्धवी रुचिः ॥ १२६ ॥

अपि च—

प्रयागः सर्वतीर्थेभ्यस्तीर्थमुच्चैस्तरामयम् ।
संसाराब्धेः परं पारमिहस्थैरवलोक्यते ॥ १२७ ॥

राजः । (सादरम्)। किमुच्यते—

प्रतीयते, लक्षिता भवतीत्यर्थः, यमुना कालिन्दी च, पितुः जनकस्य, निदाघभानोः ग्रीष्मरश्मेः, सूर्यस्येत्यर्थः, अङ्के क्रोडे, लालनात् प्रतिपालनात् हेतोः, पित्रा सूर्येण प्रतिपालितत्वाद्धेतोरित्यर्थः, कालो कृष्णवर्णा, लतेव जातेवेत्यर्थः, दृश्यते लक्ष्यते, अनवरतसूर्यकिरणसन्तापात् कृष्णत्वमिति भावः । वंशस्थविलं वृत्तं—"वदन्ति वंशस्थविलं ज-तौ ज-रौ" इति तल्लक्षणात् ॥ १२५ ॥

बलिद्विष इति ।—बलिद्विषः दैत्याधिपतेः बलिराजस्य बन्धनकर्तुः वामनदेवस्य, पादनखानां चरणनखराणाम्, अतीव शुभ्राणामिति भावः, अंशुराजिभिः किरणसमूहैः, गङ्गायाः विष्णुपादसमुद्भूतत्वादिति भावः, तथा स्मरारेर्हरस्य, यः मौलीन्दुः शिरोभूषणचन्द्रः, तस्य मरीचिराजिभिः नखद्युतिनिचयैः, शङ्करशिरोनिवासत्वादिति भावः, तथ हिमाद्रेः हिमगिरेः, निःस्यन्दः प्रस्रवः, सुशुभत्वप्रवाहः इति यावत्, तस्य रसैः द्रवैः, यथा—रसैः रागैः, शुभ्रप्रभाभिरिति यावत्, "शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः" इत्यमरः; पदे पदे प्रतिपदं, वेबुधसैन्धवी देवनदीसम्बन्धिनी, गङ्गायाः स्वर्णदीत्वादिति भावः, रुचिः कान्तिः, शुभ्रता इति भावः, विवर्द्धते वर्द्धिं गच्छति ॥ १२६ ॥

प्रयाग इति ।—अयं परिदृश्यमानः एषः, प्रयागः तन्नामा त्रिवेणीतीर्थः, सर्वतीर्थेभ्यः सर्वेभ्यः पुण्यक्षेत्रेभ्यः, उच्चैस्तरामतिशयेन उच्चैः, प्रधानमित्यर्थः, तीर्थं पृथिव्या पवित्रं स्थानम्, इह प्रयागे तिष्ठन्तीति तथोक्तैः जनैः, संसाराब्धेः भवसागरस्य, परम् अपरं, पारं तीरम्, अवलोक्यते दृश्यते, प्रयागक्षेत्रे कृतवसतयः जनाः विमुक्ता भवन्तीति भावः । अनुष्टुप् वृत्तम् ॥ १२७ ॥

सत्यमेव प्रयागोऽयं मोक्षद्वारमुदीर्यते।
देव्यौ यस्याभितो गङ्गा-यमुने वहतः श्रियम् ॥ १२८ ॥

(सीतां प्रति)। देवि! प्रणम्यतामितः,—(ण)

श्यामो नाम वट सोऽयमितस्याङ्गुलकर्मणः।
छायामप्यधिवास्तव्यै परं ज्योतिर्निषेव्यते ॥ १२९ ॥

(सर्वे प्रणमन्ति)।

रामः। (विमानवेगमभिनयन् सहर्षम्)—

यूपाङ्गुष्ठप्रकरदन्तुरतीरलेखा-
सङ्ग्रायमानमनुमन्ततिसप्ततन्तुः।

सत्यमिति।—अयम् एषः, प्रयागः मोक्षस्य निर्वाणस्य, मुक्तिलाभस्येत्यर्थः, द्वारम् उपायस्वरूपम्, उदीर्यते कीर्त्यते, विद्वद्भिरिति शेषः, सत्यमेव यथार्थमेव, देव्यौ गङ्गा-यमुने भागीरथी कालिन्दी च, यस्य प्रयागस्य, अभितः उपरि, श्रियं शोभा, वहतः गच्छतः, यद्वा—देव्यौ गङ्गा-यमुने अभितः साकल्येन, सर्वतोभावेन इत्यर्थः, यस्य श्रियं वहतः धारयतः, सम्पादयत इत्यर्थः, यद्वा—देव्यौ यस्य अभितः अन्तिके, समीपे इत्यर्थः, "अभितः शीघ्रभाकल्य-सम्मुखीभयतोऽन्तिके" इति मेदिनी, श्रियं वहतः प्राप्नुतः। अनुष्टुप् वृत्तम् ॥ १२८ ॥

(ण) प्रणम्यतामितश्च "श्यामो नाम वटः" इति वक्ष्यमाणश्लोकस्थवाक्येनान्वयः। इतः अस्मात् स्थानात्, अस्यां दिशि इत्यर्थो वा।

श्याम इति।—सः प्रसिद्धः, अयम् एषः, श्यामो नाम वटः "श्यामवटः" इति "अक्षयवटः" इति वा नाम्ना प्रसिद्धः वटवृक्षः, दृश्यते इति शेषः, यद्वा—सोऽयं श्यामो नाम वटः, प्रणम्यतामिति गतस्येत्यन्वयः, अङ्गुलम् आयुधं, कर्म कार्यं यस्य तथोक्तस्य, एतस्य अस्य वटस्य, छायामपि निजस्थानस्थातपप्रदेशमपि, अधिवास्तव्यैः अधिवासिभिः जनैः, परम् उत्कृष्टं, ज्योतिः तेजः, ज्योतिर्मयं परब्रह्म इत्यर्थः, निषेव्यते प्राप्यते, छायानिषेवणेन श्रेयःप्राप्तिर्भवति, अत्र तु तेजःप्राप्तिरिति विरोधालङ्कारः, अत एवास्यैकर्मत्वमस्य, ब्रह्मप्राप्तिरिति परिहार इति बोध्यम। अनुष्टुप् वृत्तम् ॥ १२९ ॥

यूपाङ्कुरैरिति।—यूपाः यज्ञीयपशुबन्धनदारुविशेषाः, ते एव अङ्कुराः प्ररोहाः, अङ्कुरवत् भूपृष्ठे उन्नततया अवस्थानादिति भावः, तेषां प्रकरैः समूहैः, दन्तुराः उन्नतदन्ता इव, याः तीरलेखाः तटश्रेणयः, रेखावत् परिदृश्यमानतटदेशा इत्यर्थो वा,

इक्ष्वाकुराजमहिषीपदपट्टलक्ष्मी-
र्दैव्या भुवो भगवती सरयूरियं नः॥ १३०॥

इयं च भगवत्ययोध्या—

गगनगतामृदुदीक्षणकुतूहलोत्तानपृथुलनिःस्यन्दैः।
उन्नालश्यलकुवलयवनमिव जनलोचनैः क्रियते॥ १३१॥

(सर्वे नमस्कुर्वन्ति)।

सुग्रीव-विभीषणौ। (निर्वर्ण्य)—

क्रतुशतदक्षिणाभुवां फलाना-
मालोक्य यूपनिकरैर्मधुरामयोध्याम्।

यद्वा—यूपाङ्कुरप्रकरदन्तुरं यत् तोरं, तव याः लेखाः श्रेण्यः, यूपश्रेण्य इत्यर्थः, ताभिः सङ्ख्यायमानाः एकविंशत्यादिगणनाविषयीक्रियमाणाः, मनुवंश्यानां मनुवंशीय-नृपतीनाम्, इक्ष्वाकुप्रभृतीनामित्यर्थः, सप्ततन्तव. यज्ञाः यस्याः यस्यां वा तथोक्ता, "यज्ञः सवोऽध्वरो याग: सप्ततन्तुर्मखः क्रतुः" इत्यमरः; भुवः पृथिव्याः दैव्याः, इक्ष्वाकुराजमहिषीपदस्य इक्ष्वाकुवंश्यनृपतीनां महिषीरूपस्य पदस्य अधिकारस्य, महिषीव्यपदेशेन परिचयदानस्येत्यर्थः. इक्ष्वाकुवंश्यनृपतीनां पृथिवीपतित्वादिति भावः, पट्टलक्ष्मीः पट्टबन्धश्रीः, यद्वा—पट्टं राजदत्तमासनपत्रावशेषं, तदात्मिका लक्ष्मीः सम्पत्, राजदत्तमासनपत्रबन्धेन प्राप्तसम्पत्स्वरूपिणीत्यर्थः, "पट्टः पेषणपाषाणे ब्रह्मादीनाञ्च बन्धने। चतुष्पथे तु राजादि-आसनान्तर-पीठयोः॥" इति मेदिनी; इयम् एषा, भगवती पूजनीया, नः अस्माकं, सरयूः तन्नाम नदी, दृश्यते इति शेषः। वसन्ततिलकं वृत्तम्॥ १३०॥

गगनेति।—गगनगतानाम् अन्तरीक्षे स्थितानां, विमानवर्तिनामिति भावः, अस्माकम् उदीक्षणं ऊर्ध्वनिरीक्षणे, यत् कुतूहलं कौतुकम्, आयत इत्यर्थः, तेन उत्तानानि उन्नमितानि, पृथुलानि विस्फारितत्वात् विशालानि, यद्वा—पृथुलानि बहुलानि, निःस्यन्दानि निश्चलानि च तैः, जनानाम् अयोध्यावासिनां लोकानां, लोचनैः नेत्रैः, उन्नालानाम् उद्गतदण्डानां, स्थलकुवलयानां स्थलोत्पलानां, वनमिव आसनमिव, क्रियते सम्पद्यते इत्यर्थः, अयोध्येति गद्यस्थं पदमत्र कर्मकारकम्॥ १३१॥

क्रतुशतेति।—क्रतुशतदक्षिणाभुवां यज्ञशतदक्षिणासम्भूतानां, "यज्ञः सवोऽध्वरो याग: सप्ततन्तु-र्मखः क्रतुः" इत्यमरः, फलानां लाभानां, द्युतीनां वा, समृद्धीनामित्यर्थः, मालाभाश्च,

राज्ञामिह प्रवसतां च विचिन्त्य सिद्धिं
देवः शचीसहचरोऽपि न रोचते नः ॥ १३२ ॥

रामः। (तौ प्रति)। वयस्यौ!—

दृष्टाः प्रागजायन्त राजानो यदिहान्वये।
तद्वशिष्ठचरोरेन्द्रा-वार्हस्पत्यस्य वैभवम् ॥ १३३ ॥

(पुरोऽवलोक्य सहर्षोल्लासम्)। कथं, स एवायं भगवान् प्रकल्पितास्माभिषेकसम्भारो भरत-शत्रुघ्नाभ्यां सह वशिष्ठो मां प्रतीक्षमाणः (त) तिष्ठति!! (पुरतः प्रति)। विमानराज! समवतीर्यतामस्यां ककुत्स्थकुलोपकारिकायाम् (थ)।

(सर्वे विमानावतारणं नाटयन्ति)।

(ततः प्रविशति पटाक्षेपेण (द) वशिष्ठो भरत-शत्रुघ्नौ च)।

"फल्गु नातीक्ष्णे मध्ये स्तूत्थे व्युष्टि-लाभयोः" इति मेदिनी; इन्द्रेरिव प्रसवसम्बन्धेरिव, यूथनिकरैः यज्ञीयपशुसम्बन्धदारुसङ्घैः, मधुरां मनोहारिणीम्, अयोध्यां तदाख्यां नगरीम्, अवलोक्य दृष्ट्वा, तथा दृष्ट अयोध्यायां, प्रवसतां कृतवसतीनां, राज्ञां नृपाणाम्, इक्ष्वाकुवंशीयानामिति शेषः, सिद्धिं साफल्यम्, ऐश्वर्यमिति यावत्, विचिन्त्य च ज्ञात्वा च, शचीसहचरः शचीपतिः, देवः इन्द्रोऽपि, नः अस्मभ्यं, न रोचते अस्माभिर्न बहु मन्यते इत्यर्थः, न तं कृतार्थं गणयति इति भावः। वसन्ततिलकं वृत्तम् ॥ १३२ ॥

दृष्टा इति।—इह अस्मिन्, अन्वये वंशे, यत् दृष्टाः एवंविधाः, महात्मान इति भावः, राजानः भूपालाः, प्राक् पूर्वम्, अजायन्त समुदपद्यन्त, तत् इन्द्रस्य देवराजस्य, बृहस्पतेश्च देवगुरोश्च तौ इन्द्रा-बृहस्पती, तौ देवते अधिष्ठातारौ यस्य तथाभूतस्य, वशिष्ठचरोः वशिष्ठस्य अस्माकं कुलपुरोहितस्य, चरोः मन्त्रसंस्कृतपायसविशेषस्य, वैभवं सामर्थ्यं, वशिष्ठस्य मन्त्रप्रभावेणैव मत्पूर्वजाः महतीं सिद्धिं प्रापुरिति भावः। अनुष्टुप् वृत्तम् ॥ १३३ ॥

(त) प्रकल्पितेति।—प्रकल्पिताः विरचिताः, सङ्कल्पिता इत्यर्थः, मम अभिषेकाय राज्याधिकारप्राप्त्यर्थं माङ्गलिकानुष्ठानविशेषाय, सम्भाराः द्रव्याणि यैस्तादृशः। प्रतीक्षमाणः प्रतिपालयन्, मदागमनमपेक्षमाण इत्यर्थः।

(थ) ककुत्स्थकुलेति।—ककुत्स्थकुलस्य ककुत्स्थवंशस्य, उपकारिका राजसदनं तस्यां, "सौधोऽस्त्री राजसदनमुपकार्योपकारिका" इत्यमरः।

(द) पटाक्षेपेण पटस्य जवनिकायाः, आक्षेपेण अपसारणेन।

वशिष्ठः।—

चक्रे लङ्केश्वरपरिभवच्छेदनिष्णातदोष्णा
यद्बलेन त्रिजगदभयं तन्न चित्रीयते नः।
बालेनाजौ विगलितवतो वीर्य्यनिर्य्यासराशे-
र्यत् पिण्याकः स मुनिरमुना निर्मितो जामदग्न्यः॥ १२४॥

(राममवलोक्य सहर्षम्)।

भल्लावलूनदशकन्धरकण्ठपीठ-
सीमासमाप्तभुजविक्रमकर्मकाण्डः।
दिष्ट्या जगद्विजयमाङ्गलिकैर्यशोभिः
सोऽयं पुनर्नयनवर्त्मनि रामचन्द्रः॥ १२५॥

चक्रे इति।—लङ्केश्वरस्य रावणस्य, परिभवः पराजयः, छेदः छेदनं, न केवलं परिभवः विनाशयेति भावः ताभ्यां, यद्वा—लङ्केश्वरस्य परिभवेण अनादरेण, अवज्ञेलया इत्यर्थः, "अनादरः परिभवः परीभावस्तिरस्क्रिया" इत्यमरः; यः छेदः विनाशः, तेन निष्णातः निपुणः, अस्त्रविद्याया कुशलित्वेन विज्ञात इत्यर्थः, "प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः" इत्यमरः; दोर्बाहुर्यस्य तथाभूतेन, "भुजबाहू प्रवेष्टो दोः" इत्यमरः; बलेन पुरुषाणीयेन, रामेण राघवेण, त्रिजगत त्रिभुवन, यत् अभयं भयशून्यम्, "अगदम्" इति पाठे—अगदं रोगशून्यं, चक्रे कृतं, तत् नः अस्मान्, न चित्रीयते न चमत्कारीति, बालेन शिशुना, अमुना रामेण, आजौ युद्धे, सः एकविंशतिकृत्वः अधिकान्कारी, मुनिः जामदग्न्यः परशुरामः, विगलितवतः चरितवतः, वीर्य्यनिर्य्यासराशेः वीर्य्यसारसमूहस्य, यत् पिण्याकः कल्कः, निर्मितः कृतः, निर्वीर्य्यः कृत इति भावः, तत् परं चित्रीयते इत्यन्वयः। मन्दाक्रान्ता वृत्तम्॥ १२४॥

भल्लेति।—भल्लेन अस्त्रविशेषेण, अवलूनं छिन्नं, यत् दशकन्धरस्य रावणस्य, कण्ठपीठ गलदेशरूपनाम्न, पीठवत् कठिनविस्तृतगलदेश इत्यर्थः, तस्य सीमा अवसानं, तया समाप्तः शेषता गतः, भुजयोः बाह्वोः, विक्रमस्य सामर्थ्यस्य, बलस्येत्यर्थः, कर्मकाण्डः क्रियासमूहः यस्य तथाभूतः, जगतां भुवनानां, विजयेन पराभवेण, त्रिजगद्विजयिरावणविनाशेनैव रामचन्द्रस्य जगद्विजयित्वं सिद्धयेत्, अत एव माङ्गलिकैः मङ्गलमयैः, यशोभिः कीर्त्तिभिः उपलक्षित इति विशेषणे तृतीया, रावणकृतपीडानिवारणात् यशसः माङ्गलिकत्वमवगन्तव्यं, स नरवीरः, अयम् एषः,

रामः। (सस्मयमुपसृत्य वशिष्ठपादावुपस्पृश्य च)।

रघुब्रह्मक्रियाऽऽचार्यं पुराणब्रह्मवादिनम्।
ब्रह्मर्षिं ब्रह्मजन्मानमेष रामोऽभिवादये ॥ १२६ ॥

वशिष्ठ.। (सादरमालिङ्ग्य)। वत्स रामभद्र! का तुभ्यमाशीः? (ध)—

आदाय प्रतिपक्षकीर्त्तिनिवहान् ब्रह्माण्डमूषान्तरे
निर्विघ्नं धमता नितान्तमुदितैः स्वैरेव तेजोऽग्निभिः।
तत्तादृक्पुटपाकशोधितमिव प्राप्तं गुणोत्कर्षिणा
पिण्डस्थं च महत्तरं च भवता निःसारतारं यशः ॥ १२७ ॥

रामचन्द्रः दिष्ट्या भाग्येन, पुनः भूयः, नयनयोः चक्षुषोः, वर्त्मनि पथि, वर्त्तते इति शेषः। वसन्ततिलकं वृत्तम् ॥ १२५ ॥

रघ्विति।—रघूणां रघुवंशप्रसूतानां ब्रह्मक्रिया वैदिककर्मानुष्ठानं, तथा आचार्यः गुरुः तं, पुराणब्रह्मवादिनं प्राचीनं वेदविदं, ब्रह्मज्ञानसम्पन्नं वा, ब्रह्मजन्मानं ब्रह्मणः पुत्रं, ब्रह्मर्षिं ब्रह्मसदृशम ऋषिं, वेदमन्त्रारम् ऋषिं वा, वशिष्ठमित्यर्थः, एष अहं, रामः अभिवादये प्रणमामि। अनुष्टुप् वृत्तम ॥ १२६ ॥

(ध) आशीः आशीर्वादः, प्रयुज्यते मयेति शेषः।

आदायेति।—ब्रह्माण्डमेव भुवनकोष एव, मूषा आवर्त्तनघटिका, सुवर्णादिधातुद्रावणपात्रविशेष इत्यर्थः, "तैजसावर्त्तनी मूषा" इत्यमरः, तस्या अन्तरे मध्ये, प्रतिपक्षाणां शत्रूणां, कीर्त्तिनिवहान् यशोराशीन्, आदाय गृहीत्वा, संगृह्य इत्यर्थः, नितान्तम् अत्यर्थम, उदितैः उद्भटैः, प्रबुद्धैरित्यर्थः, स्वैरेव निजैरेव, तेजोऽग्निभिः प्रतापानलैः, निर्विघ्नम अन्तरायविहीनं यथा तथा, धमता पूरयता, उद्दीपयता वा, गुणोत्कर्षिणा गुणोत्कर्षशालिना, उत्तमगुणवता इत्यर्थः, भवता तत् प्रसिद्धं, तादृक् तथाविधं, पुटपाकः पुटे मृत्तिकादिनिर्मित-सावरणपात्रविशेषे, पाकः पचनं, तेन शोधितमिव द्रवीकृत्य उज्ज्वलीकृतमिव, पिण्डस्थम् एकीभूतञ्च, महत्तरञ्च अतिमहच्च, निःसार-तारं निःसारं निर्दोषं, तारम् उद्भटञ्च, यशः कीर्त्तिः, प्राप्तं लब्धम, अतः का तुभ्यम आशीः? इति गद्योक्तेनान्वयः, का नाम आशीः तुभ्यं प्रदीयते, आशिषां सर्वस्वमेव फलञ्च भवता प्राप्तत्वादिति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ १२७ ॥

अपि च—

त्रिजगदङ्गनलङ्घनजाङ्घिकै-
स्तव यशोभिरतीव पवित्रिताः।
प्रथमपार्थिवपुङ्गवकीर्त्तयो
विबुधसिन्धुजलैरिव सिन्धवः॥ ११८॥

तथाऽपीदमस्तु—

जगदालोकधौरेयौ सूर्य्या-चन्द्रमसाविव।
पुत्रौ गोत्रस्य गोप्तारौ जनय स्वभुजाविव॥ ११९॥

(कौतो मुनिं वन्दते)।

वसिष्ठः। वत्से! जनकवंशसुवासिनि! (न) युवयोः सायं दर्शनेव रामस्य वयमाशिषमवोचाम।

त्रिजगदिति।—त्रिजगत् त्रिभुवनमेव, अङ्गनम् अजिरं, तस्य लङ्घने अतिक्रमणे, जाङ्घिके, लङ्घाकरिके:, प्रथमत्वभावे इकारः, द्रुतगामिभिरिति यावत्, "लङ्घाकरिक-जाङ्घिकौ" इत्यमरः; तव भवतः, यशोभिः कीर्त्तिभिः, विबुधानां देवानां, सिन्धुः सरित्, तदीयैः, तन्नाकनीति यावत्, तस्या जलैः सलिलैः, सिन्धवः अम्बुद इव, समुद्रा इव इत्यर्थः, "देवे तदधिपेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः; प्रथमपार्थिवानां आदिनृपतीनां, पुङ्गवाः श्रेष्ठाः, यद्वा—प्रथमे आदौ, पूर्वजा इत्यर्थः, ये पार्थिवपुङ्गवाः नृपतिश्रेष्ठाः, सगरादयः इत्यर्थः, तेषां कीर्त्तयः यशांसि, अतीव अतिमात्रं, पवित्रिताः पवित्राः कृताः, उज्ज्वलीकृता इत्यर्थः। द्रुतविलम्बितं वृत्तं—"द्रुतविलम्बितमाह न-भौ भरौ" इति तल्लक्षणात्॥ ११८॥

जगदिति।—जगतां भुवनानाम्, आलोके प्रकाशने, धौरेयौ धुरन्धरौ, समर्थौ इत्यर्थः, "धूर्वहे धुर्य्य-धौरेय-धुरीणाः सधुरन्धराः" इत्यमरः; सूर्य्या-चन्द्रमसाविव दिनकर-निशाकराविव, तथा स्वभुजाविव निजबाहुद्वयमिव, स्वसदृशबाहुवीर्य्यशालिनौ इति भावः, गोत्रस्य कुलस्य, गोप्तारौ रक्षितारौ, पुत्रौ तनयद्वयं, जनय उत्पादय। अनुष्टुप् वृत्तम्॥ ११९॥

(न) जनकेति।—जनकवंशे सीरध्वजजनकान्वये, सुवासिनी सुष्ठु वासकारिणी, तत्सम्बुद्धौ, यद्वा—जनकवंशस्य सुवासिनि! सुवासजननि! यशःसौरभप्रदायिनि! इत्यर्थः। युवयोः भवतोः, तव रामस्य चेत्यर्थः, सायंदर्शनेव अमावास्येव, रामस्य

सीता। (सहर्षमात्मगतम्)। अम्मो! णिस्सावत्तअं (प) मे अज्जउत्तस्स घरणित्तणं हुविस्सदि। *

लक्ष्मणः। सगरगोत्रगुरो! मैत्रावरुणे! सौमित्रिरभिवादयते।

वसिष्ठः। वत्स लक्ष्मण! आशिषां विषयमतिक्रम्य वर्त्तसे—

वीरमिन्द्रजितं जित्वा दिष्ट्या वर्द्धयतो जगत्।
अभये दक्षिणीयस्ते गीर्वाणग्रामणीरपि॥ १४०॥
तथाऽपि यूयं सर्वेऽपि द्वौ द्वौ जनयतात्मजौ।
यैरादिराजवंशोऽयमष्टशाखः प्ररोहति॥ १४१॥

रामः। (सहर्षं कृताञ्जलिः)। भगवन्! परमनुगृहीतमिक्ष्वाकुकुलम्।

भरतः। (रामं प्रति)। आर्य्य! शून्यभवनप्रकोष्ठकरक्षापदातिः (फ) भरतः प्रणमति।

* अम्मो! निःसापत्ना मे आर्यपुत्रस्य गृहिणीत्वं भविष्यति।

आशिषं युवयोः साधारणीमेव वयम् अवोचाम इत्यन्वयः, वयं रामाय यामाशिषं कृतवन्तः, सा न केवलं रामस्य, परन्तु तवापि सम्बन्धे इत्यर्थः।

(प) निःसापत्ना निःशत्रुकं, सपत्नीदोषशून्यमित्यर्थः।

वीरमिति।—वीरं वीर्यवन्तम्, इन्द्रजितं मेघनादं, जित्वा पराभूय, विनाश्य इत्यर्थः, दिष्ट्या भाग्येन, जगत् भुवनं, वर्द्धयतः आप्याययमानस्य, जगतः अभ्युदयं सम्पादयत इत्यर्थः, जगत् निर्विघ्नं कुर्वत इति यावत्, ते तव, गीर्वाणानां देवानां, ग्रामणीः श्रेष्ठः, अधीश्वरः इत्यर्थः, इन्द्र इति यावत्, "ग्रामणीर्नायिते पुंसि श्रेष्ठे ग्रामाधिपे विधु" इत्यमरः; अभये भयराहित्ये, दक्षिणीयः सदाराससम्भ्रः, दत्ताभयदक्षिण इति यावत्, तव अभयविधाने देवराजोऽपि सदा जागरूक इति भावः। अनुष्टुप् छन्दम्॥ १४०॥

तथाऽपीति।—तथाऽपि भवतः आशीर्विषयातिक्रमणेऽपीत्यर्थः, यूयं भवन्तः, सर्वेऽपि भ्रातृचतुष्टयेऽपीत्यर्थः, द्वौ द्वौ आत्मजौ पुत्रौ, जनयत उत्पादयत, यैः आत्मजैः, अयम् एषः, आदिराजस्य प्रथमनृपस्य, मनोरित्यर्थः, वंशः कुलम्, अष्टौ अष्टसङ्ख्याकाः, शाखा विभागाः यस्य तथाभूतः, अष्टधा विभक्तः सन्नित्यर्थः, प्ररोहति प्रवर्द्धते। अनुष्टुप् छन्दम्॥ १४१॥

(फ) शून्येति।—शून्यं रिक्तं, भवता विरहितमिति भावः, यत् भवनं गृहं, तस्य

रामः। (सहर्षमाविश्य)। वत्स भरत!—

आत्मानमिन्दुकरमेदुरचन्द्रकान्त-
स्तम्भोज्ज्वलं वितर मे हृदि निर्वृणोमि।
न भ्रातृसङ्गमसुखासिकया जहाति
विष्णोः सकौस्तुभमुरश्चपलाऽपि लक्ष्मीः॥ १४२॥

भरतः। (सीता प्रति)। देवि! प्रणमामि।

सीता। वच्छ भरद! उण्हकरकिरणणिउरंबचुंबिअ-
कमलखंडं विअ चिरं मे णअणं आणंदेहि * (ब)।

* वत्स भरत! उष्णकरकिरणनिकुरम्बचुम्बितकमलखण्डमिव चिरं मे नयनं-
मानन्दय।

प्रकोष्ठः बाह्यप्रदेशः, द्वारसन्निहितोपवेशनस्थानमिति यावत्, यद्वा—प्रकोष्ठः राज्ञ
ऋक्षविशेषः, यस्मिन् वृक्षे सिंहासन मणिरत्नादिकं वा विद्यते स इति यावत्, "प्रकोष्ठो
मणिबन्धस्य कूर्परस्यान्तरेऽपि च। भूषकवृक्षान्तरेऽपि स्यात्" इति मेदिनी; तस्य एषा
केवला, रचा रचणं, तस्याः तदर्थं वा पदाति: सैन्यविशेषः, रचिसैन्यविशेष इत्यर्थः।

आत्मानमिति।—इन्दोश्चन्द्रस्य, करैश्च किरणैश्च, मेदुरः सान्द्रस्निग्धः, अत्यर्थं
स्निग्ध इत्यर्थः, "सान्द्रस्निग्धस्तु मेदुरः" इत्यमरः, यश्चन्द्रकान्तस्तम्भः चन्द्रकान्तमणि-
निर्मितस्तूणा, तद्वत् उज्ज्वलं निर्मलं, कालुष्यश्लेशशून्यमिति यावत्, आत्मानं
शरीरं, स्वदेहमित्यर्थः, "आत्मा पुंसि स्वभावे च···शरीरब्रह्मणोरपि" इति मेदिनी;
मे मम, हृदि वक्षसि, वितर अर्पय, निर्वृणोमि निर्वृतिं प्राप्नोमि, सुखीभवामीत्यर्थः,
"निर्वृतिः स्वस्थितावस्तं गमने च सुखे स्त्रियाम्" इति मेदिनी; तथाहि, लक्ष्मीः
कमला, चपलाऽपि चञ्चलाऽपि, अस्थिरप्रकृतिरपीति भावः, भ्रातृसङ्गमसुखासिकया
भ्राता सोदरेण, कौस्तुभेनेति भावः, सङ्गमः मेलनं भ्रातृसङ्गमः, तेन या सुखासिका
सुखावस्थानं, सुखानुभव इति यावत् तया हेतुना, विष्णोर्नारायणस्य, सकौस्तुभं
कौस्तुभाख्यरत्नभूषितमित्यर्थः, उरः वक्षःस्थलं, न जहाति न त्यजति, कौस्तुभस्य
लक्ष्म्या भ्रातृत्वमेकसमुद्रसमुद्भूतत्वादिति भावः। भ्रातृसङ्गमादधिकं सुखकरं किमपि
नास्तीति तात्पर्यम्। वैधर्म्येण दृष्टान्तालङ्कारः; तदुक्तं दर्पणे—"दृष्टान्तस्तु सधर्मस्य
वस्तुनः प्रतिबिम्बनम्" इति। वसन्ततिलकं वृत्तम्॥ १४२॥

(ब) उण्हकरेति।—उष्णकरस्य सूर्यस्य, किरणनिकुरम्बेन मयूखनिचयेन,

(लक्ष्मणो भरतं वन्दते)।

भरतः।—

वत्स लक्ष्मण! मोत्कण्ठं चिरात् परिरभस्व माम्।
अङ्गालुभ्रांतुरङ्गानि चन्दनेष्वप्यरोचकी॥ १४३॥

(निर्भरं (म) परिरभ्य)। हन्त! रघुवंशयशस्तडागयूपदण्डेन (म) लक्ष्मणबाहुना(ऽ)परिश्लिष्यमाण (य) चिरेण शीतलीकृतोऽस्मि।—

इन्दोः कलाकलापेन षड्भिरिक्ष्वाकुवंशिना।
सर्वदुःखापनोदाय मोदयांणां भुजाः कृताः॥ १४४॥

पुष्पितं सृष्टं, कमलवनमिव पद्मसमूहमिव, यथा सूर्योदयेन कमलवनानन्दनमुद्भवति, तथा मम नेत्रे त्वद्दर्शनेनेति भावः।

वत्सेति।—हे वत्स लक्ष्मण! मोत्कण्ठम् उत्कलिकाकुलं, त्वदालिङ्गनोत्सुकमिति भावः, मां चिरात् बहुकालात् परं, दीर्घकालं व्याप्य वा, यद्वा—चिरात् दीर्घकालं यावत्, मोत्कण्ठं मालिंगत्यर्थः, परिरभस्व आलिङ्ग, स्वातु, मोदस्य, अङ्गानि गात्राणि, "अङ्गानि" इत्यत्र "अङ्गेषु" इति पाठः सुगमार्थत्वः, अङ्गालु अङ्गायुक्तः, अङ्गवानः दुःखार्थः, अनुरागेण दधान इति यावत्, अत्र इति शेषः, चन्दनेषु अपि मलयजेष्वपि, अतीव सुख-शीतलस्पर्शेष्वपीति भावः, अरोचकी अनभिलाषी, अभवदिति शेषः, भ्रान्तुरङ्ग-अर्थत्वे चन्दनरसस्पर्शादपि सुखकरत्वादिति भावः। अनुष्टुप् छन्दः॥ १४३॥

(म) निर्भरं प्रगाढम्।

(म) हन्त हर्षे। रघुवंशेति।—रघुवंशस्य रघुकुलस्य, यश एव कीर्तिरेव, तडागः सरोवरं, तस्य यूपदण्डः यज्ञसमाप्तिसूचकस्तम्भविशेषः, तडागप्रतिष्ठासूचकदारु-स्तम्भविशेष इत्यर्थः "रैकाठ" इति प्रसिद्धः तेन।

(य) परिश्लिष्यमाणः आलिंग्यमानः, आलिङ्गनाय इति यावत्। "लक्ष्मणबाहुना परिश्लिष्यमाणः" इत्यत्र "लक्ष्मणबाहुनाऽपरिश्लिष्यमाणः" इति सूत्र-अकारपरिलोपेन सन्धिः; परिश्लिष्यमाणः इत्यस्य वेष्टनार्थकत्वस्य अप्रसिद्धत्वात् कृत्वाप्रत्ययेन च; अपरिश्लिष्यमाणः अत्यज्यमानः, आकृष्यमाणः इति यावत्, आलिङ्गनाय इति भावः।

इन्दोरिति।—षड्भिरंशैः श्रेणीकृतैः निखिलं व्याप्नोतीति तथोक्तेन, इन्दोश्चन्द्रस्य, कलाकलापेन कलासमूहेन, षोडशभिरेव कलाभिरित्यर्थः, सर्वेषां निखिलानां, दुःखानां क्लेशानाम्, अपनोदाय निराकरणाय, मोदयांणां आनन्दानां,

शत्रुघ्नः। (रामं प्रति)। आर्य्य! पादुकाभृत्यानुभृत्यः (र) शत्रुघ्नः प्रणमति।

रामः। (गाढमालिङ्ग्य)। कथम्, आहत्या लक्ष्मणमनुभवामि!! (ल)। (अपवार्य्य सीतायै दर्शयन्)—

एतत्तदेव मुखमब्जतचन्द्रबिम्ब-
संवावटूकमवलोकय लक्ष्मणस्य।
गीर्वाणवारणकरार्गलकर्कशौ मां
तावेव लक्ष्मणभुजौ न परिष्वजाते?॥ १४५॥

(शत्रुघ्नः सीतां प्रणमति)।

सीता। तेल्लोक्कसल्लुद्धरणगोरविदेहिं चरिदेहिं लक्खणसरिसो होहि। वच्छ सत्तुहण! अज्जाजणो कहिं? * (व)

---

* त्रैलोक्यशल्योद्धरणगौरवितैश्चरितैर्लक्ष्मणसदृशो भव। वत्स शत्रुघ्न! आर्य्याजनः क्व?

भुजाः बाहवः, कृताः निर्मिताः, विधात्रेति शेषः। अत्र विवाहजातानामपि स्त्रीरत्नेनाभिधानं निरतिशयसौभाग्यद्योतनायेति बोध्यम्। अनुष्टुप् वृत्तम्॥ १४४॥

(र) पादुकेति।—पादुकाभृत्यः उपानद्वाहकः सेवकः, भरत इति यावत्, तस्य अनुभृत्यः कनिष्ठसेवकः इत्यर्थः; यद्वा—पादुकाभृत्यादपि अनुभृत्यः हीनः दासः, अतीव क्षुद्रसेवक इत्यर्थः, "अनु हीने सदार्थे च" इति मेदिनी।

(ल) आहत्या आवर्त्तनेन, पुनरपीति यावत्। शत्रुघ्नस्य लक्ष्मणानुजत्वेन लक्ष्मणालिङ्गनमिव शत्रुघ्नालिङ्गनमिति भावः।

एतदिति।—एतत् पुरतः परिदृश्यमानं, तदेव बहुशो दृष्टमेव, अद्यतं परिपूर्णं, यत् चन्द्रबिम्बं चन्द्रमण्डलं, तस्य संवावटूकम् अनुरूपं, लक्ष्मणस्य मुखम् आननम्, अवलोकय पश्य, यादृशौ लक्ष्मणादृश एव शत्रुघ्न इति भावः, गीर्वाणवारणस्य ऐरावतस्य इत्यर्थः, करः शुण्ड एव, अर्गलं विघ्नस्य; कवाटप्रसरप्रतिबन्धार्थे लौहमयः काष्ठमयो वा दण्डविशेषः इत्यर्थः, तद्वत् कर्कशौ कठिनौ, तावेव लक्ष्मणस्य भुजौ बाहू, मां परिष्वजाते नु? आलिङ्गतः किम्? वसन्ततिलकं वृत्तम्॥ १४५॥

(व) त्रैलोक्येति।—त्रैलोक्यस्य त्रिभुवनस्य, यत् शल्योद्धरणं पीड़ादायकास्त्र-

शत्रुघ्नः। कृतमङ्गलोपचारो मध्यमाम्बाभवने (ग) भवतौ प्रतीक्षते। (उपसृत्य जामातरं प्रणमति)।

जामाता। (सहर्षमालिङ्ग्य)। वत्स! दिष्ट्या दीर्घायुषि त्वयि दीप्यमाने न वयमेकाकिनम् (घ) आर्यभरतं परित्यज्य गताः।

रामः। (मुनिं प्रति)। भगवन्! एतौ लङ्का-किष्किन्धयोरधिपती विभीषण-सुग्रीवौ भगवन्तं प्रणमतः।

वसिष्ठः। विकर्त्तन-पुलस्त्यकुलकीर्त्तितोरणमालाऽवलम्बन-स्तम्भाविमौ चिरञ्च भूयास्ताम्। (ङ)

रामः। (भरतं प्रति)। वत्स! वन्दस्व महात्मानावेतौ पौलस्त्य-सावित्रौ (च)।

(भरत-शत्रुघ्न-विभीषण-सुग्रीवा मिथो यथोचितमाचरन्ति)।

वसिष्ठः। (सहर्षम्)। दिष्ट्या चतुर्दशभिः परिवत्सरैः पुनः समुदयमानं दशरथकुटुम्बमीक्षामहे (छ)। (सविमर्शं-जिनम्)(ख)—

विशेषोत्पाटनम्, इन्द्रजिदादिप्रमुखसंहरणमिति यावत्, तेन मोदिते: सर्वलोकाहृतैः। आर्य्या-श्वश्रूः श्वश्रूः।

(ग) कृतेति।—कृतः अनुष्ठितः, मङ्गलोपचारः माङ्गलिकव्यवहारः, मङ्गलार्थं देवाराधना वा येन तथाभूतः। मध्यमा अम्बा माता, कैकयी इत्यर्थः, तस्या भवनं गृहं तस्मिन्।

(घ) दीप्यमाने विभाति, स्वयोर्ध्येव उद्भासमाने इत्यर्थः, विद्यमाने इति भावः। एकाकिनम् असहायम्।

(ङ) विकर्त्तनेति।—विकर्त्तनः सूर्यः, पुलस्त्यः देवर्षिविशेषः, तयोः कुलयोः वंश्योः, कीर्त्तिरेव यत्र एव, तोरणमाला बहिर्द्वारस्थक्, तस्या अवलम्बनाय धारणाय, स्तम्भौ तत्खट्वावित्यर्थः, विकर्त्तनकुलतोरणस्तम्भः सुग्रीवः, पुलस्त्यकुलतोरणस्तम्भो विभीषण इति भावः। चिरञ्च भूयास्ता चिरं जीव्यास्ता, चिरजीविनौ भूयास्तामित्यर्थः।

(च) पौलस्त्य-सावित्रौ पौलस्त्यः पुलस्त्यपौत्रः विभीषणः, सवितुः सूर्यस्य अपत्यं पुमान् सावित्रः सुग्रीवः तौ।

(छ) समुदयमानं सम्यक् वर्द्धमानम्। दशरथकुटुम्बं दशरथस्य पोष्यवर्गं, परिजनवर्गमित्यर्थः। ईक्षामहे पश्यामः।

जेतारं दशकन्धरस्य जितवानेवार्जुनं भार्गव-
स्तं रामो यदि काकपक्षकधरस्तत् पूरितेयं कथा।
ऊर्ध्वं कल्पयतस्तु बालचरितात्तत्प्रक्रियागौरवा-
दन्येयं कविता तथाऽपि जगतस्तोषाय वर्त्तिष्यते ॥ १४६ ॥

(रामं प्रति)। वत्स! माङ्गलिकलग्नमतिक्रामति (ग)।—

तदिदं रघुसिंहानां सिंहासनमलङ्कुरु।
राजन्वन्तः प्रतन्वन्तु मुदमुत्तरकोशलाः ॥ १४७ ॥

(रामस्तथा करोति। वसिष्ठ ऐन्द्रेय (घ) महाभिषेकेण सत्कर्म पूर्वकमभिषिञ्चति।

(ख) सविस्मयं-स्मितं किञ्चित् विनर्क-हास्याभ्यां सहितम्।

जेतारमिति।—भार्गवः परशुरामः, दशकन्धरस्य रावणस्य, जेतारं पराजयितारम्, अर्जुनं कार्त्तवीर्य्यार्जुनं, जितवानेव पराभूतवानेव, काकपक्षकधरः शिखण्डकधारी, बालोचितशिखाविशेषधारीत्यर्थः, शिखरिति भावः, "काकपक्षः शिखण्डकः" इत्यमरः; रामः यदि तं दशकन्धरविजयिनं कार्त्तवीर्य्यविजयिनं भार्गवमित्यर्थः, जितवानिति पूर्वेणान्वयः, तत् तदा, इयम् एषा, कथा आख्यानं, विजयवार्त्ता इति यावत्, पूरिता समाप्तिं गता, परशुरामजयेनैव रावणादीनां सर्वेषां जयस्य सिद्धत्वादिति भावः, तथाऽपि कथायाः पूरितत्वेऽपि, बालचरितात् शैशवशिखाचरणात्, तस्य रावणवधादेः, प्रक्रियायाः प्रकरणस्य, गौरवात् गुरुत्वात्, ऊर्द्धम् अग्रे, आगामिनि काले इत्यर्थः, कल्पयतः रचयतः, रावणवधादिकमिति भावः, कवेरिति शेषः, अन्या अपरा, इयम् एषा, कविता छन्दोनिबद्धा कविभारती, जगतः भुवनस्य, लोकानामिति भावः, तोषाय सन्तुष्ट्यै, वर्त्तिष्यते भविष्यति। मार्दूल-विक्रीडितं वृत्तम् ॥ १४६ ॥

(ग) माङ्गलिकलग्नं शुभसमयम्, अभिषेकस्येति शेषः। अतिक्रामति अतिगच्छति।

तदिति।—तत् तस्मात्, रघुसिंहानां रघुश्रेष्ठानाम्, इदं सम्मुखे स्थापितं, सिंहासनं मणिकाञ्चनमयं राजासनम्, अलङ्कुरु भूषय, अधिष्ठानेनेति भावः, उत्तरकोशलाः कोशलाख्यजनपदस्य उत्तरविभागाः, राजन्वन्तः सुराजपालिताः, प्रशस्तराजयुक्ता वा सन्तः इत्यर्थः, "सुराज्ञि देशे राजन्वान्" इत्यमरः; मुदम् आनन्दं, प्रतन्वन्तु विस्तारयन्तु, महोत्सवादिकं कुर्वन्त्विति यावत्। अनुष्टुप् वृत्तम् ॥ १४७ ॥

(घ) ऐन्द्रेय इन्द्रसम्बन्धिना, इन्द्रो यथाऽभिषिक्तः तथेति भावः।

अन्ये तूद्भावयमभिषेकं (ङ) नाटयित्वा पश्चात्तुष्टितभूमयः (च) प्रचलन्ति।
नेपथ्ये मङ्गलगीतिर्नान्दीवाद्यानि च)।

वसिष्ठः। (सदर्भम्)। वत्स रामभद्र! सम्प्रति—

उदयदुदयद्धर्मस्कन्धे धुरं त्वयि बिभ्रति
क्व नु परिभवो दृष्टादृष्टौ प्रजाः परिचिन्वते?।
अपि खलु यथा जीवात्मानः प्रभोः परमात्मनो
दिशि दिशि दिशामष्टौ नाथास्त्वैव विभीषिकाः॥१४८॥

(ङ) उद्भावयम् अनेकविधम्, "उद्भावयं नैकमेदम्" इत्यमरः। अभिषेकम् अभिषेकार्थमनुष्ठानमित्यर्थः।

(च) पश्चादिति।—पञ्चभिः अङ्गैः हस्तद्वय-पादद्वय-मूर्द्धभिरित्यर्थः, तुष्टिता स्पृष्टा, भूमिः यस्तिका यैः तथाभूताः।

उदयदिति।—उदयन् उदयन् अतिशयेन वृद्धिं गच्छन्निित्यर्थः, धर्म एव स्कन्धः कायः यस्य, यद्वा—धर्मकायः धर्मसमूहः, धर्म्यः क्रिया इत्यर्थः यस्मात् तस्मिन्, "स्कन्धः प्रकाण्डे कायेऽसे विज्ञानादिषु पञ्चसु। नृपे समूहे व्यूहे च" इति हैमः; त्वयि भवति, धुरं राज्यभारं, बिभ्रति वहति सति, प्रजाः जनाः, "प्रजा स्यात् सन्ततौ जने" इत्यमरः; दृष्टादृष्टौ दृष्टः स्व-परचक्रजः, स्वचक्रजातः अनुपक्रजातश्च इति यावत्, अदृष्टः वह्नि-मोयादिरूपः, अनलाजाहुत्यादिसमुद्भव इति यावत् तादृशी, "अदृष्टो वह्नि-मोयादि दृष्ट स्व-परचक्रजम्" इत्यमरः; परिभवो तिरस्कारी, दुःखे इति यावत्, क्व नु कुत्र खलु, परिचिन्वते? जानन्ति? नैव कुत्रापि जानन्तीत्यर्थः, तथाहि, प्रभोः नियन्तानुग्रहसमर्थस्य, परमात्मनः ईश्वरस्य, जीवात्मानः जीवलक्षणक्षेत्रज्ञाः, यथा, तथा दिशि दिशि प्रतिदिशं, दिशाम् अष्टानां काष्ठानाम्, अष्टौ नाथाः अपि अधिपतयोऽपि, इन्द्रादयो दिक्पाला अपि इत्यर्थः, प्रभोः तवैव भवत एव, विभीषिकाः खलु लोकानां भयप्रदर्शनानि एव, परमात्मा यथा लोकानां पुण्य-पापादिकं द्रष्टुं पापेभ्यो भयं प्रदर्शयितुञ्च जीवात्मनो देहे नियोजितवान्, अत एव ते लोकानां विभीषिकाः, एवं भवानपि इन्द्रादीन् अष्टौ लोकपालान् लोकानां पुण्यपापादिकं द्रष्टुं पातकिनः शासितुञ्च अष्टसु दिक्षु संस्थापितवान् इति भावः, यद्वा—विभीषिकाः खलु प्रपञ्चा एव, यथा परमात्मनः प्रपञ्चा जीवाः, तथा इन्द्रादयो दिगीश्वरास्तवैवांशकपास्त्वत्कार्य्यमेव जगद्रक्षणं कुर्वन्तीति भावः, अतः तव राज्ये न दृष्टादृष्टभयावकाश इति पर्य्यवसितम्। हरिणी वृत्तम्॥१४८॥

(रामो लज्जते)।

विमानचयः। (कृताञ्जलिर्मुखं प्रविपद्य)। देव !—

लङ्का च पुष्पकमिदं च विमानमार्य्यात्
यत्त्वेश्वरादपहृतं दशकन्धरेण।
एकां भवानदित मङ्क्षमथेदमन्य-
दाज्ञापय द्रुतमुपैतु पतिं निधीनाम् ॥ १४९ ॥

रामः। (वसिष्ठेनानुज्ञातः पुष्पकं प्रति)। विमानेराज ! प्रथमस्वामिनं प्रथमपौलस्त्यम् उपतिष्ठस्व। (ङ)

वसिष्ठः। (सहर्षं प्रसादम्)। रामभद्र ! किं ते भूयः प्रियं करोमि ?

रामः। भगवन् ! किमतः परमपि प्रियमस्ति ? भगवत्प्रसादात्—

तातास्यामधिमौलि मौक्तिकमणिं कृत्वा मषीपोत्रिणी
दंष्ट्राविन्यविलोपपत्रशबरी दृष्टा भृशं मेदिनी।

लङ्केति।—दशकन्धरेण रावणेन, आर्य्यात् पूज्यात्, ज्येष्ठभ्रातुरिति यावत्, वैश्रवणात् कुबेरात्, लङ्का च दृढं परिदृश्यमानम्, पुष्पकं पुष्पकाख्यं विमानञ्च श्रीमद्यानञ्च, अपहृतम् बलात् गृहीतमित्यर्थः। पूर्वं धनपतिः लङ्कायामधिराज्यमकरोत्, ततश्च रावणेन तं ज्येष्ठभ्रातरं पराजित्य दूरीकृत्य च स्वयं लङ्का तदीयं पुष्पकञ्चाधिश्रितमिति पुराघवार्त्ता। भवान् एकां लङ्कामिति यावत्, मङ्क्षम् अदित दत्तवान्, यच्च इदम् एतत्, अन्यत् अपरं, पुष्पकमित्यर्थः, द्रुतं क्षिप्रं, निधीनां पतिं धनेश्वरम्, उपैतु प्राप्नोतु, आज्ञापय आदिश। वसन्ततिलकं वृत्तम् ॥ १४९ ॥

(ङ) प्रथमस्वामिनं पूर्वाधिकारिणम्। प्रथमपौलस्त्यं ज्येष्ठं पुलस्त्यनन्दनं, पुलस्त्यस्य ज्येष्ठपौत्रं कुबेरमित्यर्थः। उपतिष्ठस्व सेवस्व, वहनादिकर्मणा आराधयेत्यर्थः।

तातास्यामिति।—तातस्य पितुः, आस्यम् आदेशम्, अधिमौलि मौलौ, शिरस्तीत्यर्थः, विभक्त्यर्थेऽव्ययीभावः, मौक्तिकमणिं मौक्तिकस्य मुक्ताहारस्येति यावत्, मणिं रत्नं, मुक्ताहारघटितमणिवदिति यावत्, कृत्वा विधाय, धृत्वा इत्यर्थः, मुक्तामालालिप्त मषीलेखेति यावत्, मषीपोत्रिणी मषीवराङ्गी, "वराङ्गः शूकरो घृष्टिः क्रोडः पोत्री